श्रीमत्सिद्धर्षिगणिविरचिता

श्रीउपमितिभवप्रपञ्चा कथा ।

(चतुर्थादिप्रस्तावद्वयात्मको द्वितीयो भागः)

२

❖ सम्पादयिता ❖

आचार्यविजयचन्द्रगुप्तसूरिः ।

6.1

श्रीमत्सिद्धर्षिगणिविरचिता

श्रीउपमितिभवप्रपञ्चा कथा ।

(चतुर्थादिप्रस्तावद्वयात्मको द्वितीयो भागः)

२

सम्पादयिता

पू. परमशासनप्रभावक आ.भ.श्री.वि. रामचन्द्रसू.म.सा. प्रशिष्य
पू.आ.भ.श्री.वि. अमरगुप्तसू.म.सा. शिष्य
पू.आ.भ.श्री.वि. चन्द्रगुप्तसू.म.सा.

प्रकाशनम्

श्री अनेकान्तप्रकाशन

आर्थिकसहकारः

भाभरतीर्थनिवासि रोलीया कपुरचन्द मानचन्दपरिवारस्य
मुमुक्षु चार्मीबेन भरतभाई इत्यस्याः
परमपारमेश्वरी प्रव्रज्याप्रसङ्गे सम्प्राप्तज्ञानद्रव्येण प्रकाशितेयम् ।

- पुस्तक : श्रीमत्सिद्धर्षिगणिविरचिता श्रीउपमितिभवप्रपञ्चा कथा ।
  (चतुर्थादिप्रस्तावद्वयात्मको द्वितीयो भागः)

- आवृत्ति : द्वितीया ।

- प्रतय : ७५०

- वि.सं. २०७१

- प्राप्तिस्थानम् ।

  - मुकुंदभाई आर. शाह
    २०१, नवरत्न फ्लेट्स, नवा विकासगृह मार्ग,
    पालडी, अहमदाबाद-३८० ००७.

  - मुनीशभाई एस. वखारिया
    सी/५३, सर्वोदयनगर,
    पांजरापोळ रोड, मुंबई-४०० ००४.

  - जतीनभाई हेमचंद शाह
    'कोमल', छापरीया शेरी,
    महीधरपुरा, सुरत-३९५ ००३.

  - तनील ए. वोरा
    ४/७४, कृष्णकुंज, जुना पुलगेट पासे,
    २३९२/९३, जनरलथीमैया रोड, पूना-४११ ००१.

- मुद्रक :
  Tejas Printers
  F/5, Parijat Complex, Swaminarayan Mandir Road, Kalupur,
  AHMEDABAD-380 001. • (M) 98253 47620 • PH. (O) (079) 22172271

श्रीउपमितिभवप्रपञ्चकथाया
अनुक्रमणिका ।

चतुर्थः प्रस्तावः ।

पञ्चमः प्रस्तावः ।

• • •

चतुर्थः प्रस्तावः ।

रिपुदारणजन्म ।

अथ विख्यातसौन्दर्ये, सपुण्यजनसेविते ।
सिद्धार्थनगरे तत्र, भूपोऽभून्नरवाहनः ॥१॥
यस्तेजसा सहस्रांशुं, गाम्भीर्येण महोदधिम् ।
स्थैर्येण शैलराजेन्द्रं, जयति स्म महाबलः ॥२॥
येन बन्धुषु चन्द्रत्वं, शत्रुवंशे कृशानुता ।
प्रदर्शिताऽऽत्मनो नित्यं, धनेन धनदायितम् ॥३॥
तस्य रूपयशोवंशविभवैरनुरूपताम् ।
दधानाऽऽसीन्महादेवी, नाम्ना विमलमालती ॥४॥
सा चन्द्रिकेव चन्द्रस्य, पद्मेव जलजन्मनः ।
तस्य राज्ञः सदा देवी, हृदयान्न विनिर्गता ॥५॥
ततोऽगृहीतसङ्केते ! तदानीं निजभार्यया ।
सह पुण्योदयेनाहं, तस्याः कुक्षौ प्रवेशितः ॥६॥
अथ सम्पूर्णकालेन, सर्वावयवसुन्दरः ।
निष्क्रान्तोऽहमभिव्यक्तरूपश्छन्नस्तथेतरः ॥७॥
ततो मामुपलभ्यासौ, देवी विमलमालती ।
सञ्जातः किल पुत्रो मे, परं हर्षमुपागता ॥८॥
ततो निवेदितो राज्ञे, तुष्टोऽसावपि चेतसा ।
सञ्जातो नगरानन्दः, कृतो जन्ममहोत्सवः ॥९॥
ममापि च समुत्पन्नो, वितर्को निजमानसे ।
यथाऽहमनयोः पुत्रस्तातो मातेति तावुभौ ॥१०॥
अथ मासे गते पूर्णे, महानन्दपुरःसरम् ।
ततः प्रतिष्ठितं नाम, ममेति रिपुदारुणः ॥११॥
नन्दिवर्धनकाले या, ममाऽऽसीदविवेकिता ।
सा धात्री पुनरायाता, स्तनपायनतत्परा ॥१२॥
इतश्च तेन सा भर्त्रा, निजेन प्रियकामिना ।
क्वचिद् द्वेषगजेन्द्रेण, संयोगं समुपागता ॥१३॥
यदा चापन्नगर्भाऽभूद्देवी विमलमालती ।
तदैव दैवयोगेन, सञ्जाता सापि गर्भिणी ॥१४॥

ततो मज्जन्मकाले सा, प्रसूता दुष्टदारकम् ।
उन्नामितमहोरस्कं, वदनाष्टकधारकम् ॥१५॥
तं वीक्ष्य सा विशालाक्षी, परं हर्षमुपागता ।
ततश्च चिन्तयन्त्येवं, स्तिमितेनान्तरात्मना ॥१६॥
अहो मदीयपुत्रस्य, कूटानि सुगिरेरिव ।
मूर्धानोऽष्ट विराजन्ते, तदिदं महदद्भुतम् ॥१७॥

शैलराजजन्म ।

ततः साऽपि गते मासे, निजसूनोर्गुणोचितम् ।
करोति नाम विख्यातं, शैलराज इति स्फुटम् ॥१८॥
इतश्च-सा धात्री स च तत्सूनुरनादावपि सर्वदा ।
ममान्तरङ्गोऽभूदेव, तिरोभूततया परम् ॥१९॥
ततः पित्रोर्महानन्दं, दधानः सुखलालितः ।
सहैव शैलराजेन, परां वृद्धिमहं गतः ॥२०॥

मैत्री उभयोः ।

अथातीतेषु वर्षेषु, पञ्चषेषु ततो मया ।
स व्यक्तं रममाणेन, शैलराजो निरीक्षितः ॥२१॥
अनादिस्नेहमोहेन, तं दृष्ट्वा मम मानसे ।
या प्रीतिरासीत्साऽऽख्यातुं, वचनेन न पार्यते ॥२२॥
विलोकयन्तं मां वीक्ष्य, स्निग्धदृष्ट्या स दारकः ।
शठात्मा चिन्तयत्येवं, लब्धलक्ष्यः स्वचेतसा ॥२३॥
अये ! मामेष राजेन्द्रतनयः स्निग्धचक्षुषा ।
विलोकयति तन्नूनं, ममायं वर्तते वशे ॥२४॥
ततो विस्मेरिताक्षोऽसौ, किलाहं स्नेहनिर्भरः ।
दर्शयन्निति मे देहं, समालिङ्गति मायया ॥२५॥
ततो मे मोहदोषेण, स्फुरितं निजमानसे ।
अहो भावज्ञताऽप्यस्य, त्रैलोक्यमतिवर्तते ॥२६॥
तदिदानीं मया नैष, स्निग्धो बन्धुर्विचक्षणः ।
मोक्तव्यः क्षणमप्येवं, कृतश्चित्ते विनिश्चयः ॥२७॥
ततस्तेन सहोद्यानकाननेषु दिने दिने ।
क्रीडतः सततं याति, कालो मे हृष्टचेतसः ॥२८॥

न लक्षितं मया मोहविह्वलीभूतचेतसा ।
यथैष शैलराजो मे, परमार्थेन वैरिकः ॥२९॥

शैलराजकृतविकल्पाः ।

ततो दिनेषु गच्छत्सु, मैत्री तेन विवर्धते ।
तत्प्रभावात्प्रवर्धन्ते, वितर्का मम मानसे ॥३०॥
यथा ममोत्तमा जातिः, कुलं सर्वजनाधिकम् ।
बलं भुवनविख्यातं, रूपं भुवनभूषणम् ॥३१॥
सौभाग्यं जगदानन्दमैश्वर्यं भुवनातिगम् ।
श्रुतं पूर्वभवाभ्यस्तं, परिस्फुरति मेऽग्रतः ॥३२॥
मघवाऽपि पदं स्वीयं, यद्यहं प्रार्थये ततः ।
ददात्येव न कार्यं मे, लाभशक्तिरियं मम ॥३३॥
ये चान्येऽपि तपोवीर्यधैर्यसत्त्वादयो गुणाः ।
ते मय्येव वसन्त्युच्चैर्विमुच्य भुवनत्रयम् ॥३४॥
यदिवा-यस्येदृशेन मित्रेण, सञ्जातो मम मीलकः ।
तस्य को वर्णयेल्लोके, गुणसम्भारगौरवम् ? ॥३५॥
तथाहि-पुरुषस्य भवेत्तावत्सर्वस्यैकमिहाननम् ।
अयं वक्त्राष्टकेनैव, जयत्येव परं जनम् ॥३६॥
तदेष शैलराजो मे, यस्य प्राप्तो वयस्यताम् ।
तस्य नास्ति जगत्यत्र, यन्न सम्पन्नमञ्जसा ॥३७॥
ततोऽवलिप्तचित्तोऽहं, तां विकल्पपरम्पराम् ।
वर्धयन्नात्मनः सर्वं, न्यूनं मन्ये तदा जनम् ॥३८॥
ऊर्ध्वीकृतनिजग्रीवो, नक्षत्राणि निभालयन् ।
अग्रतोऽपि न पश्यामि, मत्तवद्गन्धवारणः ॥३९॥
आपूर्णो भूरिवातेन, विततात्मा यथा दृतिः ।
ततोऽहं विचरामि स्म, निःसारो मदविह्वलः ॥४०॥
चिन्तयामि न मे वन्द्यः, कश्चिदस्ति जगत्त्रये ।
यत एतद्गुणैः सर्वमधस्तान्मम वर्तते ॥४१॥
को ममान्यो गुरुर्नूनमहमेव गुणैर्गुरुः ।
क एते देवसङ्घाता ?, ये मत्तोऽपि गुणाधिकाः ॥४२॥

ततोऽगृहीतसङ्केते ! तदाऽहं गर्वनिर्भरः ।
शैलस्तम्भसमो नैव, कस्यचित्प्रणतिं गतः ॥४३॥
किञ्च-प्रणताशेषसामन्तकिरीटांशुविराजितम् ।
न नतं जातुचिद्भद्रे !, तातीयं पादपङ्कजम् ॥४४॥
अशेषजनवन्द्याऽपि, स्नेहनिर्भरमानसा ।
कदाचिदपि नैवाम्बा, मया नूनं नमस्कृता ॥४५॥
ये केचिल्लौकिका देवा, याश्चान्याः कुलदेवताः ।
न ताः प्रणामकामेन, चक्षुषाऽपि मयेक्षिताः ॥४६॥

नरवाहनकृतानुकूलता ।

ततो मां तादृशं वीक्ष्य, शैलराजसमन्वितम् ।
वर्धमानं स राजेन्द्रो, मनसा पर्यचिन्तयत् ॥४७॥
अहो मदीयपुत्रोऽयं, गाढं मानधनेश्वरः ।
तदस्य लोको यद्याज्ञां, लङ्घयेत कदाचन ॥४८॥
ततोऽयं चित्तनिर्वेदान्मन्यमानोऽवधीरणाम् ।
मां विहाय क्वचिद्गच्छेत्तदिदं नैव सुन्दरम् ॥४९॥
ज्ञापयित्वा नरेन्द्रादीन्, कुमारचरितं ततः ।
आज्ञाविधेयानस्योच्चैः, करोमि सकलानपि ॥५०॥
एवं विचिन्त्य मे तातः, स्नेहनिर्भरमानसः ।
समस्तं तत्करोत्येव, यत्स्वयं परिचिन्तितम् ॥५१॥
अथ ताताज्ञया सर्वे, नरेन्द्रा नतमस्तकाः ।
बालस्यापि ममात्यन्तं, किङ्करत्वमुपागताः ॥५२॥
प्रधानकुलजाता ये, ये च विक्रमशालिनः ।
तेऽपि मां देव देवेति, ब्रुवाणाः पर्युपासते ॥५३॥
यदहं वच्मि तत्सर्वो, राजलोकः कृतादरः ।
जय देवेति लपन्नुच्चैः, शिरसा प्रतिपद्यते ॥५४॥
किञ्चात्र बहुनोक्तेन ? तातोऽम्बा च सबान्धवा ।
वीक्षते सर्वकार्येष्वधिकं मां परमात्मनः ॥५५॥
स च पुण्योदयस्तत्र, माहात्म्ये मम कारणम् ।
तथापि मोहदोषेण, मयेदं परिचिन्तितम् ॥५६॥

अयं ममैष यो जातो, देवानामपि दुर्लभः ।
सर्वस्यास्य प्रतापस्य, शैलराजो विधायकः ॥५७॥

कुमारशैलराजयोरालापः ।

ततः सन्तुष्टचित्तेन, शैलराजो मयाऽन्यदा ।
प्रोक्तो विश्रम्भजल्पेन, स्नेहनिर्भरचेतसा ॥५८॥
वयस्य ! योऽयं सम्पन्नो, लोकमध्येऽतिसुन्दरः ।
मम ख्यातिविशेषोऽयं, प्रतापो हन्त तावकः ॥५९॥
ततश्च–मदीयवचसा तुष्टः, शैलराजः स्वमानसे ।
वष्टतामुररीकुर्वन्निदं वचनमब्रवीत् ॥६०॥
कुमार ! परमार्थोऽयं, कथ्यते तव साम्प्रतम् ।
यदेवंविधजल्पस्य, कुमारस्येह कारणम् ॥६१॥
ये दुर्जना भवन्त्यत्र, गुणपूर्णं परं जनम् ।
स्वाभिप्रायानुमानेन, मन्यन्ते दोषपुञ्जकम् ॥६२॥
ये सज्जनाः पुनर्धन्यास्ते लोकं दोषपूरितम् ।
स्वाभिसन्धिविशुद्ध्यैव, लक्षयन्ति गुणालयम् ॥६३॥
एवं च स्थिते–यद्भासते गुणित्वेन, गुणहीनोऽप्ययं जनः ।
कुमार ! तावके चित्ते, सौजन्यं तत्र कारणम् ॥६४॥
प्रतापस्तावकीनोऽयं, समस्तोऽपि सुनिश्चितम् ।
भावत्कवीर्यविख्याताः, के वयं परमार्थतः ? ॥६५॥
तदिदं शैलराजीयं, वचनं सुमनोहरम् ।
आकर्ण्याहं तदा भद्रे ! परं स्नेहरसं गतः ॥६६॥
चिन्तितं च मया–अहो मय्यनुरागोऽस्य, अहो गम्भीरचित्तता ।
अहो वचनविन्यासस्तथाऽहो भावसारता ॥६७॥
ततो मयाऽभिहितं–वयस्य ! नेदृशं वाच्यमुपचारपरं वचः ।
ममाग्रतो यतो ज्ञातं, माहात्म्यं तावकं मया ॥६८॥
ततो हर्षवशात्तेन, शैलराजेन जल्पितम् ।
प्रसादपरमे नाथे, भृत्यानां किं न सुन्दरम् ॥६९॥
अन्यच्च–यदि सम्भावना जाता, भवतां मादृशे जने ।
ततो मे परमं गुह्यं, भवद्भिरनुमन्यताम् ॥७०॥

विद्यते मम सद्वीर्यं, हृदयस्यावलेपनम् ।
तन्निजे हृदये देयं, कुमारेण प्रतिक्षणम् ॥७१॥

मयाऽभिहितं, कुतस्तदवाप्तं भवता ? किंनामकम् ? को वा तस्य हृदयावलेपनस्य प्रभावः ? इति श्रोतुमिच्छामि ।

स्तब्धचित्ताख्यमवलेपनम् ।

शैलराजेनाभिहितं–कुमार ! न कुतश्चिदपि तदवाप्तं मया, किं तर्हि ? स्वकीयेनैव वीर्येण जनितं, नामतः पुनः स्तब्धचित्तं तदभिधीयते, प्रभावं तस्यानुभवद्वारेणैव विज्ञास्यति कुमारः, किं तेनावेदितेन ? मयाऽभिहितं–यद्वयस्यो जानीते, ततः समर्पितं ममान्यदा शैलराजेन तदात्मीयं हृदयावलेपनं, विलिप्तं मया हृदयं, जातोऽहं गाढतरमुल्लम्बितशूनतस्कराकारधारितया नमनरहितः, ततस्तथाभूतं मामवलोक्य सुतरां प्रणतिप्रवणाः सम्पन्नाः सामन्तमहत्तमादयः, तातोऽपि सप्रणामं मामालापयति स्म, तथाऽम्बाऽपि स्वामिनमिव मां विज्ञपयति स्म । ततः सञ्जातो मे हृदयावलेपनप्रभावे सम्प्रत्ययः, सम्पन्ना स्थिरतरा शैलराजे परमबन्धुबुद्धिरिति ॥

मृषावादस्तत्कुटुम्बं च ।

इतश्चान्यदा गतोऽहमन्तरङ्गे क्लिष्टमानसाभिधाने नगरे, तच्च कीदृशम् ?
आवासः सर्वदुःखानां, नष्टधर्मैर्निषेवितम् ।
कारणं सर्वपापानां, दुर्गतिद्वारमञ्जसा ॥१॥

तत्र च नगरे दुष्टाशयो नाम राजा, स च कीदृशः ?
उत्पत्तिभूमिर्दोषाणामाकरः क्लिष्टकर्मणाम् ।
सद्विवेकनरेन्द्रस्य, महारिः स नराधिपः ॥२॥

तस्य च राज्ञो जघन्यता नाम देवी, सा च कीदृशी ?
नराधमानां साऽभीष्टा, विद्वद्भिः परिनिन्दिता ।
प्रवर्तिका च सा देवी, सर्वेषां निन्द्यकर्मणाम् ॥३॥

तयोश्च जघन्यतादुष्टाशययोर्देवीनृपयोरत्यन्तमभीष्टोऽस्ति मृषावादो नाम तनयः, स च कीदृशः ?
समस्तभूतसङ्घस्य, विश्वासच्छेदकारकः ।
निःशेषदोषपुञ्जत्वाद् गर्हितश्च विचक्षणैः ॥४॥
शाठ्यपैशुन्यदौर्जन्यपरद्रोहादितस्कराः ।
तं राजपुत्रं सेवन्ते, सदनुग्रहकाम्यया ॥५॥

स्नेहो मैत्री प्रतिज्ञा च, तथा सम्प्रत्ययश्च यः ।
एतेषां शिष्टलोकानां, राजसूनुरसौ रिपुः ॥६॥
पिताऽसौ व्रतलोपस्य, मर्यादाया महारिपुः ।
अयशोवादतूर्यस्य, सदास्फालनतत्परः ॥७॥
ये केचिन्नरकं यान्ति, तस्य निर्देशकारिणः ।
स [1]एवं प्रगुणं मार्गं, तेषां दर्शयितुं क्षमः ॥८॥

ततो दृष्टोऽसौ मया दुष्टाशयो नरेन्द्रः, तत्पार्श्ववर्तिनी च विलोकिता सा जघन्यता महादेवी। तयोश्चाग्रतो वर्तमानो निर्वर्णितो मया तयोरेव चरणशुश्रूषाकरण-परायणः स मृषावादो राजदारकः । ततो विहितप्रतिपत्तिः स्थितस्तत्राहं कियन्त-मपि कालं, महामोहविमोहितमानसेन च मया न लक्षितं तदा तेषां नगरराजेन्द्र-महादेवीदारकाणां सम्बन्धि स्वरूपं, गृहीतोऽपि परमबन्धुबुद्ध्या विशेषतः प्रतिपन्नो वयस्यतया मृषावादः, प्राप्तः प्रकर्षगतिं तेन सह प्रेमाबन्धः, दृष्टोऽसौ शरीरादभिन्नरूपतया, ततश्चानीतः स मया मृषावादः स्वस्थाने ।

मृषावादजा विकल्पाः ।

ततस्तेन सह ललमानस्य मे समुत्पद्यन्ते स्म मनसीदृशा वितर्काः, यदुत-
नूनं विदितसारोऽहमहमेव विचक्षणः ।
शेषः सर्वः पशुप्रायो, मुग्धबुद्धिरयं जनः ॥१॥
यस्य मे सर्वसम्पत्तिकारको मित्रतां गतः ।
सर्वदाऽयं मृषावादः, स्नेहेन हृदि वर्तते ॥२॥
असद्भूतपदार्थेऽपि, सद्बुद्धिं जनयाम्यहम् ।
सद्भूतमप्यसद्भूतं, दर्शयामि सुहृद्बलात् ॥३॥
कृतं प्रत्यक्षमप्युच्चैर्महासाहसमात्मना ।
वरमित्रप्रसादेन, लगयामि परे जने ॥४॥
चौर्यं वा पारदार्यं वा, कुर्वतोऽपि यथेच्छया ।
कुतोऽपराधगन्धोऽपि, मम यावदयं सुहृत् ? ॥५॥
स्वार्थसिद्धिः कुतस्तेषाम् ?, येषामेष न विद्यते ।
अतो मूर्खा अमी लोकाः, **स्वार्थभ्रंशो हि मूर्खता** ॥६॥
विग्रहेऽपि क्वचित्सन्धिं, सन्धावपि च विग्रहम् ।
मृषावादप्रसादेन, घटयामि यथेच्छया ॥७॥

---

१. एव प्र०।

यत्किञ्चिच्चिन्तयाम्यत्र, वस्तु लोकेऽतिदुर्लभम् ।
वरमित्रप्रसादेन, सर्वं सम्पद्यते मम ॥८॥
मया पुण्यैरवाप्तोऽयमयमेव च मे सुहृत् ।
एष एव जगद्वन्द्यो, यथेष्टफलदायकः ॥९॥
ततोऽगृहीतसङ्केते ! मया मोहहतात्मना ।
कुविकल्पैर्मनस्तत्र, मृषावादे प्रतिष्ठितम् ॥१०॥
तद्वशेन च येऽनर्थाः, सम्पद्यन्तेऽतिदारुणाः ।
पुण्योदयप्रभावेण, ते यान्ति विलयं तदा ॥११॥
अहं तु तन्न जाने स्म, महामोहवशं गतः ।
ततस्तत्र मृषावादे, पश्यामि गुणमालिकाम् ॥१२॥

कलाग्रहणेऽनृतमहिमा ।

एवं च वर्तमानस्य, वयस्यद्वययोगतः ।
कलाग्रहणकालो मे, सम्प्राप्तः क्रमशोऽन्यदा ॥१३॥
ततस्तातेन सम्पूज्य, कलाचार्यं विधानतः ।
तस्यार्पितोऽहं सद्भक्त्या, महानन्दपुरःसरम् ॥१४॥
उक्तश्चाहं गुरुः पुत्र ! तवायं ज्ञानदायकः ।
अतः पादौ प्रणम्यास्य, शिष्यभावं समाचर ॥१५॥
मयोक्तं तात ! मुग्धोऽसि, यो मामेवं प्रभाषसे ।
वराकः किं विजानीते, नूनमेष ममाग्रतः ? ॥१६॥
गुरुरन्यस्य लोकस्य, स्यादेष न तु मादृशाम् ।
अतो नाहं पताम्यस्य, पादयोः शास्त्रकाम्यया ॥१७॥
केवलं-भवतामनुरोधेन, गृह्णामि सकलाः कलाः ।
मदीयविनयो नूनमस्य स्यान्मातृलोहितम् ॥१८॥
ततस्तातेन स प्रोक्तः, कलाचार्यो रहःस्थितः ।
आर्य ! मामकपुत्रोऽयं, गाढं मानधनेश्वरः ॥१९॥
तदत्र भवता नास्य, दृष्ट्वाऽप्यविनयादिकम् ।
चित्तोद्वेगो विधातव्यो, ग्राहणीयश्च सत्कलाः ॥२०॥
ततो विनयनम्रस्य, श्रुत्वा तातस्य जल्पितम् ।
यदादिशति राजेन्द्र, इत्याह स महामतिः ॥२१॥

चिन्तितं च तदा तेन, कलाचार्येण मानसे ।
किलैष यावच्छास्त्रस्य, सद्भावं नावबुध्यते ॥२२॥
यावच्च केलिबहुलां, बालतामनुवर्तते ।
अलीकगर्वितोष्मान्तस्तावदेवं प्रभाषते ॥२३॥
यदा तु ज्ञातसद्भावः, शास्त्रार्थानां भविष्यति ।
तदा मदं परित्यज्य, स्वयं नम्रो भविष्यति ॥२४॥ त्रिभिर्विशेषकम् ॥
एवं निश्चित्य हृदये, कलाचार्यो महामतिः ।
ततः सर्वादरेणासौ, प्रवृत्तो ग्राहणे मम ॥२५॥
इतश्चान्येऽपि तत्पार्श्वे, बहवो राजदारकाः ।
प्रशान्ता विनयोद्युक्ता, गृह्णन्ति सकलाः कलाः ॥२६॥
यथा यथा च मे नित्यमादरं कुरुते गुरुः ।
तथा तथा वयस्यो मे, शैलराजो विवर्धते ॥२७॥
ततश्च तद्वशेनाहमुपाध्यायं [१]महोद्धतः ।
जात्या श्रुतेन रूपेण, हीलयामि क्षणे क्षणे ॥२८॥
ततश्च चिन्तितं महामतिना, अये !-
ग्रस्तस्य सन्निपातेन, क्षीरान्नमिव सुन्दरम् ।
अपथ्योऽस्य वराकस्य, कलाशास्त्रपरिश्रमः ॥२९॥
गाढं कर्षितदेहस्य, यथाऽऽम्लं भूरि भोजनम् ।
तथाऽस्य मत्कृतो यत्नः, श्वयथुं वर्धयत्यलम् ॥३०॥
ततो यद्यपि राजेन्द्रः, पुत्रस्नेहपरायणः ।
उत्साहयति मां नित्यं, गुणाधानार्थमस्य वै ॥३१॥
तथाप्यपात्रभूतोऽयं, य एवं रिपुदारणः ।
तस्य त्यागः परं न्याय्यो, ज्ञानदानं न युज्यते ॥३२॥
यो हि दद्यादपात्राय, सज्ज्ञानममृतोपमम् ।
स हास्यः स्यात्सतां मध्ये, भवेच्चानर्थभाजनम् ॥३३॥
न चैष शक्यते कर्तुं, नम्रो यत्नशतैरपि ।
को हि स्वेदशतेनापि, श्वपुच्छं नामयिष्यति ? ॥३४॥

ततश्चैवं स्वचेतस्यवधार्य तेन महामतिना कलाचार्येण शिथिलितो ममोपरि कलाशास्त्रग्राहणानुबन्धः, परित्यक्तमुपचारसम्भाषणं, दृष्टोऽहं धूलिरूपतया, तथापि

१. मदो० पा. ।

तातलज्जया नासौ बहिर्मुखविकारमात्रमपि दर्शयति न च मनागपि मां परुषमाभाषते। इतश्च तेऽपि राजदारकाः शैलराजमृषावादनिरतं मामुपलभ्य विरक्ताश्चित्तेन, तथापि पुण्योदयेनाधिष्ठितं मां ते चिन्तयन्तोऽपि न कथञ्चिदभिभवितुं शक्नुवन्ति। इतश्च यथा यथा तौ शैलराजमृषावादौ वर्धेते तथा तथाऽसौ मदीयवयस्यः पुण्योदयः क्षीयते, ततः कृशीभूते तस्मिन् पुण्योदये समुत्पन्ना मे गाढतरं गुरुपरिभवबुद्धिः।

गुरुपरिभवः ।

अन्यदा निर्गतो बहिः प्रयोजनेनोपाध्यायः, ततोऽधिष्ठितं मया तदीयं महार्हं वेत्रासनं, दृष्टोऽहमुपविष्टस्तत्र राजदारकैः, ततो लज्जितास्ते मदीयकर्मणा, लघुध्वनिना चोक्तमेतैः–हा हा कुमार ! न सुन्दरमिदं विहितं भवता, वन्दनीयमिदं गुरोरासनं, न युक्तं भवादृशामस्याक्रमणं, यतोऽस्मिन्नुपविशतां सम्पद्यते कुलकलङ्कः, समुल्लसति भृशमयशःपटहः, प्रवर्धते पापं, सञ्जायते चायुषः क्षरणमिति। मयाऽभिहितम्–अरे ! बालिशा ! नाहं भवादृशां शिक्षणार्हः, गच्छत यूयमात्मीयं ससकुलं शिक्षयत। तदाकर्ण्य स्थितास्ते तूष्णींभावेन, ततः स्थित्वा तत्र वेत्रासने बृहतीं वेलामुत्थितोऽहं यथेष्टचेष्टया, समागतः कलोपाध्यायः, कथितं तस्मै राजदारकैर्मदीयं विलसितं, क्रुद्धः स्वचेतसा, पृष्टोऽहमनेन। ततः सासूयं मयाऽभिहितम्–अहमेतत्करोमि ? अहो ते शास्त्रकौशलम्, अहो ते पुरुषविशेषज्ञता, अहो ते विचारितभाषिता, अहो ते विमर्शपाटवं यस्त्वमेतेषां मत्सरिणामसत्यवादिनां वचनेन विप्रतारितो मामेवमाभाषसे। ततो विलक्षीभूतः कलोपाध्यायः। चिन्तितमनेन–न तावदेते राजदारका विपरीतं भाषन्ते, अयं तु स्वकर्मापराधमेवमपलपति तदेनं स्वयमुपलभ्य शिक्षयिष्यामि। अन्यदा प्रच्छन्नदेशस्थितेनावेक्षितोऽहं तेन महामतिना, दृष्टस्तत्र वेत्रासने सरभसमुपविष्टो ललमानः, ततः प्रकटीभूतोऽसौ, दृष्टो मया, मुक्तं झगिति वेत्रासनम्। महामतिनाऽभिहितम्–इदानीं तर्हि भवतः किमुत्तरम् ? मयोक्तं–कीदृशे प्रश्ने ? महामतिराह–तत्रैव पूर्वके। मयोक्तं–न जानाम्यहं कीदृशोऽसौ पूर्वकः प्रश्नः ? महामतिराह–किमुपविष्टस्त्वमत्र वेत्रासने न वेति। ततो हा शान्तं पापमिति ब्रुवाणेन पिहितौ मया कर्णौ। पुनरभिहितं–पश्यत भो मत्सरविलसितं यदेते स्वयमकार्यं कृत्वा ममोपर्येवमारोपयन्ति। महामतिना चिन्तितम्–अहो **सेयं दृष्टेऽप्यनुपपन्नता नाम**, अहो अस्य धृष्टत्वं, अवैद्यकः खल्वयं, इयत्ताऽतः परमसत्यवचनस्य, राजदारकैरभिहितमेकान्ते विधाय कलाचार्यं, यदुत–अदृष्टव्यः खल्वयं पापः तत्किमेनमस्माकं मध्ये धारयत यूयम्।

मृषाभाषिणोऽपात्रता ।

महामतिना चिन्तितं-सत्यमेते तपस्विनः प्रवदन्ति,
नोचित एवायं रिपुदारणः सत्सङ्गमस्य ।

तथाहि-**लुब्धमर्थप्रदानेन, क्रुद्धं मधुरभाषणैः,**
मायाविनमविश्वासात्, स्तब्धं विनयकर्मणा ॥१॥
चौरं रक्षणयत्नेन, सद्बुद्ध्या पारदारिकम् ।
वशीकुर्वन्ति विद्वांसः, शेषदोषपरायणम् ॥२॥ युग्मम् ॥
न विद्यते पुनः कश्चिदुपायो भुवनत्रये ।
असत्यवादिनः पुंसः, कालदष्टः स उच्यते ॥३॥
यतः-सर्वेऽपि ये जगत्यत्र, व्यवहाराः शुभेतराः ।
सत्ये प्रतिष्ठिता नेदं, यस्यासौ नन्वलौकिकः ॥४॥
अतो विज्ञाय यत्नेन, सत्यहीनं नराधमम् ।
त्यजन्त्येव सुदूरेण, प्रियसत्या महाधियः ॥५॥
ततोऽयं सत्यहीनत्वादस्माकं रिपुदारणः ।
सम्यग्विज्ञातशीलानां, न मध्ये स्थातुमर्हति ॥६॥

अथवा नास्य वराकस्य रिपुदारणस्यायं दोषो यतोऽयमनेन शैलराजेन प्रेर्यमाणस्तावत्सकलदुर्विनयमाचरति, तथाऽनेन मृषावादेन प्रोत्साह्यमानः खल्वयमेवं भाषते, ततो यद्येतौ पापवयस्यौ परिहरति तदर्थं शिक्षयामि तावदेनं, ततः कृतोऽहमुत्सारके महामतिना । अभिहितश्च-कुमार ! नेदृशानां[१] स्थानमिह मदीय-शालायां, अतः कदाचिदेतौ पापवयस्यौ परिहर, अन्यथा नागन्तव्यमिह कुमारेणेति । मयाऽभिहितं-त्वमात्मीयजनकाय स्वस्थानं प्रयच्छ, वयं तु त्वदीय-स्थानेन त्वयापि च विनैव भलिष्यामहे । ततश्चैवंविधैस्तिरस्कृत्य परुषवचनै-रुपाध्यायमुन्नामितया कन्धरया गगनाभिमुखेन वदनेन वितततीकृतेन वक्षःस्थलेना-विकटपादपातेन गतिमार्गेण विलिप्य तेन स्तब्धचित्तेन शैलराजीयविलेपनेनात्महृदयं निर्गतोऽहमुपाध्यायभवनात् । ततोऽभिहिता महामतिना राजदारकाः-अरे ! निर्गतस्तावदेष दुरात्मा रिपुदारणः, केवलं गरीयान्नरवाहननृपतेः पुत्रस्नेहः, "स्नेहमूढाश्च प्राणिनो न पश्यन्ति वल्लभस्य दोषसमूहं, समारोपयन्त्यसन्तमपि गुणसङ्घातं, रुष्यन्ति तद्विप्रियकारिणि जने, न विचारयन्ति विप्रियकरणकारणं, न लक्षयन्ति स्थानमानान्तरं, कुर्वन्ति स्वाभिमतविप्रियकर्तुर्महापायम् ।" तदेवं

१. यदिवा पा. ।

व्यवस्थिते भवद्भिर्मौनमवलम्बनीयं। यदि रिपुदारणनिर्गमनव्यतिकरं प्रश्नयिष्यति देवो नरवाहनस्ततोऽहमेव तं प्रत्याययिष्यामि। राजदारकैरभिहितं–यदाज्ञापयत्यु–पाध्यायः। इतश्च ततो निर्गत्य गतोऽहं तातसमीपे। पृष्टस्तातेन–पुत्र ! किं वर्तते कलाग्रहणस्येति ? ततः शैलराजीयहृदयावलेपनवशेन मृषावादावष्टम्भेन च मयाऽभिहितम्–तात ! समाकर्णय–

पूर्वमेव ममाशेषं, विज्ञानं हृदयस्थितम्।
अयं तावकयत्नो मे, विशेषाधायकः परम् ॥१॥
ततश्च–लेख्ये चित्रे धनुर्वेदे, नरादीनां च लक्षणे।
गान्धर्वे हस्तिशिक्षायां, पत्रच्छेद्ये सवैद्यके ॥२॥
शब्दे प्रमाणे गणिते, धातुवादे सकौतुके।
निमित्ते याश्च लोकेऽत्र, कलाः काश्चित्सुनिर्मलाः ॥३॥
तासु सर्वासु मे तात !, प्रावीण्यं वर्तते परम्।
आत्मतुल्यं न पश्यामि, त्रैलोक्येऽप्यपरं नरम् ॥४॥

कलासु स्थैर्यं हितम्।

सुतस्नेहेन तच्छ्रुत्वा, तातो हर्षमुपागतः।
चुम्बित्वा मूर्धदेशे मामिदं वचनमब्रवीत् ॥५॥
जात ! चारु कृतं चारु, सुन्दरस्ते महोद्यमः।
किं त्वेकं मे कुमारेण, वचनं श्रूयतामिति ॥६॥
मयाभिहितं–वदतु तात ! तातेनाभिहितं–
विद्यायां ध्यानयोगे च, स्वभ्यस्तेऽपि हितैषिणा।
सन्तोषो नैव कर्तव्यः, स्थैर्यं हितकरं तयोः ॥७॥
एवं च स्थिते–गृहीतानां स्थिरत्वेन, शेषाणां ग्रहणेन च।
कलानां मे कुमारत्वे, त्वं पुषाण मनोरथान् ॥८॥

मयाऽभिहितम्–एवं भवतु, ततो गाढतरं तुष्टस्तातः, दत्तो भाण्डागारिकस्या–देशः, अरे पूरय महामतिभवनं धनकनकनिचयेन, येन कुमारः सकलोपभोगसम्पत्त्या निर्व्यग्रस्तत्रैव कलाग्रहणं कुर्वन्नास्ते। ततो यदाज्ञापयति देव इत्यभिधाय सम्पादितं भाण्डागारिकेण राजशासनम्। महामतिनाऽपि मा देवस्य चित्तसन्तापो भविष्य–तीत्याकलय्य न निवेदितं ताताय मदीयविलसितम्। ततोऽभिहितोऽहं तातेन–वत्स ! अद्यदिनादारभ्य स्थिरीकुर्वता पूर्वगृहीतं कलाकलापं गृह्णता चापूर्वं तत्रैवोपाध्यायभवने भवता स्थातव्यमहमपि न द्रष्टव्यः। मयाभिहितम्–'एवं

भवतु', जातश्च मे हर्षः । ततस्तातसमीपान्निर्गतेन मया मृषावादं प्रत्यभिहितं-वयस्य ! कस्योपदेशेनेदृशं भवतः कौशल्यं, येन युष्मदवष्टम्भेन मया सम्पादितस्तातस्य हर्षः, प्रच्छादितः कलाचार्यकलहव्यतिकरो, लब्धा चेयमतिर्दुलभा मुत्कलचारितेति ।

मायोत्पत्तिस्तत्कुटुम्बं च ।

मृषावादेनाभिहितं-कुमाराकर्णय । अस्ति राजसचित्ते नगरे रागकेसरी नाम राजा । तस्य च मूढता नाम महादेवी । तयोश्चास्ति माया नाम दुहिता, सा मया महत्तमा भगिनी प्रतिपन्ना, प्राणेभ्योऽपि वल्लभोऽहं तस्याः, ततस्तदुपदेशेन ममेदृशं कौशलं, सा च जननीकल्पमात्मानं मन्यमाना यत्र यत्र क्वचिदहं सञ्चरामि तत्र तत्र वत्सलतया सततमन्तर्लीना तिष्ठति, न क्षणमात्रमपि मां विरहयति । मयाऽभिहितं-वयस्य ! दर्शनीया ममापि साऽऽत्मीया भगिनी भवता । मृषावादेनाभिहितम्-एवं करिष्यामि । ततो मया ततः प्रभृति वेश्याभवनेषु, द्यूतकरशालासु, दुर्ललितमीलकेषु, तथाऽन्येषु च दुर्विनयस्थानेषु यथेष्टचेष्टया विचरता तथापि मृषावादबलेन कलाग्रहणमहं करोमीति लोकमध्ये गुणोपार्जनतत्परमात्मानं प्रकाशयता तातमपश्यतैवातिवाहितानि द्वादश वर्षाणि । मुग्धजनप्रवादेन च समुच्चलिताऽलीकवार्ता-यथा रिपुदारणकुमारः सकलकलाकलापकुशल इति । प्रचरितो देशान्तरेष्वपि प्रवादः समारूढश्चाहं यौवनभरे ।

नरसुन्दर्यागमः ।

ततश्च शेखरपुरे नगरे नरकेसरिनरेन्द्रस्य वसुन्धरामहादेव्याः कुक्षिसम्भूताऽस्ति नरसुन्दरी नाम दुहिता, सा च भुवनाद्भुतभूता रूपातिशयेन निरुपमा, कलासौष्ठवेन सम्प्राप्ता यौवनं, समुत्पन्नोऽस्याश्चित्तेऽभिनिवेशः, यदुत-यः कलाकौशलेन मत्तः समधिकतरः स एव यदि परं मां परिणयति, नापरः, निवेदितं पित्रोर्निजाकूतं, सञ्जातमनयोः पर्याकुलत्वं, नास्त्येवास्याः कलाभिः समानोऽपि भुवने पुरुषः कुतः पुनरधिकतर इति भावनया । ततः श्रुतस्ताभ्यां मदीयः कलाकौशलप्रवादः । चिन्तितं नरकेसरिणा-स एव रिपुदारणो यदि परमस्याः समर्गलतरो भविष्यति, युज्यते च नरवाहनेन सहास्माकं वैवाह्यं, यतः प्रधानवंशो महानुभावश्चासौ वर्तते, तस्य च राज्ञो रत्नसूचिरिव महानागस्य निरपत्यस्य सैवैका नरसुन्दरी दुहिता । ततोऽत्यन्तमभीष्टतया तस्याश्चिन्तितमनेन-गच्छामि तत्रैव सिद्धार्थपुरे गृहीत्वा वत्सां नरसुन्दरीं, ततः परीक्ष्य तं रिपुदारणं निकटस्थितो विवाहयाम्येनां येन मे चित्तनिर्वृतिः सम्पद्यते ।

मूर्खस्य हास्यास्पदत्वम् ।

ततः सर्वबलेन समागतो नरकेसरी, ज्ञापितस्तातस्यागमनवृत्तान्तः, परितुष्टोऽसौ, कारितमुच्छ्रितपताकं नगरं, प्रवेशितो महाविमर्देन नरकेसरी तातेन, दत्तमावासस्थानं, भविष्यति रिपुदारणकुमारस्य नरसुन्दर्या सह कलाकौशलपरीक्षेति ज्ञापितं लोकानां, प्रशस्तदिने सज्जीकारितः स्वयंवरमण्डपः, विरचिता मञ्चाः, मीलितं राजवृन्दं, समुपविष्टस्तन्मध्ये सपरिकरस्तातः । समाहूतोऽहं कलाचार्यश्च, प्राप्तोऽहं सह मित्रत्रयेण तातसमीपं, महामतिश्च सह राजदारकैः । इतश्च पुण्योदयस्य मदीयदुष्टचेष्टितानि पश्यतश्चित्तखेदेनैव सञ्जातं कृशतरं शरीरं, विगलितं परिस्फुरणं, मन्दीभूतः प्रतापः । ततोऽहमुपविष्टस्ताताभ्यर्णे कलोपाध्यायश्च, निवेदितं विनयनम्रेण नरवाहनेन महामतये नरकेसरिराजागमनप्रयोजनम् । तदाकर्ण्य सञ्जातो मे हर्षातिरेकः, स्थितस्तूर्ष्णींभावेन स्वहृदयमध्ये हसन्नुपाध्यायः । अत्रान्तरे समागतो नरकेसरी, परितुष्टो नरवाहनः, दापितं तस्मै महार्हसिंहासनम्, उपविष्टः सपरिकरो नरकेसरी । ततस्तदनन्तरं पूरयन्ती जनहृदयसरांसि लावण्यामृतप्रवाहेण, अधरयन्ती वरबर्हिकलापं कृष्णस्निग्धकुञ्चितकेशपाशेन, प्रोद्भासयन्ती दिक्चक्रवालं वदनचन्द्रेण, विधुरयन्ती कामिजनचित्तानि लीलामन्थरेण विलासविलोकितेन, दर्शयन्ती महेभकुम्भविभ्रमं पयोधरभरेण, उच्छृङ्खलयन्ती मदनवारणं विस्तीर्णजघनपुलिनेन, विडम्बयन्ती सञ्चारितरक्तराजीवयुगललीलां चरणयुग्मेन, उपहसन्ती कलकोकिलाकुलकूजितं मन्मथोल्लापजल्पितेन, कुतूहलयन्ती वरमुनीनपि प्रवरनेपथ्यालङ्कारमाल्यताम्बूलाङ्गरागविन्यासेन, परिकरिता प्रियसखीवृन्देन, अधिष्ठिता वसुन्धरया प्रविष्टा नरसुन्दरी । ततस्तां विलोक्याहं हृष्टः स्वचेतसा विजृम्भितः शैलराजः विलिप्तं स्तब्धचित्तेन तेनावलेपनेन मयाऽऽत्महृदयम् । चिन्तितं च-कोऽन्यो मां विहायैनां परिणेतुमर्हति ? न खलु मकरध्वजादृते रतिरन्यस्योपनीयते । अत्रान्तरे विहितविनया तातादीनामभिहिता नरकेसरिणा नरसुन्दरी, यदुत-उपविश वत्से ! मुञ्च लज्जां, पूरयाऽऽत्मीयमनोरथान्, प्रश्नय रिपुदारणकुमारं कलामार्गे यत्र क्वचित्ते रोचते । ततो नरसुन्दर्या सहर्षमुपविश्याभिहितं-यदाज्ञापयति तातः, केवलं गुरूणां समक्षं न युक्तं ममोद्ग्राहयितुं, तस्मादार्यपुत्र एवोद्ग्राहयतु सकलाः कलाः, अहं पुनरेकैकस्यां कलायां सारस्थानानि प्रश्नयिष्यामि, तत्रार्यपुत्रेण निर्वाहः करणीय इति । तदाकर्ण्य हृष्टौ नरवाहननरेन्द्रौ समस्तं राजकुलं लोकाश्च ।

भ्रमनाशः ।

ततस्तातेनाभिहितोऽहं-कुमार ! सुन्दरं मन्त्रितं राजदुहित्रा, तत्साम्प्रतमुद्ग्राहयतु कुमारः सकलाः कलाः, पूरयत्वस्या मनोरथान्, जनयतु ममानन्दं,

निर्मलयतु कुलं, गृह्णातु जयपताकां, एषा सा निकषभूमिर्वर्तते विज्ञानप्रकर्षस्येति। मम तु तदा कलानां नामान्यपि विस्मृतानि । ततो विह्वलीभूतमन्तःकरणं, प्रकम्पिता गात्रयष्टिः, प्रादुर्भूताः प्रस्वेदबिन्दवः, सञ्जातो रोमोद्धर्षः, प्रनष्टा भारती, तरलिते लोचने। ततो हा किमेतदितिविषण्णस्तातः, प्रलोकितं महामतिवदनम्। महामतिराह - किं कर्तव्यमादिशतु देवः । तातेनाभिहितं-किमितीयमीदृशी कुमारशरीरेऽवस्था ? ततः कर्णे निवेदितं महामतिना, देव ! मनःक्षोभविकारोऽयमस्य। तातः प्राह-किं पुनरस्य मनःक्षोभनिमित्तम् ? महामतिराह-देव ! प्रस्तुत-वस्तुन्यज्ञानं, भवत्येव हि वागायुधानां सदसि विदुषां सस्पर्धमाभाषितानां ज्ञानावष्टम्भविकलानां मनसि क्षोभातिरेकः । तातेनाभिहितम्-आर्य ! कथमज्ञानं कुमारस्य ? ननु सकलकलासु प्रकर्षं प्राप्तः कुमारो वर्तते । ततः संस्मृत्य मदीयदुर्विलसितं गृहीतो मनाक्क्रोधेन कलाचार्यः । ततोऽभिहितमनेन-देव ! प्रकर्षं प्राप्तः कुमारः शैलराजमृषावादप्रणीतयोः कलयोर्न पुनरन्यत्र। तातः प्राह-के पुनस्ते कले ? महामतिराह-दुर्विनयकरणमसत्यभाषणं च, एते ते शैलराज-मृषावादप्रणीते कले, अनयोश्चात्यन्तं कुशलः कुमारः, न पुनरन्यकलानां गन्धमात्रमपि जानीते। तातः प्राह-कथमिदम् ? महामतिनाऽभिहितं-देव ! देवस्य दीर्घचित्तसन्तापभीरुभिस्तदैव नाख्यातमिदमस्माभिः, यतो लोकमार्गातीतं कुमारस्य चरितमिदानीमपि देवस्य पुरतस्तत्कथयतो न प्रवर्तते मे वाणी। तातेनाभिहितं-यथावृत्तकथने भवतो नास्त्यपराधः, निःशङ्कं कथयत्वार्यः। ततो कलाचार्येणा-वज्ञाकरणादिको वेत्रासनारोहणगर्भो दुर्वचनतिरस्करणपर्यन्तो निवेदितः समस्तोऽपि मदीयदुर्विलसितवृत्तान्तः । तातेनाभिहितम्-आर्य ! यद्येवं ततो जानताऽपि त्वयाऽस्य कुलदूषणस्य स्वरूपं किमित्ययमेवंविधसभामध्ये प्रवेशितः ? ननु विगोपिता वयमाकालमनेन पापेन। महामतिराह-देव ! न मयाऽयमिह प्रवेशितः, मद्भवनान्निर्गतस्यास्य द्वादश वर्षाणि वर्तन्ते, केवलमकाण्ड एव सञ्जातमद्य मम देवकीयमाकारणं, ततः समागतोऽहं, अयं तु कुतश्चिदन्यतः स्थानादिहागत इति। तातेनाभिहितम्-आर्य ! यद्येवमपात्रचूडामणिरेष रिपुदारणो गुणानामभाजनतया वर्जितो युष्माभिस्तत्किमिति गर्भाधानादारभ्यास्येयन्तं कालं यावत्कल्याणपरम्परा सम्पन्ना ? किमिदानीमेवं लोकमध्ये विगुप्यत इति। महामतिराह-देव ! अस्त्यस्य पुण्योदयो नामान्तरङ्गो वयस्यः, तज्जनिता प्राक्तनीकल्याणपरम्परा, तथाहि-तत्प्रभावादेवायं प्रादुर्भूतः सुकुले, सम्पन्नो जननीजनकयोरभीष्टतमः, सञ्जातो रूप-सौभाग्यसुखैश्वर्यादिभाजनम् । तातः प्राह-तर्हि क्व पुनरधुना गतोऽसौ

पुण्योदयः? महामतिराह-न कुत्रचिद्‌गतोऽत्रैव प्रच्छन्नरूप आस्ते, केवलं पश्यन्नस्यैव रिपुदारणस्य सम्बन्धीनि दुर्विलसितानि चित्तदुःखासिकया साम्प्रतं क्षीणशरीरोऽसौ तपस्वी वर्तते, न शक्नोत्यस्यापदं निवारयितुमिति। तदाकर्ण्य तातो नास्त्यत्र कश्चिदुपायो विनाटिता वयमनेन दुष्पुत्रेण महालोकमध्ये प्रसभमिति चिन्तया राहुग्रस्तशशधरबिम्बमिव कृतं तातेन कृष्णं मुखं, लक्षितः समस्तलोकैः पर्यालोचनपरमार्थस्ततो विलक्षीभूतास्तातबान्धवाः, विद्राणवदनः सम्पन्नः परिजनः, प्रहसिता मुखमध्ये षिङ्गलोकाः, विषण्णा नरसुन्दरी, विस्मितो नर-केसरिलोकः। ततश्चिन्तितं जनेन तातलज्जया लघुध्वनिना परस्परमुक्तं च-अये!

गर्वाध्मातः परं मूढो, बस्तिवद्वातपूरितः।
निःसारोऽपि गतः ख्यातिमेष भो! रिपुदारणः ॥१॥
अथवा-निरक्षरोऽपि वाचालो, लोकमध्येऽतिगौरवम्।
वागाडम्बरतः प्राप्तो, यः स्यादन्योऽपि मानवः ॥२॥
स सर्वो निकषप्राप्तः, प्राप्नोत्येव विडम्बनाम्।
महाहास्यकरीं मूढो, तथाऽयं रिपुदारणः ॥३॥ युग्मम् ॥

रङ्गमण्डपविसर्गः।

मम तु तातोपाध्यायौ कर्णोत्सारकेण परस्परं तथाजल्पन्तौ पश्यतः समुत्पन्नो मनसि विकल्पः-अये! बलात्कारेण मामेतौ जल्पयिष्यतः। ततो भयातिरेकेण स्तम्भितं मे गलकनाडीजालं निरुद्धश्चोच्छ्वासनिःश्वासमार्गः, सञ्जाता म्रियमाणावस्था। ततो हा पुत्र! हा तात! हा वत्स! हा तनय! किमेतदितिप्रलपन्ती वेगेनागत्य शरीरे लग्ना ममाम्बा विमलमालती, पर्याकुलीभूतः परिजनः, किं कर्तव्यताविमूढा वसुन्धरा, विस्मितो नरकेसरी। तातेनाभिहितं-गच्छत भो लोकाः! गच्छत न पटुः शरीरेणाद्य कुमारः, पुनर्जल्पो भविष्यति। तदाकर्ण्य निर्गता वेगेन लोकाः, मिलिता बहिस्त्रिकचतुष्कचत्वरादिषु, अहो रिपुदारणस्य पाण्डित्यमहो पाण्डित्यमिति प्रवृत्तं प्रहसनं, प्रहितौ लज्जावनम्रेण तातेन कलोपाध्यायनरकेसरिणौ; गतः स्वावासस्थाने नरकेसरी। चिन्तितमनेन-दृष्टं यद् द्रष्टव्यं, दीयतां प्रभाते प्रयाणकमिति। ममापि निर्जनीभूते मन्दीभूतं भयं, स्वस्थीभूतं शरीरं, तातस्य तु हृतराज्यस्येव वज्राहतस्येव महाचिन्ताभराक्रान्तस्य लङ्घितं तद्दिनं, समागता रजनी, न दत्तं प्रादोषिकमास्थानं, निवार्य जनप्रवेशं प्रसुप्तः, केवलं तया चिन्तयाऽपनिद्रेणैवातिवाहितप्राया विभावरी।

पुण्योदयेन दापिता कुमारी ।

इतश्च लज्जितो मे वयस्यः पुण्योदयः । चिन्तितमनेन-

यस्य जीवत एवैवं, पुंसः स्वामी विडम्ब्यते ।
किमस्य[1] जन्मनाऽप्यत्र, जननीक्लेशकारिणः ? ॥१॥

ततश्च-जातं विच्छायकं तावन्ममैतदतिदुःसहम् ।
यायात्सुतामदत्त्वैव, यद्यसौ नरकेसरी ॥२॥
ततोऽस्य सर्वथा व्यर्थं, कुमारस्य मदीयकम् ।
संनिधानमतो नैव, ममोपेक्षाऽत्र युज्यते ॥३॥
ततो यद्यप्ययोग्योऽयमेतस्या रिपुदारणः ।
तथापि दापयाम्येनामस्मै कमललोचनाम् ॥४॥

अत्रान्तरे समागता तातस्य रात्रिशेषे निद्रा । ततो भद्रेऽगृहीतसङ्केते ! समाश्वासनार्थं तातस्य दत्तं कामरूपितया स्वप्नान्तरे तेन पुण्योदयेन दर्शनं, दृष्टः सुन्दराकारो धवलवर्णः पुरुषः । अभिहितमनेन-महाराज ! किं स्वपिषि किं वा जागर्षि ? तातेनाभिहितं-जागर्मि । पुरुषः प्राह-यद्येवं ततो मुञ्च विषादं, दापयिष्याम्यहं रिपुदारणकुमाराय नरसुन्दरीमिति । तातेनाभिहितं-महाप्रसादः । अत्रान्तरे प्रहतं प्राभातिकं तूर्यं, ततो विबुद्धस्तातः । पठितं कालनिवेदकेन-

हीनप्रतापो यः पूर्वं, गतोऽस्तं जगतां पुरः ।
स एवोदयमासाद्य, रविराख्याति हे जनाः ! ॥१॥
यदा येनेह यल्लभ्यं, शुभं वा यदिवाऽशुभम् ।
तदाऽवाप्नोति तत्सर्वं, तत्र तोषेतरौ वृथा ॥२॥

नरसुन्दरीविवाहः ।

एतच्चाकर्ण्य चिन्तितं तातेन, यदुत-न कर्तव्यो मयाऽधुना विषादः, यतो लम्भयिष्यामि कुमारं नरसुन्दरीमिति स्फुटमेव निवेदितं स्वप्ने मम देवेन, अनेन तु कालनिवेदकेन पाठव्याजेन दत्तो ममोपदेशो वेधसा, यदुत-यः पुरुषो यावतः सुन्दरस्यासुन्दरस्य वा वस्तुनो यदा भाजनं तस्य तावत्तदतर्कितमेव तदा मद्वशेन सम्पद्यत इति न कर्तव्यौ तत्र विदुषा हर्षविषादौ, ततोऽनया भावनया स्वस्थीभूतस्तातः । इतश्चाचिन्त्यप्रभावतया पुण्योदयस्य सम्पादिता तेन नरकेसरिणो बुद्धिः, यदुत-महानुभावोऽयं नरवाहनराजः, विज्ञातं च राज्यान्तरेष्वपि मम यदिहागमनप्रयोजनं ततो लज्जाकरं पक्षद्वयस्यापि नरसुन्दरीमदत्त्वा मम स्वस्थाने

१. किं तस्य पा. ।

गमनं, अतः सम्भाल्य कथञ्चिदेनां प्रयच्छामि रिपुदारणकुमारायेति। ततो निवेदितो नरकेसरिणा वसुन्धरासमक्षं नरसुन्दर्यै स्वाभिप्रायः । ततो नरसुन्दर्या अपि पुण्योदयप्रभावादेव वलितं मां प्रति मानसं, चिन्तितमनया-युक्तियुक्तमेव तातेन मन्त्रितं, ततोऽभिहितमनया-यदाज्ञापयति तातः, तदाकर्ण्य हृष्टो नरकेसरी, आगत्याभिहितोऽनेन नरवाहनः, महाराज ! किमत्र बहुना जल्पितेन ? आगतैवेयं वत्सा नरसुन्दरी कुमारस्य स्वयंवरा, तदत्र किं बहुना विकत्थनेन ?, केवलं दुर्जनवचनावकाशो भवति, अतो निर्विचारं ग्राह्यतां कुमारेण स्वपाणिना पाणिरस्याः । तातेनाभिहितम्-एवं क्रियते, गणितं प्रशस्तदिनं, परिणीता मया महता विमर्देन नरसुन्दरी, तां विमुच्य गतः स्वस्थाने नरकेसरी ।

परस्परं प्रेम ।

दत्तो मह्यं तातेन निर्व्यग्रभोगार्थं महाप्रासादः, गतानि नरसुन्दर्या सह ललमानस्य मे कतिचिद्दिनानि, घटितं च पुण्योदयेन निरन्तरमावयोः प्रेम, समुत्पादितश्चित्तविश्रम्भः, लगिता मैत्री, जनितो मनोरतिप्रबन्धः, प्ररोहितः प्रणयः, वर्धितश्चित्तमीलकाह्लादप्रणयसागरः सर्वथा ।

स्वप्रभामिव तीक्ष्णांशुश्चन्द्रिकामिव चन्द्रमाः ।
क्षणमेकं न मुञ्चामि, तामुमामिव शङ्करः ॥१॥
साऽपि मामकवक्त्राब्जरसास्वादनतत्परा ।
भ्रमरीव गतं कालं, न जानाति तपस्विनी ॥२॥
ततस्तं तादृशं वीक्ष्य, देवानामपि दुर्लभम् ।
सार्धं मे नरसुन्दर्या, प्रेमाबन्धं मनोहरम् ॥३॥
मदीयौ सुहृदाभासौ, परमार्थेन वैरिकौ ।
तौ मृषावादशैलेशौ, चित्तमध्ये रुषं गतौ ॥४॥ युग्मम् ॥
चिन्तितं च ततस्ताभ्यां, कथमेष वियोक्ष्यते ।
एतया नरसुन्दर्या, पापात्मा रिपुदारणः ? ॥५॥
शैलराजो मृषावादं, ततश्चेत्थमभाषत ।
त्वं तावन्नरसुन्दर्याः, कुरु चित्तविरञ्जनम् ॥६॥
स्वयमेवाहमत्रार्थे, भलिष्यामि ततः परम् ।
मादृशा च कृते यत्ने, कीदृशं प्रेमबन्धनम् ? ॥७॥
मृषावादस्ततः प्राह, नोत्साह्योऽहं भवादृशा ।
कृतमेव मया पश्य, एतस्याश्चित्तभेदनम् ॥८॥

तदेवं मद्वियोगार्थं, ततस्तौ कृतनिश्चयौ ।
शैलराजमृषावादौ, पर्यालोच्य व्यवस्थितौ ॥९॥
अहं तु तां समासाद्य, सद्भार्यां नरसुन्दरीम् ।
चिन्तयामि त्रिलोकेऽपि, प्राप्तं यत्सुन्दरं मया ॥१०॥
ततश्चोन्नामितैकभ्रूर्मन्थरीकृतलोचनः ।
दत्त्वा तच्छैलराजीयं, हृदये स्वेऽवलेपनम् ॥११॥
चिन्तयामि न लोकेऽत्र, पुरुषोऽन्योऽस्ति मादृशः ।
यतो ममेदृशी भार्या, ततो गाढतरं पुनः ॥१२॥
न पश्यामि गुरुं नैव, देवान्नो बन्धुसन्ततिम् ।
न भृत्यवर्गं नो लोकं, न जगत् सचराचरम् ॥१३॥ त्रिभिर्विशेषकम् ॥
अथ तत्तादृशं दृष्ट्वा, मदीयं दुष्टचेष्टितम् ।
पुण्योदयो मनस्तापाद् गाढं जातोऽतिदुर्बलः ॥१४॥
ततो मां तादृशं वीक्ष्य, विरक्ताः सर्वबान्धवाः ।
इदं जल्पितुमारब्धा, हसन्तस्ते परस्परम् ॥१५॥
पश्यताहो विधेः कीदृगस्थानविनियोजनम् ? ।
स्त्रीरत्नमीदृशं येन, मूर्खेणानेन योजितम् ॥१६॥
स्तब्धोऽभून्मूर्खभावेन, प्रागेष रिपुदारणः ।
आसाद्येमां पुनर्भार्यां, गर्वेणान्धोऽधुना ह्ययम् ॥१७॥
स एव वर्तते न्यायो, लोके यः किल श्रूयते[1] ।
एकं स वानरस्तावदद्दष्टोऽन्यद्वृषणे[2]ऽलिना[3] ॥१८॥
तदेषा चारुसर्वाङ्गी, सद्भार्या नरसुन्दरी ।
करिणीव खरस्योच्चैर्न योग्याऽस्य मृगेक्षणा ॥१९॥

प्रेमपरीक्षायै कलाप्रश्नः ।

अन्यदा नरसुन्दर्या, सद्भावार्पितचित्तया ।
स्नेहगर्भपरीक्षार्थं, चिन्तितं निजमानसे ॥२०॥
किं ममार्पितसद्भावः ?, किं वा नो रिपुदारणः ? ।
आ ज्ञातं स्नेहसर्वस्वं, गुह्याख्यानेन गम्यते ॥२१॥
अनाख्येयमतः किञ्चिद् गुह्यसर्वस्वमञ्जसा ।
पृच्छाम्येनं दृढस्नेहे, ततो व्यक्तिर्भविष्यति ॥२२॥

१. गीयते प्र. । २. मुष्के । ३. वृश्चिकेन ।

ततश्चिन्तितं नरसुन्दर्या–कीदृशं पुनरहं गुह्यमधुनाऽऽर्यपुत्रं पृच्छामि ? हुं ज्ञातं तावत्सुनिश्चितमिदं मया, यदुत–नितरां कमनीयशरीरोऽपि रक्ताशोकपादपवदेष निखिलकलाकलापकौशलफलविकल एवार्यपुत्रः, यतो विज्ञानाभावजनिताद्भया-तिरेकादेव तथाविधोऽस्य तदा सभामध्ये मनःक्षोभोऽभूत्, तदधुना तदेव मनःक्षोभकारणमार्यपुत्रं प्रश्नयामि, ततो यदि स्फुटमाचक्षीत, विज्ञास्यामि यथा-ऽस्ति मया सहास्य स्नेहसद्भावः, अथ न कथयेत्ततस्तत्राप्यभिप्रायं लक्षयिष्यामीति विचिन्त्य पृष्टोऽहं नरसुन्दर्या, यदुत–आर्यपुत्र ! कीदृशं तव तदा सभामध्ये शरीरापाटवमासीदिति । अत्रान्तरे ज्ञातावसरेण प्रयुक्ता मृषावादेनाऽऽत्मीया योगशक्तिः, कृतमन्तर्धानं, प्रविष्टो मदीयमुखे। ततोऽभिहितं मया–प्रियतमे ! त्वया पुनस्तदा कीदृशं लक्षितम् ? नरसुन्दरी प्राह–न मया किञ्चित्तदा सम्यग् विज्ञातं, केवलं समुत्पन्ना शङ्का–किं सत्यमेव शरीरापाटवमार्यपुत्रस्य ? किं वा कलाकलापे न कौशलमिति ? मयाऽभिहितं–सुन्दरि ! न तत्रैकोऽपि विकल्पः कर्तव्यः यतस्तरन्ति हृदये मम सकलाः कलाः शरीरापाटवमपि मम न किञ्चित्तदाऽऽसीत्, केवलमम्बया तातेन चालीकमोहात् कृतो मुधैव बहलः कलकलः, तथाविधालीककलकले च स्थिरतया स्थितोऽहं मौनेन। एतच्चाकर्ण्य नरसुन्दर्याः सञ्जातो मनसि व्यलीकभावः । चिन्तितमनया–अहो अस्य प्रत्यक्षापलापित्वम्, अहो निर्लज्जता, अहो धृष्टता, अहो आत्मबहुमानिता। ततोऽभिहितं नरसुन्दर्या–आर्यपुत्र ! यद्येवं ततो महत्कुतूहलं मम इदानीमप्यहमार्यपुत्रेण कलास्वरूप-मुत्कीर्त्यमानं श्रोतुमिच्छामि अतो महता प्रसादेन समुत्कीर्तयतु तदार्यपुत्रः ।

परिभवापादनबुद्धि-र्निष्काशनम् ।

मया चिन्तितम्–अये ! पाण्डित्याभिमानेन परिभवबुद्ध्या मामुपहसत्येषा। अत्रान्तरे लब्धावसरो विजृम्भितः शैलराजो विलिप्तं तेन स्तब्धचित्ताभिधाने-नात्मीयविलेपनेन स्वहस्तेन मद्धृदयं, ततश्चिन्तितं मया–एवं या मम परिभवेनोपहासकारिणी खल्वेषा पापा नरसुन्दरी, तया किमिह स्थितया ? ततो मयाऽभिहितम्–अपसर पापे ! दृष्टिमार्गादपसर, तूर्णं निर्गच्छ मदीयभवनात्, न युक्तं भवादृश्याः पण्डितम्मन्याया मूर्खेणानेन जनेन सहावस्थातुमिति । ततोऽ-वलोकितं मदीयवदनं नरसुन्दर्या । चिन्तितमनया–हा धिक् सद्भावीभूत एवायं वशीकृतो मानभटेन न गोचरः साम्प्रतं प्रसादनायाः, ततो मन्त्राहतेव भुजङ्गवनिता, समुन्मूलितेव वनलतिका, उत्खोटितेव चूतमञ्जरी, अङ्कुशकृष्टेव करिणिका सर्वथा विद्राणदीनवदना साऽवसभ[illegible] हृदयमुद्वहन्ती मन्दं मन्दं क्वणन्माणि-

मेखलाकिङ्किणीकलकोलाहलनूपुरझणझणारावसमाकृष्टस्नानवापिकाकलहंसिकानि पदानि निक्षिपन्ती चलिता नरसुन्दरी, निर्गता मामकीनसदनात्, प्राप्ता तातीयभवने, स्थितोऽहं शैलस्तम्भनया यावदद्यापि न शुष्यति शैलराजीयं तद्वक्षःस्थलावलेपनं तावतीं वेलां, शोषमुपागते मनाक् पुनस्तत्रावलेपने सञ्जातो मे पश्चात्तापः, बाधते नरसुन्दरीस्नेहमोहः समाध्यासितोऽहमरत्या, गृहीतो रणरणकेन, अङ्गीकृतः शून्यतया, उररीकृतो विह्वलतया, प्रतिपन्नो विकारकोटीभिः, अवष्टब्धो मदनज्वरेण।

विमलमालत्यागमः ।

ततो निषण्णः शयनीये, तत्रापि प्रवर्धमानया जृम्भिकयाऽनवरतमुद्वर्तमानेनाङ्गेन मत्स्यक इव खादिराङ्गारराशिमध्ये दन्दह्यमानः स्तोकवेलायां यावत्तिष्ठामि तावदागता सविषादमम्बा विमलमालती। ततस्तां वीक्ष्य कृतं मयाऽऽकारसंवरणं, निषण्णा भद्रासने स्वयमेवाम्बा, स्थितोऽहं पर्यङ्क एवोपविष्टः ।

नरसुन्दर्यवस्थोदितिः ।

अभिहितमम्बया-वत्स ! न सुन्दरमनुष्ठितं भवता यदसौ तपस्विनी नरसुन्दरी परुषवचनैस्तथा तिरस्कृता, तथाहि-यदितो गतायास्तस्याः सम्पन्नं तत्समाकर्णयतु वत्सः। मयाऽभिहितम्-उच्यतां यत्ते रोचते। अम्बयाऽभिहितम्-अस्ति तावदितो निर्गता नयनसलिलधाराधौतगण्डलेखा दीनमनस्का दृष्टा सा मया नरसुन्दरी पतिता रुदन्ती मम पादयोः । मयाऽभिहिता-हले ! नरसुन्दरि ! किमेतत् ? तयाऽभिहितम्-अम्ब ! दाहज्वरो मां बाधते, ततो नीता मया सा वातप्रदेशे, सज्जीकारितं शयनीयं, तत्र च स्थापिता सा, निषण्णाऽहं पार्श्वे, ततः प्रहतेव महामुद्गरेण, प्लुष्यमाणेव तीव्राग्निना, खाद्यमानेव वनपञ्चाननेन, ग्रस्यमानेव महामकरेण, अवष्टभ्यमानेव महापर्वतेन, उत्कर्त्यमानेव कृतान्तकर्तिकया, पाट्यमानेव क्रकचपाटेन, पच्यमानेव नरके प्रतिक्षणमुद्वर्त्तपरावर्तं कर्तुमारब्धा। मयाऽभिहितं-हले ! किंनिमित्तकः पुनस्तवायमेवंविधो दाहज्वरः ? ततो दीर्घदीर्घं निःश्वस्य न किञ्चिज्जल्पितमनया । मया चिन्तितं-मानसीयमस्याः पीडा, कथमन्यथा ममापि न कथयेत् ? ततः कृतो मया निर्बन्धः, कथितं कृच्छ्रेण नरसुन्दर्या यथावृत्तं, ततो नियुज्य तस्याः शीतक्रियाकरणे कन्दलिकां[१] मयाऽभिहिता सा नरसुन्दरी, यदुत-वत्से ! यद्येवं ततो धीरा भव, मुञ्च विषादं, अवलम्बस्व साहसं, गच्छाम्यहं स्वयमेव वत्सस्य रिपुदारणस्य समीपे, करोमि तं तवानुकूलं, केवलं किं न विज्ञातं पूर्वमेव त्वयेदं यथा नितरां मानधनेश्वरो

१. कन्दलिकाम् पा.।

मदीयस्तनयो न विषयः प्रतिकूलभाषणस्य, तदिदानीमपि विज्ञातमाहात्म्ययाऽस्य त्वया न कदाचिदपि प्रतिकूलमाचरणीयं यावज्जीवं परमात्मेवायमाराधनीयः । ततश्चेदं मदीयवचनमाकर्ण्य सा बाला नरसुन्दरी विकसितेव कमलिनी, कुसुमितेव कुन्दलता, परिपाकबन्धुरेव मञ्जरी, मदसुन्दरेव करिणिका, जलसेकाप्यायितेव वल्लरी, पीतामृतरसेव नागप्रणयिनी, गतघनबन्धनेव चन्द्रलेखिका, सहचरमीलितेव चक्रवाकिका, क्षिप्तेव सुखामृतसागरे सर्वथा किमप्यनाख्येयं रसान्तरमनुभवन्ती शयनादुत्थाय निपतिता गाढं मम चरणयोः । अभिहितमनया–अम्ब ! महाप्रसादः, अनुगृहीताऽस्मि मन्दभाग्याऽहमनेन वचनेनाम्बया, तद्गच्छतु शीघ्रमम्बा, करोतु ममानुकूलमेकवारमार्यपुत्रं, ततो यदि पुनरयं जनस्तस्य प्रतिकूले वर्तमानः स्वप्नेऽपि विज्ञातः स्यादम्बया ततो यावज्जीवं न सम्भाषणीयो नापि द्रष्टव्यः पापात्मेति । मयाऽभिहितं–यद्येवं ततो गच्छामि । नरसुन्दरी प्राह–अम्ब ! महाप्रसादः । ततः समागताऽहमेषा वत्सस्य समीपे, तदयमत्र वत्स ! परमार्थः–

सा तु दन्दह्यते बाला, विदित्वा प्रतिकूलताम् ।
तवानुकूलतां मत्वा, प्रमोदमवगाहते ॥१॥
वल्लभेयं कुमारस्य, श्रुत्वेदममृतायते ।
अनिष्टेयं कुमारस्य, श्रुत्वेदं नारकायते ॥२॥
त्वदीयरोषनाम्नाऽपि, म्रियते सा तपस्विनी ।
सन्तोषमात्रनाम्नाऽपि, तावकीनेन जीवति ॥३॥
अतो यन्मुग्धया किञ्चिदपराद्धं तया तव ।
बालया प्रणयात्सर्वं, तद्वत्सः क्षन्तुमर्हति ॥४॥
प्रणतेषु दयावन्तो, दीनाभ्युद्धरणे रताः ।
सस्नेहार्पितचित्तेषु, दत्तप्राणा हि साधवः ॥५॥

मातुस्तिरस्कारः ।

ततश्चेदमम्बया नरसुन्दरीस्नेहसर्वस्वमुत्कीर्त्यमानमाकर्ण्य यावत्किलाहं स्नेह-निर्भरतया तां प्रति प्रगुणो भवामि तावच्छैलराजेन विरचिता कुटिलभ्रुकुटि-र्धूनितमुत्तमाङ्गं दत्तो मदीयहृदये विलेपनचर्चः । ततस्तस्याः सम्बन्धिनमपराधं संस्मृत्य जातो मम पुनश्चित्तावष्टम्भः । ततोऽभिहिता मयाऽम्बा यदुत–न कार्यं मम तया परिभवकारिण्या पापयेति । अम्बयाऽभिहितं–वत्स ! मा मैवं वोचः, क्षन्तव्यो मम लग्नाया वत्सेन तदीयोऽयमेको गुरुरप्यपराधः । ततः पतिता मच्चरणयोरम्बा । मयाऽभिहितम्–अपसर [illegible]वस्तुनिर्बन्धपरे ! मम

दृष्टिपथादपसर, न प्रयोजनं त्वयाऽपि मे, या त्वं मया निःसारितां तां दुरात्मिकां सङ्गृह्णासि, ततश्चरणाभ्यां प्रेरिता मयाऽम्बा। ततो भद्रेऽगृहीतसङ्केते! शैलराज-वशवर्तिना मया पापात्मना तथा तिरस्कृता सती लक्षयित्वा मदीयमनिवर्त-कमाग्रहविशेषं निराशा मुञ्चन्ती नयनसलिलं यथाऽऽगतमेव प्रतिगताऽम्बा। निवेदितो नरसुन्दर्यै व्यतिकरः, तमाकर्ण्य वज्रनिर्दलितेव मूर्च्छया निपतिताऽसौ भूतले सिक्ता चन्दनरसेन, समाश्वासिता तालवृन्तवायुना लब्धचेतना रोदितुमारब्धा।

विमलमालत्याऽभिहितं–पुत्रि! किं क्रियते? वज्रमयहृदयोऽसौ ते भर्ता तथापि मा रुदिहि, मुञ्च विषादं, साहसावष्टम्भेन कुरु तावदेकं त्वमुपायं, गच्छ स्वयमेव प्रियतमप्रसादनार्थं ततः स्वयं गतायाः प्रत्यागतहृदयः कदाचित्प्रसीदत्यसौ। यतो **मार्दवाध्यासितानि कामिहृदयानि भवन्ति**, अथ तथापि कृते न प्रसीदेत्ततः पश्चात्तापो न भविष्यति, यतः **सुपरिणामिते वल्लभके किलावरक्तको न भवतीति** लोकवार्ता।

नरसुन्दर्यागमः।

नरसुन्दरी प्राह–यदाज्ञापयत्यम्बा, ततश्चलिता सा मम तोषणार्थं, किमस्या-स्तत्र गतायाः सम्पद्यत इतिविमर्शेन लग्ना तदनुमार्गेणाम्बा, प्राप्ता मम पार्श्वे नरसुन्दरी, स्थिता द्वारदेशे विमलमालती।

नरसुन्दर्याऽभिहितम्–

नाथ! कान्त! प्रिय! स्वामिञ्जीवदायक! वल्लभ!
प्रसीद मन्दभाग्यायाः, प्रसीद नतवत्सल! ॥१॥
न पुनस्ते मनोदुःखं, करिष्येऽहं कदाचन।
त्वां विना शरणं नाथ!, नास्ति मे भुवनत्रये ॥२॥

एवं च वदन्ती बाष्पोदकबिन्दुवर्षिणा लोललोचनयुगलेन स्नपयन्ती मदीय-चरणद्वयं प्रणता नरसुन्दरी। मम तु तां तादृशीं पश्यतस्तदा कीदृशं हृदयं सम्पन्नम्? अपि च–स्नेहेन नरसुन्दर्या, भवत्युत्पलकोमलम्।
वीक्षितं शैलराजेन, शिलासङ्घातनिष्ठुरम् ॥१॥
नवनीतमिवाभाति, यावच्चिन्तयति प्रियाम्।
वज्राकारं पुनर्भाति, शैलराजवशीकृतम् ॥२॥
ततो दोलां समारूढं, तदा मामकमानसम्।
निश्चेतुं नैव शक्नोमि, किमत्र मम सुन्दरम् ॥३॥

तथापि मोहदोषेण, मया दीनाऽपि बालिका ।
शैलराजं प्रियं कृत्वा, भर्त्सिता नरसुन्दरी ॥४॥
कथम्-आः पापे ! गच्छ गच्छेति, वागाडम्बरमायया ।
न प्रतारयितुं शक्यस्त्वयाऽयं रिपुदारणः ॥५॥
कुशलाऽपि कलासूच्चैरन्येषां यदि वञ्चनम् ।
कर्तुं शक्ताऽसि नो जातु, मूर्खाणामपि मादृशाम् ॥६॥
यदाऽहं हसनस्थानं, सञ्जातस्त्वादृशामपि ।
तदा किं ते प्रलापेन ?, कीदृशी मम नाथता ॥७॥
इत्युक्त्वा स्तब्धसर्वाङ्गः, शून्यारण्ये मुनिर्यथा ।
स्थितोऽहं मौनमालम्ब्य, शैलराजेन चोदितः ॥८॥

ततः सा वराकी नरसुन्दरी विगलितविद्येवाम्बरचारिणी, परिभ्रष्टसमाधि-सामर्थ्येव योगिनी, तप्तस्थलनिक्षिप्तेव शफरिका, अवाप्तनष्टरत्ननिधानेव मूषिका, सर्वथा त्रुटिताशापाशबन्धना निपतिता महाशोकभरसागरे चिन्तयितुं प्रवृत्ता-किमिदानीं सर्वथा प्रियतमतिरस्कृताया मम जीवितेनेति ।

उद्बन्धनाय गतिः ।

ततो निर्गत्य भवनात् क्वचिद् गन्तुमारब्धा । ततः किमियं करोतीति विचिन्त्य सहित एव शैलराजेनालक्षितपादपातं लग्नोऽहं तदनुमार्गेण ।

इतश्च-लोकयन्निव निर्विण्णो, मदीयं दुष्टचेष्टितम् ।
अत्रान्तरे गतोऽन्यत्र, तदा क्षेत्रे दिवाकरः ॥१॥

ततः समुल्लसितमन्धकारं सञ्जाता विरलजनसञ्चारा राजमार्गाः, ततो गता सैकत्र शून्यगृहे नरसुन्दरी । इतश्चोद्गन्तुं प्रवृत्तः शशधरः, ततो मन्दमन्दप्रकाशे तामेव निरीक्षमाणः प्राप्तोऽहमपि तद्द्वारदेशे, स्थितो गोपायितेनात्मना । ततो नरसुन्दर्या विलोकितं दिक्चक्रवालं, इष्टकास्थलमारुह्योत्तरीयेण बद्धो मध्यवलये पाशकः, निर्मिता तत्र शिरोधरा । ततोऽभिहितमनया-भो भो लोकपालाः ! शृणुत यूयं, अथवा प्रत्यक्षमेवेदं दिव्यज्ञानिनां तत्रभवतां, यदुत-लब्धप्रसरतया नाथवादेन कलोपन्यासं कारितो मयाऽऽर्यपुत्रो न परिभवबुद्ध्या, तस्य तु तदेव मानपर्वता-रोहकारणं सम्पन्नमेवं च सर्वथा निराकृताऽहं तेन मन्दभाग्या । अत्रान्तरे मया चिन्तितं-नास्यास्तपस्विन्या ममोपरि परिभवबुद्धिः, किं तर्हि ? प्रणयमात्रमेवात्रा-पराध्यति, ततो न सुन्दरमनुष्ठितं मया, अधुनाऽपि वारयाम्येनामितोऽध्यवसायादिति

विचिन्त्य पाशकच्छेदार्थं यावच्चलामि तावदभिहितं नरसुन्दर्या, यदुत-तत्प्रतीच्छत भगवन्तो लोकपालाः साम्प्रतं मदीयप्राणान्, मा च मम जन्मान्तरेष्वपि पुनरेवंविधव्यतिकरो भूयादिति । ततः शैलराजेनाभिहितं-कुमार ! पश्य जन्मान्तरेऽपि त्वदीयसम्बन्धमेषा नाभिलषति, मया चिन्तितं-सत्यमिदं, तथाहि-इयं प्रस्तुतव्यतिकरनिषेधमाशास्ते, मदीयव्यतिकरश्चात्र प्रस्तुतः, तन्म्रियतां, किमनया मम पापया ? ततो लब्धप्रसरेण दत्तो मम हृदये शैलराजेन स्वविलेपनहस्तकः, स्थितोऽहं तस्य माहात्म्येन तां प्रति काष्ठवन्निष्ठितार्थः । ततः प्रवाहितो नरसुन्दर्यात्मा, पूरितः पाशको लम्बितुं प्रवृत्ता, निर्गते नयने, निरुद्धः श्वासमार्गः, वक्रीकृता ग्रीवा, आकृष्टं धमनीजालं, शिथिलितान्यङ्गानि, समसमायितं श्रोतोभिः, निर्वादितं वक्त्रकुहरं, विमुक्ता च सा प्राणैर्वराकी । इतश्च भवनान्निर्गच्छन्ती दृष्टाऽम्बया नरसुन्दरी, अहं तु तदनुयायी । चिन्तितमनया-नूनं भग्नप्रणयेयं रुष्टा क्वचिद् गच्छति मे वधूः, अयं पुनरस्या एव प्रसादनार्थं पृष्ठतो लग्नो मम पुत्रकः ।

विमलमालत्युद्बन्धनम् ।

ततो दूरं गतयोरावयोरनुमार्गेणागच्छन्ती समागताऽम्बापि तत्र शून्यगृहे । दृष्टा तथा लम्बमाना नरसुन्दरी । चिन्तितमम्बया-हा हा हताऽस्मि, नूनं मत्पुत्रकस्यापीयं वार्ता, कथमन्यथाऽस्यामेवं व्यवस्थितायां स तूष्णीमासीत्[१] ? मया तु शैलराजीयावलेपनदोषेणैव अवस्तुनिर्बन्धपरेयमिति कृता तदवधीरणा । ततः शोकभरान्धया मम पश्यत एव तथैव व्यापादितोऽम्बयाऽप्यात्मा । ततः साध्वससन्तापेनेव शुष्कं मनाङ् मे स्तब्धचित्ताभिधानं तत्तदा हृदयावलेपनं, गृहीतोऽहं पश्चात्तापेनाक्रान्तः शोकभरेण ।

ततः स्वाभाविकस्नेहविह्वलीभूतमानसः ।
क्षणं विधातुमारब्धः, प्रलापमतिदारुणम् ॥१॥

तथाऽप्यतिप्रौढतया निजमाहात्म्येन कृत एव मे शैलराजेन चित्तावष्टम्भः । चिन्तितं च मया-अये मनुष्यः कथं स्त्रीविनाशे रोदितीति । ततः स्थितोऽहं तूष्णींभावेन । इतश्च कन्दलिकया चिन्तितं-किमिति स्वामिनी नागच्छति ? तद्गच्छाम्यहं तदन्वेषणार्थं, ततः कुतश्चिन्निश्चित्य प्राप्ता साऽपि तं प्रदेशं, ततो दृष्टा विमलमालतीनरसुन्दर्यौ तथा लम्बमाने कृतस्तया हाहारवः, मिलितं सतातं नगरं, समुच्छलितः कोलाहलः, किमेतदिति पृष्टा कन्दलिका, निवेदितं तया सर्वं यथावृत्तम् ।

---

१. ०मासीत प्र. ।

जननिन्दा ।

अत्रान्तरे सम्पन्नः स्फुटतरश्चन्द्रालोकः, ततो दृष्टे तथैवोल्लम्बमाने सर्वलोके-नाम्बानरसुन्दर्यौ । विलोकितोऽहमपि स्वकर्मत्रस्ततया भग्नगतिप्रसरो नष्टवाणी-कस्तत्रैव लीनो वर्तमानश्छन्नप्रदेशे, जातः सम्प्रत्ययः, धिक्कारितोऽहं जनेन, कारितं तातेनाम्बानरसुन्दर्योर्मृतककार्यम् ।

ततस्तत्तादृशं वीक्ष्य, मदीयं कर्म दारुणम् ।
तातः शोकभराक्रान्तस्तदैवं चिन्तयत्यलम् ॥१॥
अहोऽनर्थपुञ्जोऽयमहो मे कुलदूषणः ।
अहो सर्वजघन्योऽयमहो पापिष्ठशेखरः ॥२॥
अहो सर्वापदां मूलमहो लोकपथातिगः ।
अहो वैरिकसङ्काशो, ममायं रिपुदारणः ॥३॥
न कार्यं मे ततोऽनेन, पुत्रेणापि दुरात्मना ।
एवं विचिन्त्य तातेन, कृतश्चित्ते विनिश्चयः ॥४॥
ततोऽवधीरितस्तेन, भवनाच्च बहिष्कृतः ।
भ्रष्टश्रीकः पुरे तत्र, विचरामि सुदुःखितः ॥५॥
स्वदुष्टचेष्टितेनैव, बालानामपि सर्वथा ।
गम्यश्चाहं तदा जातस्ततश्चैवं विगर्हितः ॥६॥
पापोऽयं दुष्टचेष्टोऽयमद्रष्टव्यो विमूढधीः ।
कुलकण्टकभूतोऽयं, सर्वथा विषपुञ्जकः ॥७॥
मानावलेपनाद् येन, कलाचार्योऽपकर्णितः ।
मूर्खचूडामणित्वेऽपि, पाण्डित्यं च प्रकाशितम् ॥८॥
माता च प्रियभार्या च, येन मानेन मारिता ।
को वा निरीक्षते पापं, तमेनं रिपुदारणम् ? ॥९॥
उक्तमेवेदमस्माभिर्नोचिताऽस्य दुरात्मनः ।
सा कलाकौशलादीनां, खानिर्या नरसुन्दरी ॥१०॥
ततश्च-वियुक्तो नरसुन्दर्या, यदयं तच्च सुन्दरम् ।
किं तु सा पद्मपत्राक्षी, यन्मृता तन्न सुन्दरम् ॥११॥
अहं पुनर्महामोहलुप्तसज्ज्ञानः स्वचेतसा ।
तदापि चिन्तयाम्येवं, भद्रे विमललोचने ! ॥१२॥

त्यक्तस्यापीह तातेन, निन्दितस्यापि दुर्जनैः ।
शैलराजमृषावादौ, तथापि मम बान्धवौ ॥१३॥
अनयोर्हि प्रसादेन, भुक्तपूर्वं मया फलम् ।
भोक्ष्ये च कालमासाद्य, पुनर्नास्त्यत्र संशयः ॥१४॥
ततश्चैवं जनेनोच्चैर्निन्द्यमानः क्षणे क्षणे ।
स्थितोऽहं भूरिवर्षाणि, दुःखसागरमध्यगः ॥१५॥
इतश्च-अत्यन्तदुर्बलीभूतः, सकोपो मयि निस्फुरः ।
स तु पुण्योदयो भद्रे ! स्थितोऽकिञ्चित्करस्तदा ॥१६॥
अथान्यदा क्वचिद्राजा, वाहनार्थं सुवाजिनाम् ।
वेष्टितो राजवृन्देन, निर्गतो नगराद्बहिः ॥१७॥
ततः कुतूहलाकृष्टः, सर्वो नागरको जनः ।
तत्रैव निर्गतोऽहं च, सम्प्राप्तस्तस्य मध्यगः ॥१८॥
अथ वाल्हीककाम्बोजतुरुष्कवरवाजिनः ।
वाहयित्वा भृशं राजा, राजलोकविलोकितः ॥१९॥
ततः खेदविनोदार्थमुद्यानं सुमनोहरम् ।
प्रविष्टः सह लोकेन, ललितं नाम शीतलम् ॥२०॥
तच्च कीदृशम् ?-अशोकनागपुन्नागतालहिन्तालराजितम् ।
प्रियङ्गुचम्पकाङ्कोल्लकदलीवनसुन्दरम् ॥२१॥
केतकीकुसुमामोदहृष्टालिकुलमालितम् ।
समस्तगुणसम्पूर्णं, सर्वथा नन्दनोपमम् ॥२२॥ युग्मम् ॥
तत्रैकदेशे विश्रम्य, स राजा नरवाहनः ।
उत्थाय सह सामन्तैर्लीलया हृष्टमानसः ॥२३॥

विचक्षणसूर्यागमनम् ।

प्रलोकयितुमारब्धः, कौतुकेन वनश्रियम् ।
विस्फारितेन नीलाब्जचारुणा लोलचक्षुषा ॥२४॥
तत्र च-सत्कान्तियुक्तनक्षत्रग्रहसङ्घातवेष्टितम् ।
प्रकाशितदिगाभोगं, साक्षादिव निशाकरम् ॥२५॥
रक्ताशोकतरुस्तोमपरिवारितविग्रहम् ।
यथेष्टफलदं साक्षाज्जङ्गमं कल्पपादपम् ॥२६॥

उन्नतं विबुधावासं, कुलशैलविवेष्टितम् ।
हेमावदातं सुखदं, सुमेरुमिव गत्वरम् ॥२७॥
कुवादिमत्तमातङ्गमदनिर्णाशकारणम् ।
वृतं सत्करिवृन्देन, निर्मदं गन्धवारणम् ॥२८॥
अथ साधूचिते देशे, रक्ताशोकतलस्थितम् ।
सत्साधुसङ्घमध्यस्थं, कुर्वाणं धर्मदेशनाम् ॥२९॥
शुभार्पितं यथा धन्यो, निधानं रत्नपूरितम् ।
विचक्षणाख्यमाचार्यं, स नरेन्द्रो व्यलोकयत् ॥३०॥ षड्भिः कुलकम् ॥
अथ तं तादृशं वीक्ष्य, सूरिं निर्मलमानसः ।
नरवाहनराजेन्द्रः, परं हर्षमुपागतः ॥३१॥
ततश्चित्ते कृतं तेन, नूनं नास्ति जगत्त्रये ।
ईदृशं नरमाणिक्यं, यादृशोऽयं तपोधनः ॥३२॥
निर्जितामरसौन्दर्या, निवेदयति वीक्षिता ।
अमुष्याकृतिरेवोच्चैर्गुणसम्भारगौरवम् ॥३३॥
तदीदृशस्य किं नाम, भवेद्वैराग्यकारणम् ? ।
येन यौवनसंस्थेन, खण्डितो मकरध्वजः ॥३४॥
अथवा-गत्वा प्रणम्य पादाब्जं, स्वयमेव महात्मनः ।
ततः पृच्छामि पूतात्मा, भवनिर्वेदकारणम् ॥३५॥
एवं विचिन्त्य गत्वाऽसौ, नत्वा सूरेः क्रमद्वयम् ।
दत्ताशीस्तेन हृष्टात्मा, निषण्णः शुद्धभूतले ॥३६॥
ततस्तदनुमार्गेण, राजवृन्दं तथा पुरम् ।
उपविष्टं यथास्थानं, नत्वाऽऽचार्याङ्घ्रिपङ्कजम् ॥३७॥
मया तु भद्रे ! पापेन, शैलराजवशात्मना ।
न नतं तादृशस्यापि, तदा सूरेः क्रमद्वयम् ॥३८॥
पाषाणभृतमुक्तोलीसन्निभो लोकपूरणः ।
केवलं स्तब्धसर्वाङ्गो, निषण्णोऽहं भुवस्तले ॥३९॥
अथ गम्भीरघोषेण, मेघवन्नीरपूरितः ।
धर्ममाख्यातुमारब्धः, स आचार्यो विचक्षणः ॥४०॥

अभिहितं च तेन भगवता, यदुत-"भो भो भव्याः ! प्रदीप्तभवनोदरकल्पोऽयं संसारविस्तारो, निवासः शरीरादिदुःखानां,न युक्त इह विदुषः प्रमादः, अति-

दुर्लभेयं मानुषावस्था, प्रधानं परलोकसाधनं, परिणामकटवो विषयाः, विप्रयोगान्तानि सत्सङ्गतानि, पातभयातुरमविज्ञातपातमायुः, तदेवं व्यवस्थिते विध्यापनेऽस्य संसारप्रदीपनकस्य यत्नः कर्तव्यः, तस्य च हेतुः सिद्धान्तवासनासारो धर्ममेघः, अतः स्वीकर्तव्यः सिद्धान्तः, सम्यक् सेवितव्यास्तदभिज्ञाः, भावनीयं मुण्डमालिकोपमानं, त्यक्तव्या खल्वसदपेक्षा, भवितव्यमाज्ञाप्रधानेन, उपादेयं प्रणिधानं, पोषणीयं सत्साधुसेवया, रक्षणीयं प्रवचनमालिन्यम् । एतच्च विधिप्रवृत्तः सम्पादयति, अतः सर्वत्र विधिना प्रवर्तितव्यं सूत्रानुसारेण, प्रत्यभिज्ञातव्यमात्मस्वरूपं, प्रवृत्तावपेक्षितव्यानि निमित्तानि, यतितव्यमसम्पन्नयोगेषु, लक्षयितव्या विस्रोतसिका, प्रतिविधेयमनागतमस्याः, भवत्येवं प्रवर्तमानानां सोपक्रमकर्मविलयः, विच्छिद्यते निरुपक्रमकर्मानुबन्धः, तस्मादत्रैव यतध्वं यूयमि"ति ॥ एवं च निवेदिते तेन भगवता विचक्षणसूरिणाऽस्याः परिषदो मध्ये केषाञ्चिद्भव्यानामुल्लसितश्चरणपरिणामः, अपरेषां सञ्जातो देशविरतिक्षयोपशमः, अन्यैः पुनर्विदलितं मिथ्यात्वं, अपरेषां प्रतनूभूता रागादयः, केषाञ्चित्सम्पन्नो भद्रकभावः । ततो निपतितास्ते सर्वेऽपि भगवच्चरणयोः, अभिहितमेतैः–'इच्छामोऽनुशास्तिं, कुर्मो यदाज्ञापयन्ति नाथाः ।'

रसनाविपाकदेशना ।

अत्रान्तरे चिन्तितं तातेन, यदुत–प्रश्नयाम्यधुना तदहमात्मविवक्षितं, ततो ललाटतटविन्यस्तकरमुकुलितेनाभिहितमनेन–

जनातिशायिरूपाणां जगदैश्वर्यभागिनाम् ।
भदन्त ! तत्रभवतां, किं वो वैराग्यकारणम् ॥१॥
सूरिणाऽभिहितम् भूप ! यद्यत्र तव कौतुकम् ।
ततस्ते कथयाम्येष, भवनिर्वेदकारणम् ॥२॥
किं तु–**आत्मस्तुतिः परनिन्दा, पूर्वक्रीडितकीर्तनम् ।**
विरुद्धमेतद्राजेन्द्र ! साधूनां त्रयमप्यलम् ॥३॥
ममात्मचरिते चैतत्कथ्यमाने परिस्फुटम् ।
त्रयं सम्पद्यते तेन, न युक्तं तस्य कीर्तनम् ॥४॥
तातेनाभिहितम्–एवं निगदता नाथ ! वर्धितं कौतुकं त्वया ।
कर्तव्योऽतः प्रसादो मे, निवेद्यं चरितं निजम् ॥५॥
ततो विज्ञाय निर्बन्धं, मध्यस्थेनान्तरात्मना ।
प्रबोधकारणं ज्ञात्वा, सूरिरित्थमवोचत ॥६॥

यदुत–अनादिनिधनं लोके, नानावृत्तान्तसङ्कुलम् ।
विद्यते भूतलं नाम, नगरं सुमनोहरम् ॥७॥
तत्रास्ति भुवनख्यातो, देवानामपि नायकः ।
अलङ्घ्यसत्प्रतापाज्ञो, नरेन्द्रो मलसञ्चयः ॥८॥
सुन्दरासुन्दरे कार्ये, नित्यं विन्यस्तमानसा ।
तस्य चास्ति महादेवी, तत्पक्तिर्नाम विश्रुता ॥९॥
तयोश्च देवीनृपयोरेकः सुन्दरचेष्टितः ।
विद्यते जगदाह्लादी, पुत्रो नाम शुभोदयः ॥१०॥
तथा द्वितीयस्तनयस्तयोर्देवीनरेन्द्रयोः ।
अस्ति सर्वजनोत्तापी, विख्यातश्चाशुभोदयः ॥११॥
स्वभर्तुर्वत्सला साध्वी, सुन्दराङ्गी जनप्रिया ।
भार्या शुभोदयस्यास्ति, पद्माक्षी निजचारुता ॥१२॥
तथाऽशुभोदयस्यापि, जनसन्तापकारिणी ।
भार्या स्वयोग्यता नाम, विद्यतेऽत्यन्तदारुणा ॥१३॥

विचक्षणजडवृत्तान्तः ।

इतश्च कालपर्यायादवाप्य निजचारुताम् ।
ततः शुभोदयाज्जातः पुत्रो नाम्ना विचक्षणः ॥१४॥
तथैव कालपर्यायादवाप्यैव स्वयोग्यताम् ।
ततोऽशुभोदयाज्जातो, जडो नाम सुताधमः ॥१५॥
तयोर्विचक्षणस्तावद्वर्धमानः प्रतिक्षणम् ।
यादृशः स्वैर्गुणैर्जातस्तदिदानीं निबोधत ॥१६॥
"मार्गानुसारिविज्ञानः, पूजको गुरुसंहतेः ।
मेधावी प्रगुणो दक्षो, लब्धलक्ष्यो जितेन्द्रियः ॥१७॥
सदाचारपरो धीरः, सद्भोगी दृढसौहृदः ।
देवाभिपूजको दाता, ज्ञाता स्वपरचेतसाम् ॥१८॥
सत्यवादी विनीतात्मा, प्रणयागतवत्सलः ।
क्षमाप्रधानो मध्यस्थः, सत्त्वानां कल्पपादपः ॥१९॥
धर्मैकनिष्ठः शुद्धात्मा, व्यसनेऽप्यविषण्णधीः ।
स्थानमानान्तराभिज्ञः, कुत्सिताग्रहवर्जितः ॥२०॥

समस्तशास्त्रतत्त्वज्ञो, वाचि पाटवसङ्गतः ।
नीतिमार्गप्रवीणत्वात्, त्रासकः शत्रुसंहतेः ॥२१॥
स्वगुणोत्सेकहीनात्मा, विमुक्तः परनिन्दया ।
अहृष्टः सम्पदां लाभे, परार्थं च विनिर्मितः" ॥२२॥
किं चेह बहुनोक्तेन ?, यावन्तः पुरुषे गुणाः ।
गीयन्ते तेऽखिलास्तत्र, प्रादुर्भूता विचक्षणे ॥२३॥
अथ संवर्धमानोऽसौ, शरीरेण प्रतिक्षणम् ।
जडस्तु यादृक् सम्पन्नस्तदिदानीं निबोधत ॥२४॥
"विपर्यस्तमनाः सत्यशौचसन्तोषवर्जितः ।
मायावी पिशुनः क्लीबो, निन्दकः साधुसंहतेः ॥२५॥
असत्यसन्धः पापात्मा, गुरुदेवविडम्बकः ।
असत्प्रलापो लोभान्धः, परेषां चित्तभेदकः ॥२६॥
अन्यच्चित्ते वदत्यन्यच्चेष्टते क्रिययाऽपरम् ।
दह्यते परसम्पत्सु, परापत्सु प्रमोदते ॥२७॥
गर्वाध्मातः सदा क्रुद्धः, सर्वेषां भषणप्रियः ।
आत्मश्लाघापरो नित्यं, रागद्वेषवशानुगः" ॥२८॥
किं चात्र बहुनोक्तेन ? ये ये दोषाः सुदुर्जने ।
गीयन्ते तेऽखिलास्तत्र, प्रादुर्भूतास्ततो जडे ॥२९॥
एवं च वर्धमानौ तौ, स्वगेहे सुखलालितौ ।
विचक्षणजडौ प्राप्तौ, यौवनं परिपाटितः ॥३०॥
इतश्च गुणरत्नामुत्पत्तिस्थानमुत्तमम् ।
पुरं निर्मलचित्ताह्वं, विद्यते लोकविश्रुतम् ॥३१॥
तत्रान्तरङ्गे नगरे, नृपो नाम्ना मलक्षयः ।
अस्ति सद्गुणरत्नानां, जनकः पालकश्च सः ॥३२॥
तस्य सुन्दरता नाम, महादेवी मनःप्रिया ।
विद्यते चारुसर्वाङ्गी, सा तद्रत्नविवर्धिका ॥३३॥

बुद्ध्युत्पत्तिः ।

ताभ्यां च कालपर्यायाज्जाता पद्मदलेक्षणा ।
बुद्धिर्नाम गुणैराढ्या, कन्यका कुलवर्धनी ॥३४॥

ततः सा गुणरूपाभ्यामनुरूपं विचक्षणम् ।
विचिन्त्य प्रहिता बाला, ताभ्यां तस्य स्वयंवरा ॥३५॥
परिणीता च सा तेन, महाभूतिप्रमोदतः ।
विचक्षणेन सत्कन्या, जाता च मनसः प्रिया ॥३६॥
तया युक्तस्य तस्योच्चैर्भुञ्जानस्य मनःसुखम् ।
विचक्षणस्य गच्छन्ति, दिनानि शुभकर्मणा ॥३७॥
अथान्यदा क्वचिद्बुद्धेर्वार्तान्वेषणकाम्यया ।
मलक्षयेण प्रहितो, विमर्शो निजपुत्रकः ॥३८॥
स च बुद्धौ दृढस्नेहभावभावितमानसः ।
तस्या एव समीपस्थः, सद्भगिन्याः स्थितो मुदा ॥३९॥
सहोदरसमायुक्ता, भर्त्रा च बहुमानिता ।
ततः सा चित्तनिर्वाणाद्गर्भं गृह्णाति बालिका ॥४०॥

प्रकर्षोत्पत्तिः ।

अथ तस्याः शुभे काले, सद्गर्भपरिपाकतः ।
जातो देदीप्यमानाङ्गः, प्रकर्षो नाम दारकः ॥४१॥
जातः संवर्धमानोऽसौ, प्रकर्षो बुद्धिनन्दनः ।
विचक्षणगुणैस्तुल्यो, विमर्शस्यातिवल्लभः ॥४२॥
अथान्यदा स्वकं दृष्टं, काननं सुमनोहरम् ।
विचक्षणजडाभ्यां भो ! नाम्ना वदनकोटरम् ॥४३॥
तत्र खादनपानेन, ललमानौ यथेच्छया ।
तौ द्वावपि स्थितौ कञ्चित्कालं सन्तुष्टमानसौ ॥४४॥
तत्र कुन्दसमाः शुभ्रा, रदनाः सन्ति वृक्षकाः ।
तेषां च वीथिकायुग्मं, ताभ्यां दृष्टं मनोहरम् ॥४५॥
ततः कुतूहलेनान्तः, प्रविश्य प्रविलोकितम् ।
तत्र चालब्धपर्यन्तं, दृष्टं ताभ्यां महाबिलम् ॥४६॥
ततो विस्फारिताक्षाभ्यां, कौतुकेन सविस्मयम् ।
विचक्षणजडाभ्यां तत्, सुचिरं संनिरीक्षितम् ॥४७॥

रसनालोलताभ्यां सङ्गः ।

अथ तस्मात्समुद्भूता, रक्तवर्णा मनोहरा ।
दासचेट्या समं काचिल्ललना चारुविग्रहा ॥४८॥

तां वीक्ष्य स जडश्चित्ते, परं हर्षमुपागतः ।
ततश्च चिन्तयत्येवं, विपर्यासितमानसः ॥४९॥
अहो अपूर्विका योषिदहो सुन्दरदर्शना ।
अहो संस्थानमेतस्या, अहो रूपमहो गुणाः ॥५०॥
किमेषा नाकतो मुग्धा, भ्रष्टा स्यादमराङ्गना ? ।
किं वा पातालतो बाला, नागकन्या विनिर्गता ? ॥५१॥
अथवा नहि नहि सुष्ठु मया चिन्तितम्-
यतः-स्वर्गे वा नागलोके वा, कुतः स्यादियमीदृशी ? ।
मर्त्ये च दूरतोऽपास्ता, वार्ताऽपीदृक्षयोषितः ॥५२॥
तन्नूनं विधिना मह्यं, परितुष्टेन कल्पिता ।
निर्माप्येयं प्रयत्नेन, सुन्दरैः परमाणुभिः ॥५३॥
अन्यच्च-नूनं पुरुषहीनेयं, मदर्थं विहिता वने ।
यतो मां वीक्षते बाला, लोलदृष्टिर्मुहुर्मुहुः ॥५४॥
गत्वा समीपमेतस्याः, कृत्वा चित्तपरीक्षणम् ।
ततः करोमि स्वीकारं, किं ममान्येन चेतसा ॥५५॥
इतश्च-विचक्षणश्च तां दृष्ट्वा, ललनां ललिताननाम् ।
ततश्चेतसि सम्पन्नो, वितर्कोऽयं महात्मनः ॥५६॥
एकाकिनी वने योषा, परकीया मनोरमा ।
न द्रष्टुं युज्यते रागान्नापि सम्भाषणोचिता ॥५७॥
यतः सन्मार्गरक्तानां, व्रतमेतन्महात्मनाम् ।
परस्त्रियं पुरो दृष्ट्वा, यान्त्यधोमुखदृष्टयः ॥५८॥
अतो व्रजाम्यतः स्थानात्किं ममापरचिन्तया ? ।
ततो गन्तुं प्रवृत्तोऽसौ, हस्तेनाकृष्य तं जडम् ॥५९॥
तेन चाकृष्यमाणोऽसौ, कथञ्चिद्विलिना जडः ।
हृतसर्वस्ववन्मोहात्परं दुःखमुपागतः ॥६०॥
यावत्तौ गच्छतः स्तोकं, भूभागं राजपुत्रकौ ।
तावत्सानुचरी तस्याः, पश्चाल्लना समागता ॥६१॥

तया च दूरत एव विहितः पूत्कारः, यदुत-त्रायध्वं भो नाथास्त्रायध्वं, हा हताऽस्मि मन्दभागिनी, ततो वलितस्तदभिमुखं जडः । तेनाभिहितं-सुन्दरि ! मा भैषीः, कथय कुतस्ते भयमिति । तयाऽभिहितं-यद्भवन्तौ मम स्वामिनीं विमुच्य

चलितौ तेनैषा जातमूर्च्छा म्रियते लग्नाऽधुना, तस्माद् देवौ ! तावत्समीपे स्थीयतां भवद्भ्यामेतस्या येन युष्मत्सन्निधानेन मनाक्-स्वस्थीभूतायां स्वामिन्यां ततोऽहं निराकुला सती भवतोरेतत्स्वरूपं समस्तं विज्ञपयामि । ततो जडेनाभिहितो विचक्षणः-भ्रातर्गम्यतामेतत्स्वामिनीसमीपे, भवतु सा स्वस्था, विज्ञपयत्वेषा यथाविवक्षितं, को दोषः ? विचक्षणेन चिन्तितं-न सुन्दरमिदं, इयं हि वष्टा चेटी तरला स्वभावेन प्रतारयिष्यति नूनमस्मान्, अथवा पश्यामि तावत्किमेषा तत्र गता जल्पति ? न चाहमनया प्रतारयितुं शक्यः, तस्माद्गच्छामि, काऽत्र मम शङ्का ? एवं विचिन्त्याभिहितं विचक्षणेन-भ्रातरेवं भवतु । ततो गतौ पश्चान्मुखौ विचक्षण-जडौ, प्राप्तौ तत्समीपे, स्वस्थीभूता ललना, निपतिता दासचेटी तयोश्चरणेषु । अभिहितमनया-महाप्रसादः, अनुगृहीताऽस्मि युवाभ्यां, जीविता स्वामिनी, दत्तं मे जीवितम् । जडेनाभिहितं-सुन्दरि ! किंनामिकेयं तव स्वामिनी ? चेट्याऽभिहितं-देव ! सुगृहीतनामधेया रसनेयमभिधीयते । जडेनाभिहितं-भवतीं किंनामिकामवगच्छामि ? ततः सलज्जमभिहितमनया-देव ! लोलताऽहं प्रसिद्धा लोके, चिरपरिचिताऽपि विस्मृताऽधुना देवस्य, तत्किमहं करोमि मन्दभागिनीति । जडेनाभिहितं-भद्रे ! कथं मम त्वं चिरपरिचिताऽसि ? लोलतयाऽभिहितम्-इदमेवास्माभिर्विज्ञपनीयम् । जडः प्राह-विज्ञपयतु भवती । लोलतयोक्तं-अस्ति तावदेषा मम स्वामिनी परमयोगिनी, जानात्येवातीतानागतं, अहमपि तस्याः प्रसादादेवंविधैव ।

पूर्वसाङ्गत्यम् ।

इतश्च कर्मपरिणाममहाराजभुक्तौ स्थितमस्त्यसंव्यवहारनगरं, तत्र कदाचिद्भ-वतोरवस्थानमासीत्, ततः कर्मपरिणामादेशेनैवायातौ भवन्तावेकाक्षनिवासपुरे, ततोऽप्यागतौ विकलाक्षनिवासे, तत्र त्रयः पाटका विद्यन्ते, तत्र प्रथमे द्विहृषीका-भिधानाः, कुलपुत्रकाः प्रतिवसन्ति, ततस्तेषां मध्ये वर्तमानाभ्यां युवाभ्यां यथा-निर्देशकारितया प्रसन्नेन कर्मपरिणाममहानरेन्द्रेण भटभुक्त्या दत्तमिदं वदनकोटरं काननं, एतच्च स्वाभाविकमेवात्र सर्वदा विद्यत एव महाबिलं, इयं च सर्वाप्यस्मदुत्पत्तेः पूर्विका वार्ता । ततो विधिना चिन्तितं-गृहिणीरहिताविमौ वराकौ न सुखेन तिष्ठतः, अतः करोम्यनयोर्गृहिणीमिति । ततस्तेन भगवता विधात्रा दयापरीतचेतसा युवयोर्निमित्तमत्रैव महाबिले निर्वर्तितैषा मे स्वामिनी, तथाऽहं चास्या एवानुचरीति । जडेन चिन्तितम्-अये ! यथा मया विकल्पितं तथैवेदं सम्पन्नम्, अस्मदर्थमेवेयं रसना निष्पादिता वेधसा, अहो मे प्रज्ञातिशयः । विचक्षणेन

चिन्तितं-कः पुनरयं विधिर्नाम ?, हुं ज्ञातं, स एव कर्मपरिणामो भविष्यति, कस्यान्यस्येदृशी शक्तिरिति । जडः प्राह-भद्रे ! ततस्ततः, लोलतयोक्तं-ततः प्रभृत्येषा मे स्वामिनी युक्ता मया युवाभ्यां सह खादन्ती नानाविधानि खाद्यकानि, पिबन्ती विविधरसोपेतानि पानकानि, ललमाना यथेष्टचेष्टया तत्रैव विकलाक्षनिवासे नगरे त्रिष्वपि पाटकेषु तथा पञ्चाक्षनिवासे मनुजगतौ अन्येषु च तथाविधेषु स्थानेषु विचरिता भूयांसं कालम्, अत एव क्षणमप्येषा युष्मद्विरहं न विषहते, युष्मदवधीरणया चागतमूर्च्छा म्रियते स्वामिनी । तदेवमहं भवतोश्चिरपरिचिताऽस्मि ।

रसनालोलतास्वीकारः ।

एतच्चाकर्ण्य 'सिद्धं नः समीहितम्' इति भावनया परितुष्टो जडः । ततोऽभिहितमनेन-सुन्दरि ! यद्येवं प्रविशतु तव स्वामिनी नगरे, पवित्रयत्वेकं स्वावस्थानेन महाप्रासादं, येन पुनस्तत्र चिरन्तनस्थित्या सुखमास्महे । लोलतयाऽभिहितं-मा मैवमाज्ञापयतु देवः, न निर्गतेयं स्वामिनी कदाचिदपीतः काननात्, पूर्वमपीयमत्रैव वर्तमाना युवाभ्यां सह ललिता, तदधुनाऽप्यस्मिन्नेव स्थाने तिष्ठन्ती लालयितुं युज्यते स्वामिनी । जडः प्राह-यद्भवती जानीते तदेव क्रियते, सर्वथा त्वमेवात्र प्रमाणं, कथनीयं यद्रोचते तव स्वामिन्यै येन सम्पादयामः । लोलतयोक्तं-महाप्रसादः, किमत्रापरमुच्यतां, अनुभवतु भवतोः स्वामिनी लालनेन सुखामृतमविच्छेदेनेति ।

पालनं तयोः ।

एवं च स्थापिते सिद्धान्ते-तत आरभ्य यत्नेन, जडो वदनकोटरे ।
तिष्ठन्तीं रसनां नित्यं, लालयत्येव मोहतः ॥१॥
कथम् ?-क्षीरेक्षुशर्कराखण्डदधिसर्पिर्गुडादिभिः ।
पक्वान्नखाद्यकैर्दिव्यैर्द्राक्षादिवरपानकैः ॥२॥
मद्यैर्मांसरसैश्चित्रैर्मधुभिश्च विशेषतः ।
ये चान्ये लोकविख्याता, रसास्तैश्च दिने दिने ॥३॥
एवं लालयतस्तस्य, जडस्य रसनां सदा ।
यदि क्षूणं भवेत्तच्च, कथयत्येव लोलता ॥४॥
यतः सानुदिनं वक्ति, स्वामिनी मधुरप्रिया ।
मांसमाहर मद्यं च, नाथ ! मृष्टं च भोजनम् ॥५॥
ददस्व व्यञ्जनान्यस्यै, रोचन्ते तानि सर्वदा ।
तत्सर्वं स करोत्येव, मन्वानोऽनुग्रहं जडः ॥६॥

सततं लालनासक्तो, भार्यायाः प्रतिवासरम् ।
क्लेशराशिनिमग्नोऽपि, मोहादेवं च मन्यते ॥७॥
यदुत-धन्योऽहं कृतकृत्योऽहमहो मे सुखसागरः ।
यस्येदृशी शुभा भार्या, सम्पन्ना पुण्यकर्मणः ॥८॥
नास्ति नूनं मया सदृक्, सुखितो भुवनत्रये ।
यतोऽस्या लालनां मुक्त्वा, किं नाम भुवने सुखम् ? ॥९॥
यतोऽलीकसुखास्वादपरिमोहितचेतनः ।
तदर्थं नास्ति तत्कर्म, यदसौ नानुचेष्टते ॥१०॥
तं भार्यालालनोद्युक्तं, तथा दृष्ट्वाऽखिलो जनः ।
जडं हसितुमारब्धः, सत्यमेष जडो जडः ॥११॥
यतो धर्मार्थमोक्षेभ्यो, विमुखः पशुसन्निभः ।
रसनालालनोद्युक्तो, न चेतयति किञ्चन ॥१२॥

लोकनिन्दा ।

जडस्तु तत्र गृद्धात्मा, लोकैरेवं सहस्रशः ।
हसितो निन्दितश्चापि, न कथञ्चिन्निवर्तते ॥१३॥
विचक्षणस्तु तच्छ्रुत्वा, लोलतायाः प्रभाषितम् ।
ततश्च चिन्तयत्येवं, तदा मध्यस्थमानसः ॥१४॥
अस्ति तावदियं भार्या, मम नास्त्यत्र संशयः ।
आस्माके दृश्यते येन, वने वदनकोटरे ॥१५॥
केवलं यदियं वक्ति, रसनालालनं प्रति ।
अपरीक्ष्य न कर्तव्यं, तन्मया सुपरिस्फुटम् ॥१६॥
यतः स्त्रीवचनादेव, यो मूढात्मा प्रवर्तते ।
कार्यतत्त्वमविज्ञाय, तेनानर्थो न दुर्लभः ॥१७॥
ततोऽनादरतः किञ्चिल्लौ[1]लतायाचने सति ।
दत्त्वा खाद्यादिकं तावत्कुर्महे कालयापनाम् ॥१८॥
ततश्च-भार्येयं पालनीयेति, मत्वा रागविवर्जितः ।
ददानः शुद्धमाहारं, लोलतां च निवारयन् ॥१९॥
अविश्रब्धमनास्तस्यां, लोकयात्रानुरोधतः ।
अनिन्दितेन मार्गेण, रसनामनुवर्तयन् ॥२०॥

१. लोलता० पा. ।

धर्मार्थकामसम्पन्नो, विद्वद्भिः परिपूजितः ।
स्थितो विचक्षणः कालं, कियन्तमपि लीलया ॥२१॥ युग्मम् ॥
तं च तेजस्विनं मत्वा, निरीहं च विचक्षणम् ।
भावज्ञा किञ्चिदप्येनं, याचते नैव लोलता ॥२२॥
स लोलताविनिर्मुक्तो, रसनां पालयन्नपि ।
अशेषक्लेशहीनात्मा, सुखमास्ते विचक्षणः ॥२३॥
यतः-ये जाता ये जनिष्यन्ते, जडस्येह दुरात्मनः ।
रसनालालने दोषा, लोलता तत्र कारणम् ॥२४॥

विचक्षणस्योपेक्षा ।

विचक्षणेन सा यस्माल्लोलताऽलं निराकृता ।
रसनापालनेऽप्यस्य, ततोऽनर्थो न जायते ॥२५॥
इतश्च तुष्टचित्तेन, जडेनाम्बा स्वयोग्यता ।
ज्ञापिता रसनालाभं, जनकश्चाशुभोदयः ॥२६॥

मातापितृज्ञापनम् ।

तयोरपि मनस्तोषस्तच्छुत्वा समपद्यत ।
ततस्ताभ्यां जडः प्रोक्तः, स्नेहापूर्णेन चेतसा ॥२७॥
पुत्रानुरूपा ते भार्या, सम्पन्ना पुण्यकर्मणा ।
सुन्दरं च त्वयाऽऽरब्धं, यदस्याः पुत्र ! लालनम् ॥२८॥
इयं हि सुखहेतुस्ते, सुभार्येयं वरानना ।
ततो लालयितुं युक्ता, पुत्र ! रात्रिन्दिवं त्वया ॥२९॥
ततश्च-स्वयमेव प्रवृत्तोऽसौ, जनकाभ्यां च चोदितः ।
एकं सोन्माथिता बाला, मयूरैर्लपितं तथा ॥३०॥
ततो गाढतरं रक्तो, रसनायां जडस्तदा ।
तल्लालनार्थं मूढात्मा, सहतेऽसौ विडम्बनाः ॥३१॥
इतो विचक्षणेनापि, स्वीयस्तातः शुभोदयः ।
ज्ञापितो रसनालाभं, माता च निजचारुता ॥३२॥
तथा बुद्धिप्रकर्षौ च, विमर्शश्च विशेषतः ।
बोधितो रसनावार्सि, मिलितं च कुटुम्बकम् ॥३३॥
ततः शुभोदयेनोक्तं, वत्स ! किं ते प्रकथ्यते ? ।
जानासि वस्तुनस्तत्त्वं, सत्योऽसि त्वं विचक्षणः ॥३४॥

तथापि ते प्रकृत्यैव, यन्ममोपरि गौरवम् ।
तेन प्रचोदितो वत्स ! तवाहमुपदेशने ॥३५॥

नारीदोषाः ।

"वत्स ! तावत्समस्तापि, नारी पवनचञ्चला ।
क्षणरक्तविरक्ता च, सन्ध्याभ्रालीव वर्तते ॥३६॥
नदीव पर्वतोद्भूता, प्रकृत्या नीचगामिनी ।
दर्पणार्पितदुर्ग्राह्यवदनप्रतिमोपमा ॥३७॥
बहुकौटिल्यनागानां, संस्थापनकरण्डिका ।
कालकूटविषस्योच्चैर्लतेव मरणप्रदा ॥३८॥
नरकानलसन्तापदायिकेयमुदाहृता ।
मोक्षप्रापकसद्ध्यानशत्रुभूता च वर्तते ॥३९॥
कार्यं सञ्चिन्तयत्यन्यद्भाषतेऽन्यच्च मायया ।
करोत्यन्यच्च सा पुंसः, शुद्धशीला च भासते ॥४०॥
ऐन्द्रजालिकविद्येव, दृष्टेराच्छादकारिका ।
नरचित्तजतुद्रावकारिणी वह्निपिण्डवत् ॥४१॥
प्रकृत्यैव च सर्वेषां, वैमनस्यविधायिनी ।
संसारचक्रविभ्रान्तिहेतुर्नारी बुधैर्मता ॥४२॥
पुंभिरास्वादितं दिव्यं, विवेकामृतभोजनम् ।
क्षुद्रेव वामयत्येषा, भुज्यमाना न संशयः ॥४३॥
अनृतं साहसं माया, नैर्लज्ज्यमतिलोभिता ।
निर्दयत्वमशौचं च, नार्याः स्वाभाविका गुणाः ॥४४॥
वत्स ! किं बहुनोक्तेन ?, ये केचिद्दोषसञ्चयाः ।
ते नारीभाण्डशालायामाकालं सुप्रतिष्ठिताः" ॥४५॥
तस्मात्तस्याः सदा पुंसा, न कर्तव्यो हितैषिणा ।
विश्रम्भवशगो ह्यात्मा, तेनेदमभिधीयते ॥४६॥
येयं ते रसना भार्या, सम्पन्ना लोलतायुता ।
न सुन्दरैषा मे भाति, को वा योगस्तवानया ? ॥४७॥
यतो न ज्ञायतेऽद्यापि, कुतस्त्येयं ततस्त्वया ।
सङ्ग्रहं कुर्वताऽमुष्या, मूलशुद्धिः परीक्ष्यताम् ॥४८॥

यतः-अत्यन्तमप्रमत्तोऽपि, मूलशुद्धेरवेदकः ।
स्त्रीणामर्पितसद्भावः, प्रयाति निधनं नरः ॥४९॥

ततो निजचारुतयाऽभिहितं-वत्स विचक्षण ! सुन्दरं ते जनकेन मन्त्रितम्, अन्विष्यतामस्या रसनाया मूलशुद्धिः, को दोषः ? विज्ञातकुलशीलस्वरूपा हि सुखतरमनुवर्तनीया भविष्यति, बुद्ध्याऽभिहितम्-आर्यपुत्र ! यद्गुरू आज्ञापयतस्त-देवानुष्ठातुं युक्तमार्यपुत्रस्य, **अलङ्घनीयवाक्या हि गुरवः सत्पुरुषाणां भवन्ति ।**

रसनामूलशुद्धये विमर्शप्रकर्षगमनम् ।

प्रकर्षः प्राह-तात ! सुन्दरमम्बया जल्पितम् । विमर्शेनोक्तं-को वाऽत्रा-सुन्दरं वक्तुं जानीते ? **सर्वथा सुन्दरमेवेदं यत्सुपरीक्षितं क्रियत इति ।** विचक्षणेन चिन्तितं-सुन्दरमेतानि मन्त्रयन्ति, न सङ्ग्रहणीयैव विदुषा पुरुषेणा-विज्ञातकुलशीलाचारा ललना, केवलं कथितमेव मम लोलतया रसनायाः सम्बन्धि मूलोत्थानं, विज्ञातश्चाधुना मया शीलाचारो, यदुत-खादनपानप्रियेयं रसना । अथवा नहि नहि, को हि सकर्णकः पुरुषो भुजङ्गवनितागतिकुटिलत-रचित्तवृत्तेः कुलयोषितोऽपि वचने सम्प्रत्ययं कुर्यात् ? किं पुनर्दासचेट्यः ?, तत्कीदृशो मम लोलतावचने सम्प्रत्ययः ? शीलाचारोऽपि सहसंवासेन भूयसा च कालेन सम्यग् विज्ञायते, न यथाकथञ्चित्, तत्किमनेन बहुना ? करोमि तावदहं तातादीनामुपदेशं, गवेषयाम्यस्या रसनाया मूलशुद्धिम् । ततो विज्ञाय यथोचितं करिष्यामीति विचिन्त्य विचक्षणेनाभिहितं-यदाज्ञापयति तातः, केवलं तातः स्वयमेव निरूपयतु, कः पुनरत्र रसनामूलशुद्धिगवेषणार्थं प्रस्थापनायोग्य इति । शुभोदयेनोक्तं-वत्स ! अयं विमर्शः परमरूपकार्यभरस्य निर्वाहणक्षमः । तथाहि-

"युक्तं चायुक्तवद्भाति, सारं चासारमुच्चकैः ।
अयुक्तं युक्तवद्भाति, विमर्शेन विना जने ॥१॥
तस्य हेयमुपादेयमुपादेयं च हेयताम् ।
भजेत वस्तु यस्यायं, विमर्शो नानुकूलकः ॥२॥
अत्यन्तगहने कार्ये, मतिभेदतिरोहिते ।
विमर्शः कुरुते नृणामेकपक्षं विवेचितम् ॥३॥
किञ्च-नरस्य नार्या देशस्य, राज्यस्य नृपतेस्तथा ।
रत्नानां लोकधर्माणां, सर्वस्य भुवनस्य वा ॥४॥
देवानां सर्वशास्त्राणां, धर्माधर्मव्यवस्थितेः ।
विमर्शोऽयं विजानीते, तत्त्वं नान्यो जगत्त्रये ॥५॥

येषामेष महाप्राज्ञो, वत्स ! निर्देशकारकः ।
ते ज्ञातसर्वतत्त्वार्था, जायन्ते सुखभाजनम्" ॥६॥
अतो धन्योऽसि यस्यायं, विमर्शस्तव बान्धवः ।
न कदाचिदधन्यानां, चिन्तारत्नेन मीलकः ॥७॥
एष एव नियोक्तव्यो, भवताऽत्र प्रयोजने ।
भानुरेव हि शर्वर्यास्तमसः क्षालनक्षमः ॥८॥

विचक्षणेनाभिहितं–यदाज्ञापयति तातः, ततो निरीक्षितमनेन विमर्शवदनम् । विमर्शः प्राह–अनुग्रहो मे । विचक्षणेनोक्तं–यद्येवं ततः शीघ्रं विधीयतां भवता तातादेशः । विमर्शेनाभिहितम्–एष सज्जोऽस्मि, केवलं विस्तीर्णा वसुन्धरा, नानाविधा देशा, भूयांसि राज्यान्तराणि, तद्यदि कथञ्चिन्मे कालक्षेपः स्यात्ततः कियतः कालान्निर्वर्तितव्यम् ? विचक्षणेनोक्तं–भद्र ! संवत्सरस्ते कालावधिः । विमर्शः प्राह–महाप्रसादः । ततो विहितप्रणामश्चलितो विमर्शः । अत्रान्तरे शुभोदयस्य पादयोर्निपत्याभिवन्द्य निजचारुतां प्रणम्य च जननीजनकौ प्रकर्षेणाभिहितं–तात ! यद्यपि ममार्यकताताम्बाविरहेऽपि न मनसो निर्वृतिस्तथापि सहचरतया मातुले मम गाढतरं प्रतिबद्धमन्तःकरणं, नाहं मामेन विरहितः क्षणमात्रमपि जीवितुमुत्सहे, ततो मामनुजानीत यूयं येनाहमेनं गच्छन्तमनुगच्छामीति । एतच्चाकर्ण्योल्लसितापत्यस्नेहमोहपूरितहृदयेनानन्दोदकबिन्दुसन्दोहप्लावितनयनपुटेन विचक्षणेन दक्षिणकराङ्गुलीभिरुन्नामितं प्रकर्षस्य मुखकमलकं, दत्ता चुम्बिका, आघ्रातो मूर्धप्रदेशः, साधु वत्स ! साध्वितिवदता निवेशितश्चासौ निजोत्सङ्गे । शुभोदयं च प्रत्यभिहितं–तात ! दृष्टो बालकस्य विनयः ? निरूपितो वचनविन्यासः ? आकलितः स्नेहसारः ? शुभोदयः प्राह–वत्स ! किमत्राश्चर्यम् ? त्वया बुद्धेर्जातस्येदृशमेव चेष्टितं युज्यते ।

किञ्च वत्स !–न युक्तमिदमस्माकं, स्नुषापौत्रकवर्णनम् ।
विशेषतस्तवाभ्यर्णे, यत एतदुदाहृतम् ॥१॥
प्रत्यक्षे गुरवः स्तुत्याः, परोक्षे मित्रबान्धवाः ।
भृतकाः कर्मपर्यन्ते, नैव पुत्रा मृताः स्त्रियः ॥२॥
तथापि चानयोर्दृष्ट्वा, गुणसम्भारगौवरम् ।
अवर्णितेन तेनाहं, पुत्र ! शक्नोमि नासितुम् ॥३॥
इयं हि भार्या ते बुद्धिरनुरूपा वरानना ।
गुणवृद्धिकरी धन्या, यथा चन्द्रस्य चन्द्रिका ॥४॥

भर्तृस्नेहपरा पट्वी, सर्वकार्यविशारदा ।
बलसम्पादिका गेहभरनिर्वहणक्षमा ॥५॥
विशालदृष्टिरप्येषा, सूक्ष्मदृष्टिरुदाहृता ।
सर्वसुन्दरदेहापि, द्वेषहेतुर्जडात्मनाम् ॥६॥
अथवा-मलक्षयेण जनिता, पुरे निर्मलमानसे ।
या च सुन्दरतापुत्री, तस्याः को वर्णनक्षमः ? ॥७॥
अत एव प्रकर्षोऽपि, नेदानीं बहु वर्ण्यते ।
अनन्तगुण एवायं, जनयित्र्या विभाव्यते ॥८॥
वत्स ! किं बहुनोक्तेन ? धन्यस्त्वं सर्वथा जने ।
यस्येदृशं महाभागं, सम्पन्नं ते कुटुम्बकम् ॥९॥
अत एव वयं चित्ते, साशङ्काः साम्प्रतं स्थिताः ।
आकर्ण्य रसनालाभं, नोचितेयं यतस्तव ॥१०॥
मा भूद्बुद्धेर्विघाताय, सपत्नी मत्सरादियम् ।
विशेषतः प्रकर्षस्य, तेन चिन्तातुरा वयम् ॥११॥
किं वा कालविलम्बेन ?, प्रस्तुतं प्रविधीयताम् ।
ततो यथोचितं ज्ञात्वा, युक्तं यत्तत्करिष्यते ॥१२॥
मातुलस्नेहबद्धात्मा, प्रकर्षः प्रस्थितो यदि ।
इदं चारुतरं जातं, क्षीरे खण्डस्य योजनम् ॥१३॥
तदेतौ सहितावेव, गच्छतां कार्यसिद्धये ।
युवाभ्यां न तु कर्तव्या, चिन्तेति प्रतिभाति मे ॥१४॥

ततो विचक्षणेन बुद्ध्या चाभिहितं-यदाज्ञापयति तातः । ततो निपतितौ गुरूणां चरणेषु विमर्शप्रकर्षौ, कृतमुचितकरणीयं, प्रवृत्तौ गन्तुम् ।

शरद्धेमन्तवर्णनम् ।

इतश्च तदा शरत्कालो वर्तते, स च कीदृशः ?-
शस्यसम्भारनिष्पन्नभूमण्डलो, मण्डलाबद्धगोपालरासाकुलः ।
साकुलत्वप्रजाजातसारक्षणो, रक्षणोद्युक्तसच्छालिगोपप्रियः ॥१॥
यत्र च शरत्काले-जलवर्जितनीरदवृन्दचितं, स्फुटकाशविराजितभूमितलम् ।
भुवनोदरमिन्दुकरैर्विशदं, कलितं स्फटिकोपलकुम्भसमम् ॥२॥
अन्यच्च-शिखिविरावविरागपरा श्रुतिः, श्रयति हंसकुलस्य कलस्वनम् ।
न रमते च कदम्बवने तदा, विषमपर्णरता जनदृष्टिका ॥३॥

लवणतिक्तरसाच्च पराङ्मुखा, मधुरखाद्यपरा जनजिह्विका ।
स्फुटमिदं तदहो प्रियताकरो, जगति शुद्धगुणो न तु संस्तवः ॥४॥
तथा-स्वच्छसन्नीरपूरं सरोमण्डलं, फुल्लसत्पद्मनेत्रैर्दिवा वीक्षते ।
यन्नभस्तत्पुनर्लोकयात्रेच्छया, रात्रिनक्षत्रसल्लोचनैरीक्षते ॥५॥
नन्दितं गोकुलं मोदिताः पामराः, पुष्पितो नीपवृक्षो निशा निर्मला ।
चक्रवाकस्तथापीह विद्राणको, **भाजनं यस्य यत्तेन तल्लभ्यते** ॥६॥

ततश्चैवंविधे शरत्समये पश्यन्तौ मनोरमकाननानि, विलोकयन्तौ कमलखण्डभूषितसरोवराणि, निरीक्षमाणौ प्रमुदितानि ग्रामाकरनगराणि, हृष्टौ शक्रोत्सवदर्शनेन, तुष्टौ दीपालिकावलोकनेन, आह्लादितौ कौमुदीनिरीक्षणेन, परीक्षमाणौ जनहृदयानि, प्रयुञ्जानौ स्वप्रयोजनसिद्ध्यर्थमुपायशतानि, विचरितौ बहिरङ्गदेशेषु विमर्शप्रकर्षौ । न दृष्टं क्वचिदपि रसनायाः कुलं, तथा च विचरतोस्तयोः समायातो हेमन्तः ।

कीदृशश्चासौ ?-अर्घितचेलतैलवरकम्बलरल्लकचित्रभानुकः,
विकसिततिलकलोध्रवरकुन्दमनोहरमल्लिकावनः ।
शीतलपवनविहितपथिकस्फुटवादितदन्तवीणकः,
जलराशिकिरणहर्म्यतलचन्दनमौक्तिकसुभगताहरः ॥१॥

यत्र च हेमन्ते दुर्जनसङ्गतानीव ह्रस्वतमानि दिनानि, सज्जनमैत्रीव दीर्घतरा रजन्यः, सुज्ञानानीव सङ्गृह्यन्ते धान्यानि, काव्यपद्धतय इव विरच्यन्ते मनोहरा वेण्यः, सुजनहृदयानीव विधीयन्ते स्नेहसाराणि वदनानि, परबलकलकलेन रणशिरसि सुभटा इव निवर्तन्ते दवीयोदेशगता अपि निजदयिताविकटनितम्बबिम्बपयोधरभरशीतहरोष्मसंस्मरणेन पथिकलोका इति ।

प्रतापहानिः सम्पन्ना, लाघवं च दिवाकरे ।
अथवा-दक्षिणाशावलग्नस्य, सर्वस्यापीदृशी गतिः ॥
अन्यच्च-अयं हेमन्तो दुर्गतलोकान्-
प्रियवियोगभुजङ्गनिपातितान्, शिशिरमारुतखण्डिततविग्रहान् ।
पशुगणानिव मुर्मुरराशिभिः, पचति किं निशि भक्षणकाम्यया ? ॥१॥

राजसचित्ते गमनम् ।

यदा चेयतापि कालेन नोपलब्धा विमर्शप्रकर्षाभ्यां रसनामूलशुद्धिस्तदा प्रविष्टौ तावन्तरङ्गदेशेषु, तत्रापि पर्यटितौ नानाविधस्थानेषु । अन्यदा प्राप्तौ राजसचित्तनगरे-

तच्च दीर्घमिवारण्यं, भूरिलोकविवर्जितम् ।
क्वचिद्दृष्टगृहारक्षं, ताभ्यां समवलोकितम् ॥१॥

ततः प्रकर्षेणाभिहितं–माम ! किमितीदं नगरं विरलजनतया शून्यमिव दृश्यते ? किं वा कारणमाश्रित्येदमीदृशं सम्पन्नम् ? विमर्शः प्राह–

यथेदं दृश्यते सर्वं, समृद्धं निजसम्पदा ।
केवलं लोकसन्दोहरहितं सुस्थितालयम् ॥१॥
तथेदं भाव्यते नूनं, नगरं निरुपद्रवम् ।
प्रयोजनेन केनापि, क्वचिन्निष्क्रान्तराजकम् ॥२॥ युग्मम् ॥

प्रकर्षः प्राह–एवमेतत्सम्यगवधारितं मामेन । विमर्शः प्राह–भद्र ! कियदिदं, जानाम्यहं सर्वस्यैव वस्तुनो दृष्टस्य यत्तत्त्वं, प्रष्टव्यमन्यदपि यत्र ते क्वचित्सन्देहः सम्भवति । प्रकर्षेणाभिहितं–माम ! यद्येवं ततः किमितीदं नगरं रहितमपि नायकेन विवर्जितमपि भूरिलोकैर्निजश्रियं न परित्यजति ? विमर्शेनोक्तम्–अस्त्यस्य मध्ये कश्चिन्महाप्रभावः पुरुषस्तज्जनितमस्य सश्रीकत्वम् । प्रकर्षः प्राह–यद्येवं ततः प्रविश्य निरूपयावस्तं पुरुषम् । विमर्शेनोक्तम्–एवं भवतु । ततः प्रविष्टौ तौ नगरे । प्राप्तौ राजकुले दृष्टस्तत्राहङ्कारादिकतिचित्पुरुषपरिकरो मिथ्याभिमानो नाम महत्तमः । ततो विमर्शः प्राह–भद्र ! सोऽयं पुरुषो यत्प्रभावजन्यमस्य राजसचित्तनगरस्य सश्रीकत्वम्, प्रकर्षेणोक्तं–यद्येवं ततस्तावदेनमुपसृत्य जल्पयावः, पृच्छावश्च कोऽत्र वृत्तान्त इति । विमर्शेनोक्तम्–एवं भवतु । ततः सम्भाषितस्ताभ्यां मिथ्याभिमानः, पृष्टश्च–भद्र ! केन पुनर्व्यतिकरेण विरलजनमिदं दृश्यते नगरम् ?

मिथ्याभिमानः प्राह – ननु सुप्रसिद्धैवेयं वार्ता कथं न विदिता भद्राभ्याम् ? विमर्शेनोक्तं–न कर्तव्योऽत्र भद्रेण कोपः, आवां हि पथिकौ न जानीवो महच्चात्रार्थे कुतूहलमतो निवेदयितुमर्हति भद्रः । मिथ्याभिमानेनोक्तम्–अस्ति तावत्समस्तभुवनप्रतीतोऽस्य नगरस्य स्वामी सुगृहीतनामधेयो देवो रागकेसरी, तज्जनकश्च महामोहः, तथा तयोर्मन्त्रिमहत्तमाश्च भूयांसो विषयाभिलाषादयः, तेषामितो नगरात् सर्वबलसमुदयेन दण्डयात्रया निर्गतानामनन्तः कालो वर्तते, तेनेदं विरलजनमुपलभ्यते नगरम् । विमर्शः प्राह–भद्र ! केन सह पुनस्तेषां विग्रहः ? मिथ्याभिमानः प्राह–दुरात्मना सन्तोषहतकेन । विमर्शेनोक्तं–किं पुनस्तेन सार्धं विग्रहनिमित्तम् ?

रसनाया मूलशुद्धिः ।

मिथ्याभिमानेनोक्तं-क्वचिद्देवादेशेनैव जगद्वशीकरणार्थं विषयाभिलाषेण प्रहितानि पूर्वं स्पर्शनरसनादीनि पञ्चात्मीयानि गृहमानुषाणि । ततस्तैर्वशीकृतप्राये त्रिभुवने सन्तोषहतकेन तान्यपि निर्जित्य भूयांसो निर्वाहिताः कियन्तोऽपि लोकाः प्रापिता निर्वृतौ नगर्यां, तच्छ्रुत्वा सन्तोषहतकस्योपरि प्रादुर्भूतक्रोधानुबन्धो निर्गतः स्वयमेव देवो रागकेसरी विक्षेपेण, तदिदमत्र विग्रहनिमित्तम् । विमर्शेन चिन्तितम्-अये ! उपलब्धं तावद्रसनाया नामतो मूलोत्थानं, गुणतः पुनर्विषयाभिलाषं दृष्ट्वा ज्ञास्यामि, **यतो जनकानुरूपाणि प्रायेणापत्यानि भवन्ति,** ततो भविष्यति मे तद्दर्शनान्निश्चयः । ततोऽभिहितमनेन-भद्र ! यद्येवं ततो भवतां किंनिमित्तमिहाव-स्थानम् ? मिथ्याभिमानेनोक्तं-प्रस्थितोऽहमप्यासं तदा केवलमग्रानीकान्निवर्तितो देवेन । अभिहितश्च-यथार्य मिथ्याभिमान ! न चलितव्यमितो नगराद्भवता, इदं हि नगरं त्वयि स्थिते निर्गतेष्वप्यस्मास्वविनष्टश्रीकं निरुपद्रवमास्ते, वयमप्यत्र स्थिता एव परमार्थतो भवामः, यतस्त्वमेवास्य नगरस्य प्रतिजागरणक्षमः । मयाऽभिहितं-यदाज्ञापयति देवः । ततः स्थितोऽहं, तदिदमस्माकमत्रावस्थान-कारणम्। विमर्शेनोक्तं-अयि ! प्रत्यागता काचिद्देवसकाशात्कुशलवार्ता ? मिथ्याभिमानः प्राह-बाढमागता, जितप्रायं वर्तते देवकीयसाधनेन, केवलमसावपि वष्टः सन्तोषहतको न शक्यते सर्वथाऽभिभवितुं, ददात्यन्तराऽन्तरा प्रत्यवस्कन्दान्, निर्वाहयत्यद्यापि कञ्चिज्जनं, अत एव देवेऽपि रागकेसरिणि लग्ने स्वयमेतावान् कालविलम्बो वर्तते । विमर्शेनोक्तं-क्व पुनरधुना भवदीयदेवः श्रूयते ? ततः समुत्पन्ना मिथ्याभिमानस्य प्रणिधिशङ्का, न कथितं यथावस्थितं, अभिहितं चानेन-न जानीमः परिस्फुटं, केवलं तामसचित्तं नगरमुररीकृत्य तावदितो निर्गतो देवस्ततः कदाचित्तत्रैवावतिष्ठते । विमर्शेनोक्तं-पूरितं भद्रेणावयोः कुतूहलं, निवेदितः प्रस्तुतवृत्तान्तः, दर्शितं सौजन्यं तद्गच्छावः साम्प्रतमावाम् । मिथ्याभिमानेनोक्तम्-एवं सिद्धिर्भवतु । तदाकर्ण्य हृष्टो विमर्शः । ततः परस्परं विहितं मनागुत्तमाङ्गनमनं, निर्गतौ राजसचित्तनगराद्विमर्शप्रकर्षौ ।

तामसचित्तनगरम् ।

विमर्शेनोक्तं-भद्र ! कथिता तावदनेन तेषां विषयाभिलाषमानुषाणां मध्ये रसना, तदधुना तमेव विषयाभिलाषं दृष्ट्वा तस्याः स्वरूपमावयोर्गुणतो निश्चेतुं युक्तं, तद्गच्छावस्तत्रैव तामसचित्तनगरे । प्रकर्षः प्राह-यन्मामो जानीते, ततो गतौ तामसचित्तपुरे विमर्शप्रकर्षौ । तच्च कीदृशम् ?-

"नाशिताशेषसन्मार्गमामूलतस्तेन दुर्गं न लङ्घ्यं परेषां सदा ।
सर्वदोद्योतमुक्तं च तद्वर्तते, चौरवृन्दं तु तत्रैव संवर्धते ॥१॥
वल्लभं तत्सदा पापपूर्णात्मनां, निन्दितं तत्सदा शिष्टलोकैः पुरम् ।
कारणं तत्सदाऽनन्तदुःखोदधेर्वारणं तत्सदाऽशेषसौख्योन्नतेः" ॥२॥
केवलं तदपि ताभ्यां विमर्शप्रकर्षाभ्यामीदृशमवलोकितं, यदुत-
दवदग्धमिवारण्यं, कृष्णवर्णं समन्ततः ।
रहितं भूरिलोकेन, न मुक्तं च निजश्रिया ॥३॥
ततः प्रकर्षस्तं दृष्ट्वा, प्रत्याह निजमातुलम् ।
माम ! किं विद्यते कश्चिदत्रापि पुरनायकः ? ॥४॥
विमर्शः प्राह-नैवास्ति, योऽत्र भो ! मूलनायकः ।
केवलं नायकाकारः, कश्चिदत्रास्ति मानवः ॥५॥

ततो यावदेतावान् विमर्शप्रकर्षयोर्जल्पः सम्पद्यते तावद्दृष्टस्ताभ्यां तत्रैव नगरे प्रवेष्टुकामो दैन्याक्रन्दनविलपनादिभिः कतिचित्प्रधानपुरुषैः परिकरितः शोको नाम पाडीरिकः । ततः सम्भाषितोऽसौ विमर्शप्रकर्षाभ्यां, पृष्टश्च-भद्र ! कोऽत्र नगरे राजा ? शोकः प्राह-ननु भुवनप्रसिद्धोऽयं नरेन्द्रः ।
तथाहि-महामोहसमुद्भूतो, रागकेसरिसोदरः ।
धवोऽविवेकितायाश्च, प्रसिद्धोऽयं नराधिपः ॥१॥
स्वर्गपातालमर्त्येषु, शत्रुभिर्भीतकम्पितैः ।
नामापि गृह्यते तस्य, प्रतापहतवैरिणः ॥२॥
देवस्याचिन्त्यवीर्यस्य, सत्पराक्रमशालिनः ।
तस्य द्वेषगजेन्द्रस्य, नाम कः प्रष्टुमर्हति ? ॥३॥
किञ्च-आस्तां तावद्देवः, किं तर्हि ?-
या मोहयति वीर्येण, सकलं भुवनत्रयम् ।
ख्याताऽविवेकिताऽप्यत्र, सा देवी देववल्लभा ॥४॥
अन्यच्च-सा महामोहनिर्देशकारिणी गुरुवत्सला ।
सा महामूढताज्ञायां, वर्तते सुन्दरा वधूः ॥५॥
रागकेसरिनिर्देशं, न लङ्घयति सा सदा ।
मूढतायाश्च तत्पत्न्याः, सौहार्दं दर्शयत्यलम् ॥६॥
तथा द्वेषगजेन्द्रस्य, सा भर्तुर्गाढवत्सला ।
तेनाविवेकिता लोके, प्रख्यातिं समुपागता ॥७॥

तदेतौ भुवनेऽप्यत्र, ख्यातौ देवीनरेश्वरौ ।
इदानीं हन्त भद्राभ्यां, कथं प्रष्टव्यतां गतौ ? ॥८॥
विमर्शः प्राह-नैवात्र, कोपः कार्यस्त्वया यतः ।
सर्वः सर्वं न जानीते, सिद्धमेतज्जगत्त्रये ॥९॥
आवां दवीयसो देशादागतौ न च वीक्षितम् ।
पूर्वमेतत्पुरं किं तु, श्रुतौ देवीनरेश्वरौ ॥१०॥
ततश्च-किं स्याद् द्वेषगजेन्द्रोऽत्र ?, किं वा स्यान्नगरान्तरे ? ।
ततः कुतूहलेनेदं, पृष्टं सन्दिग्धचेतसा ॥११॥
तद्भद्र ! साम्प्रतं ब्रूहि, किमत्रास्ते नराधिपः ? ।
किं वा विनिर्गतः क्वापि ? पश्यावस्तं नरेश्वरम् ॥१२॥
शोकेनोक्तं जगत्यत्र, वृत्तान्तोऽयमपि स्फुटम् ।
प्रसिद्ध एव सर्वेषां, विदुषां दत्तचेतसाम् ॥१३॥
यथा देवो महामोहस्तत्पुत्रो रागकेसरी ।
तथा द्वेषगजेन्द्रश्च, समस्तबलसंयुताः ॥१४॥
सन्तोषहतकस्योच्चैर्वधाय कृतनिश्चयाः ।
विनिर्गताः स्वकस्थानाद्, भूरिकालश्च लङ्घितः ॥१५॥
विमर्शः प्राह-यद्येवं, ततो भद्रः किमर्थकम् ।
इहागतः किमास्तेऽत्र, पुरे भोः साऽविवेकिता ? ॥१६॥
शोकेनाभिहितम्-नास्त्यत्र नगरे तावदधुना साऽविवेकिता ।
नापि देवसमीपे सा, तत्राकर्णय कारणम् ॥१७॥
यदा तातो महामोहस्तथाऽन्यो रागकेसरी ।
सन्तोषहतकस्योच्चैर्वधार्थं कृतनिश्चयः ॥१८॥
तदा प्रचलिते देवे, ताभ्यां सह कृतोद्यमे ।
देवेन सार्धं सा देवी, प्रस्थिता भर्तृवत्सला ॥१९॥
ततो द्वेषगजेन्द्रेण, सा प्रोक्ता कमलेक्षणा ।
स्कन्धावारक्षमं देवि ! न त्वदीयं शरीरकम् ॥२०॥
दीर्घा कटकसेवेयं, त्वं च गर्भभरालसा ।
नातः संवाहनायोग्या, वेलामासश्च वर्तते ॥२१॥
तस्मात्तिष्ठ त्वमत्रेति, व्रजामो वयमेककाः ।
तयोक्तं त्वां विना नाथ !, नात्र मे नगरे धृतिः ॥२२॥

तच्छ्रुत्वा देवपादैः सा, पुनः प्रोक्ता वरानना ।
तथापि नैव युक्तं ते, स्कन्धावारे प्रवर्तनम् ॥२३॥
किं तु-रौद्रचित्तपुरे गत्वा, देवि ! दुष्टाभिसन्धिना ।
रक्षिता तिष्ठ निश्चिन्ता, पदातिः स हि मेऽनघः ॥२४॥
ततोऽविवेकिता प्राह-किमत्रास्माभिरुच्यताम् ? ।
यदार्यपुत्रो जानीते, तदेव करणक्षमम् ॥२५॥
ततो विनिर्गतो देवो, महामोहादिभिः सह ।
रौद्रचित्तपुरे देवी, देवादेशेन सा गता ॥२६॥
ततोऽपि बहिरङ्गेषु, पुरेषु किल वर्तते ।
किञ्चित्कारणमाश्रित्य, साऽधुना युक्तकारिणी ॥२७॥
जातश्चासीत्तदा पुत्रस्तथाऽन्योऽप्यधुना किल ।
निजभर्तुः समायोगादेतदाकर्णितं मया ॥२८॥
तदेवं नास्ति सा देवी, यत्पुनर्मम कारणम् ।
नगरागमने भद्र ! तदाकर्णय साम्प्रतम् ॥२९॥

प्रज्ञाविशालाऽगृहीतसङ्केतासंसार्यालापाः ।

अत्रान्तरे प्रज्ञाविशालयाऽभिहिताऽगृहीतसङ्केता-प्रियसखि ! यदनेन संसारि-जीवेन नन्दिवर्धनवैश्वानरवक्तव्यतायां हिंसापरिणयनावसरे वैश्वानरमूलशुद्धिं निवेदयता पूर्वमभिहितमासीत्, यदुत-'यादृशं तत्तामसचित्तनगरं यादृशश्चासौ द्वेषगजेन्द्रो राजा यादृशी च साऽविवेकिता यच्च तस्यास्तस्मात्तामसचित्तनगराद्रौद्र-चित्तपुरं प्रत्यागमनप्रयोजनमेतत् सर्वमुत्तरत्र कथयिष्याम' इति । तदिदमधुना तेन संसारिजीवेन समस्तं निवेदितमिति, अगृहीतसङ्केतयाऽभिहितं-साधु प्रियसखि ! साधु, सुन्दरं मम स्मारितं भवत्या, ततः प्रज्ञाविशालया संसारिजीवं प्रत्यभिहितं-भद्र ! यदा विचक्षणाचार्येण नरवाहननरेन्द्राय विमर्शप्रकर्षवक्तव्यतां कथयता तव रिपुदारणस्य सतस्तस्यामेव परिषदि निषण्णस्य समाकर्णयतो निवेदितमेवम-विवेकितापूर्वचरितं तदा किं विज्ञातमासीद्भवता ? यदुत-याऽसौ वैश्वानरस्य माताऽभून्नन्दिवर्धनकाले मम च धात्री सैवेयमविवेकिता साम्प्रतं शैलराजस्य जननी वर्तते मम च पुनर्धात्रीति ? किं वा न विज्ञातमिति ? संसारिजीवेनोक्तं-भद्रे ! न किञ्चित्तदा मया विज्ञातं, अज्ञानजनित एव मे समस्तोऽपि निवेदयिष्य-माणोऽनर्थपरम्पराप्रबन्धः, केवलं तदाऽहं चिन्तयामि यथाकथानिकां काञ्चिदेष प्रव्रजितकस्ताताय कथयति, न पुनस्तद्भावार्थमहं लक्षयामि स्म यथेयं साम्प्रतम-

गृहीतसङ्केता न लक्षयति। अगृहीतसङ्केतयाऽभिहितं-भद्र! किमन्यः कश्चिद्भावार्थो भवति? संसारिजीवः प्राह-बाढं, भद्रे! नास्ति प्रायेण मदीयचरिते भावार्थरहित-मेकमपि वचनं, ततो न भवत्या कथानकमात्रेण सन्तोषो विधातव्यः, किं तर्हि? भावार्थोऽपि बोद्धव्यः, स च परिस्फुट एव भावार्थः, तथाप्यगृहीतसङ्केते! यत्र क्वचिन्न बुध्यते भवती तत्र प्रज्ञाविशाला प्रष्टव्या यतो बुध्यते सभावार्थमेषा मदीयवचनम्। अगृहीतसङ्केतयोक्तम्-एवं करिष्यामि, प्रस्तुतमभिधीयताम्।

ततो विचक्षणसूरिवचनमनुसन्दधानः संसारिजीवः कथानकशेषमिदमाह, यदुत-ततो विमर्शेनाभिहितं-भद्र! वर्णय यदिहागमनकारणं भद्रस्य। शोकेनाभिहितम्-

आस्तेऽत्र नगरेऽद्यापि, वयस्योऽत्यन्तवल्लभः।
मम जीवितसर्वस्वं, मतिमोहो महाबलः ॥१॥
तद्दर्शनार्थमायातस्ततोऽहं भद्र! साम्प्रतम्।
आवासितं महाटव्यां, मुक्त्वा देवस्य साधनम् ॥२॥
विमर्शेनोक्तम्-स कस्मात्स्वामिना सार्धं, न गतस्तत्र साधने।
शोकः प्राह स देवेन, धारितोऽत्रैव पत्तने ॥३॥
उक्तश्चासौ यथा नित्यं, न मोक्तव्यं त्वया पुरम्।
मतिमोह! त्वमेवास्य, यतः संरक्षणक्षमः ॥४॥
ततः प्रपद्य देवाज्ञां, संस्थितोऽत्र पुरे पुरा।
एतन्निवेदितं तुभ्यं, प्रविशामोऽधुना वयम् ॥५॥
विमर्शः प्राह-सिद्धिस्ते, तुष्टः शोको गतः पुरे।
विमर्शश्च ततश्चेदं, प्रकर्षं प्रत्यभाषत ॥६॥
भद्र! या साधनाधारा, प्रोक्ताऽनेन महाटवी।
गत्वा तस्यां प्रपश्यावो, रागकेसरिमन्त्रिणम् ॥७॥
प्रकर्षः प्राह-को वाऽत्र, विकल्पो? माम! गम्यताम्।
ततः प्रचलितौ तूर्णं, हृष्टौ स्वस्त्रीयमातुलौ ॥८॥
ततो विलङ्घ्य वेगेन, मार्गं पवनगामिनौ।
प्राप्तौ तौ मध्यमे भागे, महाटव्याः प्रयाणकैः ॥९॥
अथ तत्र महामोहं, रागकेसरिसंयुतम्।
युक्तं द्वेषगजेन्द्रेण, चतुरङ्गबलान्वितम् ॥१०॥
आवासितं महानद्याः, पुलिनेऽतिमनोरमे।
महामण्डपमध्यस्थं, वेदिकायां प्रतिष्ठितम् ॥११॥

महासिंहासनारूढं, भटकोटिविवेष्टितम् ।
गत्वा स्म नातिदूरं तौ, दत्तास्थानं प्रपश्यतः ॥१२॥

ततो विमर्शेनाभिहितं–भद्र ! प्राप्तौ तावदावामभीष्टप्रदेशे, लङ्घिता महाटवी, दृष्टं महामोहसाधनं, दर्शनपथमवतीर्णोऽयं दत्तास्थानः सह रागकेसरिणा सपरिकरो महामोहराजः, तन्न युक्तोऽधुनाऽऽवयोरस्मिन्नास्थाने प्रवेशः, मा भूदेतेषामास्थान-स्थायिनां लोकानामपूर्वयोरावयोर्दर्शनेन काचिदाशङ्का । अन्यच्च–अत्रैव प्रदेशे व्यवस्थिताभ्यां दृश्यत एवेदं सकलकालमास्थानम्, अतः कुतूहलेनापि न युक्तोऽत्र प्रवेशः । प्रकर्षेणोक्तम्–एवं भवतु, केवलं मामेयं महाटवी, इयं च महानदी, इदं च पुलिनं, अयं च महामण्डपः, एषा च वेदिका, एतच्च महा-सिंहासनम्, अयं च महामोहनरेन्द्रः, एते च सपरिवाराः समस्ता अपि शेष-नरेन्द्राः । सर्वमिदमदृष्टपूर्वमहो महदत्र कुतूहलं, तेनामीषामेकैकं नामतो गुणतश्च मामेन वर्ण्यमानं विस्तरतः श्रोतुमिच्छामि । अभिहितं च पूर्वं मामेन यथा-जानाम्यहं दृष्टस्य वस्तुनो यथावस्थितं तत्त्वं, अतः समस्तं निवेदयितुमर्हति मामः । विमर्शः प्राह–सत्यम्, अभिहितमिदं मया, केवलं भूरिप्रकारं परिप्रश्नितमिदं भद्रेण, ततः सम्यगवधार्य निवेदयामि । प्रकर्षः प्राह–विश्रब्धमवधारयतु मामः । ततो विमर्शेन समन्तादवलोकिता महाटवी, निरीक्षिता महानदी, विलोकितं पुलिनं, निर्वर्णितो महामण्डपः, निरूपिता वेदिका, निभालितं महासिंहासनं, विचिन्तितो महामोहराजा, विचारिताः प्रत्येकं महताऽभिनिवेशेन सपरिकराः सर्वे नरेन्द्राः, स्वहृदयेन प्रविष्टो ध्यानं, तत्र च व्युपरताशेषेन्द्रियग्रामवृत्तिनिष्पन्दस्तिमित-लोचनयुगलः स्थितः कञ्चित्कालं, ततः प्रकम्पयता शिरः प्रहसितमनेन । प्रकर्षः प्राह–माम ! किमेतत् ? विमर्शेनोक्तम्–अवगतं समस्तमिदमधुना मया, ततः समुद्भूतो हर्षः, प्रच्छनीयमन्यदपि साम्प्रतं यत्ते रोचते । प्रकर्षेणोक्तम्–एवं करिष्यामि, तावदिदमेव प्रस्तुतं निवेदयतु मामः ।

चित्तवृत्त्यटवीवर्णनम् ।

विमर्शेनाभिहितं–यद्येवं ततस्तावदेषा चित्तवृत्तिर्नाम महाटवी ।
इयं च भद्र ! विस्तीर्णविविधाद्भुतसङ्गता ।
उत्पत्तिभूमिः सर्वेषां, सद्रत्नानामुदाहृता ॥१॥
इयमेव च सर्वेषां, लोकोपद्रवकारिणाम् ।
महानर्थपिशाचानां, कारणं परिकीर्तिता ॥२॥

सर्वेषामन्तरङ्गाणां, लोकानामत्र संस्थिताः ।
चित्तवृत्तिमहाटव्यां, ग्रामपत्तनभूमयः ॥३॥
यदापि बहिरङ्गेषु, निर्दिश्यन्ते पुरेषु ते ।
किञ्चित्कारणमालोक्य, विद्वद्भिर्ज्ञानचक्षुषा ॥४॥
तथापि परमार्थेन, तेऽन्तरङ्गजनाः सदा ।
अस्यामेव महाटव्यां, विज्ञेयाः सुप्रतिष्ठिताः ॥५॥ (युग्मम्)
यतः-नैवान्तरङ्गलोकानां, चित्तवृत्तिमहाटवीम् ।
विहाय विद्यते स्थानं, बहिरङ्गपुरे क्वचित् ॥६॥
ततश्च-सुन्दरासुन्दराः सर्वे, येऽन्तरङ्गाः क्वचिज्जनाः ।
एनां विहाय ते भद्र ! न वर्तन्ते कदाचन ॥७॥
अन्यच्च-मिथ्यानिषेविता भद्र ! भवत्येषा महाटवी ।
घोरसंसारकान्तारकारणं पापकर्मणाम् ॥८॥
सम्यङ् निषेविता भद्र, भवत्येषा महाटवी ।
अनन्तानन्दसन्दोहपूर्णमोक्षस्य कारणम् ॥९॥
किं चेह बहुनोक्तेन ? सुन्दरेतरवस्तुनः ।
सर्वस्य कारणं भद्र ! चित्तवृत्तिमहाटवी ॥१०॥

प्रमत्ततानदीवर्णनम् ।

इयं चासारविस्तारा, दृश्यते या महानदी ।
एषा प्रमत्तता नाम, भद्र ! गीता मनीषिभिः ॥११॥
इयं निद्रातटी तुङ्गा, कषायजलवाहिनी ।
विंज्ञेया मदिरास्वादविकथास्त्रोतसां निधिः ॥१२॥
महाविषयकल्लोललोलमालाकुला सदा ।
विकल्पानल्पसत्त्वौघैः पूरिता च निगद्यते ॥१३॥
योऽस्यास्तटेऽपि वर्तेत, नरो बुद्धिविहीनकः ।
तमुन्मूल्य महावर्ते, क्षिपत्येषा महापगा ॥१४॥
यस्तु प्रवाहे नीरस्य, प्रविष्टोऽस्याः पुमानलम् ।
स यज्जीवति मूढात्मा, क्षणमात्रं तदद्भुतम् ॥१५॥
यद् दृष्टं भवता पूर्वं, रागकेसरिपत्तनम् ।
यच्च द्वेषगजेन्द्रस्य, सम्बन्धि नगरं परम् ॥१६॥

ताभ्यामेषा समुद्भूता, विगाह्येमां महाटवीम् ।
गत्वा पुनः पतत्येषा, घोरसंसारनीरधौ ॥१७॥
अतोऽस्यां पतितो भद्र ! पुरुषस्तत्र सागरे ।
अवश्यं याति वेगेन, तस्य चोत्तरणं कुतः ? ॥१८॥
ये गन्तुकामास्तत्रैव, भीमे संसारसागरे ।
अत एव सदा तेषां, वल्लभेयं महापगा ॥१९॥
ये तु भीताः पुनस्तस्माद् घोरात्संसारसागरात् ।
ते दूराद् दूरतो यान्ति, विहायेमां महानदीम् ॥२०॥

तद्विलसितपुलिनम् ।

तदेषा गुणतो भद्र ! वर्णिता तव निम्नगा ।
त्वं तद्विलसितं नाम, साम्प्रतं पुलिनं शृणु ॥२१॥
एतद्धि पुलिनं भद्र ! हास्यविब्बोकसैकतम् ।
विलासलाससङ्गीतहंससारसराजितम् ॥२२॥
स्नेहपाशमहाकाशविकासधवलं तथा ।
घूर्णमानमहानिद्रामदिरामत्तदुर्जनम् ॥२३॥
केलिस्थानं सुविस्तीर्णं, बालिशानां मनोरमम् ।
विज्ञाततत्त्वैर्दूरेण, वर्जितं शीलशालिभिः ॥२४॥
तदिदं पुलिनं भद्र !, कथितं तव साम्प्रतम् ।
महामण्डपरूपं ते, कथयामि सनायकम् ॥२५॥

चित्तविक्षेपमण्डपः ।

अयं हि चित्तविक्षेपो, नाम्ना सङ्गीयते बुधैः ।
गुणतः सर्वदोषौघवासस्थानमुदाहृतः ॥२६॥
अत्र प्रविष्टमात्राणां, विस्मरन्ति निजा गुणाः ।
प्रवर्तन्ते महापापसाधनेषु च बुद्धयः ॥२७॥
एतेषामेव कार्येण, निर्मितोऽयं सुवेधसा ।
राजानो येऽत्र दृश्यन्ते, महामोहादयः किल ॥२८॥
बहिरङ्गाः पुनर्लोका, यदि मोहवशानुगाः ।
स्युर्महामण्डपे भद्र ! प्रविष्टाः क्वचिदत्र ते ॥२९॥
ततो विभ्रमसन्तापचित्तोन्मादव्रतप्लवान् ।
प्राप्नुवन्ति न सन्देहो, महामण्डपदोषतः ॥३०॥ युग्मम् ॥

एनं भद्र ! प्रकृत्यैव, महामण्डपमुच्चकैः ।
एते नरेन्द्राः सम्प्राप्य, मोदन्ते तुष्टमानसाः ॥३१॥
बहिरङ्गाः पुनर्लोका, मोहादासाद्य मण्डपम् ।
एनं हि दौर्मनस्येन, लभन्ते दुःखसागरम् ॥३२॥
अयं हि चित्तनिर्वाणकारिर्णी निजवीर्यतः ।
तेषामेकाग्रतां हन्ति, सुखसन्दोहदायिनीम् ॥३३॥
केवलं ते न जानन्ति, वीर्यमस्य तपस्विनः ।
प्रवेशमाचरन्त्यत्र, तेन मोहात्पुनः पुनः ॥३४॥
यैस्तु वीर्यं पुनर्ज्ञातं, कथञ्चित् पुण्यकर्मभिः ।
अस्य नैवात्र ते भद्र ! प्रवेशं कुर्वते नराः ॥३५॥
एकाग्रमनसो नित्यं, चित्तनिर्वाणयोगतः ।
ततस्ते सततानन्दा, भवन्त्यत्रैव जन्मनि ॥३६॥
तदेष गुणतो भद्र ! चित्तविक्षेपमण्डपः ।
मया निवेदितस्तुभ्यमधुना शृणु वेदिकाम् ॥३७॥

तृष्णावेदिकावर्णनम् ।

एषा प्रसिद्धा लोकेऽत्र, तृष्णानाम्नी सुवेदिका ।
अस्यैव च नरेन्द्रस्य, कारणेन निरूपिता ॥३८॥
भद्रात एव त्वं पश्य, महामोहेन यो निजः ।
कुटुम्बान्तर्गतो लोकः, स एवास्यां निवेशितः ॥३९॥
ये तु शेषा महीपालास्तत्सेवामात्रवृत्तयः ।
एते निविष्टास्ते पश्य, सर्वे मुत्कलमण्डपे ॥४०॥
एषा हि वेदिका भद्र !, प्रकृत्यैवास्य वल्लभा ।
महामोहनरेन्द्रस्य, स्वजनस्य विशेषतः ॥४१॥
अस्यां समुपविष्टोऽयमत एव मुहुर्मुहुः ।
सगर्वं वीक्षते लोकं, सिद्धार्थोऽहं किलाधुना ॥४२॥
एतच्च प्रीणयत्येषा, स्वभावेनैव वेदिका ।
स्वस्योपरिष्टादासीनं, महामोहकुटुम्बकम् ॥४३॥
बहिरङ्गाः पुनर्लोका, यद्येनां भद्र ! वेदिकाम् ।
आरोहन्ति ततस्तेषां, कौतस्त्यं दीर्घजीवितम् ॥४४॥

अन्यच्चैषा स्ववीर्येण, तृष्णाख्या भद्र ! वेदिका ।
अत्रैव संस्थिता नित्यं, भ्रामयत्यखिलं जगत् ॥४५॥
तदेषा गुणतो भद्र ! यथार्था वरवेदिका ।
मया निवेदिता तुभ्यमिदानीं शृणु विष्टरम् ॥४६॥

विपर्याससिंहासनम् ।

एतत्सिंहासनं भद्र !, विपर्यासाख्यमुच्यते ।
अस्यैव विधिना नूनं, महामोहस्य कल्पितम् ॥४७॥
यदिदं लोकविख्यातं, राज्यं याश्च विभूतयः ।
तत्राहं कारणं मन्ये, नृपतेरस्य विष्टरम् ॥४८॥
यावच्चास्य नरेन्द्रस्य, विद्यते वरविष्टरम् ।
इदं तावदहं मन्ये, राज्यमेताश्च भूतयः ॥४९॥
यतः-अस्मिन्निविष्टो राजाऽयं, महासिंहासने सदा ।
सर्वेषामेव शत्रूणामगम्यः परिकीर्तितः ॥५०॥
यदा पुनरयं राजा, भवेदस्माद्बहिः स्थितः ।
सामान्यपुरुषस्यापि, तदा गम्यः प्रकीर्तितः ॥५१॥
एतद्धि विष्टरे[१] भद्र !, बहिरङ्गजनैः सदा ।
आलोकितं करोत्येव, रौद्रानर्थपरम्पराम् ॥५२॥
यतः-तावत्तेषां प्रवर्तन्ते, सर्वाः सुन्दरबुद्धयः ।
यावत्तैर्विष्टरे लोकैरत्र दृष्टिर्न पातिता ॥५३॥
निबद्धदृष्टयः सन्तः, पुनरत्र महासने ।
ते पापिनो भवन्त्युच्चैः, कुतः सुन्दरबुद्धयः ? ॥५४॥
किञ्च-यन्नद्यास्तत् पुलीनस्य, मण्डपस्य च वर्णितम् ।
वेदिकायाश्च तद्वीर्यं, सर्वमत्र प्रतिष्ठितम् ॥५५॥
तदिदं गुणतो भद्र ! कथितं तव विष्टरम् ।
महामोहनरेन्द्रस्य, निबोध गुणगौरवम् ॥५६॥

अविद्यागात्रयष्टिः ।

जराजीर्णकपोलापि, यैषा भुवनविश्रुता ।
अमुष्येयमविद्याख्या, गात्रयष्टिरुदाहृता ॥५७॥

१. विष्टरम् पा. ।

एषाऽत्र संस्थिता भद्र !, सकलेऽपि जगत्त्रये ।
यत्करोति स्ववीर्येण, तदाकर्णय साम्प्रतम् ॥५८॥
अनित्येष्वपि नित्यत्वमशुचिष्वपि शुद्धताम् ।
दुःखात्मकेषु सुखतामनात्मस्वात्मरूपताम् ॥५९॥
पुद्गलस्कन्धरूपेषु, शरीरादिषु वस्तुषु ।
लोकानां दर्शयत्येषा, ममकारपरायणा ॥६०॥ युग्मम् ॥
ततस्ते बद्धचित्तत्वात्तेषु पुद्गलवस्तुषु ।
आत्मरूपमजानन्तः, क्लिश्यन्तेऽनर्थकं जनाः ॥६१॥
तदेनां धारयन्नुच्चैर्गात्रयष्टिं महाबलः ।
जराजीर्णोऽपि नैवायं, मुच्यते निजतेजसा ॥६२॥
अयं हि भद्र ! राजेन्द्रो, जगदुत्पत्तिकारकः ।
तेनैव गीयते प्राज्ञैर्महामोहपितामहः ॥६३॥
ये रुद्रोपेन्द्रनागेन्द्रचन्द्रविद्याधरादयः ।
तेऽप्यस्य भद्र ! नैवाज्ञां, लङ्घयन्ति कदाचन ॥६४॥
तथाहि-योऽयं स्ववीर्यदण्डेन, जगच्चक्रं कुलालवत् ।
विभ्रम्य घटयत्येव, कार्यभाण्डानि लीलया ॥६५॥
तथास्याचिन्त्यवीर्यस्य, महामोहस्य भूपतेः ।
को नाम भद्र ! लोकेऽस्मिन्नाज्ञां लङ्घयितुं क्षमः ? ॥६६॥
तदेष गुणतो भद्र ! वर्णितस्ते नराधिपः ।
अधुना परिवारोऽस्य, वर्ण्यते तं विचिन्तय ॥६७॥
केवलं कथयत्येवं, मयि भद्र ! विशेषतः ।
केनाप्याकूतदोषेण, न त्वं पृच्छसि किञ्चन ॥६८॥
हुङ्कारमपि नो दत्से, भावितश्च न लक्ष्यसे ।
शिरःकम्पनखस्फोटविरहेण विभाव्यसे ॥६९॥
निश्चलाक्षो मदीयं तु, केवलं मुखमीक्षसे ।
तदिदं नैव जानेऽहं, बुध्यसे किं न बुध्यसे ? ॥७०॥
प्रकर्षः प्राह-मा मैवं, माम ! वोचः प्रसादतः ।
तवाहं नास्ति तल्लोके, यन्न बुध्ये परिस्फुटम् ॥७१॥
विमर्शः प्राह-जानामि, बुध्यसे त्वं परिस्फुटम् ।
अयं तु विहितो भद्र ! परिहासस्त्वया सह ॥७२॥

यतः-विज्ञातपरमार्थेऽपि, बालबोधनकाम्यया ।
परिहासं करोत्येव, प्रसिद्धं पण्डितो जनः ॥७३॥
बालो विनोदनीयश्च, मादृशां भद्र ! वर्तसे ।
अतो मत्परिहासेन, न कोपं गन्तुमर्हसि ॥७४॥
अन्यच्च-जानताऽपीदमस्माकं हर्षवृद्धये ।
त्वया प्रश्नोऽपि कर्तव्यः, क्वचित्प्रस्तुतवस्तुनि ॥७५॥
किञ्च-अविचार्य मया सार्धं, वस्तुतत्त्वं यथास्थितम् ।
त्वमत्र श्रुतमात्रेण, भद्र ! न ज्ञातुमर्हसि ॥७६॥
ऐदम्पर्यमतस्तात !, बोद्धव्यं यत्नतस्त्वया ।
अज्ञातपरमार्थस्य, मा भूद्भौतकथानिका ॥७७॥
प्रकर्षः प्राह-माम ! कथय कीदृशी पुनः सा भौतकथानिका ?

भौतकथानिका ।

विमर्शेनाभिहितं-भद्र ! समाकर्णय । अस्ति क्वचिन्नगरे जन्मबधिरः सदाशिवो नाम भौताचार्यः, स च जराजीर्णकपोलः सन्नुपहासपरेण हस्तसञ्ज्ञयाऽभिहितः केनचिद्धूर्तबटुना, यथा-भट्टारक ! किलैवं नीतिशास्त्रेषु पठ्यते, यदुत-

विषं गोष्ठी दरिद्रस्य, जन्तोः पापरतिर्विषम् ।
विषं परे रता भार्या, विषं व्याधिरुपेक्षितः ॥१॥

अतः शीघ्रमस्य बाधिर्यस्य करोतु किञ्चिदौषधं भट्टारकः, न खलूपेक्षितुं युक्तोऽयं महाव्याधिः, ततः प्रविष्टो भौताचार्यस्य मनसि स एवाऽऽग्रहविशेषः, ततोऽभिहितोऽनेन शान्तिशिवो नाम निजशिष्यो, यदुत-गच्छ त्वं वैद्यभवने मदीयबधिरत्वस्य विज्ञाय भेषजं गृहीत्वा च तच्चूर्णमागच्छ, मा भूत्कालहरणेन व्याधिवृद्धिरिति । शान्तिशिवेनाभिहितं-यदाज्ञापयति भट्टारकः । ततः प्राप्तोऽसौ वैद्यभवने, दृष्टो वैद्यः । इतश्च बृहतीं वेलां रमणं विधाय द्वारात्समागतो वैद्यपुत्रः, ततः क्रोधान्धबुद्धिना वैद्येन गृहीतातिपरुषा वालमयी रज्जु-र्बद्धश्चारटन्नसौ निजदारकः स्तम्भके गृहीतो लकुटस्ताडयितुमारब्धस्ताड्यमाने च निर्दयं तत्र दारके शान्तिशिवः प्राह-वैद्य ! किमित्येनमेवं ताडयसि ?, वैद्येनोक्तं-न शृणोति कथञ्चिदप्येष पापः । अत्रान्तरे हाहारवं कुर्वाणा वेगेनागत्य लग्ना वैद्यस्य हस्ते वारणार्थं भार्या । वैद्यः प्राह-मारणीयो मयाऽयं दुरात्मा यो ममैवं कुर्वतोऽपि न शृणोति । अपसरापसर त्वमितरथा तवापीयमेव गतिः । तथापि लगन्ती ताडिता साऽपि वैद्येन । शान्तिशिवेन चिन्तितम्-अये ! विज्ञातं भट्टारकस्यौषधं किमधुना

पृष्टेन ? ततो निर्गत्य गतोऽसौ माहेश्वरगृहे, याचिता तेन रज्जुः समर्पिता माहेश्वरैः शणमयी । शान्तिशिवः प्राह–अलमनया, मम वालमय्याऽतिपरुषया प्रयोजनं, दत्ता तादृश्येव। माहेश्वरैरभिहितं च–भट्टारक! किं पुनरनया कार्यम्? शान्तिशिवेनोक्तं–सुगृहीतनामधेयानां सदाशिवभट्टारकाणामौषधं करिष्यते । ततो गृहीत्वा रज्जुं गतो मठे शान्तिशिवः। तत्र च दृष्ट्वा गुरुं कृतमनेन विषमभृकुटितरङ्गभङ्गकरालं वक्त्रकुहरं बद्धश्चाराटीर्मुञ्चन्नसौ मठमध्यस्तम्भके निजाचार्यः। ततो गृहीतबृहल्लकुटोऽसौ प्रवृत्तस्तस्य ताडने । इतश्च माहेश्वरैश्चिन्तितं–गच्छामो भट्टारकाणां क्रियायां क्रियमाणायां प्रत्यासन्नाः स्वयं भवामः । ततः समागतास्ते दृष्टो निर्दयं ताडयन्नाचार्यं शान्तिशिवः । तैरभिहितं–किमित्येनमेवं ताडयसि ? शान्तिशिवः प्राह–न शृणोति कथञ्चिदप्येष पापः । ततो विहितः सदाशिवेन म्रियमाणेन महाक्रन्दभैरवः शब्दः । ततो लग्ना वारणार्थं हाहारवं कुर्वन्तः शान्तिशिवस्य माहेश्वराः । शान्तिशिवः प्राह–मारणीयो मयाऽयं दुरात्मा, यो ममैवं कुर्वतोऽपि न शृणोति, अपसरतापसरत यूयमितरथा युष्माकमपीयमेव वार्त्तेति । तथापि वारयतो माहेश्वरानपि प्रवृत्तस्ताडयितुमसौ लकुटेन, ततो बहुत्वात्तेषां रे लात लातेति ब्रुवाणैरुद्दालितस्तेन तस्य हस्ताल्लकुटः, चिन्तितं च–नूनं ग्रहगृहीतोऽयं, ततो बद्धस्तैस्ताडयित्वा पश्चाद्बाहुबन्धेन शान्तिशिवः । विमोचितः सदाशिवः, लब्धा तेन चेतना, जीवितो दैवयोगेन, माहेश्वरैरभिहितं–शान्तिशिव ! किमिदं भगवतस्त्वया कर्तुमारब्धमासीत्? शान्तिशिवः प्राह–ननु बधिरताया वैद्योपदेशादौषधं, किञ्च–मुञ्चत मां मा भट्टारकव्याधिमुपेक्षध्वम्। माहेश्वरैश्चिन्तितं–महाग्रहोऽयं, ततोऽभिहितमेतैः–मुञ्चामस्त्वां यद्येवं न करोषि। शान्तिशिवः प्राह–किमहं भवतां वचनेन स्वगुरोरपि भैषजं न करिष्यामि ? अहं हि यदि परं तस्यैव वैद्यस्य वचनेन तिष्ठामि, नान्यथा। ततः समाहूतो वैद्यः, निवेदितस्तस्मै वृत्तान्तः, ततो मुखमध्ये हसताऽभिहितं वैद्येन–भट्टारक ! न बधिरोऽसौ मदीयो दारकः, किं तर्हि, पाठितो मया क्लेशेन वैद्यकशास्त्राणि स तु रमणशीलतया मम रटतोऽपि तदर्थं न शृणोति ततो मया रोषात्ताडितः, तत्रेदमौषधम् । किञ्च–प्रगुणीभूतः खल्वयं साम्प्रतं तव प्रभावादनेनैव भैषजेन, तस्मादतः परं न कर्तव्यं मदीयवचनेन त्वयाऽस्येदमौषधमिति। शान्तिशिवेनाभिहितम्–एवं भवतु, भट्टारकैर्हि प्रगुणैर्मम प्रयोजनं, ते च यदि प्रगुणास्ततः किमौषधेन ? ततो मुक्तः शान्तिशिवः। तदेषा भद्र ! भौतकथानिका श्रुतमात्रग्राहिणस्तवापि मया सार्धमविचारयतो मा भूदित्येवमर्थं परिचोदितस्त्वं मयेति। प्रकर्षः प्राह–साधु साधूक्तं मामेन, पृच्छामि

तर्हीदानीं किञ्चिद्भवन्तम् । विमर्शेनोक्तं–प्रश्नयतु भद्र ! । प्रकर्षः प्राह–माम ! यद्येवं ततो विज्ञातेयं मया समस्तान्तरङ्गलोकाधारभूता बहिरङ्गलोकानां सर्वसुन्दरा–सुन्दरवस्तुनिर्वर्तिका सभावार्था चित्तवृत्तिर्महाटवी, एतानि तु महानदीपुलिनमहा–मण्डपवेदिकासिंहासनगात्रयष्टिनरेन्द्ररूपाणि वस्तूनि यानि भवता प्रमत्ततातद्विल–सितचित्तविक्षेपतृष्णाविपर्यासाविद्यामहामोहाभिधानानि निवेदितानि तानि मया भावार्थमधिकृत्य न सम्यग्विज्ञातानि, विकल्पितानि मया यथा नाम्ना परमेतानि भिद्यन्ते नार्थेन, यतः सर्वाण्यपि पुष्टिकारणतयाऽमीषामन्तरङ्गलोकानामनर्थकारणतया च बहिरङ्गजनानां समानानि वर्तन्ते ततो यद्येतेषामस्ति कश्चिदर्थेन भेदस्तं मे निवेदयतु मामः । विमर्शः प्राह–ननु निवेदिंत एव प्रत्येकमेतेषां गुणान् वर्णयता मया परिस्फुटोऽर्थभेदस्तथापि स यदि न विज्ञातो भद्रेण ततः पुनरपि निवेदयामि । ततः कथितो विमर्शेन महानद्यादीनां वस्तूनां प्रत्येकं भावार्थः, बुद्धः प्रकर्षेण ।

वेल्लहलकुमारकथा ।

अत्रान्तरे नरवाहनः प्राह–भदन्त ! वयमपि बोधनीयास्तेषां भावार्थं, ततः प्रबोधितो नरवाहननरेन्द्रोऽपि तेन भगवता विचक्षणसूरिणा । ततोऽगृहीतसङ्केतया–ऽभिहितं–भद्र ! संसारिजीव ! तर्हि यद्येवं ततोऽहमपीदानीं तेषां महानद्यादिवस्तूनां बोधनीया भवताऽर्थभेदम् । संसारिजीवेनोक्तं–भद्रे ! स्पष्टदृष्टान्तमन्तरेण न त्वया सुखावसेयमेतेषां प्रविभक्तं स्वरूपं, अतो दृष्टान्तं कथयिष्ये । अगृहीतसङ्केतयोक्तम्–अनुग्रहो मे । संसारिजीवेनाभिहितम्–अस्ति सम्भावितसमस्तवृत्तान्तं भुवनोदरं नाम नगरं, तत्र च निवारको हरिहरहिरण्यगर्भादीनामपि प्रभुशक्तेरनादिर्नाम राजा, तस्य च नीतिमार्गनिपुणाऽविच्छेदकारिणी कुयुक्तिमिथ्याविकल्पजल्पानां संस्थिति–र्नाम महादेवी, तयोश्चात्यन्तवल्लभोऽस्ति वेल्लहलो नाम तनयः, स च गाढमाहार–प्रियो दिवानिशमनवरतं विविधखाद्यपेयानि भक्षयन्नास्ते, ततः सञ्जातं महाऽजीर्णं, प्रकुपिता दोषाः, सम्पन्नोऽन्तर्लीनो ज्वरः, तथापि न विच्छिद्यते तस्याहाराभिलाषः, प्रवृत्ता चोद्यानिकागमनेच्छा, ततः कारिता भूरिप्रकारा भक्ष्यविशेषाः, तांश्च पश्यतस्तस्य एनमेनं च भक्षयिष्यामीति प्रवर्तन्ते चित्तकल्लोलाः, लौल्यातिरेकेण च भक्षितं सर्वेषामाहारविशेषाणां स्तोकस्तोकं, ततः परिवेष्टितो मित्रवृन्देन परिकरितोऽन्तःपुरेण पठता बन्दिवृन्देन ददद्दानं विविधैर्विलासैर्महता विमर्देन प्रासो मनोरमे कानने, निविष्टं सुखमासनं, तत्र चोपविष्टस्य विरचिताः पुरतो विविधाहारविस्ताराः, ततश्चाहारलेशभक्षणेन पवनस्पर्शादिना गाढतरं प्रवृद्धो ज्वरः, लक्षितश्च पार्श्ववर्तिना समयज्ञाभिधानेन महावैद्यसुतेन, यदुत–आतुरवदनो

दृश्यते कुमारः । ततो दत्तस्तेन शङ्खयोर्हस्तः, निरूपितानि सन्धिस्थानानि, निश्चितमनेन यथा ज्वरितः खल्वयं कुमारः। ततोऽभिहितं समयज्ञेन-देव ! न युक्तं तव भोक्तुं, प्रबलज्वरं ते शरीरं वर्तते, यतोऽत्यन्तमातुरा घूर्णते दृष्टिः, आताम्र-स्निग्धं वदनकमलं, द्रगद्रगायेते शङ्खौ, धमधमायन्ते सन्धिस्थानानि, ज्वलतीव बहिस्त्वग्, दहतीव हस्तं, ततो निवर्तस्व भोजनात्, गच्छ प्रच्छन्नापवरके, भजस्व निवातं, कुरुष्व लङ्घनानि, पिब क्वथितमुदकं, समाचर विधिनाऽस्य सर्वां प्रति-क्रियाम्, इतरथा सन्निपातस्ते भविष्यति। स तु वेल्लहलो दत्तदृष्टिः पुरतो विन्यस्ते तस्मिन्नाहारविस्तारे एतदेतच्च भक्षयामीति भ्रमयन्नपरापरेषु खाद्यप्रकारेषु[१] स्वीयमन्तःकरणं नाकर्णयति तत्तदा वैद्यसुतभाषितं नाकलयति अस्य हितरूपतां न चेतयते तं वारणार्थं लगन्तमपि शरीरे। ततो वारयतो वचनेन धारयतो हस्तेन तस्य समयज्ञस्य समक्षमेव बलात्प्रवृत्तो भक्षयितुमाहारं वेल्लहलः। ततः समुत्कट-तयाऽजीर्णस्य प्रबलतया ज्वरस्य न क्रमतेऽसौ गलकेनाहारस्तथापि बलादेव क्रामितः कियानपि वेल्लहलेन। ततः समुद्वृत्तं हृदयं, सञ्जातः कलमलकः, सम्पन्नं वमनं, विमिश्रितं च तेन वमनेन सर्वमपि पुरतो विन्यस्तं भोजनम्। ततश्चिन्तितं वेल्लहलेन-

क्षुधाक्षामं शरीरं मे, नूनमूनतया भृशम् ।
एतद्धि वायुनाऽऽक्रान्तमन्यथा वमनं कुतः ॥१॥
एवं स्थिते-रिक्तकोष्ठं शरीरं मे, वाताक्रान्तं विनङ्क्ष्यति ।
ततश्च प्रीणयामीदं, भुञ्जे भूयोऽपि भोजनम् ॥२॥
ततोऽसौ वान्तिसंमिश्रं, तत् पुरःस्थितभोजनम् ।
निर्लज्जो भोक्तुमारब्धः, सर्वेषामपि पश्यताम् ॥३॥
तद्दृष्ट्वा समयज्ञेन, प्रोक्तः पूत्कुर्वता भृशम् ।
देव देव ! न युक्तं ते, कर्तुं काकस्य चेष्टितम् ॥४॥
मा च राज्यं शरीरं च, यशश्च शशिनिर्मलम् ।
देव ! हारय भक्तेन, त्वमेकदिनभाविना ॥५॥
अन्यच्चेदं सतां निन्द्यममेध्यं शौचदूषणम् ।
उद्वेगहेतुर्नो भक्तं, देवः खादितुमर्हति ॥६॥
देव ! दुःखात्मकं चेदं, सर्वव्याधिप्रकोपनम् ।
गाढमुल्बणदोषाणां, विशेषेण भवादृशाम् ॥७॥

१. तस्य पा. ।

का वाऽस्योपरि ते मूर्च्छा ? यद्बाह्यं पुद्गलात्मकम् ।
अतो देव ! विहायेदमात्मानं रक्ष यत्नतः ॥८॥
इत्थं च समयज्ञस्य, रटतोऽपि वचस्तदा ।
स राजपुत्रः श्रुत्वाऽपि, स्वचित्ते पर्यचिन्तयत् ॥९॥
अहो विमूढः खल्वेष, समयज्ञो न बुध्यते ।
नूनं मदीयप्रकृतिं, नावस्थां न हिताहितम् ॥१०॥
यो वातलं क्षुधाक्षामं, भुञ्जानं मां निषेधति ।
एतच्च दूषयत्येष, भोजनं देवदुर्लभम् ॥११॥
तत्किमेतेन मूर्खेण ? भुञ्जे भोज्यं यथेच्छया ।
स्वार्थसिद्धिर्मया कार्या, किं ममापरचिन्तया ? ॥१२॥
ततः परिजनेनोच्चैः, सहितेऽपि पुनः पुनः ।
समयज्ञे रटत्येवं, भक्षितं तेन भोजनम् ॥१३॥
ततः प्रबलदोषोऽसौ, भक्षणानन्तरं तदा ।
सन्निपातं महाघोरं, सम्प्राप्तो निजकर्मणा ॥१४॥
पुनर्वमनबीभत्से, ततस्तत्रैव भूतले ।
पश्यतां पतितस्तेषां, काष्ठवन्नष्टचेतनः ॥१५॥
स लोलमानस्तत्रैव, जघन्ये वान्तिकर्दमे ।
कुर्वन् घुरघुरारावं, श्लेष्मापूर्णगलस्तदा ॥१६॥
अनाख्येयामचिन्त्यां च, तेषामुद्वेगकारिणीम् ।
अशक्यप्रतिकारां च, प्राप्तोऽवस्थां सुदारुणाम् ॥१७॥
न शक्यः समयज्ञेन, त्रातुमेष न बान्धवैः ।
तदवस्थो न राज्येन, न देवैर्नापि दानवैः ॥१८॥
केवलं तदवस्थेन, लुठताऽशुचिकर्दमे ।
अनन्तकालं तत्रैव, स्थातव्यं तेन पापिना ॥१९॥
तदेष भद्रे ! दृष्टान्तः, प्रस्तुतानां परिस्फुटः ।
वस्तूनां भेदसिद्ध्यर्थं, मया तुभ्यं निवेदितः ॥२०॥
ततोऽगृहीतसङ्केता, प्राह विह्वलमानसा ।
संसारिजीव ! नैवेदं, पौर्वापर्येण युज्यते ॥२१॥
यतः-नद्यादिवस्तुभेदार्थं, कथितं मे कथानकम् ।
त्वयेदं तत्र मे भाति, क्वोष्ट्रो नीराजना क्व च ? ॥२२॥

अथास्ति कश्चित्सम्बन्धो, हन्त प्रस्तुतवस्तुनि ।
स्फुटः कथानकस्यास्य, स इदानीं निवेद्यताम् ॥२३॥
ततः संसारिजीवेन, तद्वार्ष्टान्तिकयोजने ।
बहुभाषणखिन्नेन, तत्सखी सम्प्रचोदिता ॥२४॥
कथम् ?-अस्याः प्रज्ञाविशाले ! त्वं, निःशेषं मत्कथानकम् ।
घटय प्रस्तुतार्थेन, निजशीलक(त)या स्फुटम् ॥२५॥

कथोपनयः ।

अथ प्रज्ञाविशालाऽऽह, कामं भोः कथयामि ते ।
भद्रेऽगृहीतसङ्केते !, समाकर्णय साम्प्रतम् ॥२६॥
यस्ते वेल्लहलो नाम, राजपुत्रो निदर्शितः ।
एषोऽनेन विशालाक्षि !, प्रोक्तो जीवः सकर्मकः ॥२७॥
स एव जायते भद्रे !, नगरे भुवनोदरे ।
अनादिसंस्थितिसुतः, स एव परमार्थतः ॥२८॥
स एवानन्तरूपत्वाद्बहिरङ्गजनः स्मृतः ।
सामान्यरूपमुद्दिश्य, स चैकः परिकीर्तितः ॥२९॥
मनुष्यभावमापन्नः, स प्रभुः सर्वकर्मणाम् ।
महाराजसुतस्तेन, स प्रोक्तोऽनेन सुन्दरि ! ॥३०॥
तस्यैव सत्का विज्ञेया, चित्तवृत्तिर्महाटवी ।
सुन्दरेतरवस्तुनां, सा तस्यैव च कारणम् ॥३१॥
केवलं यावदद्यापि, स आत्मानं न बुध्यते ।
महामोहादिभिस्तावल्लुप्यते सा महाटवी ॥३२॥
यदा तु तेन विज्ञातः, स स्यादात्मा कथञ्चन ।
तद्वीर्यं वीक्ष्य नश्यन्ति, महामोहादयस्तदा ॥३३॥
यावच्च ते विवर्तन्ते, चित्तवृत्तौ महाभटाः ।
महानद्यादिवस्तुनि, तावत्तस्यां भवन्ति वै ॥३४॥
तेषामेव यतस्तानि, क्रीडास्थानानि भूभुजाम् ।
अतस्तेषु विनष्टेषु, तेषां नाशः प्रकीर्तितः ॥३५॥
एवं च स्थिते-अविज्ञातात्मरूपस्य, भद्रे ! जीवस्य कर्मणा ।
महामोहनरेन्द्रे च, सप्रतापेऽटवीस्थिते ॥३६॥

यदा तानि विवर्धन्ते, जीवश्च बहु मन्यते ।
महानद्यादिवस्तूनि, नितरामात्मवैरिकः ॥३७॥
तदा तानि स्ववीर्येण, यत्कुर्वन्ति पृथक् पृथक् ।
जीवस्य तद्विशेषार्थं, दृष्टान्तोऽयं निवेदितः ॥३८॥ युग्मम् ॥
स चैवं योज्यते भद्रे ! प्रस्तुतार्थेन पण्डितैः ।
महानद्यादिवस्तूनां, प्रत्येकं भेदसिद्धये ॥३९॥
यथाऽऽहारप्रियो नित्यं, राजपुत्रो निवेदितः ।
तथाऽयमपि विज्ञेयो, जीवो विषयलम्पटः ॥४०॥
यथा च तस्य सञ्जातमजीर्णं भूरिभक्षणात् ।
तथाऽस्यापि कुरङ्गाक्षि !, कर्माजीर्णं प्रचक्षते ॥४१॥
पापाज्ञानात्मकं तच्च, वर्तते कर्म दारुणम् ।
यतः प्रमत्ततोद्भूता, तज्जन्यं तत्पुर(पुलिन)द्वयम् ॥४२॥
यथा प्रकुपितास्तस्य, दोषा जातस्तनुज्वरः ।
तथा रागादयोऽस्यापि, वर्धन्ते ज्वरहेतवः ॥४३॥
यथा तथास्थितस्यापि, बुद्धिर्भोज्येषु धावति ।
नरेन्द्रदारकस्येह, तथाऽस्यापि दुरात्मनः ॥४४॥
तथाहि–मनुष्यभावमापन्नः, कर्माजीर्णं सुदारुणम् ।
रागादिकोपनं मूढश्चित्तज्वरविधायकम् ॥४५॥
जीवो न लक्षयत्येष, ततश्चास्य प्रवर्तते ।
अहितेषु सदा बुद्धिः, प्रकाशं सुखकाम्यया ॥४६॥
तथाहि स्वादते मद्यं, निद्राऽत्यन्तं सुखायते ।
विकथा प्रतिभात्युच्चैरस्यानेकविकल्पना ॥४७॥
इष्टः क्रोधः प्रियो मानो, माया चात्यन्तवल्लभा ।
लोभः प्राणसमो मन्ये, रागद्वेषौ मनोगतौ ॥४८॥
कान्तः स्पर्शो रसोऽभीष्टः, कामं गन्धश्च सुन्दरः ।
अत्यन्तदयितं रूपं, रोचते च कलध्वनिः ॥४९॥
विलेपनानि ताम्बूलमलङ्काराः सुभोजनम् ।
माल्यं वरस्त्रियो वस्त्रं, सुन्दरं प्रतिभासते ॥५०॥
आसनं ललितं यानं, शयनं द्रव्यसञ्चयाः ।
अलीककीर्तिश्च जने, रुचिताऽस्य दुरात्मनः ॥५१॥

चित्तवृत्तिमहाटव्यां, भद्रे ! सततवाहिनी ।
महानदी वहत्युच्चैः, सेयमस्य प्रमत्तता ॥५२॥
यथा च तदवस्थस्य, राजपुत्रस्य सुन्दरि ! ।
समुत्पन्ना विलासेच्छा, यातुमुद्यानिकां मतिः (प्रति) ॥५३॥
कारितानि च भोज्यानि, लौल्येन प्राशितानि च ।
निर्गतश्च विलासेन, पुरात्प्राप्तश्च कानने ॥५४॥
निविष्टमासनं दिव्यमुपविष्टश्च तत्र सः ।
विस्तारितं पुरो भक्तं, नानाखाद्यकसंयुतम् ॥५५॥
तथास्यापि प्रमत्तस्य, जीवस्य वरलोचने ! ।
कर्माजीर्णात्समुत्पन्ने, भीषणेऽपि मनोज्वरे ॥५६॥
जायन्ते चित्तकल्लोला, नानारूपाः क्षणे क्षणे ।
यथोपार्ज्य धनं भूरि, विलसामि यथेच्छया ॥५७॥
करोम्यन्तःपुरं दिव्यं, भुञ्जे राज्यं मनोहरम् ।
महाप्रासादसङ्घातं, कारये काननानि च ॥५८॥ षड्भिः कुलकम् ॥
ततश्च–महाविभवसम्पन्नः, क्षपिताखिलवैरिकः ।
श्लाघितः सर्वलोकेन, पूरितार्थमनोरथः ॥५९॥
शब्दादिसुखसन्दोहसागरे मग्नमानसः ।
तिष्ठामि सततानन्दो, नान्यन्मानुष्यके फलम् ॥६०॥
सेयमुद्यानिकाकाङ्क्षा, विज्ञेया सुन्दरि ! त्वया ।
ततो जीवो महारम्भैः, कुरुते द्रव्यसञ्चयम् ॥६१॥
यथेष्टं दैवयोगेन, विधत्तेऽन्तःपुरादिकम् ।
शब्दादिसुखलेशं च, किञ्चिदास्वादयेदपि ॥६२॥
अस्य जीवस्य जानीहि, तदिदं मृगवीक्षणे ! ।
कारणं मृष्टभोज्यानां, तल्लवानां च भक्षणम् ॥६३॥
ततोऽलीकविकल्पैश्च, सुखनिर्भरमानसः ।
विलासलास्यसङ्गीतहास्यविब्बोकतत्परः ॥६४॥
युतो दुर्ललितैर्नित्यं, द्यूतमद्यरतिप्रियः ।
सन्मार्गनगराद् दूरे, याति दौःशील्यकानने ॥६५॥
एतन्महाविमर्देन, पुरनिर्गमनं मतम् ।
उद्यानप्रापणं चेदं, विद्धि नीलाब्जलोचने ! ॥६६॥

स मिथ्याभिनिवेशाख्ये, स्थितो विस्तीर्णविष्टरे ।
कर्माख्यपरिवारेण, रचितानि ततोऽग्रतः ॥६७॥
मनोहराणि चित्राणि, लब्धास्वादो विशेषतः ।
प्रमादवृन्दभोज्यानि, सुन्दरत्वेन मन्यते ॥६८॥ युग्मम् ॥
प्रमत्ततामहानद्याः, पुलिनं पद्मलोचने ! ।
तत्तद्विलसितं विद्धि, वृत्तान्तस्यास्य कारणम् ॥६९॥
ततो यथाऽन्नलेशेन, भक्षितेन तनुज्वरः ।
वायुस्पर्शादिभिश्चोच्चैर्वर्धितस्तस्य दारुणः ॥७०॥
लक्षितश्च सुवैद्येन, वारितश्च सुभोजनात् ।
न चासौ बुध्यते किञ्चिद्भोजनाक्षिप्तमानसः ॥७१॥
जीवस्यापि तथा भद्रे !, कर्माजीर्णोद्भवो ज्वरः ।
प्रमादात्तेन वर्धेत, तथैवाज्ञानवायुना ॥७२॥
लक्षयन्ति च तं वृद्धं, धर्माचार्या महाधियः ।
समयज्ञमहावैद्या, वारयन्ति च देहिनम् ॥७३॥ चतुर्भिः कलापकम् ॥
कथम् ?–अनादिभवकान्तारे, भ्रान्त्वा भद्रातिसुन्दरम् ।
अवाप्य मानुषं जन्म, महाराज्यमिवातुलम् ॥७४॥
कर्माजीर्णज्वराक्रान्तं, प्रमादमधुनाऽपि भोः ! ।
मा सेवस्व महामोहसन्निपातस्य कारणम् ॥७५॥
कुरुष्व ज्ञानचारित्रसम्यग्दर्शनलक्षणाम् ।
चित्तज्वरविघाताय, जैनीं भद्र ! प्रतिक्रियाम् ॥७६॥
स तु प्रमादभोज्येषु, क्षिप्तचित्तो न बुध्यते ।
तत्तादृशं गुरोर्वाक्यं, पापो जीवः प्रपञ्चितम् ॥७७॥
ततश्च–उन्मत्त इव मत्त इव, ग्राहग्रस्त इवातुरः ।
गाढसुप्त इवोद्भ्रान्तो, विपरीतं विचेष्टते ॥७८॥
स एष भद्रे ! सर्वोऽपि, चित्तविक्षेपमण्डपः ।
महानदीकूलसंस्थो, जीवस्यास्य विजृम्भते ॥७९॥
यथा च राजपुत्रेण, भोजनं चारुलोचने ! ।
अगच्छदपि कण्ठेन, गमितं लौल्यदोषतः ॥८०॥
तदनन्तरमेवोच्चैर्वान्तं तत्रैव भोजने ।
जीवस्यापि विजानीहि, समानमिदमञ्जसा ॥८१॥

तथाहि-कर्माजीर्णज्वरग्रस्तः, सदा विह्वलमानसः ।
जराजीर्णतनुक्षामो, रोगार्दितशरीरकः ॥८२॥
सर्वेषामक्षमो भोगे, भोगानामेष वर्तते ।
तथापि जायते नास्य, स्तोकाऽपि विरतौ मतिः ॥८३॥
ततश्च गाढलौल्येन, तथाभूतोऽपि सेवते ।
प्रमादवृन्दभोज्यानि वार्यमाणो विवेकिभिः ॥८४॥
शतप्राप्तौ सहस्रेच्छा, सहस्रे लक्षरोचनम् ।
लक्षे कोटिगता बुद्धिः, कोटौ राज्यस्य वाञ्छनम् ॥८५॥
राज्ये देवत्ववाञ्छाऽस्य, देवत्वे शक्रतामतिः ।
शक्रत्वेऽपि गतस्यास्य, नेच्छापूर्तिः कथञ्चन ॥८६॥
सुपुत्रैर्वरयोषाभिः, सर्वकामैर्मुहुर्मुहुः ।
नास्याभिलाषविच्छित्तिः, कोटिशोऽपि निषेवितैः ॥८७॥
सङ्गृह्णाति ततो मूढः, सर्वार्थान् सुखकाम्यया ।
ते तु दुःखाय जायन्ते, सज्वरस्येव भोजनम् ॥८८॥
जलज्वलनदायादचौरराजादिभिस्तथा ।
तस्यार्थभोजनस्योच्चैर्बलाद्वान्तिर्विधाप्यते ॥८९॥
हृत्कलमलकं घोरं, वम्यमानः सहत्ययम् ।
आराटीर्मुञ्चति प्राज्याः, कृपाहेतुर्विवेकिनाम् ॥९०॥
तदेषा चारुसर्वाङ्गि !, चित्तविक्षेपमण्डपे ।
जीवस्य विलसत्युच्चैस्तृष्णानाम्नी सुवेदिका ॥९१॥
यत्पुनश्चिन्तयत्येवं, तदा वेल्लहलः किल ।
वाताक्रान्तं शरीरं मे, ततोऽभूद्वमनं मम ॥९२॥
एतच्च रिक्तकोष्ठत्वाद्वायुनाऽभिभविष्यते ।
अतः सम्प्रीणयामीदं[१], भुञ्जे भूयोऽपि भोजनम् ॥९३॥
जीवोऽपि चिन्तयत्येव, तदिदं तारवीक्षणे ! ।
पापज्वरवशादुच्चैर्नष्टे विभवसञ्चये ॥९४॥
मृतेषु च कलत्रेषु, पुत्रेषु स्वजनेषु च ।
अन्येषु च विनष्टेषु, चित्ताबन्धेषु मन्यते ॥९५॥

१. सम्प्राण० पा. ।

न मया चेष्टितं नीत्या, न कृतं चारु पौरुषम् ।
नाश्रितो वा वरस्वामी, न कृता वा प्रतिक्रिया ॥९६॥
तेनेदं मम सर्वस्वं, पत्नी वा चारुदर्शना ।
पुत्रा वा बान्धवा वापि, विनष्टाः पश्यतोऽपि मे ॥९७॥
न चैषां विरहे नूनं, वर्तेऽहं क्षणमप्यतः ।
उपार्जयामि भूयोऽपि, तान्येवोत्साहयोगतः ॥९८॥
उपार्जितानि सन्नीत्या, रक्षिष्यामि प्रयत्नतः ।
अजागलस्तनस्येव, जीवितव्यं वृथाऽन्यथा ॥९९॥
सर्वमस्य विजानीहि, तदिदं सुभ्रु ! भावतः ।
जीवस्यास्य विपर्यासनामविष्टरचेष्टितम् ॥१००॥
यथा च भोक्तुमारब्धः, स[1]निर्लज्जतया पुनः ।
पश्यतः सर्वलोकस्य, वान्तिसंमिश्रभोजनम् ॥१०१॥
ततः सपरिवारेण, तेन पूत्कुर्वता भृशम् ।
वारितः समयज्ञेन, तद्दोषाश्च निवेदिताः ॥१०२॥
स तु तत्र गुणारोपाद्भोजने बद्धमानसः ।
तं रटन्तमनालोच्य, भक्षणं कृतवानिति ॥१०३॥
तथाऽयमपि चार्वङ्गि !, जीवः कर्ममलीमसः ।
भुक्तोत्सृष्टेषु भोगेषु, निर्लज्जः सम्प्रवर्तते ॥१०४॥
परमाणुमया ह्येते, भोगाः शब्दादयो मताः ।
सर्वे चैकैकजीवेन, गृहीताः परमाणवः ॥१०५॥
गृहीत्वा मुक्तपूर्वाश्च, बहुशो भवकोटिषु ।
भुक्तवान्तास्ततः सत्यमेते शब्दादयोऽनघे ! ॥१०६॥
यच्चास्य किञ्चिल्लोकेऽत्र, चित्ताबन्धविधायकम् ।
जीवस्य वस्तु सन्नेत्रे !, तत्सर्वं पुद्गलात्मकम् ॥१०७॥
तथापि भद्रे ! पापात्मा, पश्यतां विमलात्मनाम् ।
आबद्धचित्तस्तत्रैव, जम्बाले संप्रवर्तते ॥१०८॥
कृपापरीतचित्ताश्च, भोगकर्दमलम्पटम् ।
तं जीवं वारयन्त्येते, धर्माचार्याः प्रयत्नतः ॥१०९॥

१. स निर्ल० पा. ।

कथम् ?–अनन्तानन्दसद्वीर्यज्ञानदर्शनरूपकः ।
देवस्त्वं भद्र ! नो युक्तमतो भोगेषु वर्तनम् ॥११०॥
अन्यच्चामी विवर्तन्ते, सर्वे भोगाः क्षणे क्षणे ।
अपरापररूपेण, तुच्छमास्थानिबन्धनम् ॥१११॥
वान्ताशुचिसमाश्चैते, वर्णितास्तत्त्वदर्शिभिः ।
भद्रः परमदेवोऽपि, नातोऽमून् भोक्तुमर्हति ॥११२॥
दुःखोपढौकिताश्चामी, दुःखरूपाश्च तत्त्वतः ।
दुःखस्य कारणं तेन, वर्जनीया मनीषिणा ॥११३॥
ये च बाह्याणुनिष्पन्नास्तुच्छा गाढमनात्मकाः ।
तेषु कः पण्डितो रागं, कुर्यादात्मस्वरूपवित् ॥११४॥
अतो ममोपरोधेन, भद्र ! भोगेषु कुत्रचित् ।
अन्येषु च प्रमादेषु, मा प्रवर्तिष्ट साम्प्रतम् ॥११५॥
तदेवं पद्मपत्राक्षि !, निवारयति सद्गुरौ ।
प्रमादभोजने सक्तः, स जीवो हृदि मन्यते ॥११६॥
अहो विमूढः खल्वेष, वस्तुतत्त्वं न बुध्यते ।
आह्लादजनकानेष, यो भोगानपि निन्दति ॥११७॥
तथाहि–मद्यं वरस्त्रियो मांसं, गान्धर्वं मृष्टभोजनम् ।
माल्यताम्बूलनेपथ्यविस्ताराः सुखमासनम् ॥११८॥
अलङ्काराः सुधाशुभ्रा, कीर्तिर्भुवनगामिनी ।
सद्रत्ननिचयाः शूरं, चतुरङ्गं महाबलम् ॥११९॥
राज्यं प्रणतसामन्तं, यथेष्टाः सर्वसम्पदः ।
यद्येतद्दुःखहेतुस्ते, किमन्यत्सुखकारणम् ? ॥१२०॥ त्रिभिर्विशेषकम् ॥
विप्रलब्धाः कुसिद्धान्तैः, शुष्कपाण्डित्यगर्विताः ।
ये नूनमीदृशा लोके, भोगभोजनवञ्चिताः ॥१२१॥
ते मोहेन स्वयं नष्टाः, परानपि कृतोद्यमाः ।
नाशयन्ति हितं तेऽतो, वर्जनीया विजानता ॥१२२॥
तथाहि–यो भोगरहितो मोक्षो, वञ्चनं तदुदाहृतम् ।
तदर्थं कस्त्यजेद्दृष्टमिदं भोगसुखामृतम् ? ॥१२३॥
एवंविधविकल्पैश्च, गुरुवाक्यपराङ्मुखः ।
अभूतगुणसङ्घातं, तेषु भोगेषु मन्यते ॥१२४॥

कथम् ?–स्थिरा ममैते शुद्धाश्च, सुखरूपाश्च तत्त्वतः ।
एतदात्मक एवाहमलमन्येन केनचित् ॥१२५॥
आस्तामेष गृहीतेन, मोक्षेण प्रशमेन वा ।
अहं तु नेदृशैर्वाक्यैरात्मानं वञ्चयामि भोः ! ॥१२६॥
ततश्च–सद्धर्मावेदनव्याजाद् गाढं पूत्कुर्वतोऽग्रतः ।
गुरोरपि प्रवर्तेत प्रमादाशुचिकर्दमे ॥१२७॥
सा सर्वेयमविद्याख्या, जीवस्यास्य वरानने ! ।
महामोहनरेन्द्रस्य, गात्रयष्टिर्विजृम्भते ॥१२८॥
यथा स भोजनं भूयो, भक्षयित्वा पुनर्वमन् ।
सञ्जातसन्निपातत्वात्पतितस्तत्र भूतले ॥१२९॥
लुठन्नितस्ततो गाढं, मुञ्चन्नाक्रन्दभैरवान् ।
अनाख्येयामचिन्त्यां च प्राप्तोऽवस्थां सुदारुणाम् ॥१३०॥
न त्रातः केनचिल्लोके, तदवस्थः स्थितः परम् ।
तथायमपि विज्ञेयो, जीवः सर्वाङ्गसुन्दरि ! ॥१३१॥
तथाहि–यदा प्रमत्ततायुक्तस्तद्विलासपरायणः ।
विक्षिप्तचित्तस्तृष्णार्तो, विपर्यासवशं गतः ॥१३२॥
अविद्याऽन्धीकृतो जीवः, सक्तः संसारकर्दमे ।
आरोपितगुणव्रातस्तत्रैव विषयादिके ॥१३३॥
सर्वज्ञं धर्मसूरिं च, वारयन्तं मुहुर्मुहुः ।
सुवैद्यसन्निभं जीवो, विमूढमिति मन्यते ॥१३४॥ त्रिभिर्विशेषकम् ॥
ततश्च–पापोऽजीर्णज्वराक्रान्तः, स जीवो वान्तिसन्निभे ।
तं रटन्तमनालोच्यासत्प्रमादे प्रवर्तते ॥१३५॥
तदा निःशेषदोषौघभरपूरितमानसे ।
सन्निपातसमो घोरो, महामोहोऽस्य जृम्भते ॥१३६॥ युग्मम् ॥
ततश्च तद्वशेनायं, जीवः सुन्दरलोचने !
पश्यतामेव निश्चेष्टो, भवत्येव विवेकिनाम् ॥१३७॥
मूत्रान्त्राशुचिजम्बालवसारुधिरपूरिते ।
निर्बोलं निपतत्येव, नरके वान्तिपिच्छले ॥१३८॥
लुठतीतस्ततस्तत्र, मुञ्चन्नाक्रन्दभैरवान् ।
सहते तीव्रदुःखौघं, यद्वाचां गोचरातिगम् ॥१३९॥

तथा विचेष्टमानं च, वरगात्रि ! तपोधनाः ।
ज्ञानालोकेन पश्यन्ति, तं जीवं शुद्धदृष्टयः ॥१४०॥
केवलं सन्निपातेन, समाक्रान्तं भिषग्वराः ।
अचिकित्स्यमिमं ज्ञात्वा, वर्जयन्ति महाधियः ॥१४१॥
ततश्च तदवस्थस्य, तस्य तारविलोचने ! ।
कोऽन्यः स्यात्त्रायको जन्तोर्घोरे दुःखौघसागरे ॥१४२॥
अन्यच्च तदवस्थोऽपि, जीवोऽयं वल्गुभाषिणि ! ।
प्रमादभोजनास्वादलाम्पट्यं नैव मुञ्चति ॥१४३॥
दोषाः प्रबलतां यान्तस्ततो मुष्णन्ति चेतनाम् ।
अत्यर्थं च महामोहसन्निपातो विवर्धते ॥१४४॥
एवं च स्थिते-संसारचक्रवालेऽत्र, रोगमृत्युजराकुले ।
अनन्तकालमासीनस्त्यक्तः सद्धर्मबान्धवैः ॥१४५॥
तदिदं निजवीर्येण, जीवस्यास्य महाबलः ।
सन्निपातसमो भद्रे !, महामोहो विचेष्टते ॥१४६॥
किञ्च-प्रवर्तकश्च सर्वेषां, कार्यभूतश्च तत्त्वतः ।
महामोहनरेन्द्रोऽयं, नद्यादीनां सुलोचने ! ॥१४७॥
तदेवं राजपुत्रीयो, दृष्टान्तोऽनेन सुन्दरि ! ।
महानद्यादिवस्तूनां, दर्शितो भेदसिद्धये ॥१४८॥
अथाद्यापि न ते जाता, प्रतीतिः सुपरिस्फुटा ।
भूयोऽपीदं समासेन, प्रस्पष्टं कथयामि ते ॥१४९॥
विषयोन्मुखता याऽस्य, सा विज्ञेया प्रमत्तता ।
तत्तद्विलसितं विद्धि, यद्भोगेषु प्रवर्तनम् ॥१५०॥
प्रवृत्तौ लौल्यदोषेण, शून्यत्वं यत्तु चेतसः ।
ज्ञेयः स चित्तविक्षेपो, जीवस्यास्य मृगेक्षणे ! ॥१५१॥
तृप्तेरभावो भोगेषु, भुक्तेषु सुबहुष्वपि ।
उत्तरोत्तरवाञ्छा च, तृष्णा गीता मनीषिभिः ॥१५२॥
पापाद्भोगेषु जातेषु, जातनष्टेषु वा पुनः ।
बाह्योपायेषु यो यत्नो, विपर्यासः स उच्यते ॥१५३॥
अनित्याशुचिदुःखेषु, गाढं भिन्नेषु जीवतः ।
विपरीता मतिस्तेषु, या साऽविद्या प्रकीर्तिता ॥१५४॥

एतेषामेव वस्तूनां, सर्वेषां यः प्रवर्तकः ।
एतैरेव च यो जन्यो, महामोहः स गीयते ॥१५५॥
तदेवं भिन्नरूपाणि, तानि सर्वाणि सुन्दरि ! ।
महानद्यादिवस्तूनि, चिन्तनीयानि यत्नतः ॥१५६॥
प्राहागृहीतसङ्केता, चारु चारु निवेदितम् ।
सत्यं प्रज्ञाविशालाऽसि, नास्ति मे संशयोऽधुना ॥१५७॥
तत्तिष्ठ त्वं विशालाक्षि !, साम्प्रतं विगतश्रमः ।
निवेदयतु संसारिजीव एव ततः परम् ॥१५८॥
नरवाहनराजाय, यद्विचक्षणसूरिणा ।
निवेदितं प्रकर्षाय, विमर्शेन च धीमता ॥१५९॥
ततः संसारिजीवेन, प्रोक्तं विमललोचने ! ।
निवेदयाम्यहं तत्ते, विमर्शेन यदीरितम् ॥१६०॥
ततः प्रोक्तं विमर्शेन, भद्र ! ज्ञातो यदि त्वया ।
महानद्यादिभावार्थस्ततोऽन्यत्किं निवेद्यताम् ? ॥१६१॥
प्रकर्षः प्राह मे माम !, नामतो गुणतोऽधुना ।
महामोहनरेन्द्रस्य, परिवारं निवेदय ॥१६२॥
या चेयं दृश्यते स्थूला, राजविष्टरसंस्थिता ।
एषा किंनामिका ज्ञेया ?, किंगुणा वा वराङ्गना ? ॥१६३॥

महामूढताप्रभावः ।

विमर्शः प्राह नन्वेषा, प्रसिद्धा गुणगह्वरा ।
भो ! महामूढता नाम, भार्याऽस्य पृथिवीपतेः ॥१६४॥
चन्द्रिकेव निशानाथे, स्वप्रभेव दिवाकरे ।
एषा देवी नरेन्द्रेऽस्मिन्, देहाभेदेन वर्तते ॥१६५॥
अत एव गुणा येऽस्य, वर्णिता भद्र ! भूपतेः ।
ज्ञेयास्त एव निःशेषास्त्वयाऽमुष्या विशेषतः ॥१६६॥
प्रकर्षः प्राह यद्येवं, ततोऽतिनिकटे स्थितः ।
महाराजाधिराजस्य, कृष्णवर्णः सुभीषणः ॥१६७॥
निरीक्षमाणो निःशेषं, राजकं वक्रचक्षुषा ।
य एष दृश्यते सोऽयं, कतमो माम ! भूपतिः ? ॥१६८॥

विमर्शः प्राह विख्यातो, राज्यसर्वस्वनायकः ।
मिथ्यादर्शननामायं, महामोहमहत्तमः ॥१६९॥
अनेन तन्त्रितं राज्यं, वहत्यस्य महीपतेः ।
बलसम्पादकोऽत्यर्थममीषामेष भूभुजाम् ॥१७०॥
अत्रैव संस्थितो भद्र !, निजवीर्येण देहिनाम् ।
यदेष बहिरङ्गानां, कुरुते तन्निबोध मे ॥१७१॥

मिथ्यादर्शनमहिमा ।

अदेवे देवसङ्कल्पमधर्मे धर्ममानिताम् ।
अतत्त्वे तत्त्वबुद्धिं च, विधत्ते सुपरिस्फुटम् ॥१७२॥
अपात्रे पात्रतारोपमगुणेषु गुणग्रहम् ।
संसारहेतौ निर्वाणहेतुभावं करोत्ययम् ॥१७३॥ युग्मम् ॥
तथाहि-हसितोद्गीतविब्बोकनाट्याटोपपरायणाः ।
हताः कटाक्षविक्षेपैर्नारीदेहार्धधारिणः ॥१७४॥
कामान्धाः परदारेषु, सक्तचित्ताः क्षतत्रपाः ।
सक्रोधाः सायुधा घोरा, वैरिमारणतत्पराः ॥१७५॥
शापप्रसादयोगेन, लसच्चित्तमलाविलाः ।
ईदृशा भो ! महादेवा, लोकेऽनेन प्रतिष्ठिताः ॥१७६॥ त्रिभिर्विशेषकम् ॥
ये वीतरागाः सर्वज्ञा, ये शाश्वतसुखेश्वराः ।
क्लिष्टकर्मकलातीता, निष्कलाश्च महाधियः ॥१७७॥
शान्तक्रोधा गताटोपा, हास्यस्त्रीहेतिवर्जिताः ।
आकाशनिर्मला धीरा, भगवन्तः सदाशिवाः ॥१७८॥
शापप्रसादनिर्मुक्तास्तथापि शिवहेतवः ।
त्रिकोटिशुद्धशास्त्रार्थदेशकाः परमेश्वराः ॥१७९॥
ये पूज्याः सर्वदेवानां, ये ध्येयाः सर्वयोगिनाम् ।
ये चाज्ञाकारणाराध्या, निर्द्वन्द्वफलदायिनः ॥१८०॥
ते मिथ्यादर्शनाख्येन, लोकेऽनेन स्ववीर्यतः ।
देवाः प्रच्छादिता भद्र !, न ज्ञायन्ते विशेषतः ॥१८१॥ पञ्चभिः कुलकम् ॥
तथा-हिरण्यदानं गोदानं, धरादानं मुहुर्मुहुः ।
स्नानं पानं च धूमस्य, पञ्चाग्नितपनं तथा ॥१८२॥

तर्पणं चण्डिकादीनां, तीर्थान्तरनिपातनम् ।
यतेरेकगृहे पिण्डो, गीतवाद्ये महादरः ॥१८३॥
वापीकूपतडागादिकारणं च विशेषतः ।
यागे मन्त्रप्रयोगेण, मारणं पशुसंहतेः ॥१८४॥
कियन्तो वा भणिष्यन्ते !, भूतमर्दनहेतवः ।
रहिताः शुद्धभावेन, ये धर्माः केचिदीदृशाः ॥१८५॥
सर्वेऽपि बलिनाऽनेन, मुग्धलोके प्रपञ्चतः ।
ते मिथ्यादर्शनाह्वेन, भद्र ! ज्ञेयाः प्रवर्तिताः ॥१८६॥ पञ्चभिः कुलकम् ॥
क्षान्तिमार्दवसन्तोषशौचार्जवविमुक्तयः ।
तपःसंयमसत्यानि, ब्रह्मचर्यं शमो दमः ॥१८७॥
अहिंसास्तेयसद्ध्यानवैराग्यगुरुभक्तयः ।
अप्रमादसदैकाग्र्यनैर्ग्रन्थ्यपरतादयः ॥१८८॥
ये चान्ये चित्तनैर्मल्यकारिणोऽमृतसन्निभाः ।
सद्धर्मा जगदानन्दहेतवो भवसेतवः ॥१८९॥
तेषामेष प्रकृत्यैव, महामोहमहत्तमः ।
भवेत्प्रच्छादनो लोके, मिथ्यादर्शननामकः ॥१९०॥ चतुर्भिः कलापकम् ॥
तथा-श्यामाकतण्डुलाकारस्तथा पञ्चधनुःशतः ।
एको नित्यस्तथा व्यापी, सर्वस्य जगतो विभुः ॥१९१॥
क्षणसन्तानरूपो वा, ललाटस्थो हृदि स्थितः ।
आत्मेति ज्ञानमात्रं वा, शून्यं वा सचराचरम् ॥१९२॥
पञ्चभूतविवर्तो वा, ब्रह्मोत्समिति वाऽखिलम् ।
देवोत्समिति वा ज्ञेयं, महेश्वरविनिर्मितम् ॥१९३॥
प्रमाणबाधितं तत्त्वं, यदेवंविधमञ्जसा ।
सद्बुद्धिं कुरुते तत्र, महामोहमहत्तमः ॥१९४॥ चतुर्भिः कलापकम् ॥
जीवाजीवौ तथा पुण्यपापसंवरनिर्जराः ।
आस्रवो बन्धमोक्षौ च, तत्त्वमेतन्नवात्मकम् ॥१९५॥
सत्यं प्रतीतितः सिद्धं, प्रमाणेन प्रतिष्ठितम् ।
तथापि निह्नुते भद्र !, तदेष जनदारुणः ॥१९६॥ युग्मम् ॥

मिथ्यात्ववर्णनम् ।

तथा-गृहिणो ललनाऽवाच्यमर्दका भूतघातिनः ।
असत्यसन्धाः पापिष्ठाः सङ्ग्रहोपग्रहे रताः ॥१९७॥

तथाऽन्ये पचने नित्यमासक्ताः पाचनेऽपि च ।
मद्यपाः परदारादिसेविनो मार्गदूषकाः ॥१९८॥
तप्तायोगोलकाकारास्तथापि यतिरूपिणः ।
ये तेषु कुरुते भद्र !, पात्रबुद्धिमयं जने ॥१९९॥ त्रिभिर्विशेषकम् ॥
सज्ज्ञानध्यानचारित्रतपोवीर्यपरायणाः ।
गुणरत्नधना धीरा, जङ्गमाः कल्पपादपाः ॥२००॥
संसारसागरोत्तारकारिणो दानदायिनाम् ।
अचिन्त्यवस्तुबोहित्थतुल्या ये पारगामिनः ॥२०१॥
तेषु निर्मलचित्तेषु, पुरुषेषु जडात्मनाम् ।
एषोऽपात्रधियं धत्ते, महामोहमहत्तमः ॥२०२॥ त्रिभिर्विशेषकम् ॥
तथा-कौतुकं कुहकं मन्त्रमिन्द्रजालं रसक्रियाम् ।
निर्विषीकरणं तन्त्रमन्तर्धानं सविस्मयम् ॥२०३॥
औत्पातमान्तरिक्षं च, दिव्यमाङ्गं स्वरं तथा ।
लक्षणं व्यञ्जनं भौमं, निमित्तं च शुभाशुभम् ॥२०४॥
उच्चाटनं सविद्वेषमायुर्वेदं सजातकम् ।
ज्योतिषं गणितं चूर्णं, योगलेपास्तथाविधाः ॥२०५॥
ये चान्ये विस्मयकरा, विशेषाः पापशास्त्रजाः ।
अन्ये भूतोपमर्दस्य, हेतवः शाठ्यकेतवः ॥२०६॥
तानेव ये विजानन्ति, निःशङ्काश्च प्रयुञ्जते ।
न धर्मबाधां मन्यन्ते, शठाः पापपरायणाः ॥२०७॥
त एव गुणिनो धीरास्ते पूज्यास्ते मनस्विनः ।
त एव वीरास्ते लाभभाजिनस्ते मुनीश्वराः ॥२०८॥
इत्येवं निजवीर्येण, बहिरङ्गजनेऽमुना ।
मिथ्यादर्शनसञ्ज्ञेन, भद्र ! पापाः प्रकाशिताः ॥२०९॥ सप्तभिः कुलकम् ॥
ये पुनर्मन्त्रतन्त्रादिवेदिनोऽप्यतिनिःस्पृहाः ।
निवृत्ता लोकयात्राया, धर्मातिक्रमभीरवः ॥२१०॥
मूकान्धाः परवृत्तान्ते, स्वगुणाभ्यासने रताः ।
असक्ता निजदेहेऽपि, किं पुनर्द्रविणादिके ? ॥२११॥
कोपाहङ्कारलोभाद्यैर्दूरतः परिवर्जिताः ।
तिष्ठन्ति शान्तव्यापारा, निरपेक्षास्तपोधनाः ॥२१२॥

न दिव्यादिकमाख्यान्ति, कुहकादि न कुर्वते ।
मन्त्रादीन्नानुतिष्ठन्ति, निमित्तं न प्रयुञ्जते ॥२१३॥
लोकोपचारं निःशेषं, परित्यज्य यथासुखम् ।
स्वाध्यायध्यानयोगेषु, सक्तचित्ताः सदाऽऽसते ॥२१४॥
ते निर्गुणा अलोकज्ञा, विमूढा भोगवञ्चिताः ।
अपमानहता दीना, ज्ञानहीनाश्च कुर्कुटाः ॥२१५॥
इत्येवं निजवीर्येण, बहिरङ्गजनेऽमुना ।
ते मिथ्यादर्शनाह्वेन, स्थापिता भद्र ! साधवः ॥२१६॥ सप्तभिः कुलकम् ॥
तथा–उद्वाहनं च कन्यानां, जननं पुत्रसंहतेः ।
निपातनं च शत्रूणां, कुटुम्बपरिपालनम् ॥२१७॥
यदेवमादिकं कर्म, घोरसंसारकारणम् ।
तद्धर्म इति संस्थाप्य, दर्शितं भवतारणम् ॥२१८॥ युग्मम् ॥
यः पुनर्ज्ञानचारित्रदर्शनाढ्यो विमुक्तये ।
मार्गः सर्वोऽपि सोऽनेन, लोपितो लोकवैरिणा ॥२१९॥
ततश्च भद्र ! यत्तुभ्यं, समासेन मयोदितम् ।
वीर्यं महत्तमस्यास्य, ब्रुवाणेन पुरा यथा ॥२२०॥
अदेवे देवसङ्कल्पमधर्मे धर्ममानिताम् ।
अतत्त्वे तत्त्वबुद्धिं च, करोत्येष जडात्मनाम् ॥२२१॥
अपात्रे पात्रतारोपमगुणेषु गुणग्रहम् ।
संसारहेतौ निर्वाणहेतुभावं करोत्ययम् ॥२२२॥
तदिदं लेशतः सर्वं, प्रविवेच्य निवेदितम् ।
विस्तरेण पुनर्वीर्यं, कोऽस्य वर्णयितुं क्षमः ? ॥२२३॥
अन्यच्चायं निजे चित्ते, मन्यते भद्र ! सर्वदा ।
मदोद्धतः प्रकृत्यैव, महामोहमहत्तमः ॥२२४॥
निक्षिप्तभर एवायं, राज्यसर्वस्वनायकः ।
महामोहनरेन्द्रेण, कृतं सर्वत्र वस्तुनि ॥२२५॥
एवं च स्थिते–विश्रम्भार्पितचित्ताय, मयाऽस्मै हितमुच्चकैः ।
अन्यव्यापारशून्येन, कर्तव्यं ननु सर्वदा ॥२२६॥

चित्तविक्षेपतृष्णाविपर्यासमहिमा ।

ततश्च–मण्डपं चित्तविक्षेपं, तृष्णानाम्नीं च वेदिकाम् ।
गाढं समारयत्येष, विपर्यासं च विष्टरम् ॥२२७॥

समारितानि चानेन, यदेतानि बहिर्जने ।
कुर्वन्ति तदहं वच्मि, समाकर्णय साम्प्रतम् ॥२२८॥
यदुन्मत्तग्रहग्रस्तसन्निभो भद्र ! सर्वदा ।
जनो दोलायतेऽत्यर्थं, धर्मबुद्ध्या वराककः ॥२२९॥
कथम् ?-करोति भैरवे पातं, याति मूढो महापथम् ।
शीतेन म्रियते माघे, कुर्वाणो जलगाहनम् ॥२३०॥
पञ्चाग्नितपने रक्तो, दह्यते तीव्रवह्निना ।
गवाश्वत्थादिवन्दारुरास्फोटयति मस्तकम् ॥२३१॥
कुमारीब्राह्मणादीनामतिदानेन[1] निर्धनः ।
सहते दुःखसङ्घातं, श्राद्धः पूतमलः किल ॥२३२॥
परित्यज्य धनं गेहं, बन्धुवर्गं च दुःखितः ।
अटाट्यते विदेशेषु, तीर्थयात्राभिलाषुकः ॥२३३॥
पितृतर्पणकार्येण, देवाराधनकाम्यया ।
निपातयति भूतानि, विधत्ते च धनव्ययम् ॥२३४॥
मांसैर्मद्यैर्धनैः खाद्यैर्भक्तिनिर्भरमानसः ।
तप्तायोगोलकाकारं, ततस्तर्पयते जनम् ॥२३५॥
हास्यं विवेकिलोकस्य, धर्मबुद्ध्या विनाटितः ।
इत्येवमादिकं धर्मं, करोत्येष पृथग्जने ॥२३६॥
न लक्षयति शून्यात्मा, भूतमर्दं सुदारुणम् ।
नात्मनो दुःखसङ्घातं, हास्यं नापि धनव्ययम् ॥२३७॥
रागद्वेषादिजातस्य, स्वपापस्य विशुद्धये ।
एवं च घटते लोकस्तत्त्वमार्गाद्बहिष्कृतः ॥२३८॥
धर्मोपायमजानानः, कुरुते जीवमर्दनम् ।
प्राप्नोति करभं नैव, रासभं दामयत्ययम् ॥२३९॥
तिला भस्मीकृता वह्नौ, दग्धं पेयं तवेत्यहो ।
धनमुद्दालितं धूर्तैर्जनस्तु हृदि भावितः ॥२४०॥
न च सन्मार्गवक्तारः, पूत्कुर्वन्तोऽप्यनेकधा ।
लोकेनानेन गण्यन्ते, प्रोच्यन्ते च विमूढकाः ॥२४१॥

१. ०स्यानेन पा. ।

तदिदं भद्र ! निःशेषं, मिथ्यादर्शनसञ्ज्ञिना ।
अमुना संस्कृतस्यास्य, मण्डपस्य विजृम्भितम् ॥२४२॥
यत्पुनर्म्रियमाणोऽपि, लोकोऽयं नैव मुञ्चति ।
भद्र ! कामार्थलाम्पट्यं, नानाकारैर्विडम्बनैः ॥२४३॥
कथम् ?-अप्सरोऽर्थं करोत्येष, नदीकुण्डप्रवेशनम् ।
पत्युः सङ्गमनार्थं च, दहत्यात्मानमग्निना ॥२४४॥
स्वर्गार्थं भूतिकामेन, पुत्रस्वजनकाम्यया ।
अग्निहोत्राणि यागांश्च, कुरुतेऽन्यच्च तादृशम् ॥२४५॥
दानं ददाति चाशास्ते, भूयादेतन्मृतस्य मे ।
आशास्ते क्लेशनिर्मुक्तं, न फलं मोक्षलक्षणम् ॥२४६॥
यत्किञ्चित्कुरुते कर्म, तन्निदानेन दूषितम् ।
अर्थकामप्रदं मेऽदः, परलोके भविष्यति ॥२४७॥
तदस्य सकलस्येयं, मिथ्यादर्शनसंस्कृता ।
वृत्तान्तस्येह तृष्णाख्या, वेदिका भद्र ! कारणम् ॥२४८॥
यत्पुनर्भद्र ! लोकोऽयं, दिङ्मूढ इव मानवः ।
शिवं गन्तुमनास्तूर्णं, विपरीतः पलायते ॥२४९॥
कथम् ?-देवं विगर्हते मूढः, सर्वज्ञं सर्वदर्शिनम् ।
वेदाः प्रमाणमित्येवं भाषते निष्प्रमाणकम् ॥२५०॥
धर्मं च दूषयत्येष, जडोऽहिंसादिलक्षणम् ।
प्रख्यापयति यत्नेन, यागं पशुनिबर्हणम् ॥२५१॥
जीवादितत्त्वं मोहेनापह्नुतेऽलीकपण्डितः ।
संस्थापयति शून्यं वा, पञ्चभूतात्मकादि वा ॥२५२॥
ज्ञानादिनिर्मलं पात्रं, निन्दत्येष जडात्मकः ।
सर्वारम्भप्रवृत्तेभ्यो, दानमुच्चैः प्रयच्छति ॥२५३॥
तपः क्षमा निरीहत्वममून् दोषांश्च मन्यते ।
शाठ्यमुक्तौ(युक्तः)पिशाचत्वं, षिङ्गत्वं मनुते गुणान् ॥२५४॥
शुभ्रं ज्ञानादिकं मार्गं, मन्यते धूर्तकल्पितम् ।
कौलमार्गादिकं मूढो, मनुते शिवकारणम् ॥२५५॥
कलयत्यतुलं धर्मं, विशेषेण गृहाश्रमम् ।
निःशेषद्वन्द्वविच्छेदां, गर्हते यतिकल्पनाम् ॥२५६॥

तदनेनात्र रूपेण, मिथ्यादर्शनसंस्कृतम् ।
लोके भो ! विलसत्येतद्विपर्यासाख्यविष्टरम् ॥२५७॥
अन्यच्चास्यैव सामर्थ्याल्लोका ध्वान्तवशंगताः ।
यदन्यदपि कुर्वन्ति, भद्र ! तत्ते निवेदये ॥२५८॥
जराजीर्णकपोला ये, हास्यप्रायाश्च योषिताम् ।
वलीपलितखालित्यपिप्लुव्यङ्गादिदूषिताः ॥२५९॥
तेऽपि त्रपन्ते जरसा, विकाररसनिर्भराः ।
कथयन्त्यात्मनो जन्म, गाढमित्वरकालिकम् ॥२६०॥
अनेकद्रव्ययोगैश्च, कार्ष्ण्यसम्पत्तये किल ।
तमसेव सहार्देन, रञ्जयन्ति शिरोरुहान् ॥२६१॥
जनयन्ति मृजां देहे, नानास्नेहैर्मुहुर्मुहुः ।
तथा कपोलशैथिल्यं, यत्नतश्छादयन्ति ते ॥२६२॥
भ्रमन्ति विकटं मूढास्तरुणा इव लीलया ।
वयःस्तम्भनिमित्तं च, भक्षयन्ति रसायनम् ॥२६३॥
स्वच्छायां दर्पणे बिम्बं, निरीक्षन्ते जलेषु च ।
क्लिश्यन्ते राढया नित्यं, देहमण्डनतत्पराः ॥२६४॥
आहूतास्तात तातेति, ललनाभिस्तथापि ते ।
पितामहसमाः सन्तः, कामयन्ते विमूढकाः ॥२६५॥
सर्वस्य प्रेरणाकाराः, सन्तोऽपि नितरां पुनः ।
कुर्वन्तो हास्यबिब्बोकान्, गाढं गच्छन्ति हास्यताम् ॥२६६॥
जराजीर्णशरीराणां, येषामेषा विडम्बना ।
ते भद्र ! सति तारुण्ये, कीदृशाः सन्तु जन्तवः ? ॥२६७॥
श्लेष्मान्त्रक्लेदजम्बालपूरिते ते कलेवरे ।
आसक्तचित्ताः खिद्यन्ते, यावज्जीवं वराककाः ॥२६८॥
अनन्तभवकोटीभिर्लब्धं मानुष्यकं भवम् ।
वृथा कुर्वन्ति निर्ह्रीका, धर्मसाधनवर्जिताः ॥२६९॥
आयतिं न निरीक्षन्ते, देहतत्त्वं न जानते ।
आहारनिद्राकामार्त्तास्तिष्ठन्ति पशुसन्निभाः ॥२७०॥
ततस्तेषामपारेऽत्र, पतितानां भवोदधौ ।
निर्नष्टशिष्टचेष्टानां, पुनरुत्तरणं कुतः ? ॥२७१॥

तदनेनापि रूपेण, मिथ्यादर्शनसंस्कृतम् ।
इदं विजृम्भते भद्र ! विपर्यासाख्यमासनम् ॥२७२॥
अन्यच्च–प्रशमानन्दरूपेषु, सारेषु नियमादिषु ।
वशेनास्य भवेद्भद्र !, दुःखबुद्धिर्जडात्मनाम् ॥२७३॥
गत्वरेषु सुतुच्छेषु, दुःखरूपेषु देहिनाम् ।
भोगेषु सुखबुद्धिः स्यादासनस्यास्य तेजसा ॥२७४॥
तथैष भुवनख्यातः, प्रधानोऽत्र महाबलः ।
बहिरङ्गजनस्योच्चैः, सर्वानर्थविधायकः ॥२७५॥
मया भद्र ! समासेन, मिथ्यादर्शननामकः ।
महामोहनरेन्द्रस्य, कथितस्ते महत्तमः ॥२७६॥
ततः प्रकर्षोऽदुष्टात्मा, श्रुत्वा मातुलभाषितम् ।
उत्क्षिप्य दक्षिणं पाणिं, तं प्रतीदमभाषत ॥२७७॥
चारु चारु कृतं माम !, यदेष कथितस्त्वया ।
या त्वेषाऽर्धासनेऽस्यैव, सा किंनाम्नी वराङ्गना ? ॥२७८॥

कुदृष्टिजाताः पाखण्डिनः ।

विमर्शोऽवददेषाऽपि, समानबलसाहसा ।
अस्यैव भार्या विज्ञेया, कुदृष्टिर्नाम विश्रुता ॥२७९॥
ये दृश्यन्ते विमार्गस्था, बहिरङ्गजने सदा ।
भद्र ! पाषण्डिनः केचित्तेषामेषैव कारणम् ॥२८०॥
ते चामी नामभिर्भद्र ! वर्ण्यमाना मया स्फुटम् ।
ज्ञेया देवादिभेदेन, विभिन्नाश्च परस्परम् ॥२८१॥
तद्यथा–शाक्यास्त्रैदण्डिकाः शैवाः, गौतमाश्चरकास्तथा ।
सामानिकाः सामपरा, वेदधर्माश्च धार्मिकाः ॥२८२॥
आजीविकास्तथा शुद्धा, विद्युद्दन्ताश्च चुञ्चुणाः ।
माहेन्द्राश्चारिका धूमा, बद्धवेषाश्च खुङ्खुकाः ॥२८३॥
उल्काः पाशुपताः कौलाः, काणादाश्चर्मखण्डिकाः ।
सयोगिनस्तथोलूका, गोदेहा यज्ञतापसाः ॥२८४॥
घोषपाशुपताश्चान्ये, कन्दच्छेदा दिगम्बराः ।
कामर्दकाः कालमुखाः, पाणिलेहास्त्रिराशिकाः ॥२८५॥

कापालिकाः क्रियावादा, गोव्रता मृगचारिणः ।
लोकायताः शङ्खधमाः, सिद्धवादाः कुलन्तपाः ॥२८६॥
तापसा गिरिरोहाश्च, शुचयो राजपिण्डकाः ।
संसारमोचकाश्चान्ये, सर्वावस्थास्तथा परे ॥२८७॥
अज्ञानवादिनो ज्ञेयास्तथा पाण्डुरभिक्षवः ।
कुमारव्रतिकाश्चान्ये, शरीररिपवस्तथा ॥२८८॥
उत्कन्दाश्चक्रवालाश्च, त्रपवो हस्तितापसाः ।
चित्तदेवा बिलावासास्तथा मैथुनचारिणः ॥२८९॥
अम्बरा असिधाराश्च, तथा माठरपुत्रकाः ।
चन्द्रोद्गमिका(ख्या)श्चान्ये, तथैवोदकमृत्तिकाः ॥२९०॥
एकैकस्थालिका मङ्खाः, पक्षापक्षा गजध्वजाः ।
उलूकपक्षा मात्रादिभक्ताः कण्टकमर्दकाः ॥२९१॥
कियन्तो वाऽत्र गण्यन्ते ?, नानाभिप्रायसंस्थिताः ।
पाषण्डिनो भवन्त्येते, भो ! नानाविधनामकाः ॥२९२॥
देवैर्वादैस्तथा वेषैः, कल्पैर्मोक्षविशुद्धिभिः ।
वृत्तिभिश्च भवन्त्येते, भिन्नरूपाः परस्परम् ॥२९३॥
तथाहि–रुद्रेन्द्रचन्द्रनागेन्द्रबुद्धोपेन्द्रविनायकाः ।
निजाकूतवशादेतैरिष्टा देवाः पृथक् पृथक् ॥२९४॥
ईश्वरो नियतिः कर्म, स्वभावः काल एव वा ।
जगत्कर्तेति वादोऽयं, सर्वेषां भिन्नरूपकः ॥२९५॥
त्रिदण्डकुण्डिकामुण्डवल्कचीवरभेदतः ।
वेषः परस्परं भिन्नः, स्फुट एवोपलक्ष्यते ॥२९६॥
कल्पोऽपि भक्ष्याभक्ष्यादिलक्षणः स्वधिया किल ।
अन्योऽन्यं भिन्न एवैषां, तीर्थिनां भद्र ! वर्तते ॥२९७॥
विध्यातदीपरूपाभः, सुखदुःखविवर्जितः ।
एषां पाषण्डिनां भद्र !, मोक्षो भिन्नः परस्परम् ॥२९८॥
निजाकूतवशेनैव, विशुद्धिरपि तीर्थिकैः ।
अमीभिर्भद्र ! सत्त्वानां, भिन्नरूपा निवेदिता ॥२९९॥
कन्दमूलफलाहाराः, केचिद्धान्याशिनोऽपरे ।
वृत्तितोऽपि विभिद्यन्ते, ततस्ते भद्र ! तीर्थिकाः ॥३००॥

एवं च स्थिते–अमी वराकाः सर्वेऽपि, दोलायन्ते भवोदधौ ।
अस्याः कुदृष्टेर्वीर्येण, शुद्धधर्मबहिष्कृताः ॥३०१॥

तत्त्वमार्गमजानन्तो, विवदन्ते परस्परम् ।
स्वाग्रहं नैव मुञ्चन्ति, रुष्यन्ति हितभाषिणे ॥३०२॥

तदेषा भुवनख्याता, मिथ्यादर्शनवत्सला ।
कुदृष्टिर्विलसत्येव, बहिरङ्गजनाहिता ॥३०३॥
यस्त्वेष विष्टरे तुङ्गे, निविष्टः प्रविलोक्यते ।
प्रसिद्ध एव भद्रस्य, स नूनं रागकेसरी ॥३०४॥
एनं राज्ये निधायोच्चैर्महामोहनराधिपः ।
गतचिन्ताभरो नूनं, कृतार्थो वर्ततेऽधुना ॥३०५॥
केवलं दत्तराज्येऽपि, महामोहनरेश्वरे ।
सविशेषं करोत्येष, विनयं नयपण्डितः ॥३०६॥
महामोहनरेन्द्रोऽपि, सर्वेषामग्रतः स्फुटम् ।
अस्यैव भोः सुपुत्रस्य, प्रभुत्वं ख्यापयत्यलम् ॥३०७॥
तदेवं स्नेहसम्बद्धौ, पितापुत्रौ परस्परम् ।
एतावेव वशीकर्तुं, क्षमौ भद्र ! जगत्त्रयम् ॥३०८॥
यावद्विप्रतपत्येष, नरेन्द्रो रागकेसरी ।
बहिरङ्गजने तावत्कौतस्त्यः सुखसङ्गमः ? ॥३०९॥
यतोऽयं भद्र ! संसारसागरोदरवर्तिषु ।
बहिर्लोके पदार्थेषु, प्रीतिमुत्पादयत्यलम् ॥३१०॥
सङ्क्लिष्टपुण्यजन्येषु, सङ्क्लिष्टेषु स्वरूपतः ।
सङ्क्लेशजनकेष्वेव, सम्बध्नाति पृथग्जनम् ॥३११॥

रागत्रयम् ।

अन्यच्च भद्र ! पार्श्वस्थं, यदस्य पुरुषत्रयम् ।
रक्तवर्णमतिस्निग्धदेहं च प्रविभाव्यते ॥३१२॥
एते हि निजवीर्येण, शरीरादविभेदिनः ।
अनेन विहिता भद्र ! त्रयोऽप्यात्मवयस्यकाः ॥३१३॥
अतत्त्वाभिनिवेशाख्यः प्रथमोऽयं नरोत्तमः ।
दृष्टिरागः इति प्रोक्तः, स एवापरसूरिभिः ॥३१४॥

अयं हि भद्र ! तीर्थ्यानामात्मीयात्मीयदर्शने ।
करोति चेतसोऽत्यन्तमाबन्धमनिवर्तकम् ॥३१५॥
द्वितीयो भवपाताख्यः, पुरुषो भद्र ! गीयते ।
अयमेवापरैः प्राज्ञैः, स्नेहराग इतीरितः ॥३१६॥
अयं तु कुरुते द्रव्यपुत्रस्वजनसन्ततौ ।
मूर्च्छातिरेकतो भद्र !, चेतसो गाढबन्धनम् ॥३१७॥
अभिष्वङ्गाभिधानोऽयं, तृतीयः पुरुषः किल ।
गीतो विषयरागाख्यः, स एव मुनिपुङ्गवैः ॥३१८॥
अयं तु भद्र ! लोकेऽत्र, भ्रमन्नुद्दामलीलया ।
शब्दादिविषयग्रामे, लौल्यमुत्पादयत्यलम् ॥३१९॥
नरत्रयस्य सामर्थ्यादस्य भद्र ! जगत्त्रयम् ।
आक्रान्तमेव मन्येऽहं, रागकेसरिणा पुनः ॥३२०॥
सन्मार्गमत्तमातङ्गकुम्भनिर्भेदनक्षमः ।
स्ववीर्याक्रान्तभुवनः, सत्योऽयं रागकेसरी ॥३२१॥

मूढता ।

या त्वेषा दृश्यते भद्र !, निविष्टाऽस्यैव विष्टरे ।
अस्यैव भार्या सा ज्ञेया, मूढता लोकविश्रुता ॥३२२॥
ये केचिदस्य विद्यन्ते, गुणा भद्र ! महीपतेः ।
तेऽस्यां सर्वे सुभार्यायां, विज्ञेयाः सुप्रतिष्ठिताः ॥३२३॥
यतः शरीरनिक्षिप्तां, पार्वतीमिव शङ्करः ।
एनामेष सदा राजा, धारयत्येव मूढताम् ॥३२४॥
ततश्च-अन्योऽन्यानुगतो नित्यं, यथा देहस्तथाऽनयोः ।
अविभक्ता विवर्तन्ते, गुणा अपि परस्परम् ॥३२५॥

द्वेषगजेन्द्रः ।

यस्त्वेष वामके पार्श्वे, निविष्टोऽस्यैव भूपतेः ।
भद्र ! द्वेषगजेन्द्रोऽसौ, प्रतीतः प्रायशस्तव ॥३२६॥
अत्रापि च महामोहनरेन्द्रस्य सुतोत्तमे ।
चित्तं विश्रान्तमेवोच्चैर्गुणाः कल्याणकारकाः ॥३२७॥
यतः-जन्मना लघुरप्येष, रागकेसरिणोऽधुना ।
वीर्येणाभ्यधिको लोके, नरेन्द्रो भद्र ! वर्तते ॥३२८॥

तथाहि-न भयं यान्ति दृष्टेन, रागकेसरिणा जनाः ।
दृष्ट्वा द्वेषगजेन्द्रं तु, जायन्ते भीत्वकम्पिताः ॥३२९॥
यावदेष महावीर्यश्चित्ताटव्यां विजृम्भते ।
बहिरङ्गजने तावत्कौतस्त्यः प्रीतिसङ्गमः ? ॥३३०॥
येऽत्यन्तसुहृदो लोकाः, स्नेहनिर्भरमानसाः ।
तेषामेष प्रकृत्यैव, चित्तविश्लेषकारकः ॥३३१॥
चित्तवृत्तिमहाटव्यां, चलत्येष यदा यदा ।
तदा तदा भवन्त्येव, जनास्तेऽत्यन्तदुःखिताः ॥३३२॥
परलोके पुनर्यान्ति, नरके तीव्रवेदने ।
आबद्धमत्सरा वैरं, प्रविधाय परस्परम् ॥३३३॥
भद्र ! द्वेषगजेन्द्रोऽयं, यथार्थो नात्र संशयः ।
यस्य गन्धेन भज्यन्ते, विवेकाः कलभा इव ॥३३४॥
या त्वस्य भार्या तद्वार्त्ता, शोकेनैव निवेदिता ।
अत एव न पार्श्वस्था, दृश्यते साऽविवेकिता ॥३३५॥
प्रकर्षः प्राह यस्त्वेष, निविष्टस्तुङ्गविष्टरे ।
नरत्रयपरीवारः, पृष्ठतोऽस्यैव भूपतेः ॥३३६॥
रक्तवर्णोऽतिलोलाक्षो, विलासोल्लासतत्परः ।
पृष्ठापीडिततूणीरः, सचापः पञ्चबाणकः ॥३३७॥
भ्रमद्भ्रमरझङ्कारहारिगीतविनोदितः ।
विलसद्दीप्तिलावण्यवर्ण्यया वरयोषिता ॥३३८॥
अस्या एव तनुश्लेषवक्त्रचुम्बनलालसः ।
कमनीयाकृतिः सोऽयं, कतमो माम ! भूपतिः ? ॥३३९॥

चतुर्भिः कलापकम् ॥

विमर्शः प्राह नन्वेष, महाश्चर्यविधायकः ।
उद्दामपौरुषो लोके, प्रसिद्धो मकरध्वजः ॥३४०॥
यद्येषोऽद्भुतकर्तव्यो, भवता नावधारितः ।
न किञ्चिदपि विज्ञातं, भद्राद्यापि ततस्त्वया ॥३४१॥
यो भद्र ! श्रूयते लोके, परमेष्ठी पितामहः ।
सोऽनेन कारितो गौरीविवाहे बालविप्लवम् ॥३४२॥

स एव चाप्सरोनृत्तरूपविक्षिप्तमानसः ।
अनेनैव कृतो भद्र !, पञ्चवक्त्रधरः किल ॥३४३॥
यो लोके जगतो व्यापी, श्रूयते किल केशवः ।
अनेन कारितः सोऽपि, गोपीनां पादवन्दनम् ॥३४४॥
अन्यच्च भद्र ! सोऽनेन, सुप्रसिद्धो महेश्वरः ।
दापितोऽर्धं शरीरस्य, गौर्यै विरहकातरः ॥३४५॥
उल्लासितबृहल्लिङ्गः, स एव सुरकानने ।
तद्भार्याक्षोभणे रक्तस्तथाऽनेन विनाटितः ॥३४६॥
उत्पाद्य सुरते तृष्णां, स एवानेन धारितः ।
दिव्यं वर्षसहस्रं भो, रतस्थ इति गीयते ॥३४७॥
अन्येऽपि बहवो लोके, मुनयो देवदानवाः ।
वशीकृत्य कृताः सर्वे, भद्रानेनात्मकिङ्कराः ॥३४८॥
कोऽस्य लङ्घयितुं शक्तो, नूनमाज्ञां जगत्त्रये ? ।
आत्मभूतं महावीर्यं, यस्येदं पुरुषत्रयम् ॥३४९॥
अयं हि प्रथमो भद्र !, पुरुषोऽनघपौरुषः ।
नाम्ना विज्ञाततद्वीर्यैः, पुंवेद इति गीयते ॥३५०॥
अमुष्य तात ! वीर्येण, बहिरङ्गा मनुष्यकाः ।
पारदार्ये प्रवर्तन्ते, जायन्ते कुलदूषणाः ॥३५१॥
द्वितीयः पुरुषो ह्येष, स्त्रीवेद इति सूरिभिः ।
व्यावर्णितो महातेजा, व्यालुप्तभुवनोदरः ॥३५२॥
अस्य धाम्ना तु नस्तात ! योषितो विगतत्रपाः ।
विलङ्घ्य कुलमर्यादां, रज्यन्ते परपूरुषे ॥३५३॥
तृतीयः पुरुषो भद्र ! षण्डवेद इति स्मृतः ।
येन दन्दह्यते लोको, बहिरङ्गः स्वतेजसा ॥३५४॥
आलप्यालमिदं तावदस्य वीर्यविचेष्टितम् ।
अनिवेद्यं जने येन, विगुप्यन्ते नपुंसकाः ॥३५५॥
एतन्नरत्रयं भद्र !, पुरस्कृत्य प्रवर्तते ।
अविज्ञातबलोऽन्येषां, नूनमेष जगत्त्रये ॥३५६॥
या त्वेषा पद्मपत्राक्षी, रूपसौन्दर्यमन्दिरम् ।
अस्यैव वल्लभा भार्या, रतिरेषाऽभिधीयते ॥३५७॥

येऽनेन निर्जिता लोका, नरवीर्यपुरःसरम् ।
तेषामेषा प्रकृत्यैव, सुखबुद्धिविधायिका ॥३५८॥
तथाहि-अस्या वीर्येण भो लोका, दुःखिताः परमार्थतः ।
तथापि तेऽदो मन्यन्ते, मकरध्वजनिर्जिताः ॥३५९॥
यदुत-आह्लादजनकोऽस्मभ्यं, हितोऽयं मकरध्वजः ।
प्रतिकूलाः पुनर्येऽस्य, कुतस्तेषां सुखोद्भवः ? ॥३६०॥
ततो रत्याऽनया भद्र !, ते वशीकृतमानसाः ।
जाता निर्मिथ्यभावेन, मकरध्वजकिङ्कराः ॥३६१॥
तदादेशेन कुर्वन्ति, हास्यस्थानं विवेकिनाम् ।
आत्मनः सततं मूढा, नानारूपं विडम्बनम् ॥३६२॥
कथम् ?-रचयन्त्यात्मनो वेषं, योषितां चित्तरञ्जनम् ।
आचरन्ति च मोहेन, देहे भूषणविभ्रमम् ॥३६३॥
तुष्यन्ति कामिनीलोललोचनार्धविलोकिताः ।
वहन्ति हृदये प्रीतिं, तदालापैर्मनोरमैः ॥३६४॥
भ्रमन्ति विकटैः पादैरुन्नामितशिरोधराः ।
रामाकटाक्षविक्षिप्ताः, सुभगा इति गर्विताः ॥३६५॥
कुलटादृष्टिमार्गेषु, तच्चित्ताक्षेपलम्पटाः ।
निष्क्रीडयन्ति मोहान्धा, दत्तकान् कारणं विना ॥३६६॥
इतस्ततः प्रधावन्ति, दर्शयन्ति पराक्रमम् ।
तासां मनोऽनुकूलं हि, ते किं किं यन्न कुर्वते ? ॥३६७॥
कुर्वन्ति चाटुकर्माणि, भाषन्ते किङ्करा इव ।
पतन्ति पादयोस्तासां, जायन्ते कर्मकारकाः ॥३६८॥
सहन्ते योषितां पादप्रहारान्मस्तकेन ते ।
मन्यमाना निजे चित्ते, मोहतस्तदनुग्रहम् ॥३६९॥
आस्वाद्य मद्यगण्डूषं, योषावक्त्रसमर्पितम् ।
श्लेष्मोन्मिश्रं च मन्यन्ते,स्वर्गादभ्यधिकं सुखम् ॥३७०॥
ये नरा वीर्यभूयिष्ठा, ललनाभिः स्वलीलया ।
भ्रूक्षेपेणैव कार्यन्ते, तेऽशुचेरपि मर्दनम् ॥३७१॥
तत्सङ्गमार्थं दह्यन्ते, सुरतेषु न तोषिणः ।
दूयन्ते विरहे तासां, म्रियन्ते शोकविह्वलाः ॥३७२॥

अवधूताश्च खिद्यन्ते, रुण्टन्ति च बहिष्कृताः ।
पररक्तस्वनारीभिः, पात्यन्ते दुःखसागरे ॥३७३॥
ईर्ष्यया च वितुद्यन्ते, स्वभार्यारक्षणोद्यताः ।
एता विडम्बना भद्र !, प्राप्नुवन्तीह ते भवे ॥३७४॥
परलोके पुनर्यान्ति, घोरे संसारनीरधौ ।
ये जाता रतिवीर्येण, मकरध्वजकिङ्कराः ॥३७५॥
बहवश्चेदृशाः प्रायो, बहिरङ्गा मनुष्यकाः ।
ये त्वस्य शासनातीता, विरलास्ते मनीषिणः ॥३७६॥
तदयं यस्त्वया पृष्टो, लेशोद्देशादसौ मया ।
परिवारयुतो भद्र !, वर्णितो मकरध्वजः ॥३७७॥
प्रकर्षः प्राह-मामेदं, सुन्दरं विहितं त्वया ।
यमन्यमपि पृच्छामि, सन्देहं तं निवेदय ॥३७८॥
मकरध्वजपार्श्वस्थं, यदिदं प्रविभाव्यते ।
किंनाम किंगुणं चेदम् ? माम ! मानुषपञ्चकम् ॥३७९॥

हासतुच्छते ।

विमर्शः प्राह-यस्तावदेष शुक्लो मनुष्यकः ।
स हास इति विज्ञेयो, विषमोऽत्यन्तदुष्करः ॥३८०॥
अयं हि कुरुते भद्र !, निजवीर्येण मानुषम् ।
बहिरङ्गं विना कार्यं, सशब्दमुखकोटरम् ॥३८१॥
किञ्चिन्निमित्तमासाद्य, निमित्तविरहेण वा ।
स्वं वीर्यं दर्शयत्युच्चैर्येषामेष महाभटः ॥३८२॥
महाकहकहध्वानैर्हसन्तः शिष्टनिन्दिताः ।
निर्वादितमुखास्तुच्छास्ते जने यान्ति लाघवम् ॥३८३॥ युग्मम् ॥
आशङ्कायाः पदं लोके, जायन्ते निर्निमित्तकम् ।
जनयन्ति परे वैरं, लभन्ते वक्त्रविभ्रमम् ॥३८४॥
मक्षिकामशकादीनामुपघातं न देहिनाम् ।
आचरन्ति विना कार्यं, परेषां च पराभवम् ॥३८५॥
तदिदं भद्र ! निःशेषमिह लोके विजृम्भते ।
हासोऽयं परलोकेऽस्मात्कर्मबन्धः सुदारुणः ॥३८६॥

अस्त्यस्य तुच्छता नाम, सद्भार्या हितकारिणी ।
देहस्थाऽस्यैव पश्यन्ति, तां भो गम्भीरचेतसः ॥३८७॥
एनमुल्लासयत्येव, निमित्तेन विना सदा ।
हासं सा तुच्छता वत्स !, लघुलोके यथेच्छया ॥३८८॥
यतो गम्भीरचित्तानां, निमित्ते सुमहत्यपि ।
मुखे विकासमात्रं स्यान्न हास्यं बहुदोषलम् ॥३८९॥
या त्वेषा कृष्णसर्वाङ्गी, गाढं बीभत्सदर्शना ।
दृश्यते ललना सेयमरतिर्नाम विश्रुता ॥३९०॥
किञ्चित्कारणमासाद्य, बहिरङ्गजने सदा ।
करोत्येष मनोदुःखं, जृम्भमाणाऽतिदुःसहम् ॥३९१॥
यस्त्वेष दृश्यते भद्र !, कम्पमानशरीरकः ।
पुरुषः स भयो नाम, प्रसिद्धो गाढदुःसहः ॥३९२॥

भयहीनसत्त्वते ।

विलसन्नेष महाटव्यामेतस्यां किल लीलया ।
बहिरङ्गजनानुच्चैः, कुरुते कातराननान् ॥३९३॥
कथम् ?-त्रस्यन्तीह मनुष्यादेः, कम्पन्ते पशुसंहतेः ।
अर्थादिहानिं मन्वानाः, पलायन्तेऽतिकातराः ॥३९४॥
अकस्मादेव जायन्ते, त्रस्तास्तरललोचनाः ।
जीविष्यामः कथं चेति, चिन्तया सन्ति विह्वलाः ॥३९५॥
मरिष्यामो मरिष्याम, इत्येवं भावनापराः ।
मुधैव जीवितं हित्वा, म्रियन्ते सत्त्ववर्जिताः ॥३९६॥
जने च मा भूदश्लाघेत्येवं भावेन विह्वलाः ।
नोचितान्यपि कुर्वन्ति, कर्माणि पुरुषाधमाः ॥३९७॥
स एष निकटस्थायिसप्तमानुषसम्पदा ।
विजृम्भते भयो भद्र !, बहिरङ्गजने सदा ॥३९८॥
किञ्च-पलायनं रणे दैन्यमरीणां पादवन्दनम् ।
अस्यादेशेन निर्लज्जास्ते कुर्वन्ति नराधमाः ॥३९९॥
तदेवं भद्र ! लोकेऽत्र, ये भयस्य वशं गताः ।
विनाटिताः परत्रापि, यान्ति भीमे भवोदधौ ॥४००॥

अस्यापि च शरीरस्था, भार्याऽस्ति पतिवत्सला ।
संवर्धिका कुटुम्बस्य, प्रोच्यते हीनसत्त्वता ॥४०१॥
तां हीनसत्त्वतां देहाद्भार्यामेष न मुञ्चति ।
नूनं हि म्रियते भद्र !, भयोऽयं रहितस्तया ॥४०२॥
भद्र ! प्रत्यभिजानीषे, किमेनं तु न साम्प्रतम् ? ।
तं तत्र नगरे शोकं, यममुं द्रक्ष्यसि स्फुटम् ॥४०३॥
अनेनैव तदा वार्ता, समस्ताऽपि निवेदिता ।
सोऽयं समागतस्तूर्णं, शोको भद्र ! पुनर्बले ॥४०४॥
अपेक्ष्य कारणं किञ्चिदयं लोके बहिर्गते ।
आविर्भूतः करोत्येव, दैन्याक्रन्दनरोदनम् ॥४०५॥
इष्टैर्वियुक्ता ये लोका, निमग्नाश्च महापदि ।
अनिष्टैः सम्प्रयुक्ताश्च, तस्य स्युर्वशवर्तिनः ॥४०६॥
न लक्षयन्ति ते मूढा, यथैष रिपुरुच्चकैः ।
अस्यादेशेन मुञ्चन्ति, आराटीः केवलं जडाः ॥४०७॥
एष शोकः किलास्माकं, दुःखत्राणं करिष्यति ।
अयं तु वर्धयत्येव, तेषां दुःखं निषेवितः ॥४०८॥
न साधयन्ति ते स्वार्थं, धर्माद् भ्रश्यन्ति मानवाः ।
प्राणैरपि वियुज्यन्ते, मूर्च्छासंमीलितेक्षणाः ॥४०९॥
ताडनं शिरसोऽत्यर्थं, लुञ्चनं कचसन्ततेः ।
कुट्टनं वक्षसो भूमौ, लोठनं गाढविक्लवम् ॥४१०॥
तथाऽऽत्मोल्लम्बनं रज्ज्वा, पतनं च जलाशये ।
दहनं वह्निना शैलशिखरादात्ममोचनम् ॥४११॥
भक्षणं कालकूटादेः, शस्त्रेणात्मनिपातनम् ।
प्रलापनमुन्मादं च, वैक्लव्यं दैन्यभाषणम् ॥४१२॥
अन्तस्तापं महाघोरं, शब्दादिसुखवञ्चनम् ।
लभन्ते पुरुषा भद्र !, ये शोकवशवर्तिनः ॥४१३॥
इत्थं भूरितरं दुःखं, प्राप्नुवन्तीह ते भवे ।
कर्मबन्धं विधायोच्चैर्यान्त्यमुत्र च दुर्गतौ ॥४१४॥
तदेष बहिरङ्गानां, दुःखदो भद्र ! देहिनाम् ।
किञ्चिल्लेशेन शोकस्ते, वर्णितः पुरतो मया ॥४१५॥

अस्यापि च शरीरस्था, भवस्था नाम दारुणा ।
विद्यते पत्निका वत्स ! शोकस्य गृहनायिका ॥४१६॥
साऽस्य संवर्धिका ज्ञेया, तां विना नैव जीवति ।
अत एव शरीरस्थां, धारयत्येष सर्वदा ॥४१७॥
या त्वेषा दृश्यते कृष्णा, भोः सङ्कोचितनासिका ।
नारी सा सूरिभिर्भद्र ! जुगुप्सा परिकीर्तिता ॥४१८॥
इयं तु बहिरङ्गानां, लोकानां मनसोऽधिकम् ।
व्यलीकभावमाधत्ते, तत्त्वदर्शनवर्जिनाम् ॥४१९॥
कृमिजालोल्बणं देहं, पूयक्लिन्नं मलाविलम् ।
वस्तु दुर्गन्धि बीभत्सं, ते हि दृष्ट्वा कथञ्चन ॥४२०॥
कुर्वन्ति शिरसः कम्पं, नासिकाधूननं जडाः ।
दूरतः प्रपलायन्ते, मीलयन्ति च लोचने ॥४२१॥
हुं हुं हुमिति जल्पन्ति, वक्रां कुर्वन्ति कन्धराम् ।
विशन्ति शौचवादेन, सचेलाः शीतले जले ॥४२२॥
नासिकां कुञ्चयन्त्युच्चैर्निष्ठीवन्ति मुहुर्मुहुः ।
आश्लेषे वर्त्मचेलादेः, क्रुद्धाः स्नान्ति पुनः पुनः ॥४२३॥
छायामपि च नेच्छन्ति, परेषां स्प्रष्टुमात्मना ।
जायन्ते शौचवादेन, वेताला इव दुःखिताः ॥४२४॥
चित्तशूकावशादेव, साक्षादुन्मत्तका अपि ।
केचिद्भद्र ! प्रजायन्ते, ये जुगुप्सावशं गताः ॥४२५॥
परलोके पुनर्यान्ति, तत्त्वदर्शनवर्जिताः ।
तमोऽभिभूतास्ते मूर्खा, घोरसंसारचारके ॥४२६॥
तदेवं बहिरङ्गानां, लोकानां बहुदुःखदा ।
किञ्चित्ते वर्णिता भद्र !, जुगुप्साऽपि मयाऽधुना ॥४२७॥
प्रकर्षः प्राह दृश्यन्ते, यान्येतानि पुरो मया ।
निविष्टानि नरेन्द्राणामुत्सङ्गादिषु लीलया ॥४२८॥
गाढं दुर्दान्तचेष्टानि, चटुलानि विशेषतः ।
आरक्तकृष्णवर्णानि, डिम्भरूपाणि षोडश ॥४२९॥
अमूनि नामभिर्माम ! गुणैश्च सुपरिस्फुटम् ।
अधुना वर्ण्यमानानि, श्रोतुमिच्छाम्यहं त्वया ॥४३०॥

कषायस्वरूपम् ।

विमर्शः प्राह-सर्वेषामेतेषां सूरिभिः पुरा ।
सामान्यतः कषायाख्या, भद्र ! लोके प्रकाशिता ॥४३१॥
विशेषतः पुनर्भद्र !, यान्येतानीह वीक्षसे ।
महत्तमानि दुष्टानि, सर्वेषामग्रतस्तथा ॥४३२॥
चत्वारि गर्भरूपाणि, रौद्राकाराणि भावतः ।
तान्यनन्तानुबन्धीनि, गीतानि किल सञ्ज्ञया ॥४३३॥
अमूनि च प्रकृत्यैव, मिथ्यादर्शननामकः ।
अहं महत्तमो भद्र !, स्वात्मभूतानि पश्यति ॥४३४॥
ततश्च बहिरङ्गानां, लोकानां निजवीर्यतः ।
एतान्यपि प्रकुर्वन्ति, मिथ्यादर्शनभक्तताम् ॥४३५॥
यतः-यावदेतानि जृम्भन्ते, डिम्भरूपाणि लीलया ।
चित्तवृत्तिमहाटव्यां, तावत्ते बाह्यमानुषाः ॥४३६॥
अनन्यचित्ताः सततमेनमेव महत्तमम् ।
लोकवाक्यनिराकाङ्क्षाः, सद्भक्त्या पर्युपासते ॥४३७॥
अत एव च-चित्तवृत्तिमहाटव्यामुल्लसत्स्वेषु ते जनाः ।
न तत्त्वमार्गं भावेन, प्रपद्यन्ते कदाचन ॥४३८॥
एवं स्थिते-ये दोषा वर्णिताः पूर्वं, मिथ्यादर्शनसंश्रयाः ।
बहिर्जनानां सर्वेषां, तेषामेतानि कारणम् ॥४३९॥
एतेभ्यो लघुरूपाणि, यानि चत्वारि सुन्दर ! ।
अप्रत्याख्याननामानि, तानि गीतानि पण्डितैः ॥४४०॥
एतानि निजवीर्येण, बहिरङ्गमनुष्यकान् ।
प्रवर्तयन्ति पापेषु, वारयन्ति निवर्तनम् ॥४४१॥
किं बहुना ?-यावदेतानि गाहन्ते, चित्तवृत्तिमहाटवीम् ।
तावद्भद्र ! निवर्तन्ते, न ते पापादणोरपि ॥४४२॥
तत्त्वमार्गं प्रपद्येरन्नेतेषु विलसत्स्वपि ।
लभन्ते तद्बलात्सौख्यं, विरतिं तु न कुर्वते ॥४४३॥
ततस्तेऽमुत्र सन्तप्ता, निपतन्ति परत्र च ।
विधाय पापसङ्घातं, संसारगहने जनाः ॥४४४॥

यान्येतानि पुनर्भद्र !, लघीयांसि ततोऽपि च ।
प्रत्याख्यावारकाणीह, बुधास्तानि प्रचक्षते ॥४४५॥
अमूनि किल वल्गन्ते, यावदत्रैव मण्डपे ।
बहिरङ्गजनाः सर्वं, तावन्मुञ्चन्त्यघं न वै ॥४४६॥
किञ्चिन्मात्रं तु मुञ्चेयुः, पापं बाह्यजनाः किल ।
चित्तवृत्तिमहाटव्यामेतेषु विलसत्सु भोः ॥४४७॥
एतान्यपि स्वरूपेण, तस्मात्सन्तापकारणम् ।
बहिर्जनानां कल्याणे, विरतिस्तत्र कारणम् ॥४४८॥
एतेभ्योऽपि लघीयांसि, यान्येतानीह सुन्दर ! ।
वर्तन्ते गर्भरूपाणि, चत्वारि तव गोचरे ॥४४९॥
तानि सञ्ज्वलनाख्यानि, गीतानि मुनिपुङ्गवैः ।
लीलया चटुलानीत्थमुल्लसन्ति मुहुर्मुहुः ॥४५०॥
एतानि सर्वपापेभ्यो, विरतानामपि देहिनाम् ।
इहोल्लसन्ति कुर्वन्ति, बाह्यानां चित्तविप्लवम् ॥४५१॥
दूषयन्ति ततो भूयः, सर्वपापनिबर्हणम् ।
ते सातिचारा जायन्ते, वीर्येणैषां बहिर्जनाः ॥४५२॥
न सुन्दराणि सर्वेषां, तदेतान्यपि देहिनाम् ।
लघुरूपाणि दृश्यन्ते, तात ! यद्यपि जन्तुभिः ॥४५३॥
चतुष्टयानि चत्वारि, तदेतानि विशेषतः ।
एतेषां नामभिर्भद्र !, गुणैश्च कथितानि ते ॥४५४॥
प्रत्येकं यानि नामानि, ये गुणाश्च विशेषतः ।
एतेषां तत्पुनर्भद्र !, को वा वर्णयितुं क्षमः ? ॥४५५॥
तस्मात्ते कथयिष्यामि, विश्रब्धः कुत्रचित्पुनः ।
प्रस्तावागतमेवेह, वीर्यमेषां विशेषतः ॥४५६॥
अन्यच्च-एतेषां गर्भरूपाणां, मध्येऽष्टौ परया मुदा ।
यान्येतानि प्रनृत्यन्ति, रागकेसरिणोऽग्रतः ॥४५७॥
तान्यस्मादेव जातानि, रागकेसरिणः किल ।
अत्यन्तवल्लभान्यस्य, मूढतानन्दनानि च ॥४५८॥ युग्मम् ॥
यानि त्वेतानि चेष्टन्ते, क्रीडयाऽष्टौ मुहुर्मुहुः ।
पुरो द्वेषगजेन्द्रस्य, गर्भरूपाणि सुन्दर ! ॥४५९॥

अस्मादेव प्रसूतानि, प्रियाणि द्वेषभूपतेः ।
माताऽविवेकिताऽमीषां, सर्वेषां भद्र ! गीयते ॥४६०॥ युग्मम् ॥
एवं च स्थिते-महामोहनरेन्द्रस्य, यानि पौत्राणि सुन्दर ! ।
तत्पुत्रयोरपत्यानि, तात ! विख्यातवीर्ययोः ॥४६१॥
तेषाममीषां लोकेऽत्र, दौर्लालित्यविराजितम् ।
वीर्यं सहस्रजिह्वोऽपि, को निवेदयितुं क्षमः ? ॥४६२॥ युग्मम् ॥
पश्य पश्यात एवैषामेतानि निजचेष्टितैः ।
शीर्षे सिद्धार्थकायन्ते, सर्वेषामेव भूभुजाम् ॥४६३॥
तदिदं ते समासेन, मया तात ! निवेदितम् ।
महामोहनरेन्द्रस्य, स्वाङ्गभूतं कुटुम्बकम् ॥४६४॥
ये त्वमी वेदिकाऽभ्यर्णे, विवर्तन्ते महीभुजः ।
ते महामोहराजस्य, स्वाङ्गभूताः पदातयः ॥४६५॥

विषयाभिलाषः ।

तत्र च-य एष दृश्यते भद्र !, रागकेसरिणोऽग्रतः ।
आश्लिष्टललनो मृष्टं, ताम्बूलं स्वादयन्नलम् ॥४६६॥
रणद्द्विरेफरिञ्छोलिसूचितोत्कटगन्धकम् ।
लीलाकमलमत्यर्थमाजिघ्रंश्च मुहुर्मुहुः ॥४६७॥
स्वभार्याऽमलवक्त्राब्जे, कुर्वाणो दृष्टिविभ्रमम् ।
वल्लकीनूपुरारावकाकलीगीतलम्पटः ॥४६८॥
यश्चैवं विषयानेष,पञ्चापि किल लीलया ।
भुञ्जानो मन्यते सर्वमात्मनो मुष्टिमध्यगम् ॥४६९॥
भद्र ! सोऽयमिहायाता, वयं यस्य दिदृक्षया ।
रागकेसरिणो मन्त्री, लोके विख्यातपौरुषः ॥४७०॥ पञ्चभिः कुलकम् ॥
अस्यैव तानि वर्तन्ते, पुत्रभाण्डानि सुन्दर !
यानि मिथ्याभिमानेन, कथितानि पुराऽऽवयोः ॥४७१॥
तद्वशेन जगत्सर्वं, वशीकृत्य महाबलः ।
भद्र ! नूनं करोत्येव, चेष्टया तुल्यमात्मनः ॥४७२॥
तथाहि-एतत्प्रयुक्तैर्ये दृष्टा, मानुषैर्भद्र ! देहिनः ।
ते स्पर्शरससद्गन्धरूपशब्देषु लालसाः ॥४७३॥

कार्याकार्यं न पश्यन्ति, बुध्यन्ते नो हिताहितम् ।
भक्ष्याभक्ष्यं न जानन्ति, धर्माचारबहिष्कृताः ॥४७४॥
तन्मात्रलब्धसौहार्दा, वर्तन्ते सार्वकालिकम् ।
नान्यत्किञ्चन वीक्षन्ते, यथाऽसौ वर्तते जडः ॥४७५॥ त्रिभिर्विशेषकम् ॥
दर्शनादेव निर्णीतो, बुद्ध्या च परिनिश्चितः ।
रसनाजनको भद्र !, स एवायं न संशयः ॥४७६॥
रागकेसरिणो राज्यं, तन्त्रयन्निखिलं सदा ।
परबुद्धिप्रयोगेण, नैवैष प्रतिहन्यते ॥४७७॥
पुरुषाः पण्डितास्तावद्बहिरङ्गा दृढव्रताः ।
यावदेष स्ववीर्येण, तान्नो क्षिपति कुत्रचित् ॥४७८॥
यदा पुनर्महाप्राज्ञस्तानेष सचिवः क्वचित् ।
आरभेत स्ववीर्येण, बहिरङ्गमनुष्यकान् ॥४७९॥
तदा ते निहतप्राया, बालिशा इव किङ्कराः ।
व्रताग्रहं विमुच्यास्य, जायन्ते विगतत्रपाः ॥४८०॥ युग्मम् ॥
वर्धयत्येष साम्राज्यमेतेषामेव भूभुजाम् ।
बहिरङ्गजनस्यायममात्यो दुःखदः सदा ॥४८१॥
यतः-अस्यादेशेन कुर्वन्ति, पापं ते बाह्यमानुषाः ।
तच्च पापं कृतं तेषामिहामुत्र च दुःखदम् ॥४८२॥
निपुणो नीतिमार्गेषु, गाढं निर्व्याजपौरुषः ।
भेदकः परचित्तानामुपायकरणे पटुः ॥४८३॥
विदिताशेषवृत्तान्तः, सन्धिविग्रहकारकः ।
विकल्पबहुलो लोके, सचिवो नास्त्यमूदृशः ॥४८४॥ युग्मम् ॥
किं चात्र बहुनोक्तेन ? तावदेते नरेश्वराः ।
यावदेष महामन्त्री, तन्त्रको राज्यसंहतेः ॥४८५॥

ततः सहर्षः प्रकर्षोऽब्रवीत्-साधु माम ! साधु, सुन्दरं निर्णीतं मामेन, न तिलतुषत्रिभागमात्रयाऽपि चलतीदं, एवंविध एवायं विषयाभिलाषो महामन्त्री, नास्त्यत्र सन्देहः, तथाहि-

आकारदर्शनादेव, ते गुणा मम मानसे ।
आदावेव समारूढा, येऽस्य संवर्णितास्त्वया ॥४८६॥

विमर्शः प्राह–नाश्चर्यं, लक्षयन्ति भवादृशाः ।
नराणां दृष्टमात्राणां, यद्गुणागुणरूपताम् ॥४८७॥
तथाहि–ज्ञायते रूपतो जातिर्जातेः शीलं शुभाशुभम् ।
शीलाद् गुणाः प्रकाशन्ते, गुणैः सत्त्वं महाधियाम् ॥४८८॥
न केवलं त्वयाऽस्यैव, दर्शनादेव लक्षिताः ।
गुणाः किं तर्हि ? सर्वेषां, नूनमेषां महीभुजाम् ॥४८९॥
बुद्धेर्जातस्य ते भद्र ! किं वा स्यादविनिश्चितम् ? ।
यत्तु मां प्रश्नयस्येवं, तात ! सा तेऽभिजातता ॥४९०॥

भोगतृष्णास्वरूपम् ।

प्रकर्षः प्राह–यद्येवं, ततो माम ! निवेद्यताम् ।
किंनामिकेयं भार्याऽस्य ? मन्त्रिणो मुग्धलोचना ॥४९१॥
विमर्शः प्राह–भद्रेयं, भोगतृष्णाऽभिधीयते ।
गुणैस्तु तुल्या विज्ञेया, सर्वथाऽस्यैव मन्त्रिणः ॥४९२॥
ये त्वेते पुरतः केचित्पार्श्वतः पृष्ठतोऽपरे ।
दृश्यन्ते भूभुजो भद्र ! मन्त्रिणोऽस्य नताननाः ॥४९३॥
दुष्टाभिसन्धिप्रमुखास्ते विज्ञेया महाभटाः ।
महामोहनरेन्द्रस्य, स्वाङ्गभूताः पदातयः ॥४९४॥ युग्मम् ॥
अन्यच्च–महामोहनृपस्येष्टा, रागकेसरिणो मताः ।
भृत्या द्वेषगजेन्द्रस्य, सर्वेऽप्येते महीभुजः ॥४९५॥
अनेन मन्त्रिणाऽऽदिष्टा, राज्यकार्येषु सर्वदा ।
एते भद्र ! प्रवर्तन्ते, निवर्तन्ते च नान्यथा ॥४९६॥
ये केचिद्बाह्यलोकानां, क्षुद्रोपद्रवकारिणः ।
अन्तरङ्गा महीपालास्तेऽमीषां मध्यवर्तिनः ॥४९७॥
नार्यो डिम्भाश्च ये केचिदन्येऽप्येवंविधा जने ।
अमीषां मध्यगाः सर्वे, द्रष्टव्यास्ते महीभुजाम् ॥४९८॥
तदेते परिमातीता, निवेद्यन्तां कथं मया ? ।
सङ्क्षेपतः समाख्याताः, स्वाङ्गभूताः पदातयः ॥४९९॥
प्रकर्षः प्राह–ये त्वेते, वेदिकाद्वारवर्तिनः ।
निविष्टा भूभुजः [illegible], माम ! मु[illegible]मण्डपे ॥५००॥

युक्ताः सत्परिवारेण, नानारूपविराजिनः ।
एते किंनामका ज्ञेयाः ?, किंगुणा वा महीभुजः ? ॥५०१॥
ज्ञानावरणाद्याः ।
विमर्शः प्राह–भद्रैते, सप्तापि वरभूभुजः ।
महामोहनृपस्यैव, बहिर्भूताः पदातयः ॥५०२॥
तत्र च–य एष दृश्यते भद्र !, संयुक्तः पञ्चभिर्नरैः ।
ज्ञानसंवरणो नाम, प्रसिद्धः स महीपतिः ॥५०३॥
अत्रैव वर्तमानोऽयं, बहिःस्थं सकलं जनम् ।
करोत्यन्धं स्ववीर्येण, ज्ञानोद्योतविवर्जितम् ॥५०४॥
किञ्च–सान्द्राज्ञानान्धकारेण, यतो मोहयते जनम् ।
ततोऽयं शिष्टलोकेन, मोह इत्यपि कीर्तितः ॥५०५॥
यस्त्वेष नवभिर्युक्तो, मानुषैः प्रविभाव्यते ।
दर्शनावरणो नाम, विख्यातः स महीतले ॥५०६॥
दृश्यन्ते पञ्च या नार्यस्ताः स्ववीर्येण सुन्दराः ।
करोत्येष जगत्सर्वं, घूर्णमानगतिक्रियम् ॥५०७॥
ये त्वमी पुरुषा भद्र !, चत्वारोऽस्य पुरः स्थिताः ।
एतत्सामर्थ्ययोगेन, जगदन्धं करोत्ययम् ॥५०८॥
नरद्वयसमायुक्तो, यः पुनर्भद्र ! दृश्यते ।
स एष वेदनीयाख्यो, राजा विख्यातपौरुषः ॥५०९॥
सातनामा प्रसिद्धोऽस्य, जगति प्रथमो नरः ।
करोत्याह्लादसन्दोहनन्दितं भुवनत्रयम् ॥५१०॥
द्वितीयः पुरुषो भद्र !, यस्त्वस्य प्रविलोक्यते ।
असातनामकः सोऽयं, जगत्सन्तापकारकः ॥५११॥
दीर्घह्रस्वैः समायुक्तश्चतुर्भिर्डिम्भरूपकैः ।
विवर्तते महीपालो, यस्त्वेष तव गोचरे ॥५१२॥
आयुर्नामा प्रसिद्धोऽयं, सर्वेषां भद्र ! देहिनाम् ।
निजे भवे किलावस्थां, कुरुते डिम्भतेजसा ॥५१३॥ युग्मम् ॥
द्विचत्वारिंशता युक्तो, मानुषाणां महाबलः ।
यस्त्वेष दृश्यते भद्र ! नामनामा महीपतिः ॥५१४॥

निजमानुषवीर्येण, जगदेष चराचरम् ।
विडम्बयति यत्तात !, तदाख्यातुं न पार्यते ॥५१५॥ युग्मम् ॥
तथाहि–चतुर्गतिकसंसारे, नरनारकरूपताम् ।
ये दधाना विवर्तन्ते, पशुदेवतया परे ॥५१६॥
एकेन्द्रियादिभेदेन, नानादेहविवर्तिनः ।
नानाङ्गोपाङ्गसम्बद्धाः, सङ्घातकरणोद्यताः ॥५१७॥
भिन्नसंहननाः सत्त्वा, नानासंस्थानचारिणः ।
वर्णगन्धरसस्पर्शभेदेन, विविधास्तथा ॥५१८॥
गौरवेतरहीनाश्च, स्वोपघातपरायणाः ।
पराघातपराः केचिदिष्टजन्मानुपूर्विणः ॥५१९॥
सदुच्छ्वासातपोद्योतविहायोगतिगामिनः ।
त्रसस्थावरभेदाश्च, सूक्ष्मबादररूपिणः ॥५२०॥
पर्यासकेतराः केचिदन्ये प्रत्येकचारिणः ।
साधारणाः स्थिराः केचित्तथान्येऽस्थिररूपिणः ॥५२१॥
शुभाशुभत्वं बिभ्राणाः, सुभगा दुर्भगास्तथा ।
सुस्वरा दुःस्वरा लोके, ये चादेया मनोहराः ॥५२२॥
अनादेयाः स्ववर्गेऽपि, यशःकीर्त्तिसमन्विताः ।
अयशःकीर्त्तियुक्ताश्च, निर्मिताऽऽत्मशरीरकाः ॥५२३॥
प्रणताशेषगीर्वाणमौलिमालार्चितक्रमाः ।
ये च तीर्थकरा लोके, भवन्ति भवभेदिनः ॥५२४॥
निजमानुषवीर्येण, सर्वमेष नराधिपः ।
तदिदं जृम्भते वत्स ! नामनामा महाबलः ॥५२५॥ दशभिः कुलकम् ॥
यः पुनर्भद्र ! भूपोऽयं, वीक्ष्यते पुरतः स्थितम् ।
आत्मभूतं महावीर्यं, नीचोच्चं पुरुषद्वयम् ॥५२६॥
गोत्राभिधानो विख्यातः, स एष जगतीपतिः ।
देहिनां कुरुते भद्र !, सुन्दरेतरगोत्रताम् ॥५२७॥
नरपञ्चकसेव्योऽयं, यः पुनः प्रविभाव्यते ।
अन्तराय इति ख्यातः, स तात ! वरभूपतिः ॥५२८॥
अयं तु नरवीर्येण, कुरुते बाह्यदेहिनाम् ।
दानभोगोपभोगाप्तिवीर्यविघ्नं नराधिपः ॥५२९॥

तदेते कथितास्तात !, नामभिर्गुणलेशतः ।
सप्तापि भूभुजस्तुभ्यं, समासेन मयाऽधुना ॥५३०॥
वीर्यवक्तव्यतामेषां, विस्तरेण पुनर्यदि ।
वर्णयामि ततोऽत्येति, तत्रैव मम जीवितम् ॥५३१॥
तदेवमतिगम्भीरं, श्रुत्वा मातुलजल्पितम् ।
प्रकर्षो हृष्टचित्तत्वादिदं वचनमब्रवीत् ॥५३२॥
चारु माम ! कृतं चारु, मोचितो मोहपञ्जरात् ।
एतेषां वर्णनं राज्ञां, कुर्वतैवमहं त्वया ॥५३३॥
केवलं कश्चिदद्यापि, मामं पृच्छामि संशयम् ।
तमाकर्ण्य पुनर्मामो, मह्यमाख्यातुमर्हति ॥५३४॥
ततो विमर्शस्तुष्टात्मा, तं प्रतीदमभाषत ।
पृच्छ यद्रोचते तुभ्यं, भद्र ! विश्रब्धचेतसा ॥५३५॥
प्रकर्षः प्राह–मामायं, विस्मयो मम मानसे ।
एषु सङ्कीर्त्यमानेषु, राजसु प्रतिभासते ॥५३६॥
यदाऽमून्मण्डपान्तःस्थान्निरीक्षे नायकानहम् ।
परिवारं न पश्यामि, तदाऽमीषां निजं निजम् ॥५३७॥
यदा विलोकयाम्युच्चैः, परिवारं विशेषतः ।
तदा विस्फारिताक्षोऽपि, नैवेक्षे नायकानहम् ॥५३८॥
भवता तु परीवारो, नायकाश्च पृथक् पृथक् ।
नामतो गुणतश्चैव, कीर्त्तिता बत तत्कथम् ? ॥५३९॥

सामान्यविशेषयोर्भेदाभेदौ ।

विमर्शेनोदितं वत्स !, न विधेयोऽत्र विस्मयः ।
नैकदोभयवेत्ताऽत्र, कश्चिदन्योऽपि विद्यते ॥५४०॥
यतः–ये निरावरणज्ञानाः, केवलालोकभास्कराः ।
प्रभुं परिकरं चैषां, नैकदा तेऽपि जानते ॥५४१॥
यतः–सामान्यरूपा राजानः, सर्वेऽमी परिकीर्त्तिताः ।
विशेषरूपा विज्ञेयाः, सर्वे चामी परिच्छदाः ॥५४२॥
तथाहि–अवयव्यत्र सामान्यं, विशेषोऽवयवाः स्मृताः ।
राजानश्चांशिनो ज्ञेयास्तदंशास्तु पदातयः ॥५४३॥

इह च-नायातः कस्यचित्साक्षादेकदा ज्ञानगोचरम् ।
यथैतौ प्रकृतिस्तात !, सा सामान्यविशेषयोः ॥५४४॥
देशकालस्वभावैश्च, भेदोऽपि च न विद्यते ।
तादात्म्यादेतयोस्तात !, तेनैकः प्रतिभाति ते ॥५४५॥
तथाहि-के तरोर्भेदिनः सन्तु, धवाम्रखदिरादयः ।
धवाम्रादिविनाभूतः, कस्तरुर्वा प्रकाश्यताम् ? ॥५४६॥
श्रुतस्कन्धातिरेकेण, नास्त्यध्ययनसम्भवः ।
न चाध्ययननिर्मुक्तः, श्रुतस्कन्धोऽस्ति कश्चन ॥५४७॥
केवलं यौगपद्येन, न दृष्टौ तावितीयता ।
नादृष्टावेव तौ वत्स !, कालभेदेन दर्शनात् ॥५४८॥
तथाहि-दृश्यते हि तरुर्दूरान्न लक्ष्यन्ते धवादयः ।
अभ्यर्णे तेऽपि दृश्यन्ते, लक्ष्यते न तरुः पृथक् ॥५४९॥
तथापि तद्द्वयं दृष्टं, कालभेदेऽपि कीर्त्यते ।
यथाक्रमेण दृष्टत्वाद् भूपा(धवा)द्याश्चक्षुरादिभिः ॥५५०॥
अतो भेदेन दृष्टत्वाद्भिन्नमेवेदमिष्यताम् ।
अभिन्नस्य हि नो भिन्नं, कालभेदेऽपि दर्शनम् ॥५५१॥
तथाहि-अभेदेऽपि स्वभावाद्यैर्यत्सामान्यविशेषयोः ।
सङ्ख्यासञ्ज्ञाऽङ्ककार्येभ्यो, भेदोऽप्यस्ति परिस्फुटः ॥५५२॥
तेन तद्द्वारजः सर्वो, व्यवहारो न दुष्यति ।
भेदाभेदात्मके तत्त्वे, भेदस्येत्थं निदर्शनात् ॥५५३॥
तथाहि-सङ्ख्यया तरुरित्येको, भूयांसः खदिरादयः ।
सञ्ज्ञाऽपि तरुरित्येषां, धवाम्रार्कादिभेदिनाम् ॥५५४॥
अनुवृत्तिस्तरोस्तेषु, लक्षणं पृथगीक्ष्यते ।
धवाश्वत्थादिभेदानां, व्यावृत्तिश्च परस्परम् ॥५५५॥
कार्यं तु तरुमात्रेण, साध्यं छायादिकं पृथक् ।
विशिष्टफलपुष्पाद्यमन्यदेवाम्रकादिभिः ॥५५६॥
व्यवहारोऽपि सामान्ये, श्रुतस्कन्धेऽन्य एव हि ।
अन्य एवास्य भेदेषु, यदुद्देशादिलक्षणः ॥५५७॥
तस्मात्तं भेदमाश्रित्य, सङ्ख्यासञ्ज्ञादिगोचरम् ।
अभेदं च तिरोधाय, देशकालस्वभावजम् ॥५५८॥

राजानः परिवाराश्च, मया वत्स ! पृथक् पृथक् ।
नामतो गुणसङ्ख्याभ्यां, तवाग्रे परिकीर्तिताः ॥५५९॥ युग्मम् ॥
एवं च भेदिनोऽप्येते, न परस्परभेदिनः ।
यौगपद्येन भासन्ते, भद्र ! तन्मुञ्च संशयम् ॥५६०॥
न चान्यत्रापि कर्तव्यो, विस्मयो लक्षणादिभिः ।
कथ्यमाने मया भेदे, भोः सामान्यविशेषयोः ॥५६१॥
प्रकर्षेणोदितं माम !, नष्टोऽयं संशयोऽधुना ।
ममैष माम ! सन्देहः, परिस्फुरति मानसे ॥५६२॥
यदुत-य एते सप्त राजान, एतेषां मध्यवर्तिनः ।
तृतीयश्च चतुर्थश्च, पञ्चमः षष्ठ एव च ॥५६३॥
एते महीपाश्चत्वारो, यथा व्यावर्णितास्त्वया ।
तथा जनस्य लक्ष्यन्ते, सुन्दरेतरकारिणः ॥५६४॥
नैकान्तेनैव सर्वेषामपकारपरायणाः ।
एते हि बाह्यलोकानां, केषाञ्चित्सुखहेतवः ॥५६५॥ त्रिभिर्विशेषकम् ॥
आद्यो राजा द्वितीयश्च, यश्च पर्यन्तभूपतिः ।
दुःखदा एव सर्वेषां, त्रयोऽप्येते तु देहिनाम् ॥५६६॥
ततः सपरिवारेण, महामोहमहीभुजा ।
एतैश्च हृतसाराणां, तेषां किं नाम जीवितम् ? ॥५६७॥
एवं च स्थिते-किं विद्यन्ते जनाः केचिद् बहिरङ्गेषु देहिषु ? ।
अमीभिर्न कदर्थ्यन्ते, ये चतुर्भिररातिभिः ॥५६८॥
किं वा न सम्भवन्त्येव, तादृशा माम ! देहिनः ।
येऽमीषां निजवीर्येण, प्रतापक्षतिकारिणः ॥५६९॥
तच्छ्रुत्वा भागिनेयोक्तं, वचनं विहितादरः ।
अवादीदीदृशं वाक्यं, विमर्शो मधुराक्षरैः ॥५७०॥
विद्यन्ते बहिरङ्गेषु, वत्स ! लोकेषु तादृशाः ।
एतेषां वीर्यनिर्णाशाः, केवलं विरला जनाः ॥५७१॥
तथाहि-सद्भूतभावनामन्त्रतन्त्रशास्त्रा महाधियः ।
कृतात्मकवचा नित्यं, ये तिष्ठन्ति बहिर्जनाः ॥५७२॥
अप्रमादपरास्तेषामेते सर्वेऽपि भूभुजः ।
महामोहादयो वत्स !, नोपतापस्य कारकाः ॥५७३॥ युग्मम् ॥

यतः-सततं भावयन्त्येवं, निर्मलीमसमानसाः ।
जगत्स्वरूपं ये धीराः, श्रद्धासंशुद्धबुद्धयः ॥५७४॥
कथम् ?-"अनादिनिधनो घोरो, दुस्तरोऽयं भवोदधिः ।
राधावेधोपमा लोके, दुर्लभा च मनुष्यता ॥५७५॥
मूलं हि सर्वकार्याणामाशापाशनिबन्धनम् ।
जलबुद्बुदसङ्काशं, दृष्टनष्टं च जीवितम् ॥५७६॥
बीभत्समशुचेः पूर्णं, कर्मजं भिन्नमात्मनः ।
गम्यं रोगपिशाचानां, शरीरं क्षणभङ्गुरम् ॥५७७॥
यौवनं च मनुष्याणां, सन्ध्यारक्ताभ्रविभ्रमम् ।
चण्डवातेरिताम्भोदमालारूपाश्च सम्पदः ॥५७८॥
आदौ सम्पादिताह्लादाः, पर्यन्तेऽत्यन्तदारुणाः ।
एते शब्दादिसम्भोगाः, किम्पाकफलसन्निभाः ॥५७९॥
माता भ्राता पिता भार्या, पुत्रो जातेति जन्तवः ।
जाताः सर्वेऽपि सर्वेषामनादिभवचक्रके ॥५८०॥
उषित्वैकतरौ रात्रौ, यथा प्रातर्विहङ्गमाः ।
यथायथं व्रजन्त्येव, कुटुम्बे विश्वबान्धवाः ॥५८१॥
इष्टाः[१] समागमाः सर्वे, स्वप्नाप्तनिधिरूपताम् ।
नूनं समाचरन्त्येव, वियोगानलतापिनः ॥५८२॥
जरा जर्जरयत्येव, देहं सर्वशरीरिणाम् ।
दलयत्येव भूतानि, भीमो मृत्युमहीधरः" ॥५८३॥
ततश्च-तेषामेवंविधानेकभावनाभ्याससलासिनाम् ।
निर्धूततमसां पुंसां, निर्मलीभूतचेतसाम् ॥५८४॥
भद्र ! नैष महीपालो, महामोहः सभार्यकः ।
जायते बाधको नापि, सवधूकाविमौ सुतौ ॥५८५॥ युग्मम् ॥
अन्यच्च-न शोको नारतिस्तेषां, न भयो नापि शेषकाः ।
दुष्टाभिसन्धिप्रमुखा, नूनं बाधाविधायकाः ॥५८६॥
नामूनि डिम्भरूपाणि, न चान्ये भद्र ! तादृशाः ।
यैरेवं भावनाशस्त्रैः, पिता पुत्रा अमी जिताः ॥५८७॥ युग्मम् ॥

१. इष्टैः पा. ।

तथा–सर्वज्ञागमतत्त्वेषु, ये सन्ति सुविनिश्चिताः ।
ये पुनः सद्विचारेण, क्षालयन्त्यात्मकल्मषम् ॥५८८॥
नयन्ति स्थिरतां चित्तं, सर्वज्ञागमचिन्तया ।
पश्यन्त्युन्मार्गयायित्वं, मूढानां च कुतीर्थिनाम् ॥५८९॥
तेषामेष जनानां भो, निर्मलीभूतसद्धियाम् ।
न बाधकः प्रकृत्यैव, महामोहमहत्तमः ॥५९०॥ त्रिभिर्विशेषकम् ॥
याऽप्येषा गृहिणी पूर्वं, वर्णिता वीर्यशालिनी ।
कुदृष्टिः सापि तद्वीर्याद्दूरतः प्रपलायते ॥५९१॥
ये पुनर्भावयन्त्येवं, मध्यस्थेनान्तरात्मना ।
शरीरचित्तयो रूपं, योषितां परमार्थतः ॥५९२॥
यदुत–सितासिते विशाले ते, ताम्रराजिविराजिनी ।
जीव ! चिन्तय निर्मिथ्यमक्षिणी मांसगोलकौ ॥५९३॥
सुमांसकौ सुसंस्थानौ, सुश्लिष्टौ वक्त्रभूषणौ ।
लम्बमानाविमौ वर्ध्रौ, कर्णौ यौ ते मनोहरौ ॥५९४॥
यावेतावुल्लसद्दीप्ती, भवतश्चित्तरञ्जकौ ।
ततचर्मावृतं स्थूलमस्थिमात्रं कपोलकौ ॥५९५॥
ललाटमपि तादृक्षं, यत्ते हृदयवल्लभम् ।
दीर्घोत्तुङ्गा सुसंस्थाना, नासिका चर्मखण्डकम् ॥५९६॥
यदिदं मधुनस्तुल्यमधरोष्ठं विभाति ते ।
मांसपेशीद्वयं स्थूरमिदं लालामलाविलम् ॥५९७॥
ये कुन्दकलिकाकारा, रदनाश्चित्तहारिणः ।
एतेऽस्थिखण्डकानीति, पद्धतिस्थानि लक्षय ॥५९८॥
य एषोऽलिकुलच्छायः, केशपाशो मनोहरः ।
योषितां तत्तमो हार्दं, प्रकाशमिति चिन्तय ॥५९९॥
यौ काञ्चनमहाकुम्भविभ्रमौ ते हृदि स्थितौ ।
स्त्रीस्तनौ मूढ ! बुध्यस्व, तौ स्थूलौ मांसपिण्डकौ ॥६००॥
यल्लासयति ते चित्तं, ललितं दोर्लताद्वयम् ।
ततचर्मावृतं दीर्घं, तदस्थियुगलं चलम् ॥६०१॥
अशोकपल्लवाकारौ, यौ करौ ते मनोहरौ ।
तावस्थिघटितौ विद्धि, चर्मनद्धौ करङ्कौ ॥६०२॥

यद्रञ्जयति ते चित्तं, वलित्रयविराजितम् ।
उदरं मूढ ! तद्विष्ठामूत्रान्त्रमलपूरितम् ॥६०३॥
यदाक्षिपति ते स्वान्तं, श्रोणीबिम्बं विशालकम् ।
प्रभूताशुचिनिर्वाहद्वारमेतद्विभाव्यताम् ॥६०४॥
यौ मूढैर्हाटकस्तम्भसन्निभौ परिकल्पितौ ।
तावूरू पूरितौ विद्धि, वसामज्जाशुचेर्नलौ ॥६०५॥
सञ्चारिरक्तराजीवबन्धुरं भाति यच्च ते ।
तदङ्घ्रियुगलं स्नायुबद्धास्थ्नां पञ्जरद्वयम् ॥६०६॥
यत्ते कर्णामृतं भाति, मन्मनोल्लापजल्पितम् ।
तन्मारणात्मकं मूढ !, विषं हालाहलं तव ॥६०७॥
शुक्रशोणितसम्भूतं, नवच्छिद्रं मलोल्बणम् ।
अस्थिशृङ्खलिकामात्रं, हन्त योषिच्छरीरकम् ॥६०८॥
न चास्माद्भिद्यते जीव !, तावकीनं शरीरकम् ।
कश्चैवं ज्ञाततत्त्वोऽपि, कुर्यात्कङ्कालमीलकम् ॥६०९॥
प्रचण्डपवनोद्धूतध्वजचेलाग्रचञ्चलम् ।
चित्तं तु विदुषां स्त्रीणां, कथं रागनिबन्धनम् ? ॥६१०॥
विलसल्लोलकल्लोलजालमालाकुले जले ।
शशाङ्कबिम्बवल्लोकैस्तद् ग्रहीतुं न पार्यते ॥६११॥
स्वर्गापवर्गसन्मार्गनिसर्गार्गलिकासमाः ।
एता हि योषितो नूनं, नरकद्वारदेशिकाः ॥६१२॥
न भुक्तासु न युक्तासु, न वियुक्तासु देहिनाम् ।
विद्यमानासु नारीषु, सुखगन्धोऽपि विद्यते ॥६१३॥
याश्चैवं योषितोऽनेकमहानर्थविधायिकाः ।
सुखमार्गार्गलास्तासु, तुच्छं स्नेहनिबन्धनम् ॥६१४॥
एवं व्यवस्थिते नृणां, यदिदं मूढचेष्टितम् ।
तदीदृशं ममाभाति, पर्यालोचयतोऽधुना ॥६१५॥
यदुत-महाविगोपको भूयान्, हसनं च विडम्बनम् ।
बिब्बोका वध्यभूमीषु, गच्छतां पटहोपमाः ॥६१६॥
नाट्यं तु प्रेरणाकारं, गान्धर्वं रोदनोपमम् ।
विवेकिकरुणास्थानं, योषिदात्मनिरीक्षणम् ॥६१७॥

विलासाः सन्निपातानामपथ्याहारसन्निभाः ।
उच्चैर्विनाटनं योषिदाश्लेषसुरतादिकम् ॥६१८॥
तदेवंविधसद्भूतभावनाभावितात्मभिः ।
तैर्जितो भद्र ! सत्पुम्भिरेषोऽपि मकरध्वजः ॥६१९॥ चतुर्भिः कलापकम् ॥
अन्यच्च–याप्येषा वर्णिता पूर्वं, महावीर्या रतिर्मया ।
भार्याऽस्य साऽपि तैर्नूनं, भावनाबलतो जिता ॥६२०॥
तथैवंविधसद्भावभावनाऽऽसक्तचेतसाम् ।
तेषामेषोऽप्यहो हासो, दूराद्दूरतरं गतः ॥६२१॥
तथा–सद्भावनिर्मलजलैः, क्षालितामलचेतसाम् ।
सर्वत्र निर्व्यलीकानां, जुगुप्सापि न बाधिका ॥६२२॥
तथाहि–यैस्तत्त्वतो विनिर्णीता, शरीराशुचिरूपता ।
जलशौचाग्रहस्तेषां, नात्यन्तं मनसः प्रियः ॥६२३॥
यदेव चेतसः शुद्धेः, सम्पादकमनिन्दितम् ।
तदेव शौचं विज्ञेयं, यत एतदुदाहृतम् ॥६२४॥
सत्यं शौचं तपः शौचं, शौचमिन्द्रियनिग्रहः ।
सर्वभूतदया शौचं, जलशौचं तु पञ्चमम् ॥६२५॥
एवं च स्थिते–कार्यं जलैर्न नोऽकार्यं, किं तु तत्कार्यमीदृशम् ।
विधीयमानं यच्छौचं, भूतानां नोपघातकम् ॥६२६॥
तच्च सञ्जायते नूनं, बहिर्मलविशुद्धये ।
नान्तरङ्गमलक्षालि, यत उक्तं मनीषिभिः ॥६२७॥
चित्तमन्तर्गतं दुष्टं, न स्नानाद्यैर्विशुध्यति ।
शतशोऽपि हि तद्धौतं, सुराभाण्डमिवाशुचि ॥६२८॥
किञ्च–शरीरमलमप्येतज्जलशौचं कृतं जनैः ।
तेषां विशोधयत्येकं, क्षणमात्रं न सर्वदा ॥६२९॥
यतः–रोमकूपादिभिर्जन्तोः, शरीरं शतजर्जरम् ।
धौत धौतं स्रवत्येव, नैतच्छुचि कदाचन ॥६३०॥
तथाहि–क्वचित्प्रवर्तमानानां, देवताऽतिथिपूजने ।
केषाञ्चित्कारणं भक्तेर्जलशौचमनिन्दितम् ॥६३१॥
केवलं नाग्रहः कार्यो, विदुषा तत्त्ववेदिना ।
तत्रैव जलजे शौचे, स हि मूर्खत्वकारणम् ॥६३२॥

ततश्च–एवं विशुद्धबुद्धीनां, जलशौचादि कुर्वताम् ।
संज्ज्ञानपरिपूतानां, तेषां तात ! महात्मनाम् ॥६३३॥
याप्येषा कथिता पूर्वमिहामुत्र च दुःखदा ।
जुगुप्सा साऽपि नष्टत्वान्नैव बाधाविधायिका ॥६३४॥ युग्मम् ॥
यावप्येतौ जगच्छत्रू, पूर्वं व्यावर्णितौ मया ।
ज्ञानसंवरणो राजा, दर्शनावरणस्तथा ॥६३५॥
तौ सर्वज्ञागमाभ्यासवासनावासितात्मनाम् ।
अप्रमादपराणां च, नैव तेषां कदर्थकौ ॥६३६॥ युग्मम् ॥
योऽप्यन्तरायनामायं, राजा पर्यन्तसंस्थितः ।
दानादिविघ्नहेतुस्ते, मया पूर्वं निवेदितः ॥६३७॥
निराशानां निरीहानां, दायिनां वीर्यशालिनाम् ।
तेषां भद्र ! मनुष्याणां, सोऽपि किं किं करिष्यति ? ॥६३८॥ युग्मम् ॥
अन्येऽपि ये भटा दुष्टा, या नार्यो ये च डिम्भकाः ।
केचिदत्र बले तेऽपि, न तेषां भद्र ! बाधकाः ॥६३९॥
एते तु भूपाश्चत्वारः, सप्तानां मध्यवर्तिनः ।
तेषां भोः सुन्दराण्येव, सर्वकार्याणि कुर्वते ॥६४०॥
ततश्च–इदं ! निर्जित्य वीर्येण, तेऽन्तरङ्गबलं जनाः ।
तिष्ठन्ति सततानन्दा, निर्बाधाः शान्तचेतसः ॥६४१॥
स्वसाधनयुतो यस्मान्महामोहनराधिपः ।
अयमेव बहिर्लोके, परत्रेह च दुःखदः ॥६४२॥
एवं च स्थिते–सद्भावभावनास्त्रेण, यैः स एष वशीकृतः ।
कुतो दुःखोद्भवस्तेषां ?, निर्द्वन्द्वा सुखपद्धतिः ॥६४३॥
केवलं तादृशास्तात !, बहिरङ्गेषु देहिषु ।
अत्यन्तविरला लोकास्तेनेदं गीयते जनैः ॥६४४॥
शैले शैले न माणिक्यं, मौक्तिकं न गजे गजे ।
साधवो न हि सर्वत्र, चन्दनं न वने वने ॥६४५॥
तदेवं कथितं तुभ्यं, सन्ति ते बाह्यदेहिनः ।
केवलं विरला राज्ञां, येऽमीषां दर्पनाशिनः ॥६४६॥
प्रकर्षः प्राह–ते माम !, कुत्र तिष्ठन्ति देहिनः ।
यैरीदृशोऽपि विक्षिप्तः, शत्रुवर्गो महात्मभिः ? ॥६४७॥

विमर्शेनाभिहितं–वत्स ! समाकर्णय साम्प्रतं श्रुतं मयाऽऽप्तजनसकाशात्पूर्वं, यदुत–अस्ति समस्तवृत्तान्तसन्तानाधारविस्तारमनादिनिधनं भूरिप्रकाराद्भुतभूमितलं भवचक्रं नाम नगरं, अतिविस्तीर्णतया च तस्य नगरस्य विद्यन्ते तत्र बहून्यवान्तर-पुराणि, सन्ति बहुतराः पाटकाः, सम्भवन्ति बहुतमा भवनपङ्क्तयः, सम्भाव्यन्ते भूयांसि देवकुलानि, सङ्ख्यातीताश्च नानाजातयस्तत्र लोकाः प्रतिवसन्ति। ततो-ऽहमेवं वितर्कयामि, यदुत–विद्यन्ते तत्र भवचक्रे नगरे बहिरङ्गलोकाः, यैरेष महामोहनरेन्द्रप्रमुखः शत्रुवर्गः स्ववीर्येण विक्षिप्त इति ।

प्रकर्षः प्राह–माम ! तत् किमन्तरङ्गं तन्नगरम् ? किं वा बहिरङ्गमिति ? विमर्शेनोक्तं–तात ! न शक्यते तदेकपक्षनिक्षेपेणावधारयितुं यथाऽन्तरङ्गं यदिवा बहिरङ्गमिति, यस्मात्तत्र यथा बहिरङ्गजनास्तथैतेऽपि सर्वेऽन्तरङ्गलोका विद्यन्ते, यतोऽमीषां प्रतिपक्षभूतोऽसौ सन्तोषस्तत्रैव नगरे श्रूयते, ततोऽमीभिरनुविद्धं समस्तं नगरम् । प्रकर्षेणोक्तं–नन्वमी अत्र वर्तमानाः कथं तत्र विद्येरन् ? विमर्शेनोक्तं–तात ! योगिनः खल्वेते महामोहराजादयः सर्वेऽप्यन्तरङ्गलोकाः, तस्मादत्रापि दृश्यन्ते तत्रापि वर्तन्ते, न कश्चिद्विरोधः, यतो जानन्ति यथेष्टबहुविधरूप-करणं, कुर्वन्ति परपुरप्रवेशं, समाचरन्ति चान्तर्धानं, पुनः प्रकटीभवन्ति यथेष्ट-स्थानेषु, ततोऽचिन्त्यमाहात्म्यातिशयाः खल्वेते राजानः, ते यथाकामचारितया कुत्र न विद्येरन् ? तस्मादुभयलोकाधारतयोभयरूपमेवैतद्भद्र ! भवचक्रं नगरम्।

प्रतिगमनेच्छा ।

प्रकर्षेणोक्तं–तर्हि यदि तत्र सन्तोषो वर्तते, ते चामीषां भूभुजां दर्पोद्दलन-कारिणो महात्मानो लोका विद्यन्ते ततो द्रष्टव्यं तन्नगरं, महन्मे कुतूहलम्, अनुग्रहेण दर्शयतु माम ! गच्छावस्तावत्तत्रैव नगरे । विमर्शेनोक्तम्–ननु सिद्धमिदानीमावयोः समीहितं, दृष्टो विषयाभिलाषो मन्त्री, निश्चितमस्य रसनाजनकत्वं, अतोऽवगता तस्याः[१] सम्बन्धिनी मूलशुद्धिः, सम्पादितं राजशासनम्, अतः किमधुनाऽन्यत्र गतेन ? स्वस्थानमेवावयोर्गन्तुं युक्तम् ।

प्रकर्षेणोक्तं–माम ! मैवं वोचः, यतो वर्धितं भवचक्रव्यतिकरं वर्णयता भवता मम तद्दर्शनकौतुकं, ततो नादर्शितेन तेन गन्तुमर्हति मामः, दत्तश्चावयोः कालतः संवत्सरमात्रमवधिस्तातेन, निर्गतयोश्चाद्यापि शरद्धेमन्तलक्षणमृतुद्वयमात्र-मतिक्रान्तं, यतोऽधुना शिशिरो वर्तते, तथाहि–पश्यतु मामो मञ्जरीबन्धुरा वर्तन्ते साम्प्रतं प्रियङ्गुलताः, विकासहासनिर्भरा विराजन्तेऽधुना रोध्रवल्लर्यः, विदलितमु-कुलमञ्जरीकमिदानीं विभाति तिलकवनम् ।

१. तस्य प्र. ।

शिशिरर्तुवर्णनम् ।

अपि च-शिशिरतुषारकणकनिर्दग्धमशेषसरोजमण्डलं,
सह किसलयविलाससुभगेन महातरुकाननेन भोः ! ।
पथिकगणं च शीतवातेन विकम्पितगात्रयष्टिकं,
ननु खलसदृश एष तोषादिव हसति कुन्दपादपः ॥१॥
नूनमत्र शिशिरे विदेशगाः, सुन्दरीविरहवेदनातुराः ।
शीतवातविहताः क्षणे क्षणे, जीवितानि रहयन्ति मूढकाः ॥२॥
पश्य माम ! कृतमुत्तरायणं, भास्करेण परिवर्धितं दिनम् ।
शर्वरी च गमितेषदूनतां, पूर्वरात्रिपरिमाणतोऽधुना ॥३॥
बहलागरुधूपवरेऽपि गृहे, वरहल्लक[1]कम्बलतूलियुते ।
बहुमोहनृणां शिशिरेऽत्र सुखं, न हि पीनवपुर्ललनाविरहे ॥४॥
अथापि वर्धितं तेजो, महत्त्वं च दिवाकरे ।
अथवा-विमुक्तदक्षिणाशे किं, म्लानिलाघवकारणम् ? ॥५॥
कार्यभारं महान्तं निजस्वामिनो, यान्त्यनिष्पन्नमेते विमुच्याधुना ।
पश्य माम ! स्वदेशेषु दुःसेवकाः, शीतभीताः स्वभार्याकुचोष्माशया ॥६॥
ये दरिद्रा जराजीर्णदेहाश्च ये, वातला ये च पान्था विना कन्थया ।
भोः कदा शीतकालोऽपगच्छेदयं, माम ! जल्पन्ति ते शीतनिर्वेदिताः ॥७॥
यावमश्वादिभक्ष्याय लोलूयते, भूरिलोकं तुषारं तु दोदूयते ।
दुर्गतापत्यवृन्दं तु रोरूयते, जम्बुकः केवलं माम ! कोकूयते ॥८॥
वहन्ति यन्त्राणि महेक्षुपीडने, हिमेन शीता च तडागपद्धतिः ।
जनो महामोहमहत्तमाज्ञया, तथापि तां धर्मधियाऽवगाहते ॥९॥
अन्यच्च-अयं हि लङ्घितप्रायो, वर्तते शिशिरोऽधुना ।
ततः षण्मासमात्रेऽपि, किमु त्रस्यति मामकः ? ॥१०॥
गम्यतां भवचक्रेऽतो,ममानुग्रहकाम्यया ।
मामेन परतो यत्ते, रोचते तत्करिष्यते ॥११॥
अनिवर्तकनिर्बन्धमेवं विज्ञाय भावतः ।
ततस्तदनुरोधेन, विमर्शो गन्तुमुद्यतः ॥१२॥
अथ मिथ्यानिवेशादिस्यन्दनव्रातसुन्दरम् ।
ममत्वादिगजस्तोमगलगर्जितबन्धुरम् ॥१३॥

१. वरल्लक० प्र. ।

अज्ञानादिमहाश्वीयहेषारवमनोहरम् ।
दैन्यचापललौल्यादिपादातपरिपूरितम् ॥१४॥
महामोहनरेन्द्रस्य, चतुरङ्गं महाबलम् ।
अपसृत्य ततः स्थानात्ताभ्यां सर्वं विलोकितम् ॥१५॥
ततो निर्णीतमार्गेण, हृष्टौ स्वस्रीयमातुलौ ।
गच्छतस्तत्पुरं तूर्णमविच्छिन्नप्रयाणकैः ॥१६॥
मार्गोत्सारणकामेन, मातुलं प्रति भाषितम् ।
ततः प्रकर्षसञ्ज्ञेन, तदेवं पथि गच्छता ॥१७॥

कर्मपरिणाममोहराजयोराभाव्यम् ।

माम ! यः श्रूयते लोके, सार्वभौमो महीपतिः ।
स कर्मपरिणामाख्यः, प्रतापाक्रान्तराजकः ॥१८॥
तस्य सम्बन्धिनीमाज्ञां, महामोहनराधिपः ।
किमेष कुरुते ! किं वा, नेति मे संशयोऽधुना ॥१९॥
विमर्शः प्राह-नैवास्ति, भद्र ! भेदः परस्परम् ।
अनेन परमार्थेन, स हि ज्येष्ठः सहोदरः ॥२०॥
अयं पुनः कनिष्ठोऽस्यां, महाटव्यां व्यवस्थितः ।
यतोऽयं चरटप्रायो, महामोहनराधिपः ॥२१॥
ये दृष्टाः केचिदस्याग्रे, भवताऽत्र महीभुजः ।
समस्ता अपि विज्ञेयास्ते तस्यापि पदातयः ॥२२॥
केवलं-स कर्मपरिणामाख्यः, सुन्दराणीतराणि च ।
कार्याणि कुरुते लोके, प्रकृत्या सर्वदेहिनाम् ॥२३॥
अयं तु सर्वलोकानां, महामोहनरेश्वरः ।
करोत्यसुन्दराण्येव, कार्याणि ननु सर्वदा ॥२४॥
अन्यच्च-अयं जिगीषुर्भूपालः, स राजा नाटकप्रियः ।
एते भूपा निषेवन्ते, महामोहमतः सदा ॥२५॥
किं तु लोके महाराजो, यतोऽस्यापि महत्तमः ।
स कर्मपरिणामाख्यो, भ्रातेति परिकीर्तितः ॥२६॥
तस्मादेते महीपालास्तस्यापि पुरतः सदा ।
गत्वा गत्वा प्रकुर्वन्ति, नाटकं हर्षवृद्धये ॥२७॥

भवन्ति गायनाः केचित्केचिदातोद्यवादकाः ।
वादित्ररूपतामेव, भजन्ते भक्तितोऽपरे ॥२८॥
किं बहुना ?–महामोहनरेन्द्राद्याः, सर्वेऽमी तात ! भूभुजः ।
सर्वथा हेतुतां यान्ति, तत्र संसारनाटके ॥२९॥
स तावन्मात्रसन्तुष्टः, सपत्नीको नराधिपः ।
तदेव नाटकं पश्यन्नित्यमास्ते निराकुलः ॥३०॥
अन्यच्च–एतेषां तावदस्त्येव, सर्वेषां स प्रभुर्नृपः ।
अन्येषामपि स स्वामी, प्रायेणान्तरभूभुजाम् ॥३१॥
किं बहुना ?–स सर्वसमुदायात्मा, सुन्दरेतरनायकः ।
अयं तदेकदेशात्मा, तदादेशविधायकः ॥३२॥
तथाहि–येऽन्तरङ्गजनाः केचिद्विद्यन्ते सुन्दरेतराः ।
स कर्मपरिणामाख्यस्तेषां प्रायः प्रवर्तकः ॥३३॥
यावन्ति चान्तरङ्गाणि, निर्वृतिं नगरीं विना ।
पुराणि तेषु स स्वामी, बहिरङ्गेषु भावतः ॥३४॥
अयं पुनर्महामोहो, यावन्तोऽत्र विलोकिताः ।
भवता भूभुजः स्वामी, तदादेशेन तावताम् ॥३५॥
यदेष निजवीर्येण, किञ्चिदर्जयते धनम् ।
समर्पयति तत्तस्य, निःशेषं नतमस्तकः ॥३६॥
अनेनोपार्जितस्योच्चैर्धनस्य विनियोजनम् ।
स राजा कुरुते नित्यं, सुन्दरेतरवस्तुषु ॥३७॥
अयं हि विग्रहारूढः, सदाऽऽस्ते विजिगीषया ।
स तु भोगपरो राजा, न जानात्येव विग्रहम् ॥३८॥
एवं च स्थिते–एष वत्स ! करोत्याज्ञां, भक्तिनिर्भरमानसः ।
तस्य किं तु ततो भिन्नं, नात्मानं मन्यते नृपः ॥३९॥
अन्यच्च–यद्दृष्टं भवता पूर्वं, महामोहपुरद्वयम् ।
तत्कर्मपरिणामेन, भटभुक्त्याऽस्य योजितम् ॥४०॥
अतः पुरद्वये तत्र, सैन्यमस्य सुभक्तिकम् ।
तथाऽटव्यां च निःशेषमास्ते विग्रहतत्परम् ॥४१॥
प्रकर्षः प्राह मामेदमनयोः किं क्रमागतम् ।
राज्यम् ? किं वाऽन्यसम्बन्धि, गृहीतं बलवत्तया ॥४२॥

विमर्शेनोदितं वत्स !, नानयोः क्रमपूर्वकम् ।
परसत्कमिदं राज्यं, हठादाभ्यां विनिर्जितम् ॥४३॥
यतः-जीवः सकर्मको यस्ते, बहिरङ्गजनस्तथा ।
संसारिजीव इत्येवं, मया पूर्वं निवेदितः ॥४४॥
तस्यैषा भुज्यते सर्वा, चित्तवृत्तिर्महाटवी ।
वीर्येण तं बहिष्कृत्य, स्वीकृताऽऽभ्यां न संशयः ॥४५॥
प्रकर्षेणोक्तं-कियान् कालो गृहीताया, वर्तते माम ! मे वद ।
विमर्शः प्राह-नैवार्दि, जानेऽहमपि तत्त्वतः ॥४६॥
तदेष परमार्थस्ते, कथ्यते वत्स ! साम्प्रतम् ।
निःशेषं प्रलयं याति, येन तावकसंशयः ॥४७॥
स कर्मपरिणामाख्यो, दानोद्दालनतत्परः ।
प्रणताशेषसामन्तकिरीटच्छुरितांह्रिकः[१] ॥४८॥
प्रभावमात्रसंसिद्धकार्यविस्तारसुस्थितः ।
राजाधिराजः सर्वत्र, निविष्टो विष्टराधिपः ॥४९॥ युग्मम् ॥
अयं पुनर्महामोहस्तत्सैन्यपरिपालकः ।
तद्दत्तमन्त्रसैन्यश्च, तत्कोशपरिवर्धकः ॥५०॥
तदादेशकरो नित्यं, तथापि गुरुपौरुषः ।
नूनं तं पालयत्येष, राजकार्ये यथेच्छया ॥५१॥
तेनैष लौकिकीं वाचोयुक्तिमाश्रित्य पण्डितैः ।
महासननिविष्टोऽपि, ऊर्ध्वो राजा निगद्यते ॥५२॥
नानयोर्भिद्यते तात !, तस्माद्भेदः परस्परम् ।
यस्मादेकमिदं राज्यमेतत्तुभ्यं निवेदितम् ॥५३॥
प्रकर्षः प्राह मे माम ! विनष्टः संशयोऽधुना ।
अथवा त्वयि पार्श्वस्थे, कुतः सन्देहसम्भवः ? ॥५४॥
तदेवंविधसज्जल्पकल्पनाऽपगतश्रमौ ।
तौ विलङ्घ्यदिनैर्मार्गं, भवचक्रे परागतौ ॥५५॥
इतश्च परिपाट्यैव, शिशिरो लङ्घितस्तदा ।
संप्रासश्च जनोन्मादी, वसन्तो मन्मथप्रियः ॥५६॥

१. ०त्ताधरः पा. ।

स ताभ्यां नगरासन्ने, भ्रमन्नुद्दामलीलया ।
वसन्तकाननेषूच्चैः, कीदृशः प्रविलोकितः ? ॥५७॥

वसन्तर्तुवर्णनम् ।

यदुत–नृत्यन्निव दक्षिणपवनवशोद्वेल्लमानकोमलललताबाहुदण्डैः, गायन्निव मनोज्ञविहङ्गकलकलकलविरुतैर्महाराजाधिराजप्रियवयस्यकमकरकेतनस्य राज्याभिषेके जयजयशब्दमिव कुर्वाणो मत्तकलकोकिलाकुलकोलाहलकण्ठकूजितैः, तर्जयन्निव विलसमानवरचूतैककलिकातर्जनीभिः, आराकारयन्निव रक्ताशोककिसलयदलललिततरलकरविलसितैः, प्रणमन्निव मलयमारुतान्दोलितनमच्छिखरमहातरूत्तमाङ्गैः, हसन्निव नवविकसितकुसुमनिकराट्टहासै, रुदन्निव त्रुटितवृन्तबन्धननिपतमानसिन्दुवारसुमनोनयनसलिलैः, पठन्निव शुकसारिकास्फुटाक्षरोल्लापजल्पितेन, सोत्कण्ठक इव माधवीमकरन्दबिन्दुसन्दोहास्वादनमुदितमत्तमधुकरकुलझणझणायितनिर्भरतया । अपि च–

इति नर्तनरोदनगानपरः, पवनेरितपुष्पजधूलिधरः ।
स वसन्तऋतुर्ग्रहरूपकरः, कलितो नगरोपवनान्तचरः ॥१॥

ततो विमर्शेनाभिहितः प्रकर्षो, यथा–वत्स ! काले तव भवचक्रनगरदर्शनकुतूहलं सम्पन्नं, यतोऽत्रैव वसन्ते प्रायेणास्य नगरस्य सौन्दर्यसारमुपलभ्यते, तथाहि–पश्यामीषां काननाभोगविलोकनकौतुकेन निर्गतानां नागरिकलोकानां याऽवस्था वर्तते–

सन्तानकवनेषु परिमुह्यति धावति बकुलवृक्षके ।
विकसितमाधवीषु धृतिमेति विलुभ्यति सिन्दुवारके ॥
पाटलपल्लवेषु न च तृप्यति नूनमशोकपादपे ।
चूतवनेषु याति चन्दनतरुगहनमथावगाहते ॥१॥
इति मधुमासविकासिते रमणीयतरे द्विरेफमालिकेव ।
एतेषां ननु दृष्टिका विलसति सुचिरं वरे तरुप्रताने ॥२॥
बहुविधमन्मथकेलिरसा दोलारमणसहेन ।
एते सुरतपराश्च गुरुतरमधुपानमदेन ॥३॥
अन्यच्च–विकसिते सहकारवने रतः, कुरुबकस्तबकेषु च लम्पटः ।
मलयमारुतलोलतया वने, सततमेति न याति गृहे जनः ॥४॥
इदमहो पुरलोकशताकुलं, प्रवरचूतवनावलिमध्यगम् ।
विलसतीह सुरासवपायिनां, ननु विलोकय भद्र ! कदम्बकम् ॥५॥

मणिविनिर्मितभाजनसंस्थितैरतिविनीतजनप्रविलोकितैः ।
प्रियतमाधरमृष्टविदंशनैश्चषकरत्नमयूखविराजितैः ॥६॥
सुरभिनीरजगन्धसुवासितैः, सुवनितावदनाम्बुरुहार्पितैः ।
विविधमद्यरसैर्मुखपेशलैः, कृतमिदं तदहो मदनिर्भरम् ॥७॥

तथाहि-पश्य वत्स ! यदत्रापानकेष्वधुना वर्तते-

पतन्ति पादेषु पठन्ति मादिताः, पिबन्ति मद्यानि रणन्ति गायनाः ।
रसन्ति वक्त्राम्बुरुहाणि योषितामनेकचाटूनि च कुर्वते जनाः ॥८॥
वदन्ति गुह्यानि सशब्दतालकं, मदेन नृत्यन्ति लुडन्ति चापरे ।
विघूर्णमानैर्नयनैस्तथापरे, मृदङ्गवंशध्वनिना विकुर्वते ॥९॥
स्वपूर्वजोल्लासनगर्वनिर्भरा, धनानि यच्छन्ति जनाय चापरे ।
भ्रमन्ति चान्ये विततैः पदक्रमैरितस्ततो यान्ति विना प्रयोजनम् ॥१०॥

एवं च यावद्दर्शयति प्रकर्षस्य विमर्शस्तदापानकं तावन्निपतिता माधवीलता-वितानमण्डपे कुवलयदलविलासलासिनी प्रकर्षस्य दृष्टिः । अभिहितमनेन-मामेदमपरमापानकमेतस्मात्सविशेषतरं विजृम्भते । विमर्शेनाभिहितं-ननु सुलभाऽत्र भवचक्रनगरे वसन्तसमयागमप्रमोदितानां नागरकलोकानामापानपरम्परा, तथाहि-पश्य चम्पकवीथिकां, निरूपय मृद्वीकामण्डपान्, विलोकय कुब्जकवनगहनानि, निरीक्षस्व कुन्दपादपसन्दोहं, निभालय रक्ताशोकतरुस्तोमं, साक्षात्कुरु बकुल-विटपिगहनानि । यद्येतेषामेकमपि विलसदुद्दामकामिनीवृन्दपरिकरितमहेश्वरनागर-कलोकविरचितापानकविरहितमुपलभ्येत भवता ततो मामकीनवचनेऽन्यत्रापि न सम्प्रत्ययो विधेयः प्रतारकत्वाद्भद्रेणेति । प्रकर्षेणोक्तं-ननु कोऽत्र सन्देहः ? दृश्यन्ते प्रायेणैवात्र प्रदेशे स्थितैर्य एते मामेनोद्घाटिता वनविभागा इति । किञ्च न केवलमेते काननाभोगाः सर्वेऽपि विविधमधुपानमत्तोत्तालकलितललितमर्द-लोल्लासमिलितबहललोककलकलाकुलाः, किं तर्हि-

क्वचिद्रसन्नूपुरमेखलागुणैर्नितम्बबिम्बातुलभारमन्थरैः ।
तरुप्रसूनोच्चयवाञ्छयाऽऽगतैः, सभर्तृकैर्भान्ति विलासिनीजनैः ॥१॥
क्वचित्तु तैरेव विघट्टिताः स्तनैर्महेभकुम्भस्थलविभ्रमैरिमे ।
विभान्ति दोलापरिवर्तिभिः कृताः, सकामकम्पा इव माम ! शाखिनः ॥२॥
क्वचिल्लसद्रासनिबद्धकौतुकाः, क्वचिद्रहःस्थाननिबद्धमैथुनाः ।
इमे क्वचिन्मुग्धविलासिनीमुखैर्न पद्मषण्डादधिका न शोभया ॥३॥

विमर्शेनाभिहितं–साधु भद्र ! साधु, सुन्दरं विलोकितं भवता, नूनमेवंविधा एव सर्वेऽपीमे काननाभोगाः, अत एव मयाऽभिहितं–यथाऽवसरे भवतो भवचक्रनगरदर्शनकुतूहलं सम्पन्नं, यतोऽस्मिन्नेव वसन्तकाले नगरस्यास्य सौन्दर्यसारमुपलभ्यते, तदेते विलोकिता भद्र ! भवता तावद्बहिर्वनाभोगाः, साम्प्रतं प्रविशावो नगरं विलोकयावस्तदीयश्रियं येन तव कौतुकमनोरथः परिपूर्णो भवति । प्रकर्षेणोक्तम्–अतिदर्शनीयमिदं बहिर्लोकविलसितं रमणीयतरोऽयं प्रदेशः, पथि श्रान्तश्चाहमतः प्रसादं करोतु मे मामः, तिष्ठतु तावदत्रैव क्षणमेकं स्तोकवेलायां नगरे प्रवेक्ष्याव इति । विमर्शेनाभिहितम्–एवं भवतु । ततो यावदेष जल्पस्तयोः सम्पद्यते तावत् किं संवृत्तम्–

लोलाक्षनृपागमः ।

रथघणघणरावगर्जितः, करिसङ्घातमहाभ्रविभ्रमः ।
निशितास्त्रवितानवैद्युतश्चलशुक्लाश्वमहाबलाहकः ॥१॥
निपतन्मदवारिसुन्दरः, प्रमदभरोद्धुरलोकसेवितः ।
जनिताखिलसुन्दरीमनोबृहदुन्माथकरूपधारकः ॥२॥
मधुमासदिदृक्षया पुरादथ वरराजकपौरवेष्टितः ।
नृपतिर्निरगात्समं बलैरृतुरिव बन्धुधिया घनागमः ॥३॥
स च वादितमर्दलैर्लसद्वरकंसालकवेणुराजितैः ।
कृतनृत्तविलासचारुभिर्न न भाति स्म सुचच्चरीशतैः ॥४॥

ततो दृष्टस्ताभ्यां विमर्षप्रकर्षाभ्यां नगरान्निर्गतो महासामन्तवृन्दपरिकरितो वरवारणस्कन्धारूढो विकसितोद्दण्डपुण्डरीकपरिमण्डलपाण्डुरेण महता छत्रेण वारितातपो मघवानिवाधिष्ठितैरावतो विबुधसमूहमध्यगतश्च स नरेन्द्रः । विलोकितश्च तस्य पुरतो हृष्टः कलकलायमानो भूरिसितातपत्रफेनपिण्डः क्षुभित इव महासागरश्चलत्कदलिकासहस्रकरैः स्पर्द्धया त्रिभुवनमिवाधिक्षिपन्नतिभूरितयाऽसौ जनसमुदायः, प्राप्तश्चोद्यानपरिसरे राजा ।

अत्रान्तरे विशेषतः समुल्लसिताश्चच्चर्यः, प्रहता मृदङ्गा, वादिता वेणवः, समुल्लसितानि[१] कंसालकानि, रणरणायितानि मञ्जीरकाणि, प्रवर्धितस्तालारवो, विजृम्भितः षिङ्गकोलाहलः, प्रवृत्तो जयजयरवः, समर्गलीभूतो बन्दिवृन्दशब्दः, प्रवृत्ता गणिकागणाः, क्षुभितः प्रेक्षकजनः, सञ्जाताः केलयः । ततस्ते लोकाः केचिन्नृत्यन्ति, केचिद्वल्गन्ति, केचिद्धावन्ति, केचित्कलकलायन्ते, केचित्कटाक्ष-

१. समुल्लासितानि पा. ।

यन्ति, केचिल्लुठन्ति, केचिदुपहसन्ति, केचिद्गायन्ति, केचिद्वादयन्ति, केचिदुल्लसन्ते, केचिदुत्कृष्टिशब्दान् मुञ्चन्ति, केचिद्बाहुमूलमास्फोटयन्ति, केचित्परस्परं मलयज-कश्मीरजक्षोदरसेन कनकशृङ्गकैः सिञ्चन्ति । ततश्चैवं सति-

लसदुद्भटभूरिविलासकरे, मदनानलदीपितसर्वजने ।
अथ तादृशलोचनगोचरतां, किमचिन्ति गते तु महामतिना ? ॥१॥

इदं हि तदा मधुमासरसवशमत्तजनजनितं तत्तादृशं गुन्दलमवलोक्य विमर्शेन चिन्तितं, यदुत-अहो महामोहसामर्थ्यम्, अहो रागकेसरिविलसितम्, अहो विषयाभिलाषप्रतापः, अहो मकरध्वजमाहात्म्यम्, अहो रतिविजृम्भितम्, अहो हासमहाभटोल्लासः, अहो अमीषां लोकानामकार्यकरणधीरता, अहो प्रमत्तता, अहो स्रोतोगामिता, अहो अदीर्घदर्शिता, अहो विक्षिप्तचित्तता, अहो अनालोचकत्वम्, अहो विपर्यासातिरेकः, अहो अशुभभावनापरता, अहो भोगतृष्णादौर्लालित्यम्, अहो अविद्यापहृतचित्ततेति । ततः प्रकर्षो विस्फारिताक्षो निरीक्षमाणस्तल्लोकविल-सितमभिहितो विमर्शेन-भद्र ! एते बहिरङ्गजना यद्विषयो मया वर्णितस्तेषां महामोहादिमहीभुजां प्रतापः । प्रकर्षः प्राह-माम ! केन पुनर्वृत्तान्तेन कतमस्य वा भूभुजः प्रतापेन खल्वेते लोका एवं चेष्टन्ते ? विमर्शेनोक्तं-निरूप्य कथयामि ।

वसन्तमकरध्वजयोः सख्यम् ।

ततः प्रविश्य ध्यानं निश्चित्य परमार्थमभिहितमनेन-भद्र ! समाकर्णय, असौ चित्तवृत्तिमहाटव्यां प्रमत्ततानदीपुलिनवर्तिनि चित्तविक्षेपमहामण्डपे महामोह-राजसम्बन्धिन्यां तृष्णावेदिकायां महाविष्टरे निविष्टो दृष्टस्त्वया मकरध्वजः । तस्यायं वसन्तः प्रियवयस्यको भवति, ततो लङ्घितप्राये शिशिरे गतोऽयमासीत् तन्मूले, स्थितस्तेन सह सुखासिकया । अयं च वसन्तः कर्मपरिणाममहादेव्याः कालपरिणतेरनुचरः, ततस्तस्मै मकरध्वजाय प्रियसुहृदे निवेदितमनेन वसन्तेनात्म-गुह्यं, यदुत-स्वामिनीनिर्देशेन गन्तव्यमधुना मया भवचक्रनगरमध्यवर्तिनि मानवावासाभिधानेऽवान्तरपुरे, तेनाहं चिरविरहकातरतया भवतो दर्शनार्थमिहागत इति । ततः सहर्षेण मकरध्वजेनोक्तं-सखे ! वसन्त ! किं विस्मृतं भवतोऽतीत-संवत्सरे यन्मया भवता च तत्र पुरे विलसितं येनैवं भाविविरहवेदनाविधुरचित्ततया खिद्यसे, तथाहि-यदा यदा भवतस्तत्र पुरे गमनाय स्वामिनीनिर्देशोऽभवत् तदा तदा मह्यमप्येष महामोहनरेन्द्रस्तत्रैव पुरे राज्यं वितरति स्म, तत्किमितीयमकारणे भवतो मया सह वियोगाशङ्का ? वसन्तेनोक्तं-वयस्य ! प्रत्युज्जीवितोऽहमधुनाऽनेन कमनीयवचनेन, इतरथा विस्मृत एवासीन्नूनं ममैष व्यतिकरः ।

तथाहि-यत्तु-चिन्तानापन्नकार्याणां, सुहृद्विरहचिन्तया ।
विस्मरत्येव (विस्मर्यते हि?) हस्तेऽपि गृहीतं निखिलं नृणाम् ॥१॥

तत्सुन्दरमेवेदं, गच्छाम्यहमधुना भवद्भिस्तूर्णमागन्तव्यम्, मकरध्वजेनोक्तं-विजयस्ते, ततः समागतोऽत्र पुरे वसन्तः, दर्शितं काननादिषु निजविलसितं, मकरध्वजेनापि विज्ञापितो विषयाभिलाषो, यथा-पाल्यतां ममानुग्रहेण सा चिरन्तनी सम्भावना, चित्तस्थ एव भवतामेष वसन्तवृत्तान्तः, ततो निवेदितं विषयाभिलाषेण रागकेसरिणे तदवस्थमेव तन्मकरध्वजवचनं, तेनापि कथितं महामोहराजाय । ततश्चिन्तितमनेन-अये कृतपूर्व एवास्य वसन्तगमनावसरे प्रति-संवत्सरं मया मकरध्वजस्य मानवावासपुरे राज्यप्रसादः, तदधुनाऽपि दीयतामस्मै मकरध्वजाय राज्यं, यतो न लङ्घनीया कदाचिदप्युचितस्थितिरस्मादृशैः प्रभुभिः, पालनीया भृत्यांश्चिरन्तनसम्भावनया ।

मकरध्वजस्याभिषेकः ।

ततश्चैवमवधार्य महामोहराजेनामन्त्रितास्ते सर्वेऽपि निजास्थानस्थायिनो महीपाला, यदुत-भो भोः समाकर्णयत यूयं-दातव्यं मया भवचक्रनगरान्तर्भूते मानवावासपुरे मकरध्वजाय राज्यं, तत्र युष्माभिः समस्तैः सन्निहितैर्भाव्यम् । अङ्गीकर्तव्योऽस्य पदातिभावो, विधातव्यो राज्याभिषेको, भवितव्यमाज्ञानिर्देशका-रिभिरनुशीलनीयानि यथार्हं राज्यकार्याणि, सर्वथा कर्तव्यमक्षुण्णं समस्तस्थानेषु, मयाऽपि प्रतिपत्तव्यमस्य राज्ये स्वयमेव महत्तमत्वं, तस्मात्सज्जीभवत यूयं, गच्छामस्तत्रैव पुरे । ततस्तैर्भूपतिभिरवनितलविन्यस्तहस्तमस्तकैः समस्तैरभिहितं-यदाज्ञापयति देवः । ततोऽभिहितो महामोहराजेन मकरध्वजो यथा-भद्र ! भवताऽपि राज्ये स्थितेन तत्र पुरे न हरणीयमेतेषां नरपतीनां निजं निजं यत्किमपि यथार्हमाभाव्यं, द्रष्टव्या सर्वेऽप्यमी पुरातनसम्भावनया । मकरध्वजेनोक्तं-यदादिशति मोहराजः । ततः समागतास्ते सर्वेऽप्यत्र नगरे, अभिषिक्तो मानवावासपुरे राज्ये मकरध्वजः, प्रतिपन्नः शेषैर्यथार्हं तन्नियोगः । इतश्च योऽयं गजस्कन्धारूढो दृश्यत एष मानवावासवर्त्तिनि ललितपुरे लोलाक्षो नाम बहिरङ्गो राजा । ततस्तेन मकरध्वजेन ससैन्यपौरजनपदः स्वमाहात्म्येन निर्जित्य निःसारितोऽयमित्थं बहिःकाननेषु, न चायमात्मानं तेन निर्जितं वराको लक्षयति, नाप्येते लोकास्तेना-भिभूतमात्मानमवबुध्यन्ते, ततो भद्रानेन व्यतिकरेण तस्य मकरध्वजस्य महा-मोहादिपरिकरितस्य प्रतापादेते लोकाः खल्वेवं विचेष्टन्त इति । प्रकर्षेणोक्तं-सोऽधुना कुत्र मकरध्वजो वर्तते ? विमर्शः प्राह-नन्वेष सन्निहित एव सपरिकरः,

सोऽमूनेवं विनाटयति । प्रकर्षः प्राह–माम ! तर्हि स कस्मान्नोपलभ्यते । विमर्शेनोक्तं–ननु निवेदितमेव मया भवतः पूर्वं, जानन्त्येतेऽन्तरङ्गलोकाः कर्तुमन्तर्धानं, समाचरन्ति परपुरुषप्रवेशं, ततोऽमीषां जनानां शरीरेष्वनुप्रविष्टा निजविजयहृष्टास्ते भद्र ! प्रेक्षणकमिदं प्रेक्षन्ते । प्रकर्षः प्राह–मामक ! तर्हि कथं तानेवंस्थितानपि भवान्साक्षात्कुरुते ? विमर्शेनोक्तम्–अस्ति मे योगाञ्जनं विमलालोकं नाम, तद्बलेनेति । प्रकर्षेणोक्तं–ममापि क्रियतां तस्याञ्जनस्य दानेनानुग्रहो येनाहमपि तानवलोकयामि । ततो विमर्शेनाञ्जितं प्रकर्षस्य तेन योगाञ्जनेन लोचनयुगलम्, अभिहितश्च–वत्स ! निरूपयेदानीं निजहृदयानि, निरूपितानि प्रकर्षेण । ततः सहर्षेणाभिहितमनेन–माम ! दृश्यते मयाप्यधुना कृतराज्याभिषेको महामोहादिपरिकरितो मकरध्वजः ।

तथाहि–एष सिंहासनस्थोऽपि, जनमेनं धनुर्धरः ।
आकृष्याकृष्य निर्भिन्ते, आकर्णान्तं शिलीमुखैः ॥१॥
तैर्विद्धं विह्वलं दृष्ट्वा, ततो लोकं सराजकम् ।
प्रहारजर्जरं चेत्थं, विकारकरणाकुलम् ॥२॥
महाकहकहध्वानैः, सह रत्या प्रमोदितः ।
हस्ते तालान्विधायोच्चैर्हसत्येष नराधिपः ॥३॥
सुहृतं सुहृतं देव !, वदन्त इति किङ्कराः ।
महामोहादयोऽप्यस्य, हसन्तीमे पुरः स्थिताः ॥४॥
तत्किमत्र बहुना जल्पितेन ?–महाप्रसादो मे माम ! कृत एवातुलस्त्वया ।
यद्राज्यलीलां भुञ्जानो, दर्शितो मकरध्वजः ॥५॥

विमर्शेनोक्तं–वत्स ! कियदद्यापीदम् ? बहुतरमत्र भवचक्रनगरे भवताऽन्यदपि द्रष्टव्यं, सम्भवन्त्यत्र भूरिप्रकाराणि प्रेक्षणकानि । प्रकर्षः प्राह–माम ! त्वयि सप्रसादे दर्शके किं वा मम दर्शनकुतूहलं न परिपूर्येत ? केवलं मकरध्वजस्य समीपे महामोहरागकेसरिविषयाभिलाषहासादयः सपत्नीकाः समुपलभ्यन्ते । अधुना मया ते तु द्वेषगजेन्द्रारतिशोकादयो नोपलभ्यन्ते तत् किमत्र कारणम् ? किं नागतास्तेऽत्र मकरध्वजराज्ये ? विमर्शेनोक्तं–वत्स ! समागता एव तेऽत्र भवचक्रनगरे, न सन्देहो विधेयः किं तु निवेदितमेव मया यथाऽऽविर्भावतिरोभावधर्मकाः खल्वेतेऽन्तरङ्गलोकाः, ततस्ते द्वेषगजेन्द्रशोकादयोऽत्रैव तिरोभूतास्तिष्ठन्ति, राज्ञः सेवावसरमपेक्षन्ते । एते तु महामोहादयो लब्धावसरतया राज्ञः सभायामाविर्भूताः स्वनियोगमनुशीलयन्ति, किं तु प्रचण्डशासनः खल्वेष मकरध्वजनरेन्द्रस्ततोऽस्य राज्ये यस्य यावान्नि–

योगस्तेन तावाननुष्ठेयः, यस्य यावन्माहात्म्यं तेन तावद्दर्शनीयं, यस्य यावद्यदाभाव्यं तेन तावत्तदेव ग्राह्यं नाधिकमूनं वा, तथाहि-यदयं लोलाक्षो राजा सहाशेषराजवृन्देन निखिललोकाश्च जिता अप्यनेन मकरध्वजेन जानन्ति, सपरिकरमेनं बन्धुभूतं मन्यन्ते, तदिदं महामोहेन विहितमयमेवास्य नियोगोऽत्रैव माहात्म्यमिदमेवास्याभाव्यमिति। यत्पुनरेते लोकाः प्रीतिमुद्वहन्तो वल्गन्ते कृतकृत्यमात्मानमवगच्छन्ति तदिदं रागकेसरिणा जनितम्, अस्यैव च नियोगमाहात्म्याभाव्यगोचरभूतम् । यत्पुनरेते लुभ्यन्ति शब्दादिषु, कुर्वन्ति विकारशतानि तदिदं विषयाभिलाषस्य विजृम्भितं नियोगादिकं च । यत्पुनरट्टाट्टहासैर्हसन्ति । दर्शयन्ति विब्बोकानिदं हास्यस्य विलसितम्, एवं तत्पत्नीनामपि यथार्हं शेषाणामपि नरपतीनां च डिम्भरूपाणां च नियोगमाहात्म्याभाव्यग्रहणव्यापाराः प्रतिनियता एव द्रष्टव्याः । यत्पुनरमी जनाः शब्दादिकं भोगजातमुपभुञ्जते, सहर्षमनुकूलयन्ति कलत्राणि, चुम्बन्ति तेषां वक्त्राणि, समाश्लिष्यन्ति गात्राणि, सेवन्ते मैथुनानि, तत्रैवमादिके कर्मणि नैष मकरध्वजराजोऽन्यस्य नियोगं ददाति, किं तर्हि ? रत्या सह स्वयमेव कुरुते, यतोऽस्यैव तत्र कर्मणि सामर्थ्यं नान्यस्येति । तदेवं वत्स ! विद्यन्ते तत्र द्वेषगजेन्द्रशोकादयः, केवलं स्वकीयं नियोगावसरं प्रतीक्षन्ते, तेन नाविर्भवन्ति । प्रकर्षेणोक्तं-यद्येवं ततः किं शून्यीभूतोऽधुना चित्तवृत्तौ स महामोहास्थानमण्डपः ? विमर्शेनोक्तं-नैतदेवं, निवेदितमेव तुभ्यं, कामरूपिणः खल्वमी अन्तरङ्गजनाः, ततः समागताः सर्वेऽप्यत्र मकरध्वजराज्ये तथापि तन्महामोहास्थानं तदवस्थमेवास्ते, इदं हि कतिचिद्दिनभावि मुहूर्तसुन्दरं मकरध्वजराज्यं, तत्तु महामोहराज्यमाकालप्रतिष्ठमनन्तकल्पविमर्दसुन्दरमतः का तत्र विचलनाशङ्का ? अन्यच्च तत्समस्तभुवनव्यापकं महामोहराज्यमिदं पुनरत्रैव मानवावासपुरे मकरध्वजराज्यं, केवलं चिरन्तनस्थितिपालनव्यसनितया निजपदातैरपि स्वयमेव राज्येऽभिषिक्तस्य पुरतोऽस्य मकरध्वजस्य महामोहनरेन्द्रोऽयमेवं भृत्यभावमाचरति, तस्मादविचलमेव भद्र ! तन्महामोहास्थानं, तत्र वर्तमाना एवामी नूनमत्र दृश्यन्ते । प्रकर्षेणोक्तं-नष्टो मे संशयोऽधुना ।

मद्यपदशा ।

अत्रान्तरे करिवरादवतीर्णः स लोलाक्षो राजा प्रविष्टश्चण्डिकायतने, तर्पिता मद्येन चण्डिका, विहितपूजः समुपविष्टस्तस्या एव चण्डिकायाः पुरोवर्तिनि महति परिसरे मद्यपानार्थं, ततः सहैव तावता जनसमाजेन बद्धमापानकं, प्रकटितानि नानारत्नविसङ्घटितानि विविधमद्यभाजनानि, समर्पिताः समस्तजनानां कनक-

चषकनिकराः, प्रवर्तिता मधुधाराः, ततो विशेषतः पीयते प्रसन्ना, गीयते हिन्दोलकः, उपरि परिधीयते नवरङ्गकः, दीयते वादनेभ्यः, विधीयते नर्तनम्, अभिनीयते करकिसलयेन, विधीयते प्रियतमाधरबिम्बचुम्बनम्, अवदीर्यते रदनकोटिविलसितेन, उपचीयते मदिरामदनिर्भरता, प्रहीयते लज्जाशङ्कादिकं, निर्मीयते दयितावदनेषु दृष्टिः, विलीयते गाम्भीर्यं, स्थीयते जनैर्बालविजृम्भितेन, व्यवसीयते सर्वमकार्यमिति ।

इतश्च लोलाक्षनृपतेः कनिष्ठो भ्राता रिपुकम्पनो नाम युवराजः, तेन मदपरवशतया कार्याकार्यमविचार्याभिहिता निजा महादेवी रतिललिता, यदुत- प्रियतमे ! नृत्य नृत्येति । ततः सा गुरुसमक्षमतिलज्जाभरालसापि ज्येष्ठवचनं लङ्घयितुमशक्नुवती भर्तुरादेशेन नर्तितुं प्रवृत्ता । तां च नृत्यन्तीमवलोकयमानो मनोहरतया तल्लावण्यस्य विकारकारितया मधुमदस्याक्षिप्तचित्तस्ताडितोऽनवरतपातिना शरनिकरेण स लोलाक्षो नृपतिर्मकरध्वजेन तां प्रति गाढमध्युपपन्नश्चेतसा न च शक्नोत्यध्यवसातुं स्थितः कियतीमपि वेलाम् । इतश्च भूरिमद्यपानेन मदनिर्भरं निश्चेष्टीभूतमापानकं प्रलुठिताः सर्वे लोकाः, प्रवृत्ताश्छर्दयः, सञ्जातमशुचिकर्दमपिच्छलं, निपतिता वायसाः, समागताः सारमेयाः, अवलीढानि जनवदनानि, प्रसुप्तो रिपुकम्पनः जागर्ति रतिललिता ।

अत्रान्तरे वशीकृतो महामोहेन, क्रोडीकृतो रागकेसरिणा, प्रेरितो विषयाभिलाषेण, अभिभूतो रतिसामर्थ्येन, निर्भिन्नो हृदयमर्मणि शरनिकरप्रहारैर्मकरध्वजेन, म्रियमाण इवात्मानमचेतयमानः प्रचलितो लोलाक्षो रतिललिताग्रहणार्थं वेगेन प्राप्तस्तत्समीपं प्रसारितौ बाहुदण्डौ, ततः किमेतदिति चिन्तितं रतिललितया, लक्षितं तदाकूतमनया, समुत्पन्नं साध्वसं, सञ्जातं भयं, विगलितो मदिरामदः, पलायितुं प्रवृत्ता गृहीता लोलाक्षेण, विमोचितोऽनयाऽऽत्मा, धावन्ती पुनर्गृहीता लोलाक्षेण, ततः पुनर्विमोच्यात्मानं प्रविष्टा तत्र चण्डिकायतने, स्थिता चण्डिकाप्रतिमायाः पृष्ठतो भयेन कम्पमाना । अत्रान्तरे द्वेषगजेन्द्रस्य सम्पन्नो राजादेशः, आविर्भूतोऽसौ, दृष्टः प्रकर्षेण । स प्राह-माम ! स एष द्वेषगजेन्द्रः सहितो निजडिम्भरूपैः । विमर्शेनोक्तं-वत्स ! सम्पन्नोऽस्य नियोगावसरः, केवलमस्य विलसितमधुना विलोकयतु वत्सः । प्रकर्षेणोक्तम्-एवं करोमि, ततः प्रतिपन्नं द्वेषगजेन्द्रेण राजशासनम्, अधिष्ठितो लोलाक्षः, चिन्तितमनेन-मारयाम्येनां पापां रतिललितां या मां विहायेत्थं नष्टेति । गृहीतोऽनेन खड्गः, प्रविष्टश्चण्डिकायतने मदिरामदान्धतया तद्बुद्ध्या विदारितोऽनेन चण्डिका, नष्टा रतिललिता, बहि-

र्निर्गत्य तयाऽऽर्यपुत्रार्यपुत्र ! त्रायस्व त्रायस्वेति कृतो हाहारवः, विबुद्धो रिपुकम्पनः सहितो लोकेन। अभिहितमनेन–प्रियतमे ! कुतस्ते भयम् ?, कथितमनया लोलाक्षचेष्टितं, ततोऽधिष्ठितः सोऽपि द्वेषगजेन्द्रेण, सस्पर्धं सतिरस्कारमाहूतोऽनेन रणाय लोलाक्षः, प्रक्षुभिताः सुभटाः, समुत्थितानि शेषवनपानकानि, समुल्लसितः कलकलः, सन्नद्धं चतुरङ्गबलं, प्रादुर्भूतं गुन्दलम् । ततश्चाविज्ञातव्यतिकरतया मदिरामदपरवशतया च परस्परमेव कातरनराः कातरनरैः, खरैः खरा, वेगसरैर्वेगसरास्तुरगैस्तुरगा, वरकरभैर्वरकरभा, रथवरै रथवराः, कुञ्जरैः कुञ्जरास्तदपरैर्वरकुञ्जरैर्वरकुञ्जरा, नरवरप्रेरितैश्चूर्णयितुमारब्धाः, सञ्जातमकाण्डे बहुजनमर्दनम् ।

इतश्च तथा रिपुकम्पनेनाहूतो लोलाक्षश्चलितस्तदभिमुखं द्वेषगजेन्द्राधिष्ठितो मदिरामदान्धतया लग्नौ तौ करवालयुद्धेन, ततो गाढामर्षान्निपातितो रिपुकम्पनेन लोलाक्षः, सञ्जातो महाविप्लवः। तमवलोक्य प्रविष्टौ नगरे विमर्शप्रकर्षौ, स्थितौ निराबाधस्थाने । विमर्शेनोक्तं–वत्स ! दृष्टं द्वेषगजेन्द्रमाहात्म्यम् ? स प्राह–सुष्ठु दृष्टं माम ! तावतां विलासानामीदृशं पर्यवसानम्। विमर्शेनोक्तं–भद्र ! मद्यपायिनामेवंविधमेव पर्यवसानं भवति । मदिरामत्ता हि प्राणिनः कुर्वन्त्यगम्यगमनानि, न लक्षयन्ति पुरःस्थितं, मारयन्ति प्रियबान्धवान्, जनयन्त्यकाण्डविड्वरं, समाचरन्ति समस्तपातकानि, भवन्ति सर्वजगत्सन्तापकाः, निपात्यन्ते निष्प्रयोजनं मृत्वा च गच्छन्ति दुर्गतौ, किमत्राश्चर्यमिति ।

किञ्च–मद्ये च पारदार्ये च, ये रताः क्षुद्रजन्तवः ।
तेषामेवंविधानर्थान्, वत्स ! कः प्रष्टुमर्हति ॥१॥
मद्यं हि निन्दितं सद्भिर्मद्यं कलहकारणम् ।
मद्यं सर्वापदां मूलं, मद्यं पापशताकुलम् ॥२॥
न त्यजेद्व्यसनं मद्ये, पारदार्ये च यो नरः ।
यथाऽयं वत्स ! लोलाक्षस्तथाऽसौ लभते क्षयम् ॥३॥
मद्यं च पारदार्यं च, यः पुमांस्तात ! मुञ्चति ।
स पण्डितः स पुण्यात्मा, स धन्यः स कृतार्थकः ॥४॥

प्रकर्षेणोक्तम्–एवमेतन्नास्त्यत्र संशयः, ततस्तयोस्तत्र नगरे विचरतोर्गतानि कतिचिद्दिनानि । अन्यदा मानवावासपुरे राजकुलासन्ने दृष्टस्ताभ्यां पुरुषः । प्रकर्षेणोक्तं–माम ! स एष मिथ्याभिमानो दृश्यते । विमर्शेनोक्तं–सत्यं, स एवायम्। प्रकर्षः प्राह–ननु राजसचित्तनगरे किलाविचलोऽयं, तत् कथमिहागतः ? विमर्शेनोक्तम्–एवं नाम मकरध्वजस्योपरि सुप्रसादो महामोहराजो येनास्य राज्ये

यदचलं निजबलं सबालं तदप्यानीतं, केवलं कामरूपितयाऽयं मिथ्याभिमानो मतिमोहश्च यद्यपीहानीतौ दृश्येते तथापि तयोरेव राजसचित्ततामसचित्तपुरयोः परमार्थतस्तिष्ठन्तौ वेदितव्यौ। प्रकर्षेणोक्तं-माम! कुत्र पुनरेषोऽधुना गन्तुं प्रवृत्तः ? विमर्शेनोक्तं-भद्राकर्णय, योऽसौ दृष्टस्त्वया रिपुकम्पनः स निहते लोलाक्षेऽधुना राज्येऽभिषिक्तः, तस्य चेदं भवनम्, अतोऽयं मिथ्याभिमानः केनचित् कारणेनेदं राजसदनं प्रवेष्टुकाम इव लक्ष्यते । प्रकर्षः प्राह-ममापीदं नरपतिनिकेतनं दर्शयतु मामः । विमर्शेनोक्तम्-एवं करोमि, ततः प्रविष्टौ तौ तत्र नृपतिगेहे ।

रिपुकम्पनगृहे पुत्रजन्ममिथ्याभिमानः ।

इतश्च तस्य रिपुकम्पनभूपतेरस्ति द्वितीया मतिकलिता नाम महादेवी, सा च तस्मिन्नेव समये दारकं प्रसूता । अथ तत्र जातमात्रे राजसूनौ भास्करोदये विकसितमिव तामरसं, व्यपगततिमिरनिकरमिव गगनतलं, विनिद्रमिव सुन्दरजननयनयुगलं, भुवनमिव स्वधर्मकर्मव्यापारपरायणं तद्राजभवनं राजितुं प्रवृत्तं, कथम् ? विरचिता मणिप्रदीपनिवहा, विस्तारिता मङ्गलदर्पणमालाः, सम्पादितानि भूतिरक्षाविधानानि, निर्वर्तिता गौरसिद्धार्थकैर्नन्दावर्तशतपत्रलेखाः, निवेशिताः सितचामरधारिण्यो विलासिन्यः । ततः प्रचलिता वेगेनास्थानस्थायिनो भूपतेः सुतजन्ममहोत्सवं निवेदयितुं प्रियंवदिका ।

कथम् ?-रभसोद्दामविसंस्थुलगमनं, गमनस्खलितसुनूपुरचरणम् ।
चरणजलत्तोत्तालितहृदयं, हृदयविकम्पस्फुरितनितम्बम् ॥१॥
स्फुरितनितम्बनिनादितरसनं, रसनालग्नपयोधरसिचयम् ।
सिचयनिपातितलज्जितवदनं, वदनशशाङ्कोद्योतितभुवनम् ॥२॥

अपि च-नितम्बबिम्बवक्षोजदुर्वारभरनिःसहा ।
तथापि रभसाद्बाला, वेगाद्धावति सा तदा ॥३॥

निवेदिते तया राजपुत्रजन्ममहोत्सवे ।
आनन्दपुलकोद्भेदनिर्भरः समपद्यत ॥४॥

अत्रान्तरे प्रविष्टो मिथ्याभिमानः । ततोऽधिष्ठितमनेन रिपुकम्पनशरीरम् ।

ततश्च-तेनावष्टब्धचित्तोऽसौ, तदानीं रिपुकम्पनः ।
न मानसे न वा देहे, नापि माति जगत्त्रये ॥१॥
चिन्तितं च पुनस्तेन, विपर्यासितचेतसा ।
अहो कृतार्थो वर्तेऽहमहो वंशसमुन्नतिः ॥२॥

अहो देवप्रसादो मे, अहो लक्षणयुक्तता ।
अहो राज्यमहो स्वर्गः, सम्पन्नं जन्मनः फलम् ॥३॥
अहो जगति जातोऽहमहो कल्याणमालिका ।
अहो मे धन्यता सर्वमहो सिद्धं समीहितम् ॥४॥
अपुत्रेण मया योऽयमुपयाचितकोटिभिः ।
प्रार्थितः सोऽद्य सम्पन्नो, यस्य मे कुलनन्दनः ॥५॥
ततः कटककेयूरहारकुण्डलमौलयः ।
निवेदिकायै लक्षेण, दीनाराणां सहार्पिताः ॥६॥
उल्लसत्सर्वगात्रेण, हर्षगद्गदभाषिणा ।
प्रकृतीनां समादिष्टः, सुतजन्ममहोत्सवः ॥७॥
ततो नरपतेर्वाक्यं, श्रुत्वा मन्त्रिमहत्तमैः ।
क्षणेन सदने तत्र, बत किं किं विनिर्मितम् ॥८॥
पवननिहतनीरसङ्घातमध्यस्थितानेकयादः-
समूहोर्ध्वपुच्छच्छटाघातसम्पन्नकल्लोलमालाकुले ।
यादृशः स्यान्निनादो महानीरधौ तत्र गेहे समन्तादथो
तादृशस्तूर्यसङ्घातघोषः क्षणादुत्थितः ॥९॥
तथा-प्रवरमलयसम्भवक्षोदकश्मीरजातागुरु-
स्तोमकस्तूरिकापूरकर्पूरनीरप्रवाहोक्षसम्पन्नसत्-
कर्दमामोदसन्दोहनिष्यन्दबिन्दुप्रपूरेण सम्पादिताशेषजन्तुप्रमोदम् ।
तथा-रत्नसङ्घातविद्योतनिर्नष्टसूर्यप्रभाजाल-
सञ्चारमालोक्यते तत्तदा मन्दिरम् ॥१०॥
बहुनाटितकुब्जकवामनकं, प्रविघूर्णितकञ्चुकिहासनकम् ।
जनदापितरत्नसमूहचितं, त्रुटितातुलमौक्तिकहारभृतम् ।
लसदुद्भटवेषभटाकुलकं, ललनाजनलासविलासयुतम् ।
वरखाद्यकपानकतुष्टजनं, जनितं प्रमदादिति वर्धनकम् ॥११॥
अथ तादृशि वर्धनके निखिले, प्रमदेन प्रनृत्यति भृत्यगणे ।
अतिहर्षवशेन कृतोर्ध्वभुजः, स्वयमेव ननर्त चिरं स नृपः ॥१२॥
ततस्तत्तादृशं दृष्ट्वा, महासंमर्दगुन्दलम् ।
प्रकर्षः संशयापन्नः, प्रत्याह निजमातुलम् ॥१३॥

निवेदयेदं मे माम !, महदत्र कुतूहलम् ।
किमितीमे रटन्त्युच्चैर्निर्वादितमुखा जनाः ? ॥१४॥
अत्यर्थमुल्ललन्ते च, किमर्थमिति मोदिताः ? ।
किं चामी मृत्तिकाभारं, निजाङ्गेषु वहन्ति ? भोः ! ॥१५॥
चर्मावनद्धकाष्ठानि, दृढमास्फोटयन्ति किम् ? ।
विष्ठासम्भारमुक्तोल्यो, मन्दं मन्दं चलन्ति किम् ? ॥१६॥
किं वैष सदनस्यास्य, नायकः पृथिवीपतिः ।
बालहास्यकरं मूढः, करोत्यात्मविडम्बनम् ॥१७॥
तदत्र कारणं माम !, यावन्नो लक्षितं मया ।
इदं तावन्ममाभाति, महाकौतुककारणम् ॥१८॥
विमर्शः प्राह ते वत्स, कथ्यतेऽत्र निबन्धनम् ।
यदस्य सकलस्यापि, वृत्तान्तस्य प्रवर्तनम्[1] ॥१९॥
पश्यतस्ते प्रविष्टोऽत्र, य एष नृपमन्दिरे ।
मिथ्याभिमानस्तेनेदं, तात ! सर्वं विजृम्भितम् ॥२०॥
अयं हि राजा जातो मे, सूनुरेवं विचिन्तयन् ।
न माति देहे नो गेहे, न पुरे न जगत्त्रये ॥२१॥
ततो मिथ्याभिमानेन, विह्वलीकृतचेतसा ।
आत्मा च सकलश्चेत्थं, लोकोऽनेन विडम्बितः ॥२२॥
न चेदं लक्षयत्येष, नूनमात्मविडम्बनम् ।
यतो मिथ्याभिमानेन, वराकं मन्यते जगत् ॥२३॥
प्रकर्षः प्राह यद्येवं, ततोऽस्य परमो रिपुः ।
माम ! मिथ्याभिमानोऽयं, यः खल्वेवं विडम्बकः ॥२४॥
विमर्शः प्राह को वाऽत्र, संशयो भद्र ! वस्तुनि ।
निश्चितं रिपुरेवायं, बन्धुरस्य प्रभासते ॥२५॥
प्रकर्षः प्राह यद्येवं, ततो योऽस्य वशं गतः ।
स एष नृपतिर्माम !, कीदृशो रिपुकम्पनः ? ॥२६॥
विमर्शेनोदितं वत्स !, न भावरिपुकम्पनः ।
किंतु-बहिर्वैरिषु शूरोऽयं, तेनेत्थमभिधीयते ॥२७॥

१. ०र्त्तनम् प्र.।

इह च-यो बहिः कोटिकोटीनामरीणां जयनक्षमः ।
प्रभविष्णुर्विना ज्ञानं, सोऽपि नान्तरवैरिणाम् ॥२८॥
तन्नास्य वत्स ! दोषोऽयं, नाप्येषां शेषदेहिनाम् ।
यतोऽत्र परमार्थेन, ज्ञानाभावोऽपराध्यति ॥२९॥
यस्मादज्ञानकामान्धाः, किञ्चिदासाद्य कारणम् ।
यान्ति मिथ्याभिमानस्य, ध्रुवमस्य वशं नराः ॥३०॥
तेनाभिभूतचित्तास्ते, बाला इव जनैः सह ।
विडम्बयन्ति चात्मानं, यथैष रिपुकम्पनः ॥३१॥
ज्ञानावदातबुद्धीनां, पुत्रे राज्ये धनेऽपि वा ।
लोकाश्चर्यकरे जाते, महत्यप्यस्य कारणे ॥३२॥
चित्ते न लभते ढौकं, धन्यानामान्तरो रिपुः ।
वत्स ! मिथ्याभिमानोऽयं, ते हि मध्यस्थबुद्धयः ॥३३॥ युग्मम् ॥

शोकमहिमा ।

यावच्च कथयत्येवं, विमर्शस्तत्र कारणम् ।
तावद्राजकुलद्वारे, नरौ द्वौ समुपागतौ ॥३४॥
प्रकर्षेणोदितं माम !, दृश्यते काविमौ नरौ ।
स प्राह मतिमोहेन, युक्तः शोकोऽयमागतः ॥३५॥

अत्रान्तरे सूतिकागृहे समुल्लसितः करुणाकोलाहलोन्मिश्रः पूत्काररावः, प्रधावन्ति स्म महाहाहारवं कुर्वाणा नरपतेरभिमुखं दासचेट्यः प्रशान्तमानन्दगुन्दलं, किमेतदिति पुनः पुनः पृच्छन् कातरीभूतो राजा । ताभिरभिहितं-त्रायस्व देव ! त्रायस्व, कुमारो भग्नलोचनो जातः कण्ठगतप्राणैस्ततो धावत धावत । ततो वज्राहत इव सञ्जातो राजा, तथापि सत्त्वमवलम्ब्य सपरिकरो गतः सूतिकागृहे, दृष्टः स्वप्रभोद्भासितभवनभित्तिभागः सम्पूर्णलक्षणधरः किञ्चिच्छेषजीवितव्यो दारकः, समाहूतं वैद्यमण्डलं, पृष्टो वैद्याधिपतिः-किमेतदिति । स प्राह-देव ! समापतितोऽस्य कुमारस्य सद्योघाती बलवानातङ्कः, स च प्रचण्डपवन इव प्रदीपमेनमुपसंहरति(र्तुं) लग्नः पश्यतामेवास्माकं मन्दभाग्यानाम् । नृपतिराह-भो भो लोकाः ! शीघ्रमुपक्रमध्वं यथाशक्त्या, कुमारं यो जीवयति तस्मै राज्यं प्रयच्छामि, स्वयं च पदातिभावं प्रतिपद्येऽहम् । तदाकर्ण्य सर्वादरेण लोकैः प्रयुक्तानि भेषजानि, वाहिता मन्त्राः, निबद्धानि कण्डकानि, लिखिता रक्षाः, कृतानि भूतिकर्माणि, नियोजिता विद्या, वर्तितानि मण्डलानि, संस्मृता देवता,

विन्यासितानि तन्त्राणि । तथा कुर्वतामपि च गतः पञ्चत्वमसौ दारकः । अत्रान्तरे कामरूपितया शोकमतिमोहाभ्यां सपरिकरयोर्मतिकलितारिपुकम्पनयोः कृतः शरीरानुप्रवेशः ।

ततश्च-हा हताऽस्मि निराशाऽस्मि, मुषिताऽस्मीति भाषिणी ।
त्रायस्व देव ! देवेति, वदन्ती नष्टचेतना ॥१॥
क्षणान्निपतिता भूमौ, मृतं वीक्ष्य कुमारकम् ।
सा देवी वज्रसङ्घाततताडितेवातिविह्वला ॥२॥
हा पुत्र ! जात जातेति, ब्रुवाणो मूर्च्छया यथा ।
राजापि पतितो भूमौ, मुक्तः प्राणैस्तथैव सः ॥३॥
ततो हाहारवो घोरो, महाक्रन्दश्च भैरवः ।
जनोरस्ताडशब्दश्च, क्षणेन समजायत ॥४॥
अथ मुक्तविलोलकेशकं, दलितविभूषणभग्नशङ्खकम् ।
रिपुकम्पनयोषितां शतैर्बृहदाक्रन्दनकं प्रवर्तितम् ॥५॥
लालाविलवक्त्रकोटरं, लुठितं भूमितले सुदीनकम् ।
उल्लुञ्चितकेशपाशकं, बृहदाराटिविमोचतत्परम् ॥६॥
हाहा हाहेति सर्वतः,करुणध्वानपरायणं जनम् ।
अथ वीक्ष्य स विस्मितेक्षणो, बुद्धेः सूनुरुवाच मातुलम् ॥७॥
यदुत-किमेतैः क्षणमात्रेण, हित्वा तत्पूर्वनर्तनम् ।
प्रकारान्तरतो लोकैः, प्रारब्धं नर्तनान्तरम् ॥८॥
विमर्शेनोदितं वत्स !, यौ तौ दृष्टौ त्वया नरौ ।
ताभ्यां निजप्रभावेण, प्रविश्येदं प्रवर्तितम् ॥९॥
निवेदितं मया तुभ्यं, यथैते नैव मुत्कलाः ।
कुर्वन्त्यत्र पुरे लोकाः, स्वतन्त्राः कर्म किञ्चन ॥१०॥
किं तर्हि ?-यथा यथा स्ववीर्येण, कारयन्ति शुभेतरम् ।
अन्तरङ्गजनाः कर्म, कुर्वन्त्येते तथा तथा ॥११॥
ततो मिथ्याभिमानेन, तादृक्षं नाटिताः पुरा ।
एताभ्यां पुनरीदृक्षं, किं कुर्वन्तु वराककाः ? ॥१२॥
सज्ज्ञानपरिपूतानां, मतिमोहो महात्मनाम् ।
बाधां न कुरुते लोक, केवलं शुभचेतसाम् ॥१३॥

नापि शोको भवेत्तेषां, बाधको भद्र ! भावतः ।
यैरादावेव निर्णीतं, समस्तं क्षणभङ्गुरम् ॥१४॥
अत्र पुनः-पुत्रस्नेहवशेनैष, मतिमोहान्मृतो नृपः ।
शोकस्तु कारयत्येवं, प्रलापं करुणं जनैः ॥१५॥
प्रकर्षेणोदितं माम !, किमत्र नृपमन्दिरे ।
क्षणमात्रेण सञ्जातमीदृशं महदद्भुतम् ॥१६॥
किं वाऽन्यत्रापि जायेत, विरुद्धमिदमीदृशम् ? ।
विमर्शेनोदितं नात्र, भवचक्रेऽतिदुर्लभम् ॥१७॥
एतद्धि नगरं भद्र !, परस्परविरोधिभिः ।
अमुक्तमीदृशैः प्रायो, विविधैः संविधानकैः ॥१८॥
यावच्च मुक्तफूत्कारं, दारुणाक्रन्दभीषणम् ।
पताकाजालबीभत्सं, विषमाहतडिण्डिमम् ॥१९॥
उद्वेगहेतुस्ते भद्र !, नितरां जनतापकम् ।
इदं हि मृतकं रौद्रं, न निर्गच्छति मन्दिरात् ॥२०॥
तावदन्यत्र गच्छावो, न युक्तं द्रष्टुमीदृशम् ।
परदुःखं कृपावन्तः, सन्तो नोद्वीक्षितुं क्षमाः ॥२१॥ त्रिभिर्विशेषकम् ॥
एवं भवतु तेनोक्ते, निर्गतौ राजमन्दिरात् ।
सम्प्राप्तौ हट्टमार्गेषु, ततः स्वस्रीयमातुलौ ॥२२॥
अत्रान्तरे कृतम्लानिर्विज्ञाय रिपुकम्पनम् ।
मृतं समुद्रस्नानार्थं, पश्चिमे याति भास्करः ॥२३॥
अथादित्ये तिरोभूते, तिमिरेण मलीमसे ।
जगत्यशेषे सञ्जाते, बोधिते दीपमण्डले ॥२४॥
गोधनेषु निवृत्तेषु, विलीनेषु शकुन्तिषु ।
वेतालेषु करालेषु, कौशिकेषु विचारिषु ॥२५॥
मूकीभूतेषु काकेषु, निद्रिते नलिनीवने ।
निजावश्यकलग्नेषु, मुनिषु ब्रह्मचारिषु ॥२६॥
रटत्सु चक्रवाकेषु, रहितेषु स्वकान्तया ।
उल्लसत्सु भुजङ्गेषु, सतोषे कामिनीजने ॥२७॥
धनगर्वः ।
इत्थं प्रदोषे सम्पन्ने, प्रहृष्टजनमानसे ।
कश्चिन्निजापणद्वारे, दृष्टस्ताभ्यां महेश्वरः ॥२८॥

उत्तुङ्गविष्टरे रम्ये, निविष्टः किल लीलया ।
विनीतैर्बहुभिर्दक्षैर्वणिक्पुत्रैर्विवेष्टितः ॥२९॥
वज्रेन्द्रनीलवैडूर्यपद्मरागादिराशिभिः ।
पुरतः स्थापितैस्तुङ्गैर्नाशिताशेषतामसः ॥३०॥
विकटैर्हाटकस्तोमै, राजतैश्च पुरःस्थितैः ।
दीनारादिमहाकूटैर्गर्वितोऽग्रे विवर्त्तिभिः ॥३१॥
प्रकर्षेणोदितं माम !, किमित्येष महेश्वरः ।
उन्नामितैकभ्रूर्मन्दं, वीक्षते मन्थरेक्षणः ? ॥३२॥
अर्थिनां वचनं किं वा, सादरं बहुभाषितम् ।
एष बाधिर्यहीनोऽपि, नाकर्णयति लीलया ॥३३॥
कृतप्राञ्जलयो नम्रा, य एते चाटुकारिणः ।
एतान्नो वीक्षते कस्मात्तृणतुल्यांश्च मन्यते ? ॥३४॥
दृष्ट्वा दृष्ट्वा स रत्नानि, किञ्चिद् ध्यात्वा मुहुर्मुहुः ।
स्तब्धाङ्गः स्मेरवदनः, किं भवत्येव वाणिजः ?! ॥३५॥

विमर्शेनाभिहितं–भद्राकर्णय, अस्ति तस्यैव मिथ्याभिमानस्य स्वाङ्गभूतो धनगर्वो नाम वयस्यः, तेनाधिष्ठितोऽयं वराकः, तेनाधिष्ठितानामीदृशमेव स्वरूपं भवति । अयं हि मन्यते–"ममेदं रत्नकनकादिकं धनं, अहमस्य स्वामी, ततः कृतकृत्योऽहं, सम्पन्नं जन्मनः फलं, मत्तो वराकं भुवनम् ।" ततश्चेत्थं विकार-बाहुलः परिप्लवते, न लक्षयति धनस्वरूपं, न चिन्तयति परिणामं, नालोचय-त्यायतिं, न विचारयति तत्त्वं, न गणयति क्षणनश्वरतामिति । प्रकर्षः प्राह–माम ! योऽसौ रागकेसरिडिम्भरूपाणां मध्ये दृष्टो मया पञ्चमो डिम्भः सोऽस्य निकटवर्ती दृश्यते । विमर्शेनोक्तं–सत्यमेतत्स एवायम् । अत्रान्तरे समायातः कश्चिद्भुजङ्गो, निविष्टो महेश्वरसमीपे, याचितोऽनेनोत्सारकं महेश्वरः, दत्तोऽनेन । ततो रहसि स्थितस्य प्रकाशितदिक्चक्रवालं बहुविधानर्घेयरत्नघटितं दर्शितं तेन भुजङ्गेन तस्य महेश्वरवाणिजकस्य मुकुटं, प्रत्यभिज्ञातश्चानेन भुजङ्गो यथैष हेमपुराधिपतेर्बिभीषण-नृपतेः पदातिर्दुष्टशीलश्च, ततो नूनं हृतमनेनेदं भविष्यति । अत्रान्तरे प्रविष्टोऽसौ रागकेसरितनयो वाणिजकशरीरे, ततस्तत्प्रतापाच्चिन्तितमनेन–भवतु नाम हृतं, तथापि ग्रहीतव्यमेवेदं मया । ततोऽभिहितोऽनेन भुजङ्गः–भद्र ! किं ते क्रियताम् ? भुजङ्गेनोक्तम्–अस्योचितं मूल्यं दत्त्वा गृह्यतामिदं भवतेति । तुष्टो वाणिजकः, तोषितो मूल्येन भुजङ्गः, पलायितो वेगेन, गते च तस्मिंस्तत्पदानुसारेण समागतं

बिभीषणराजबलं, लब्धा कुतश्चिद्विक्रयवार्ता, प्रातः सलोप्त्रो वाणिजकः, गृहीतः पुरत एव लोकस्य ।

ततश्च क्षणमात्रेण, लुप्तास्ते रत्नराशयः ।
बद्धोऽसावारटन्नुच्चै, राजकेन महेश्वरः ॥१॥
इतस्ततो भयोद्भ्रान्ता, वणिक्पुत्राः सकिङ्कराः ।
सर्वेऽपि बान्धवैः सार्धं, नष्टास्ते पार्श्ववर्तिनः ॥२॥
ततो विलुप्तसर्वस्वः, स्वजनैः परिवर्जितः ।
आबद्धो लोप्त्रकः कण्ठे, महारासभरोपितः ॥३॥
भूत्या विलिप्तसर्वाङ्गस्तस्कराकारधारकः ।
स राजापथ्यकारीति, निन्द्यमानः पृथग्जनैः ॥४॥
महाकलकलध्वानसम्पूरितदिगन्तरैः ।
नीयमानो नृपेणोक्तैः, पुरुषैः कृतताडनैः ॥५॥
विद्राणवदनो दीनः, सर्वाशानाशविह्वलः ।
तस्मिन्नेव क्षणे दृष्टः, स ताभ्यामिभ्यवाणिजः ॥६॥
प्रकर्षेणोदितं माम !, किमिदं दृष्टमद्भुतम् ? ।
किमिन्द्रजालं किं स्वप्नः, किं वा मे मतिविभ्रमः ? ॥७॥
यदस्य क्षणमात्रेण, न सा लीला न तद्धनम् ।
न ते लोका न तत्तेजो, न गर्वो न च पौरुषम् ॥८॥

धनिचेष्टा ।

विमर्शेनोदितं वत्स !, सत्यमेतन्न विभ्रमः ।
अत एव न कुर्वन्ति, धनगर्वं महाधियः ॥९॥
धनं हि घर्मसन्तप्तविहङ्गगलचञ्चलम् ।
ग्रीष्मोष्माक्रान्तशार्दूलजिह्वातरलमीरितम् ॥१०॥
इन्द्रजालमिवानेकदर्शिताद्भुतविभ्रमम् ।
क्षणदृष्टविनष्टं च, नीरबुद्बुदसन्निभम् ॥११॥ युग्मम् ॥
अस्य वाणिजकस्येदं, तात ! दुर्नयदोषतः ।
नष्टं महापदस्थानं, यातं च विविधं धनम् ॥१२॥
इहान्येषां पुनर्भद्र !, दोषसंश्लेषवर्जिनाम् ।
अपि नश्येदिदं रिक्थं, भवेच्च भयकारणम् ॥१३॥

तथाहि-येऽपि फूत्कृत्य फूत्कृत्य, पादं मुञ्चन्ति भूतले ।
तेषामपि क्षणार्धेन, नश्यतीदं न संशयः ॥१४॥
प्राप्नुवन्ति च दुःखानि, धनिनो धनदोषतः ।
जलज्वलनलुण्टाकराजदायादतस्करैः ॥१५॥
अन्यच्चेदं धनं वत्स !, मेघजालमिवातुलम् ।
हतं प्रचण्डवातेन, यदा याति कथञ्चन ॥१६॥

तदा नालोकयति रूपं, न विगणयति परिचयं, न निरूपयति कुलीनतां, नानुवर्तयति कुलक्रमं, नाकलयति शीलं, नापेक्षते पाण्डित्यं, नालोचयति सौन्दर्यं, नावरुध्यते धर्मपरतां, नाद्रियते दानव्यसनितां, न विचारयति विशेषज्ञतां, न लक्षयति सदाचारपरायणतां,न परिपालयति चिरस्नेहभावं, नोररीकरोति सत्त्वसारतां, न प्रमाणयति शरीरलक्षणम् ।

किं तर्हि ?-गन्धर्वनगराकारे, पश्यतामेव देहिनाम् ।
तद्धनं क्षणमात्रेण, क्वापि न ज्ञायते गतम् ? ॥१॥
अर्जितं बहुभिः क्लेशैः, पालितं जीवितं यथा ।
नष्टं तु यादृङ् नृत्यत्सु, नटेष्वपि तदीक्षितम् ॥२॥
तथाप्यमी महामोहनिहताः क्षुद्रजन्तवः ।
ईदृशेऽपि धने भद्र ! चिन्ताबद्धं(न्धं) वितन्वते ॥३॥
अलीकधनगर्वेण, विह्वलीभूतमानसाः ।
विकारकोटीः कुर्वन्ति, यथैवैष महेश्वरः ॥४॥
तदीदृशो धनस्येह, पर्यन्तस्तात ! जन्मनि ।
परलोके पुनर्घोरा, धनाद्दुःखपरम्परा ॥५॥
प्रकर्षेणोदितं माम !, येन स्यान्निश्चलं धनम् ।
तथा शुद्धविपाकं च, स्यात् कल्याणनिबन्धनम् ॥६॥
तत्तादृशं जगत्यत्र, किमस्ति बत कारणम् ।
किं वा न सम्भवत्येव, तदिदं मे निवेदय ॥७॥
विमर्शेनोदितं तात !, सम्भवत्येव तादृशम् ।
कारणं विरलानां भोः, केवलं तेन मीलकः ॥८॥
करोति वर्धनस्थैर्ये, अजातं जनयेद्धनम् ।
अत्यन्तदुर्लभं भद्र !, पुण्यं पुण्यानुबन्धि यत् ॥९॥

यच्च-दया भूतेषु वैराग्यं, विधिवद्गुरुपूजनम् ।
विशुद्धा शीलवृत्तिश्च, पुण्यं पुण्यानुबन्ध्यदः ॥१०॥
अथवा-परोपतापविरतिः, परानुग्रह एव च ।
स्वचित्तदमनं चैव, पुण्यं पुण्यानुबन्ध्यदः ॥११॥
एतच्चान्यभवे धन्यैर्यैरुपात्तमिहापि वा ।
स्थिरमेव धनं तेषां, सुमेरोः शिखरं यथा ॥१२॥
अन्यच्च ते महात्मानस्तत्पुण्यपरिढौकितम् ।
बाह्यं तुच्छं मलप्रायं, विज्ञाय क्षणगत्वरम् ॥१३॥
योजयन्ति शुभे स्थाने, स्वयं च परिभुञ्जते ।
न च तत्र धने मूर्च्छामाचरन्ति महाधियः ॥१४॥ युग्मम् ॥
ततश्च तद्धनं तेषां, सत्पुण्यावासजन्मनाम् ।
इत्थं विशुद्धबुद्धीनां, जायते शुभकारणम् ॥१५॥
निन्द्ये बाह्ये महानर्थकारणे मूर्च्छिता धने ।
शून्यास्ते दानभोगाभ्यां, ये पुनः क्षुद्रजन्तवः ॥१६॥
इहैव चित्तसन्तापं, घोरानर्थपरम्पराम् ।
यत्ते लभन्ते पापिष्ठास्तत्र किं भद्र ! कौतुकम् ? ॥१७॥
तदत्र परमार्थोऽयं, मूर्च्छागर्वौ धने सति ।
न कार्यौ दानभोगौ तु, कर्तव्यौ तत्त्ववेदिना ॥१८॥
यस्तु नैवं करोत्युच्चैः, स वराको निरर्थकम् ।
अमूल्यकः कर्मकरः, केवलं परिताम्यति ॥१९॥
स्नेहदुर्नयगन्धोऽपि, वर्जनीयश्च जानता ।
अन्यथा जायते कष्टं, यथाऽस्य वणिजो महत् ॥२०॥
यावत्स कथयत्येवं, बुद्धिसूनोः स्वमातुलः ।
अन्यस्तावत्समापन्नो, वृत्तान्तस्तं निबोधत ॥२१॥
दृष्टस्ताभ्यां युवा कश्चिदवतीर्णो वणिक्पथे ।
दुर्बलो मलिनः क्षामो, जरच्चीवरधारकः ॥२२॥
आपणे ग्रन्थिमुन्मोच्य, रूपकैस्तेन मोदकाः ।
स्रजः पर्णानि गन्धाश्च, क्रीतं वस्त्रयुगं तथा ॥२३॥
गत्वा च निकटे वाप्यां, भक्षितं तेन भोजनम् ।
सन्मानितं सताम्बूलं, स्नातः सम्पूरितोदरः ॥२४॥

बद्धश्चामोटकः पुष्पैः, सद्गन्धैर्वासितं वपुः ।
ततः परिहिते वस्त्रे, प्रस्थितो राजलीलया ।।२५।।
निरीक्षतेऽभिमानेन, निजदेहं पुनः पुनः ।
समारयति चामोटं, गन्धमाघ्राय मोदते ।।२६।।
प्रकर्षेणोदितं माम !, क एष तरुणस्तथा ।
क्व प्रस्थितः किमर्थं वा, विकारैरिति भज्यते ? ।।२७।।
विमर्शेनोदितं वत्स !, महतीयं कथानिका ।
लेशोद्देशेन ते किञ्चित्, कथ्यते तन्निबोध मे ।।२८।।

रमणस्य वेश्यासङ्गः ।

समुद्रदत्तस्य सुतो, वास्तव्योऽत्रैव पत्तने ।
अयं हि रमणो नाम, तरुणो भोगतत्परः ।।२९।।
बालकालात्समारभ्य, गणिकाव्यसने रतः ।
अयं च रमणो भद्र !, न चेतयति किञ्चन ।।३०।।
गृहं समुद्रदत्तस्य, रत्नसम्भारपूरितम् ।
यदासीद्विभवैः पूर्वं, विक्षिप्तधनदालयम् ।।३१।।
तदनेन दिनैः स्तोकैर्गणिकारतबुद्धिना ।
अनाशककुटेस्तुल्यं, विहितं पापकर्मणा ।।३२।।
अधुना निर्धनो दीनः, परकर्मकरो लघुः ।
जातोऽयमीदृशः पापो, दुःखार्तो निजकर्मणा ।।३३।।
परकर्मकरत्वेन, कतिचिद्रूपकानयम् ।
अद्यागतः समासाद्य, हट्टे व्यसननाटितः ।।३४।।
ततः परं पुनर्वत्स !, यदनेन विचेष्टितम् ।
तद्दृष्टमेव निःशेषं, त्वया किं तत्र कथ्यताम् ।।३५।।
अस्ति चात्र पुरे ख्याता, गणिका मदनमञ्जरी ।
तस्याश्च कुन्दकलिका, दुहिता यौवनोद्धटा ।।३६।।
तस्यामासक्तचित्तेन, नाशितो धनसञ्चयः ।
अनेन धनहीनश्च, गेहान्निःसारितस्तया ।।३७।।
ततोऽद्य रूपकानेष, कियतोऽप्यतिनिष्ठया ।
सम्प्राप्य प्रस्थितस्तस्याः, सदने रतकाम्यया ।।३८।।

अत्रान्तरे सतूणीरमाकृष्टशरदारुणम् ।
नरं सानुचरं वीक्ष्य, प्रकर्षः प्राह मातुलम् ॥३९॥
हा माम माम ! पश्य त्वं, शरेण रमणं नरः ।
कश्चिदेष निहन्त्युच्चैस्तदेनं ननु वारय ॥४०॥
विमर्शेनोदितं वत्स !, स एष मकरध्वजः ।
चर्यया निर्गतो रात्रौ, भयेन सह लीलया ॥४१॥
वर्तते को ममाज्ञायाम् ? को वा नेत्यत्र पत्तने ।
परीक्षार्थं जनोल्लापवेषकर्तव्यचेतसाम् ॥४२॥ युग्मम् ॥
शरमाकृष्य वीर्येण, तदेष रमणो ननु ।
अनेनैव गृहं तस्या, वराको वत्स ! नीयते ॥४३॥
तर्त्कि ते वारणेनास्य, यदनेन पुरस्कृतः ।
रमणोऽनुभवत्येष, तन्निभालय कौतुकम् ॥४४॥
एवं भवतु तेनोक्ते, तौ गतौ गणिकागृहे ।
दृष्टा च कुन्दकलिका, गृहद्वारेऽतिचर्चिता ॥४५॥
तदभ्यर्णे विमर्शेन, कुञ्चिता निजनासिका ।
निष्ठ्यूतं धूनितं शीर्षं, वालिताऽन्यत्र कन्धरा ॥४६॥
ततो हाहेति जल्पन्तमुद्विग्नं तं स्वमातुलम् ।
प्रकर्षः प्राह ते माम !, किं व्यलीकस्य कारणम् ? ॥४७॥
स प्राह वसनच्छन्नां, पुष्पालङ्कारभारिताम् ।
किमेनां निकटे त्वं नो, वीक्षसेऽशुचिकोष्ठिकाम् ? ॥४८॥
तदस्या दूरतः स्थित्वा, देशे गन्धविवर्जिते ।
वृत्तान्तो योऽत्र जायेत, पश्यावस्तं निराकुलौ ॥४९॥
निश्छिद्रा च भवेत् काचिदशुचेरपि कोष्ठिका ।
इयं तु नवभिद्वारैः, क्षरत्येवातिमुत्कला ॥५०॥
तदहं क्षणमप्येकं, नात्र भोः स्थातुमुत्सहे ।
तुभ्यं शपे[१] शिरोऽनेन, गन्धेन मम दुष्यति ॥५१॥
प्रकर्षेणोदितं माम !, सत्यमेतन्न संशयः ।
ममापि नासिका व्याप्ता, गन्धेनोत्पादितारतिः ॥५२॥

१. वदामि ।

तत्तूर्णमपसराव: । ततोऽपसृतौ विमर्शप्रकर्षौ, स्थितौ सविलोके दूरदेशे । अत्रान्तरे सम्प्राप्तो रमण:, तदनु चाकृष्टबाण: समागत एव भयसहितो मकरध्वज: । दृष्टा रमणेन कुन्दकलिका, तत: प्रत्युज्जीवित इव, सुधासेकसिक्त इव, सम्प्राप्तरत्न-निधान इव, महाराज्येऽभिषिक्त इव गत: परमहर्षं रमण: । अत्रान्तरे निर्गता निजगृहान्मदनमञ्जरी, दृष्टस्तयाऽसौ, लक्षिता च सकिञ्चनता । तत: सञ्ज्ञिता कुन्द-कलिका, निरीक्षित: कुन्दकलिकया रमण:, सञ्जात: प्रहृष्टतर: । अत्रान्तरे विज्ञायावसरमाकर्णान्तमापूर्य विमुक्तो मकरध्वजेन शिलीमुख:[1], ताडितस्तेन रमण:, गृहीताऽनेन कण्ठे कुन्दकलिका, प्रविष्टोऽभ्यन्तरे, निकटीभूता मदनमञ्जरी, समर्पितं रूपकादि सर्वस्वं, गृहीतमनया, कृतोऽसौ यथाजात: । ततोऽभिहितं मदनमञ्जर्या-वत्स ! सुन्दरमनुष्ठितं भवता यदिहागतोऽसि, समुत्सुका त्वयि वत्सा कुन्दकलिका, किं तु भीमनृपते: सुतश्चण्डो नाम राजपुत्र: साम्प्रतमिहाजि-गमिषुर्वर्तते, तदत्रावलीनो भवतु वत्स: । एतच्चाकर्णयतो रमणस्य कृतो भयेन शरीरेऽनुप्रवेश: ।

वेश्याविपाक: ।

अत्रान्तरे समागतो द्वारि चण्ड:, समुल्लसितो बहुलकलकल:, विजृम्भितो भय:, प्रकम्पितो रमण:, प्रविष्टश्चण्ड:, दृष्टोऽनेन रमण:, गृहीत: क्रोधेन चण्ड:, समाकृष्टाऽसिपुत्रिका, समाहूतो रणाय रमण: । ततो गतेन दैन्यं, प्राप्तेन नैर्लज्ज्यं, नीतेन क्लीबतां, भयेनाभिभूतेन तेन रमणेनागत्य कृतं चण्डस्याङ्गुलीगृहीतदन्ते-नाष्टाङ्गपादपतनं, त्रायस्व देव ! त्रायस्वेति भाषितानि करुणवचनानि, सम्पन्ना चण्डस्य दया, न मारितोऽसौ । केवलं रोषोत्कर्षात् छिन्नोऽनेन रमणस्यामोटक:, त्रोटिता नासिका, विलुप्तौ कर्णौ, विदलिता दशनपङ्क्ति:, लूषितमधरोष्ठं, विकर्तितौ कपोलौ, उत्पाटितमेकं लोचनं, दत्तो मुखे वामपादपार्ष्णिप्रहार:, नि:सारितो भवनात्, हसितं सहस्ततालं मदनमञ्जरीकुन्दकलिकाभ्यां, प्रत्यायि-तश्चण्डोऽपि पेशलवचनै: कृतो हृतहृदय: । रमणस्तु निर्गच्छन्नितरां जर्जरित: प्रहारै राजलोकेन प्राप्तो नारकसमं दु:खं वियुक्त: प्राणै: कृच्छ्रेण । तत: प्रकर्षेणोक्तम्-अहो मकरध्वजसामर्थ्यम्, अहो भयविलसितम्, अहो कुट्टनीप्रपञ्चचातुर्यम्, अहो सर्वथा करुणास्थानं सोपहासप्रेक्षणकप्रायं चेदं रमणचरितमिति ।

विमर्शेनोक्तं-वत्स ! (ये) गणिकाव्यसने रक्ता, भवन्त्यन्येऽपि मानवा: ।
तेषामेवंविधान्येव, चरितानि न संशय: ॥१॥

१. बाण: ।

वस्त्रभूषणताम्बूलगन्धमाल्यविलेपनैः ।
हृताक्षास्ते न पश्यन्ति, सहजाशुचिरूपताम् ॥२॥
सञ्चरिष्णुमहाविष्ठाकोष्ठिकाभिर्विमूढकाः ।
वाञ्छन्तस्ताभिराश्लेषं, कुर्वन्त्येव धनक्षयम् ॥३॥
ततो भिक्षाचरप्राया, भवन्ति कुलदूषणाः ।
न च मूढा विरज्यन्ते, तामवस्थां गता अपि ॥४॥
ततस्ते प्राप्नुवन्त्येव, वेश्याव्यसननाटिताः ।
एवंविधानि दुःखानि, वत्स ! किं चात्र कौतुकम् ॥५॥
चलचित्ताः प्रकृत्यैव, कुलजा अपि योषितः ।
चटुलत्वेन वेश्यानां, तात ! कः प्रश्नगोचरः ? ॥६॥
कुलीना अपि भो ! नार्यः, सर्वमायाकरण्डिकाः ।
को मायां जीर्णवेश्यानां, वत्स ! पृच्छेत्सकर्णकः ? ॥७॥
शेषाभिरपि नारीभिः, स्नेहे दत्तो जलाञ्जलिः ।
यस्यास्था गणिकास्नेहे, स मूर्खपट्टबन्धकः ॥८॥
अन्यस्मै दत्तसङ्केता, वीक्षतेऽन्यं गृहे परः ।
अन्यश्चित्ते परः पार्श्वे, गणिकानामहो नरः ॥९॥
कुर्वन्ति चाटुकर्माणि, यावत्स्वार्थः प्रपूर्यते ।
च्युतसारं विमुञ्चन्ति, निर्लाक्षालक्तकं यथा ॥१०॥
पुरापघसरप्राया, गणिकाः परिकीर्त्तिताः ।
ये तास्वपि च गृध्यन्ति, ते श्वानो न मनुष्यकाः ॥११॥
तस्मादेवंविधं नूनमन्येषामपि देहिनाम् ।
चरितं यैः कृतं पापैर्गणिकाव्यसने मनः ॥१२॥

प्रकर्षेणोक्तं–सत्यमेतन्नास्त्यत्र सन्देहः । ततोऽतिवाहितस्ताभ्यां क्वचिद्देवमन्दिरे रात्रिशेषः ।

अत्रान्तरे गलत्तारा, क्वथितध्वान्तकेशिका ।
नभःश्रीः पाण्डुरा जाता, रोगाघ्रातेव बालिका ॥१॥
आददानः श्रियं तस्या, निजवीर्येण भास्करः ।
कारुण्यादिव सञ्जातः, सप्रभावो भिषग्वरः ॥२॥
ततोऽरुणप्रभाभिन्ने, पूर्वे गगनमण्डले ।
जाते रक्तेऽभ्रसङ्घाते, गतच्छाये निशाकरे ॥३॥

तस्करेषु निलीनेषु, लपत्सु कृकवाकुषु ।
कौशिकेषु च मूकेषु, कुररेषु विराविषु ॥४॥
स्वकर्मधर्मव्यापारच्छलेनेव कृतादरम् ।
सर्वं तदा जगज्जातमारोग्यार्थं नभःश्रियः ॥५॥ त्रिभिर्विशेषकम् ॥
अथोदिते सहस्रांशौ, प्रबुद्धे कमलाकरे ।
सङ्गमे चक्रवाकानां, जने धर्मपरायणे ॥६॥
विमर्शः प्राह ते वत्स !, महदत्र कुतूहलम् ।
भवचक्रं च विस्तीर्णं, नानावृत्तान्तसङ्कुलम् ॥७॥
स्तोककालावधिः शेषो, द्रष्टव्यं बहु तिष्ठति ।
न शक्यते ततः कर्तुमेकैकस्थानवीक्षणम् ॥८॥
तदिदं वचनं तात !, मामकीनं समाचर ।
आकालहीनं ते येन, पूर्यते तत्कुतूहलम् ॥९॥

विवेकपर्वतः ।

य एष दृश्यते तुङ्गः, शुभ्रः स्फटिकनिर्मलः ।
महाप्रसादो विस्तीर्णो, विवेको नाम पर्वतः ॥१०॥
आरूढैर्दृश्यते भद्र !, समस्तमिह पर्वते ।
इदं विचित्रवृत्तान्तं, भवचक्रं महापुरम् ॥११॥
तदत्रारुह्यतां तात !, निपुणं च विलोक्यताम् ।
यच्च न ज्ञायते सम्यक्, पृच्छ्यतामेष तज्जनः ॥१२॥
यतोऽत्राखिलवृत्तान्ते, विदिते नगरे तव ।
पश्चादपि न जायेत, चित्तौत्सुक्यं कदाचन ॥१३॥
एवं भवतु तेनोक्ते, समारूढौ च पर्वते ।
अथ तत्र विवेकाख्ये, तुष्टौ स्वस्त्रीयमातुलौ ॥१४॥
प्रकर्षः प्राह मामैष, रमणीयो महागिरिः ।
दृश्यते सर्वतः सर्वं, भवचक्रं मयाऽधुना ॥१५॥
किं तु देवकुले माम !, नग्नो ध्यानपरायणः ।
वेष्टितः पुरुषैर्दीनः, क्षामो मुत्कलकेशिकः ॥१६॥
नंष्टुकामो दिगालोकी, सेटिकाशुभ्रहस्तकः ।
दृश्यते पुरुषः कोऽयं पिशाचाकारधारकः ? ॥१७॥

द्यूतफलम् ।

विमर्शेनोदितं वत्स !, विख्यातातुलसम्पदः ।
कुबेरसार्थवाहस्य, सूनुरेष कपोतकः ॥१८॥
धनेश्वर इति ख्यातमभिधानं प्रतिष्ठितम् ।
अस्य पूर्वगुणैः पश्चादाहूतोऽयं कपोतकः ॥१९॥
अनर्घ्यरत्नकोटीभिः, पूरितं पापकर्मणा ।
अनेनापि पितुर्गेहं, श्मशानसदृशं कृतम् ॥२०॥
द्यूतेषु रतचित्तोऽयं, न चेतयति किञ्चन ।
निर्वाहिते धने स्वीये, द्यूतार्थं चौरिकापरः ॥२१॥
चौर्यं पुरेऽत्र कुर्वाणो, भूरिवारान् कदर्थितः ।
राज्ञाऽसौ मान्यपुत्रत्वात्केवलं न विनाशितः ॥२२॥
अद्य रात्रौ पुनः सर्वं, हारितं कर्पटादिकम् ।
ततो व्यसनतप्तेन, मस्तकेन कृतः पणः ॥२३॥
एभिरेष महाधूर्त्तैर्वराकैः कितवैर्जितः ।
शिरोऽपि लातुमिच्छद्भिरधुनैवं विनाट्यते ॥२४॥
नंष्टुमेभ्यो न शक्नोति, स्वपापभरपूरितः ।
क्षुद्रैर्वितर्ककल्लोलैः, केवलं परितप्यते ॥२५॥
प्रकर्षः प्राह न ज्ञातं, किमनेन तपस्विना ।
द्यूतं हि देहिनां लोके, सर्वानर्थविधायकम् ॥२६॥
धनक्षयकरं निन्द्यं, कुलशीलविदूषणम् ।
प्रसूतिः सर्वपापानां, लोके लाघवकारणम् ॥२७॥
सङ्क्लिष्टचेतसो मूलमविश्वासकरं परम् ।
पापैः प्रवर्तितं द्यूतं, किमनेन न लक्षितम् ? ॥२८॥
विमर्शेनोदितं वत्स !, महामोहमहीपतेः ।
वराकः किं करोत्येष, यो वशः सैन्यवर्तिनः ॥२९॥
यतः–महामोहहता येऽत्र, विशेषेण नराधमाः ।
द्यूते त एव वर्तन्ते, प्राप्नुवन्ति च तत्फलम् ॥३०॥
यावच्च कथयत्येवं, विमर्शः किल चेष्टितम् ।
तावत्त्रोटितमेवोच्चैः, कितवैस्तस्य मस्तकम् ॥३१॥

मृगयाव्यसनफलम् ।

प्रकर्षः प्राह मामेदं !, महानर्थविधायकम् ।
रमन्ते द्यूतमत्रैव, तेषामेवंविधा गतिः ॥३२॥
तं मातुलोऽब्रवीद्भद्र !, सम्यक् संलक्षितं त्वया ।
न द्यूते रक्तचित्तानां, सुखमत्र परत्र वा ॥३३॥
अत्रान्तरे महारण्ये, निपपात कथञ्चन ।
दृष्टिः प्रकर्षसञ्ज्ञस्य, नीलाब्जदललासिनी ॥३४॥
ततश्च तन्मुखं हस्तं, कृत्वा स प्राह मातुलम् ।
क एष तुरगारूढः, प्रस्विन्नः श्रमपीडितः ॥३५॥
उद्गीर्णहेतिः पापात्मा, जीवमारणतत्परः ।
स्वयं दुःखपरीतोऽपि, दुःखदोऽरण्यदेहिनाम् ॥३६॥
मध्याह्नेऽपि पिपासार्तो, बुभुक्षाक्षामकुक्षिकः ।
जम्बुकं पुरतः कृत्वा, प्रधावन्नुपलभ्यते ॥३७॥ त्रिभिर्विशेषकम् ॥
विमर्शेनोक्तम्–अत्रैव मानवावासे, विद्यतेऽवान्तरं पुरम् ।
ललितं नाम तस्यायं, राजा ललननामकः ॥३८॥
मृगयाव्यसने सक्तो, न लक्षयति किञ्चन ।
अयमत्र महारण्ये, तिष्ठत्येव दिवानिशम् ॥३९॥
सामन्तैः स्वजनैर्लोकैस्तथा मन्त्रिमहत्तमैः ।
वार्यमाणोऽपि नैवास्ते, मांसखादनलालसः ॥४०॥
सीदन्ति राज्यकार्याणि, विरक्तं राजमण्डलम् ।
ततस्तं तादृशं वीक्ष्य, चिन्तितं राज्यचिन्तकैः ॥४१॥
नोचितो राज्यपद्माया, ललनोऽयं दुरात्मकः ।
ततः पुत्रं व्यवस्थाप्य, राज्ये गेहाद्बहिष्कृतः ॥४२॥

मांसखादनफलम् ।

तथाप्याखेटके रक्तो, मांसलोलो नराधमः ।
एकाकी दुःखितोऽरण्ये, नित्यमास्ते पिशाचवत् ॥४३॥
इह च वत्स !–परमारितजीवानां, पिशितं योऽपि खादति ।
इहामुत्र च दुःखानां, पद्धतेः सोऽपि भाजनम् ॥४४॥
यस्तु क्रूरो महापापः, स्वयमेव निकृन्तति ।
स्फुरन्तं जीवसङ्घातं, तस्य मांसं च खादति ॥४५॥

तस्येह यदि दुःखानि, भवन्त्येवंविधानि भोः !
परत्र नरके पातो, वत्स ! किं तत्र कौतुकम् ॥४६॥ युग्मम् ॥
बीभत्समशुचेः पिण्डो, निन्द्यं रोगनिबन्धनम् ।
कृमिजालोल्बणं मांसं, भक्षयन्तीह राक्षसाः ॥४७॥
यैस्त्विदं धर्मबुद्ध्यैव, भक्ष्यते स्वर्गकाम्यया ।
कालकूटविषं नूनमद्युस्ते जीवितार्थिनः ॥४८॥
अहिंसा परमो धर्मः, स कुतो मांसभक्षणे ? ।
अथ हिंसा भवेद्धर्मः, स्यादग्निर्हिमशीतलः ॥४९॥
किमत्र बहुना ?-धर्मार्थं रसगृद्ध्या वा, मांसं खादन्ति ये नराः ।
निघ्नन्ति प्राणिनो वा ते, पच्यन्ते नरकाग्निना ॥५०॥
अन्यच्च- यथा गोमायुघाताय, ताम्यत्येष निरर्थकम् ।
आखेटके रतात्मानस्तथैवान्येऽपि जन्तवः ॥५१॥
यावच्च वर्णयत्येवं, विमर्शस्तस्य चेष्टितम् ।
तावल्ललनवृत्तान्तो, यो जातस्तं निबोधत ॥५२॥
स जम्बुकविनाशार्थं, धावन्नुच्चैर्दुरुत्तरे ।
सतुरङ्गो महागर्ते, पतितोऽधोमुखस्तले ॥५३॥
ततः सञ्चूर्णिताङ्गोऽसौ, क्षुद्यमानो हयेन च ।
अत्राणो विरटन्नुच्चैस्तत्रैव निधनं गतः ॥५४॥
ततः प्रकर्षेणाभिहितम्-अधुनैवामुना प्राप्तं, मृगयाव्यसने फलम् ।
विमर्शः प्राह न फलं, पुष्पमेतद्विभाव्यताम् ॥५५॥
फलं तु नरके घोरे, स्यादेवंविधकर्मणाम् ।
तथापि मूढाः खादन्ति, मांसं हिंसन्ति देहिनः ॥५६॥
इतश्च राजपुरुषैर्जिह्वामुत्पाट्य दारुणैः ।
तप्तं ताम्रं नरः कश्चित्पाय्यमानो निरीक्षितः ॥५७॥
ततो दयापरीतात्मा, प्रकर्षः प्राह मातुलम् ।
हा हा किमेष पुरुषो, निर्घृणैर्माम ! पीड्यते ? ॥५८॥

विकथाफलम् ।

विमर्शेनोक्तं-भद्राकर्णय, अयं पुरुषोऽत्रैव मानवावासान्तर्भूते चणकपुरे वास्तव्यो महाधनः सुमुखो नाम सार्थवाहः । अयं च बालकालादारभ्य वाक्पारुष्यव्यसनी, ततो लोकैर्गुणनिष्पन्नमस्य दुर्मुख इति नाम प्रतिष्ठितं, प्रकृत्यैव

चास्य प्रतिभासते स्त्रीकथा, रोचते भक्तकथा, मनोऽभीष्टा राजकथा, हृद्दयिता देशकथा । सर्वथा जल्पे सति न कथञ्चिन्निजतुण्डं धारयितुं पारयति । इतश्च चणकपुराधिपतिरेव तीव्रो नाम राजा गतो रिपूणामुपरि, विक्षेपेण लग्नमायोधनं, जिता रिपवः । इतश्च निर्गते तस्मिन्नास्थानिकायां प्रस्तुताऽनेन राजकथा, यदुत–प्रबलास्ते रिपवः, पराभविष्यन्ति राजानं, आगमिष्यन्ति ते पुरलुण्टनार्थं, ततो यथाशक्त्या पलायध्वं यूयम् । तदाकर्ण्य नष्टं समस्तं पुरं, समागतो राजा, दृष्टं तन्निरुद्वसं चणकपुरं, किमेतदिति पृष्टमनेन, कथितः केनचिद्व्यतिकरः, कुपितो दुर्मुखस्योपरि तीव्रनरेन्द्रः, ततः पुनरावासिते पुरे प्रख्याप्य तं दुर्वचनभाषणलक्षणमपराधं पौराणामेवंविधोऽस्य दण्डो निर्वर्त्तितो राज्ञेति ।

प्रकर्षेणोदितं माम !, महाकष्टकमीदृशम् ।
यद्दुर्भाषणमात्रेण, सम्प्राप्तोऽयं वराककः ॥१॥
मातुलेनोदितं वत्स !, विकथाऽऽसक्तचेतसाम् ।
अनियन्त्रिततुण्डानां, कियदेतद्दुरात्मनाम् ? ॥२॥
इयं हि कुरुते वैरं, देहिनां निर्निमित्तकम् ।
विधत्ते जनसन्तापं, मुत्कला भद्र ! भारती ॥३॥
ते धन्यास्ते महात्मानस्ते श्लाघ्यास्ते मनस्विनः ।
ते वन्द्यास्ते दृढास्तत्त्वे, ते जगत्यमृतोपमाः ॥४॥
येषां मिताक्षरा सत्या, जगदाह्लादकारिणी ।
काले सद्बुद्धिपूता च, वर्तते भद्र ! भारती ॥५॥ युग्मम् ॥
ये तु मुत्कलवाणीका, वदन्तेऽर्दवितर्दकम् ।
तैरत्रैव महानर्था, नेदृशा वत्स ! दुर्लभाः ॥६॥
सुश्लिष्टा मोचयत्येषा, भारती तात ! देहिनम् ।
उच्छृङ्खला पुनर्वत्स ! तमेषा बन्धयत्यलम् ॥७॥
तदस्य विकथामूलं, दुर्भाष्यव्यसने फलम् ।
इदमीदृशमापन्नं, परलोके च दुर्गतिः ॥८॥

हर्षशोकवृत्तान्तः ।

अत्रान्तरे प्रकर्षेण, राजमार्गे निपातिता ।
दृष्टिर्दृष्टश्च तत्रैकः, शुक्लवर्णाम्बरो नरः ॥९॥
ततः पप्रच्छ तं वीक्ष्य, क एष इति मातुलम् ।
तेनोक्तं वत्स ! हर्षोऽयं, रागकेसरिसैनिकः ॥१०॥

अस्त्यत्र मानवावासे, वासवो नाम वाणिजः ।
इदं च दृश्यतेऽभ्यर्णे, तस्य गेहं महाधनम् ॥११॥
बालकाले वियुक्तश्च, वयस्योऽत्यन्तवल्लभः ।
धनदत्तः समायातो, वासवानन्ददायकः ॥१२॥
इदं कारणमुद्दिश्य, भवनेऽत्र प्रवेक्ष्यति ।
अयं हर्षः प्रविष्टश्च, पश्य किं किं करिष्यति ? ॥१३॥
ततो विस्फारिताक्षोऽसौ, प्रकर्षस्तन्निरीक्षते ।
इतश्च वासवस्तेन, धनदत्तेन मीलितः ॥१४॥
ततः प्रविष्टस्तद्देहे, स हर्षः सकुटुम्बके ।
सञ्जातं च वणिग्गेहं, बृहदानन्दसुन्दरम् ॥१५॥
आहूता बान्धवाः सर्वे, प्रवृत्तश्च महोत्सवः ।
ततो गायन्ति नृत्यन्ति, वादितानन्दमर्दलाः ॥१६॥
अपि च-वरभूषणमुज्ज्वलवेषधरं, प्रमदोद्धुरखादनपानपरम् ।
धनदत्तसमागमजातसुखं, तदभूदथ वासवगेहसुखम् ॥१७॥
अथ तादृशि विस्मयसञ्जनके, क्षणमात्रविवर्धितवर्धनके ।
निजमाममवोचत बुद्धिसुतः, प्रविलोकनकौतुकतोषयुतः ॥१८॥
यदिदं वेल्लते माम !, सर्वमर्दवितर्दकम् ।
वासवीयगृहं तत्किं, तेन हर्षेण नाटितम् ? ॥१९॥
विमर्शेनोदितं-वत्स !, साधु साधु विनिश्चितम् ।
अकाण्डसदनक्षोभे, हर्ष एवात्र कारणम् ॥२०॥
अत्रान्तरेऽतिबीभत्सः, कृष्णवर्णधरो नरः ।
दृष्टो द्वारि प्रकर्षेण, तस्य वासवसद्मनः ॥२१॥
ततस्तेनोदितं माम !, क एष पुरुषाधमः ? ।
विमर्शेनोक्तं-वत्स ! शोकवयस्योऽयं, विषादो नाम दारुणः ॥२२॥
यश्चैष पथिकः कश्चित्प्रवेष्टुमिह वाञ्छति ।
प्रविष्टेऽत्र विषादोऽयं, भवनेऽत्र प्रवेक्ष्यते ॥२३॥
ततः प्रविश्य पान्थेन, तेन वासवसन्निधौ ।
एकान्ते वासवस्यैव, गुह्यं किञ्चिन्निवेदितम् ॥२४॥
अत्रान्तरे प्रविष्टोऽसौ, विषादस्तच्छरीरके ।
मूर्च्छया पतितश्चासौ, वासवो नष्टचेतनः ॥२५॥

हा हा किमेतदित्युच्चैर्विलपन्निखिलो जनः ।
ततः समागतस्तस्य, निकटे भयविह्वलः ॥२६॥
अथ वायुप्रदानाद्यैः, पुनः सञ्जातचेतनः ।
प्रलापं कर्तुमारब्धः, सविषादः स वासवः ॥२७॥
कथम् ?-हा पुत्र ! तात वत्सातिसुकुमारशरीरक ।
ईदृशी तव सञ्जाता, काऽवस्था मम कर्मणा ? ॥२८॥
निर्गतोऽसि ममापुण्यैर्वत्स ! वारयतो मम ।
दैवेन निर्घृणेनेदं, तव जात ! विनिर्मितम् ॥२९॥
हा हतोऽस्मि निराशोऽस्मि, मुषितोऽस्मि विलक्षणः ।
एवं व्यवस्थिते वत्स !, त्वयि किं मम जीविते ॥३०॥
यावच्च प्रलपत्येवं, स पुत्रस्नेहकातरः ।
तावद्विषादः सर्वेषु, प्रविष्टः स्वजनेष्वपि ॥३१॥
अथ ते तस्य माहात्म्यात्सर्वे वासवबान्धवाः ।
हाहारवपरा गाढं, प्रलापं कर्तुमुद्यताः ॥३२॥
ततश्च-क्षणेन विगतानन्दं, दीनविह्वलमानुषम् ।
रुदन्नारीजनं मूढं, जातं वासवमन्दिरम् ॥३३॥
ततस्तत्तादृशं दृष्ट्वा, प्रकर्षः प्राह मातुलम् ।
किमिदं माम ! सञ्जातं, गृहे तु प्रेक्षणान्तरम् ? ॥३४॥
विमर्शः प्राह तत्तुभ्यमादावेव निवेदितम् ।
मया यथाऽन्तरायत्ता, बहिरङ्गा इमे जनाः ॥३५॥
ततश्चेदं तथा पूर्वं, हर्षेण प्रविनाटितम् ।
अधुना नाटयत्येवं, विषादोऽसौ वराककम् ॥३६॥
तदत्र भवने लोकाः, किं कुर्वन्तु तपस्विनः ? ।
ये हि हर्षविषादाभ्यां, क्षणार्धेन विनाटिताः ॥३७॥
प्रकर्षः प्राह किं गुह्यं, कर्णाभ्यर्णविवर्तिना ।
अनेन वासवस्यास्य, पुरुषेण निवेदितम् ॥३८॥
विमर्शेनोदितं वत्स !, समाकर्णय साम्प्रतम् ।
अस्त्यस्य वर्धनो नाम, पुत्रो हृदयवल्लभः ॥३९॥
स चैक एव पुत्रोऽस्य, यौवनस्थो मनोहरः ।
उपयाचितकोटीभिर्जातो विनयतत्परः ॥४०॥

अनेन वार्यमाणोऽपि, स धनार्जनकाम्यया ।
प्रविधाय महासार्थं, गतो देशान्तरे पुरा ॥४१॥
स चोपार्ज्य धनं भूरि, स्वदेशागमकामुकः ।
कादम्बर्यां महाटव्यां, गृहीतो वत्स ! तस्करैः ॥४२॥
विलुप्तं धनसर्वस्वं, हतः सार्थः सबान्धवः ।
बद्धा गृहीता बन्द्यश्च, तस्करैर्धनकामिभिः ॥४३॥
तासां मध्ये गृहीतश्च, वर्धनः क्रूरकर्मभिः ।
स सार्थवाह इत्येवंवादिभिर्भद्र ! तस्करैः ॥४४॥
नीत्वा पल्लिं ततोऽनेकयातनाशतपीडितः ।
स चौरैर्विहितो वत्स ! वर्धनो धनवाञ्छया ॥४५॥
अयं च पुरुषस्तस्य, सर्वदा पादधावकः ।
वत्स ! लम्बनको नाम, गृहजो दासदारकः ॥४६॥
ततस्तं तादृशं दृष्ट्वा, स्वामिनं चौरपीडितम् ।
नंष्ट्वा कथञ्चिदायातो, वृत्तान्तस्य निवेदकः ॥४७॥
निवेदिते च वृत्तान्ते, तथा वासववाणिजः ।
यदकार्षीत्त्वया तच्च, दृष्टमेव ततः परम् ॥४८॥
प्रकर्षेणोदितं माम !, प्रलापाक्रन्दरोदनैः ।
किममीभिः परित्राणं, तस्य सञ्जनितं कृतैः ? ॥४९॥
विमर्शेनोदितं वत्स !, नैतदेवं तथापि च ।
एवमेते प्रकुर्वन्ति, विषादेन विनाटिताः ॥५०॥
धनदत्तागमं प्राप्य, ये हर्षवशवर्तिनः ।
वर्धनापदमासाद्य, विषादेन विनाटिताः ॥५१॥
तेषां हर्षविषादाभ्यामेतेषां पीडितात्मनाम् ।
कीदृशी वा भवेत्तात !, पर्यालोचितकारिता ? ॥५२॥
ततश्च-अवीक्ष्य वस्तुनस्तत्त्वमनालोच्य हिताहितम् ।
एते विडम्बयन्त्येवमात्मानं तद्वशानुगाः ॥५३॥
किञ्च-नात्र केवलमीदृक्षं, वासवीये गृहोदरे ।
आभ्यां हर्षविषादाभ्यां, प्रेक्षणं वत्स ! नाट्यते ॥५४॥
किं तर्हि ?-सर्वत्र भवचक्रेऽस्मिन्, कारणैरपरापरैः ।
एतौ नर्तयतो नित्यं, जनमेनं गृहे गृहे ॥५५॥

यतः-पुत्रं राज्यं धनं मित्रमन्यद्वा सुखकारणम् ।
हर्षस्यास्य वशं यान्ति, प्राप्यास्मिन् मूढजन्तवः ॥५६॥
ततस्ते तत्परायत्ताः, सद्बुद्धिविकला नराः ।
वत्स ! किं किं न कुर्वन्ति, हास्यस्थानं विवेकिनाम् ? ॥५७॥
न चिन्तयन्ति ते मूढा, यथेदं पूर्वकर्मणा ।
पुत्रराज्यादिकं सर्वं, जन्तूनामुपपद्यते ॥५८॥
ततः कर्मपरायत्ते, तुच्छे बाह्येऽतिगत्वरे ।
कथञ्चित्तत्र सम्पन्ने, हर्षः स्यात्केन हेतुना ? ॥५९॥
तथा-विषादेन च बाध्यन्ते, वियोगं प्राप्य वल्लभैः ।
अनिष्टैः सम्प्रयोगं च, नानाव्याधिशतानि च ॥६०॥
बाधिताश्च विषादेन, सदाऽमी मूढदेहिनः ।
आक्रन्दनं मनस्तापं, दैन्यमेवं च कुर्वते ॥६१॥
न पुनर्भावयन्त्येवं, यथेदं पूर्वसञ्चितैः ।
कर्मभिर्जनितं दुःखं, विषादावसरः कथम् ? ॥६२॥
अन्यच्च-विषादो वर्धयत्येव, तद्दुःखं तात ! देहिनाम् ।
न त्राणकारकस्त्राणं, केवलं शुभचेष्टितम् ॥६३॥
यतः-दुःखानि पापमूलानि, पापं च शुभचेष्टितैः ।
सर्वं प्रलीयते वत्स !, ततो दुःखोद्भवः कुतः ? ॥६४॥
प्रकर्षः प्राह-यद्येवं, ततः सुन्दरचेष्टिते ।
वरमेभिः कृतो यत्नो, न विषादस्य शासने ॥६५॥
विमर्शेनाभिहितं-चारु चारूदितं वत्स !, केवलं मूढजन्तवः ।
इदमेते न जानन्ति, भवचक्रनिवासिनः ॥६६॥
अन्यच्चात्र-कियन्ति संविधानानि, शृङ्गग्राहिकया तव ।
मया निवेदयिष्यन्ते, नगरे पारवर्जिते ? ॥६७॥
इतश्च-अस्य स्वरूपविज्ञाने, बलवत्ते कुतूहलम् ।
अतः समासतो वत्स !, तुभ्यमेतन्निवेदये ॥६८॥
आरूढः पर्वते तात !, विवेकाख्येऽत्र निर्मले ।
इदं विलोकयत्येवं, रूपतः किं निवेद्यताम् ॥६९॥
गुणतश्च पुनर्वत्स !, वर्ण्यमानं मया स्फुटम् ।
इदं यथावद्बुध्यस्व, भवचक्रं महापुरम् ॥७०॥

गतिचतुष्कवर्णनम् ।

अवान्तरपुरैर्वत्स !, भूरिभिः परिपूरितम् ।
यद्यपीदं तथाप्यत्र, श्रेष्ठं पुरचतुष्टयम् ॥७१॥
एकं हि मानवावासं, द्वितीयं विबुधालयम् ।
तृतीयं पशुसंस्थानं, चतुर्थं पापिपञ्जरम् ॥७२॥
एतानि तानि चत्वारि, प्रधानानीह पत्तने ।
पुराणि व्यापकानीति, सर्वेषां मध्यवर्तिनाम् ॥७३॥
तत्रेदं मानवावासं, महामोहादिभिः सदा ।
अन्तरङ्गजनैर्व्याप्तमेतैः कलकलाकुलम् ॥७४॥
कथम् ?-"क्वचिदिष्टजनप्राप्तौ, तोषनिर्भरमानुषम् ।
क्वचिद्द्वेष्यजनासत्तेर्विमनीभूतदुर्जनम् ॥७५॥
क्वचिद्धनलवावाप्तिजनितानन्दसुन्दरम् ।
क्वचिद्द्रविणनाशोत्थबृहत्सन्तापतापितम् ॥७६॥
क्वचिद्दुर्लभसत्सूनुजन्मोद्भूतमहोत्सवम् ।
क्वचिदत्यन्तचित्तेष्टमरणाक्रन्दगुन्दलम् ॥७७॥
क्वचित्सुभटसङ्घातप्रारब्धरणभीषणम् ।
क्वचिन्मिलितसन्मित्रविमुक्तनयनोदकम् ॥७८॥
क्वचिद्दारिद्र्यदौर्भाग्यविविधव्याधिपीडितम् ।
क्वचिच्छब्दादिसम्भोगादलीकसुखनिर्भरम् ॥७९॥
क्वचित्सन्मार्गदूरस्थपापिष्ठजनपूरितम् ।
क्वचिच्च धर्मबुद्ध्यापि, विपरीतविचेष्टितम् ॥८०॥
किं चेह बहुनोक्तेन ?, चरितानि पुरा मया ।
यावन्ति वर्णितान्युच्चैर्महामोहादिभूभुजाम् ॥८१॥
तावन्ति वत्स ! दृश्यन्ते, सर्वाण्यत्र विशेषतः ।
सततं मानवावासे, कारणैरपरापरैः" ॥८२॥
तदिदं मानवावासं, किञ्चिल्लेशेन वर्णितम् ।
अधुना कथ्यते तुभ्यं, सत्पुरं विबुधालयम् ॥८३॥
"नाकरूपमिदं ज्ञेयं, सत्पुरं विबुधालयम् ।
सत्पारिजातमन्दारसन्तानकवनाकुलम् ॥८४॥

उल्लसद्भिश्च गन्धाढ्यैर्नमेरुहरिचन्दनैः ।
सदा विकसितै रम्यं, कह्लारकमलाकरैः ॥८५॥
पद्मरागमहानीलवज्रवैडूर्यराशिभिः ।
दिव्यहाटकसम्मिश्रैर्घटितानेकपाटकम् ॥८६॥
प्रेङ्खन्मणिप्रभाजालैः, सदा निर्नष्टतामसम् ।
विचित्ररत्नसङ्घातमयूखैः प्रविराजितम् ॥८७॥
दिव्यभूषणसद्गन्धमाल्यसम्भोगलालितम् ।
नित्यप्रमोदमुद्दामगीतनृत्यमनोहरम् ॥८८॥
नित्यं प्रमुदितैर्दिव्यैस्तेजोनिर्जितभास्करैः ।
लसत्कुण्डलकेयूरमौलिहारविराजितैः ॥८९॥
कलालिकुलझङ्कारहारिमन्दारदामभिः ।
अम्लानवनमालाभिर्नित्यमामोदिताशयैः ॥९०॥
रतिसागरमध्यस्थैः, प्रीणितेन्द्रियसुस्थितैः ।
सदेदमीदृशैर्लोकैः, पूरितं विबुधालयम्" ॥९१॥ षड्भिः कुलकम् ॥
यः पूर्वं वेदनीयाख्यनृपतेः पुरुषो मया ।
साताभिधानस्ते भद्र !, कथितस्तत्र मण्डपे ॥९२॥
स कर्मपरिणामेन, जनाह्लादविधायकः ।
विहितो निखिलस्यास्य, पुरस्य वरनायकः ॥९३॥ युग्मम् ॥
ततस्तेन लसद्भोगं, सतताह्लादसुन्दरम् ।
इदं हि वत्स ! निःशेषं, धार्यते विबुधालयम् ॥९४॥
प्रकर्षेणोदितं माम !, महामोहादिभूभुजाम् ।
किमत्र प्रसरो नास्ति ?, येनेदमतिसुन्दरम् ॥९५॥
विमर्शः प्राह मा मैवं, मन्येथास्त्वं कथञ्चन ।
प्रभवन्ति प्रकर्षेण, यतोऽत्रान्तरभूभुजः ॥९६॥
ईर्ष्याशोकभयक्रोधलोभमोहमदभ्रमैः ।
सतताकुलितं वत्स !, पुरं हि विबुधालयम् ॥९७॥
प्रकर्षः प्राह यद्येवं, ततोऽत्र ननु किं सुखम् ? ।
किं वेदं हृष्टचित्तेन, भवता चारु वर्णितम् ॥९८॥
ततस्तेनोदितं वत्स !, न सुखं परमार्थतः ।
नाप्यत्र सुन्दरं किञ्चित्तत्त्वतो विबुधालये ॥९९॥

केवलं मुग्धबुद्धीनां, विषयामिषवाञ्छिनाम् ।
अत्रास्था महती वत्स !, मयेदं तेन वर्णितम् ॥१००॥
इतरथा–महामोहनरेन्द्रस्य, परिवारसमायुजः ।
क्व राज्यम् ? क्व च लोकानां, सुखवार्तेति दुर्घटम् ॥१०१॥
तदिदं ते समासेन, कथितं विबुधालयम् ।
अधुना पशुसंस्थानं, कथ्यमानं निबोध मे ॥१०२॥
"बुभुक्षारतिसन्तापपिपासावेदनातुराः ।
दाहशोकभयोद्वेगबन्धताडनपीडिताः ॥१०३॥
सततं दुःखिता लोका, धार्यन्तेऽत्र पुरेऽखिलाः ।
महामोहादिभिर्वत्स !, दीनाः शरणवर्जिताः ॥१०४॥
धर्माधर्मविवेकेन, विकलाः कलुषात्मकाः ।
तिष्ठन्त्यनन्तजातीयाः, पुरेऽत्र पुरुषाः किल" ॥१०५॥
तदिदं पशुसंस्थानं, वर्णितं ते महापुरम् ।
इदानीं वर्ण्यते वत्स !, तदिदं पापिपञ्जरम् ॥१०६॥
येऽत्र लोका महापापप्राग्भारभरपूरिताः ।
वसन्ति तेषां दुःखस्य, नास्ति विच्छेदसम्भवः ॥१०७॥
योऽसौ ते वेदनीयाख्यनृपतेः पुरुषो मया ।
असातनामकः पूर्वं, वर्णितस्तत्र मण्डपे ॥१०८॥
तस्येदं भो ! महामोहराजेन निखिलं पुरम् ।
क्वचित्तोषितचित्तेन, भटभुक्त्या समर्पितम् ॥१०९॥
ततस्तेन पुरे सर्वे, परमाधार्मिनामकैः ।
अत्र लोकाः कदर्थ्यन्ते, पुरुषैः स्वनियोजितैः ॥११०॥
कथम् ?–"पाय्यन्ते तसताम्राणि, नीयन्ते क्षतचूर्णताम् ।
खाद्यन्ते निजमांसानि, दह्यन्ते तीव्रवह्निना ॥१११॥
शाल्मलीरभिरोह्यन्ते, वज्रकण्टकसङ्कुलाः ।
तार्यन्ते क्लेदबहुलां, वत्स ! वैतरणीं नदीम् ॥११२॥
छिद्यन्ते करुणाहीनैरसिपत्रवनेरितैः ।
कुन्ततोमरनाराचकरवालगदाशतैः ॥११३॥
पच्यन्ते कुम्भपाकेन, पाट्यन्ते क्रकचादिभिः ।
कलम्बवालुकापृष्ठे, भ्रज्ज्यन्ते चणका इव ॥११४॥

अन्यच्च-पाटकाः सन्ति सप्तात्र, तत्राद्ये पाटकत्रये ।
परमाधार्मिकैरित्थं, जन्यते दुःखपद्धतिः ॥११५॥
परस्परं च कुर्वन्ति, दुःखमेते निरन्तरम् ।
षट्सु पाटेषु भिद्यन्ते, सप्तमे वज्रकण्टकैः ॥११६॥
किञ्च-बुभुक्षया कदर्थ्यन्ते, प्रपीड्यन्ते पिपासया ।
काष्ठीभवन्ति शीतेन, वेदनावेगविह्वलाः ॥११७॥
क्षणेन द्रवतां यान्ति, क्षणेन स्थिररूपताम् ।
क्षणेन च विलीयन्ते, गृह्णन्ति च शरीरकम्" ॥११८॥
न शक्तः कोटिजिह्वोऽपि, दुःखं वर्णयितुं जनः ।
वसतामत्र लोकानां, यादृशं पापिपञ्जरे ॥११९॥
एकान्तदुःखगर्भार्थं, तदिदं पापिपञ्जरम् ।
कथितं ते समासेन, पुरं वत्स ! मयाऽधुना ॥१२०॥
तस्मादेतानि चत्वारि, विज्ञातानि यदि त्वया ।
पुराणि विदितं वत्स !, भवचक्रं ततोऽधुना ॥१२१॥
अत्रान्तरे-आकर्ण्य मातुलीयां तां, भारतीं भगिनीसुतः ।
अदादादरतो दृष्टिं, भवचक्रे समन्ततः ॥१२२॥
ततो निःशेषतो वीक्ष्य, तारविस्फारितेक्षणः ।
त्वरयोद्विग्नचेतस्को, निजगाद ससम्भ्रमः ॥१२३॥
कथम् ?-हा हा हा माम ! दृश्यन्ते, कष्टाः सप्त महेलिकाः ।
असुर्यो नगरेऽमुष्मिन्, दारुणाकारधारिकाः ॥१२४॥
आक्रान्ताशेषधामानः, कृष्णा बीभत्सदर्शनाः ।
वेताल्य इव नाम्नाऽपि, लोककम्पविधायिकाः ॥१२५॥
एताः काः किंप्रयुक्ता वा, किंवीर्याः किंपरिच्छदाः ।
चेष्टन्ते कस्य बाधायै ? तथैवंकृतनिश्चयाः ॥१२६॥
इदं मे सर्वमाख्यातं, यावदद्यापि नो त्वया ।
तावत्प्रतारणं मन्ये, भवचक्रस्य वर्णनम् ॥१२७॥
अतः समस्तं मामोऽदो, मह्यमाख्यातुमर्हति ।
विमर्शेनोदितं वत्स !, निबोध त्वं निवेद्यते ॥१२८॥

जरास्वरूपम् ।

जरा रुजा मृतिश्चेति, खलता च कुरूपता ।
दरिद्रता दुर्भगता, नामतोऽमूः प्रकीर्तिताः ॥१२९॥

तत्र-सा कालपरिणत्याख्या, भार्या या मूलभूपतेः ।
तया प्रयोजिता तावज्जरेयं भुवनोदरे ॥१३०॥
बाह्यान्यपि निमित्तानि, वर्णयन्तीह केचन ।
अस्याः प्रयोजकानीति, लवणाद्यानि मानवाः ॥१३१॥
वीर्यं पुनरदोऽमुष्या, यदाश्लेषेण देहिनाम् ।
हरत्यशेषसद्वर्णलावण्यं बलशालिनाम् ॥१३२॥
गाढाश्लेषात्पुनर्वत्स !, विपरीतमनस्कताम् ।
कुरुते शोच्यतां लोके, देहिनां वीर्यशालिनाम् ॥१३३॥
वलीपलितखालित्यपिप्लुव्यङ्गकुवर्णताः ।
कम्पकर्कशिकाशोकमोहशैथिल्यदीनताः ॥१३४॥
गतिभङ्गान्ध्यबाधिर्यदन्तवैकल्यरीणताः ।
जरापरिकरः प्रौढो, वायुरत्र बलाग्रणीः ॥१३५॥
अनेन परिवारेण, परिवारितविग्रहा ।
जरेयं विलसत्यत्र, मत्तावद्गन्धहस्तिनी ॥१३६॥
अधुना यस्य बाधायै, चेष्टते कृतनिश्चया ।
जरेयमेव तं वत्स !, विपक्षं ते निवेदये ॥१३७॥
तस्या एव महादेव्या, विद्यतेऽनुचरः परः ।
यौवनाख्यो महावीर्यश्चञ्चदुद्दामपौरुषः ॥१३८॥
स च योगी तदादेशात्प्रविश्याङ्गेषु देहिनाम् ।
तनोति बलमौर्जित्यं, बन्धुराकारधारिताम् ॥१३९॥
किञ्च-विलासहासबिब्बोकविपर्यासपराक्रमैः ।
वल्गनोत्प्लवनोल्लासलासधावनसम्मदैः ॥१४०॥
गर्वशौण्डीर्यषिङ्गत्वसाहसादिभिरुद्धतैः ।
युतः पदातिभिर्लोकैर्लीलया स विजृम्भते ॥१४१॥
तत्सम्बन्धादमी भोगसम्भोगसुखनिर्भरम् ।
आत्मानं मन्वते लोका, भवचक्रनिवासिनः ॥१४२॥
ततस्तं निजवीर्येण, यौवनाख्यमियं जरा ।
मृद्नाति सपरीवारं, क्रुद्धा कृत्येव साधकम् ॥१४३॥
ततस्ते जरसा वत्स !, जना मर्दितयौवनाः ।
परीता दुःखकोटीभिर्जायन्ते दीनविक्लवाः ॥१४४॥

स्वभार्ययाऽप्यवज्ञाताः, परिवारावधीरिताः ।
उत्प्रास्यमानाः स्वापत्यैस्तरुणीभिस्तिरस्कृताः ॥१४५॥
स्मरन्तः पूर्वभुक्तानि, कासमाना मुहुर्मुहुः ।
श्लेष्माणमुद्गिरन्तश्च, लुठन्तो जीर्णमञ्चके ॥१४६॥
परतप्तिपराः प्रायः, क्रुध्यन्तश्च पदे पदे ।
आक्रान्ता जरया वत्स !, केवलं शेरते जनाः ॥१४७॥ त्रिभिर्विशेषकम् ॥
एषा जरा समासेन, लोकपीडनतत्परा ।
वर्णिता तेऽधुना वक्ष्ये, रुजां वैवस्वतीं भुजाम् ॥१४८॥

रुजास्वरूपम् ।

यो वेदनीयनृपतेरसाताख्यो वयस्यकः ।
वर्णितस्तत्प्रयुक्तेयं, रुजा तेन दुरात्मना ॥१४९॥
वर्णयन्ति निमित्तानि, बहिर्भूतानि सूरयः ।
अस्याः प्रयोजकान्युच्चैर्नानाकाराणि शास्त्रतः ॥१५०॥
धीधृतिस्मृतिविभ्रंशः, सम्प्राप्तिः कालकर्मणाम् ।
असात्म्यार्थागमश्चेति, रुजाहेतुरयं गणः ॥१५१॥
वातपित्तकफानां च, यद्यत्सङ्क्षोभकारणम् ।
रजस्तमस्करं चेति, तत्तदस्याः प्रयोजकम् ॥१५२॥
किं तु–बाह्यान्यपि निमित्तानि, स एव परमार्थतः ।
असाताख्यः प्रयुङ्क्तेऽतः, स एव परकारणम् ॥१५३॥
प्रविष्टेयं शरीरेषु, योगित्वेन शरीरिणाम् ।
स्वास्थ्यं निहत्य वीर्येण, करोत्यातुरतां पराम् ॥१५४॥
ज्वरातिसारकुष्ठार्शःप्रमेहप्लीहधूमकाः ।
अम्लकग्रहणीशूलहिक्काश्वासक्षयभ्रमाः ॥१५५॥
गुल्महृद्रोगसंमोहहृल्लासानाहकम्पकाः ।
कण्डूकोष्ठारुचीशोफभगन्दरगलामयाः ॥१५६॥
पामाजलोदरोन्मादशोषवीसर्पछर्दयः ।
नेत्ररोगशिरोरोगविद्रधिप्रमुखा भटाः ॥१५७॥
सर्वेऽप्यस्याः परीवारः, स्वात्मभूतो महाबलः ।
यत्प्रभावादियं वत्स !, रुजा जेतुं न पार्यते ॥१५८॥ चतुर्भिः कलापकम् ॥

अस्ति नीरोगता नाम, वेदनीयाख्यभूपतेः ।
पदातिनेह सातेन, प्रयुक्ता भवचक्रके ॥१५९॥
सा वर्णबलसौन्दर्यधीधृतिस्मृतिपाटवैः ।
परीता कुरुते लोकं, सुखसन्दर्भनिर्भरम् ॥१६०॥
तां चैषा दारुणा हत्वा, क्षणान्नीरोगतां रुजा ।
प्रवर्तयति लोकानां, तीव्रार्तिं तनुचित्तयोः ॥१६१॥
तेनेयं तद्विघाताय, रुजेत्थं वत्स ! वल्गते ।
एतदाक्रान्तमूर्तीनां, चेष्टाऽऽख्यातुं न पार्यते ॥१६२॥
तथाहि-कूजन्ति करुणध्वानैः, क्रन्दन्ति विकृतस्वराः ।
रुदन्ति दीर्घपूत्कारैरारटन्ति सविह्वलाः ॥१६३॥
गाढं दीनानि जल्पन्ति, रुण्टन्ति च मुहुर्मुहुः ।
लुठन्तीतस्ततो मूढाश्चेतयन्ते न किञ्चन ॥१६४॥
नित्यमार्ताः सदोद्विग्ना, विक्लवास्त्राणवर्जिताः ।
भयोद्भ्रान्तधियो दीना, नरकेष्विव नारकाः ॥१६५॥
भवन्ति भवचक्रेऽत्र, सत्त्वाः पापिष्ठयाऽनया ।
हत्वा नीरोगतां वत्स !, रुजया परिपीडिताः ॥१६६॥
तदेषा लेशतो वत्स !, रुजा ते गदिता मया ।
मृतिर्मर्दितविश्वेयं, साम्प्रतं ते निवेद्यते ॥१६७॥

मृतिस्वरूपम् ।

योऽसौ ते दर्शितः पूर्वमायुर्नामा महीपतिः ।
चतुर्नरपरीवारस्तत्क्षयोऽस्याः प्रयोजकः ॥१६८॥
प्रयुज्यते विचित्रैश्च, बहिर्हेतुशतैरियम् ।
विषाग्निशस्त्रपानीयगिरिपातातिसाध्वसैः ॥१६९॥
बुभुक्षाव्याधिदुर्व्यालपिपासोष्णहिमश्रमैः ।
वेदनाहारदुर्ध्यानपराघातारतिभ्रमैः ॥१७०॥
प्राणापानोपरोधाद्यैः, किं तु तैरप्युदीरिता ।
तमेवायुःक्षयं प्राप्य, मृतिरेषा विवल्गते ॥१७१॥
वीर्यं पुनरदोऽमुष्या, यदियं देहिनां क्षणात् ।
हरत्युच्छ्वासनिःश्वासं, चेष्टां भाषां सचेतनाम् ॥१७२॥

विधत्ते रक्तनिर्नाशं, वैकृत्यं काष्ठभूतताम् ।
दौर्गन्ध्यं च क्षणादूर्ध्वं, स्वपनं दीर्घनिद्रया ॥१७३॥
परिवारस्तु नास्त्यस्या, न चेयं तमपेक्षते ।
इयं हि तीव्रवीर्येण, सदैका किंमनुष्यिका ॥१७४॥
यतोऽस्या नाममात्रेण, भुवनं सचराचरम् ।
सनरेन्द्रं सदेवेन्द्रं, कम्पते त्रस्तमानसम् ॥१७५॥
सद्वीर्यबलभाजोऽपि, प्रभवोऽपि जगत्त्रये ।
आसन्नामपि मत्वैनां, भवन्ति भयकातराः ॥१७६॥
अतः परिच्छदेनास्यास्तात ! किं वा प्रयोजनम् ? ।
एकिकापि करोत्येषा, दूरे यच्छ्रूयतेऽद्भुतम् ॥१७७॥
अत एव सदैश्वर्यादियमुद्दामचारिणी ।
किञ्चिन्नापेक्षते वत्स !, विचरन्ती यथेच्छया ॥१७८॥
ईश्वरेषु दरिद्रेषु, वृद्धेषु तरुणेषु च ।
दुर्बलेषु बलिष्ठेषु, धीरेषु करुणेषु च ॥१७९॥
आपद्गतेषु हृष्टेषु, वैरभाजिषु बन्धुषु ।
तापसेषु गृहस्थेषु, समेषु विषमेषु च ॥१८०॥
किञ्चात्र बहुनोक्तेन ?, सर्वावस्थागतेष्वियम् ।
प्रभवत्येव लोकेषु, भवचक्रनिवासिषु ॥१८१॥
अस्त्यङ्गभूता सद्भार्या, जीविका नाम विश्रुता ।
तस्यायुर्नामनृपतेर्लोकाह्लादनतत्परा ॥१८२॥
तद्बलादवतिष्ठन्ते, निजस्थानेष्वमी जनाः ।
अतो हितकरत्वेन, सा सर्वजनवल्लभा ॥१८३॥
अतस्तां जीविकां हत्वा, मृतिरेषा सुदारुणा ।
लोकं स्वस्थानतोऽन्यत्र, प्रेषयत्येव लीलया ॥१८४॥
प्रहिताश्च तथा यान्ति, दृश्यन्ते न यथा पुनः ।
नीयन्ते च तथा केचिद्यथाऽसौ रिपुकम्पनः ॥१८५॥
व्रजन्तश्च धनं गेहं, बन्धुवर्गं परिच्छदम् ।
सर्वं विमुच्य गच्छन्ति, मृत्यादेशेन ते जनाः ॥१८६॥
एकाकिनः कृतोद्योगाः, सुकृतेतरशम्बलाः ।
दीर्घं मार्गं प्रपद्यन्ते, सुखदुःखसमाकुलम् ॥१८७॥

तन्निजास्तु तथा कृत्वा, रोदनाक्रन्दगुन्दलम् ।
लगन्ति स्वीयकृत्येषु, खादन्ति च पिबन्ति च ॥१८८॥
विभजन्ते धनं भोगैर्युध्यन्ते च तदर्थिनः ।
सारमेया इवासाद्य, किञ्चिदामिषखण्डकम् ॥१८९॥
तदर्थं तु कृताघौघास्ते जना दुःखकोटिभिः ।
केवलाः परिपीड्यन्ते, मृत्यादिष्टा बहिर्गताः ॥१९०॥
एवं च स्थिते-निवेदिता मृतिर्वत्स !, नानाकारेषु धामसु ।
सञ्चार्यते यया लोको, भवचक्रे मुहुर्मुहुः ॥१९१॥
अधुना वर्ण्यमानेयं, खलताऽप्यवधार्यताम् ।
एतत्स्वरूपविज्ञाने, यद्यस्ति तव कौतुकम् ॥१९२॥

खलतास्वरूपम् ।

अस्ति पापोदयो नाम, सेनानीर्मूलभूपतेः ।
प्रयुक्ता तात ! तेनैषा, खलता भवचक्रके ॥१९३॥
बहिर्निमित्तमप्यस्याः, किल दुर्जनसङ्गमः ।
केवलं तत्त्वतः सोऽपि, पापोदयनिमित्तकः ॥१९४॥
वीर्यमस्याः शरीरेषु, वर्तमानेयमुच्चकैः ।
कुरुते देहिनां दुष्टं, मनः पापपरायणम् ॥१९५॥
शाठ्यपैशुन्यदौःशील्यवैभाष्यगुरुविप्लवाः ।
मित्रद्रोहकृतघ्नत्वनैर्लज्ज्यमदमत्सराः ॥१९६॥
मर्मोद्घट्टनवैयात्ये, परपीडननिश्चयाः ।
ईर्ष्यादयश्च विज्ञेयाः, खलतापरिचारिकाः ॥१९७॥ युग्मम् ॥
अस्ति पुण्योदयो नाम, द्वितीयो मूलभूपतेः ।
सेनानीस्तत्प्रयुक्तोऽस्ति, सौजन्याख्यो नरोत्तमः ॥१९८॥
स वीर्यधैर्यगाम्भीर्यप्रश्रयस्थैर्यपेशलैः ।
परोपकारदाक्षिण्यकृतज्ञत्वार्जवादिभिः ॥१९९॥
युतः पदातिभिस्तात !, जनं बन्धुरमानसम् ।
कुर्वाणो निजवीर्येण, सत्सुधाक्षोदपेशलम् ॥२००॥
सद्धर्मलोकमर्यादां, सदाचारं सुमित्रताम् ।
घटयंश्चातुलां लोके, सद्विश्रम्भसुखासिकाम् ॥२०१॥

जनयत्येव केषाञ्चिद्भवचक्रेऽपि देहिनाम् ।
निर्मिथ्यं चारुताबुद्धिं, गाढं सौन्दर्ययोगतः ॥२०२॥
तस्येयं खलता तात !, नितरां परिपन्थिनी ।
यतः सोऽमृतमेषा तु, कालकूटविषाधिका ॥२०३॥
अतो निहत्य तं वीर्यादियं पापिष्ठमानसा ।
एवं विवर्तते वत्स !, पुरेऽत्र सपरिच्छदा ॥२०४॥
एनया हतसौजन्याश्चेष्टन्ते यादृशं जनाः ।
तदुक्त्याऽलं तथापीषद्भणित्वा तव कथ्यते ॥२०५॥
चर्चितानेकदुर्मायाः, परवञ्चनतत्पराः ।
निष्पिष्टा द्वेषयन्त्रेण, मुक्तस्नेहाः खलाः स्फुटाः ॥२०६॥
अगृह्यमाणाः सत्कृत्यैर्भषन्तः संस्तुतेष्वपि ।
खादन्तो निजवर्गांश्च, ते खला मण्डलाधिका ॥२०७॥
उत्पादयन्तश्छिद्राणि, पातयन्तः स्थिरामपि ।
कार्ये त्रिपिटिकां कुर्युरुद्वेगं ते खलाः खलु ॥२०८॥
चित्तेन चिन्तयन्त्यन्यदन्यज्जल्पन्ति भाषया ।
क्रिययाऽन्यत्र चेष्टन्ते, ते खलाः खलताहताः ॥२०९॥
क्वचिदुष्णाः क्वचिच्छीताः, क्वचिन्मध्यमतां गताः ।
नैकरूपा भवन्त्येते, सान्निपाता इव ज्वराः ॥२१०॥
किञ्च-तवानुरोधतो वत्स !, कथाप्येषा मया कृता ।
स्वयं त्वमीषां नामापि, नाहमाख्यातुमुत्सहे ॥२११॥

कुरूपतास्वरूपम् ।

तदेषा खलता तात !, लेशतो गदिता मया ।
निबोध साम्प्रतं वत्स !, वर्ण्यमानां कुरूपताम् ॥२१२॥
योऽसौ ते पूर्वमाख्यातो, नामनामा महीपतिः ।
स दौष्ट्येन युनक्त्येनां, भवचक्रे कुरूपताम् ॥२१३॥
बाहुविध्यं दधत्युच्चैर्बहिरङ्गानि भावतः ।
तस्यैवादेशकारीणि, यान्यस्याः कारणानि भोः ! ॥२१४॥
तथाहि-दुष्टाहारविहाराद्यैः, प्रकुप्यन्तः कफादयः ।
भूयांसो देहिनां देहे, जनयन्ति कुरूपताम् ॥२१५॥

वीर्यं पुनरदोऽमुष्या, यदेषा देहवर्तिनी ।
सदा हि कुरुते रूपं, दृष्टेरुद्वेगकारणम् ॥२१६॥
खञ्जताकुण्टताकाण्यवामनत्वविवर्णताः ।
कुब्जत्वान्धत्ववाडव्यहीनाङ्गत्वादि(ति)दीर्घताः ॥२१७॥
इत्याद्याः परिवारेऽस्या, वर्तन्ते वत्स ! दुर्जनाः ।
यत्सम्पर्कादियं हृष्टा, विलसत्यतिलीलया ॥२१८॥
अस्ति प्रयुक्ता तेनैव, नामनाम्ना सुरूपता ।
सुप्रसन्नेन तन्मूलबहिरङ्गनिमित्तजा ॥२१९॥
तथाहि-शुभाहारविहाराद्यैः, प्रसीदन्तः कफादयः ।
हेतवो देहिनां देहे, जनयन्ति सुरूपताम् ॥२२०॥
सा जनं भवचक्रेऽत्र, दृष्टेराह्लादकारणम् ।
प्रसन्नवर्णं पद्माक्षं, सुविभक्ताङ्गभूषणम् ॥२२१॥
गजेन्द्रगामिनं रम्यं, सुराकारानुकारिणम् ।
करोति निजवीर्येण, लोकमोदनकारिणी ॥२२२॥
तस्या विपक्षभूतेयं, प्रकृत्यैव कुरूपता ।
तां हत्वाऽऽविर्भवत्येषा, देहिदेहेषु योगिनी ॥२२३॥
ततः सुरूपताहीनाः, प्रादुर्भूतकुरूपताः ।
भवन्ति ते जना वत्स !, दृष्टेरुद्वेगकारिणः ॥२२४॥
अनादेयाः स्वहीनत्वशङ्किता हास्यभूमयः ।
भवन्ति क्रीडनस्थानं, बालानां रूपगर्विणाम् ॥२२५॥
निर्गुणाश्च भवन्त्येते, प्रायशो वामनादयः ।
आकृतौ च वसन्त्येते, प्रकृत्या निर्मला गुणाः ॥२२६॥
विडम्बनकरी लोके, तदियं ते कुरूपता ।
निरूपिताऽधुना । वत्स !, कथयामि दरिद्रताम् ॥२२७॥

दरिद्रतास्वरूपम् ।

प्रयुक्ता तावदेषाऽपि, वत्स ! तेनैव पापिना ।
अन्तरायं पुरस्कृत्य, पापोदयचमूभृता ॥२२८॥
प्रयुञ्जते पुनर्लोके, हेतवो ये बहिर्गताः ।
एतां दरिद्रतां तात !, तानहं ते निवेदये ॥२२९॥

जलज्वलनलुण्टाकराजदायादतस्कराः ।
मद्यद्यूतादिभोगित्ववेश्याव्यसनदुर्नयाः ॥२३०॥
ये चान्ये कुर्वते केचिद्धनहानिं वयस्यिकाम् ।
अस्यास्ते हेतवः सर्वे, वत्स ! ज्ञेयाः प्रयोजकाः ॥२३१॥ युग्मम् ॥
केवलं तत्त्वतस्तेऽपि, सान्तरायं चमूभृतम् ।
पापोदयाख्यं कुर्वन्ति, प्रह्वमस्याः प्रयोजकम् ॥२३२॥
दुराशापाशसंमूढं, धनगन्धविवर्जितम् ।
वीर्येण कुरुते लोकमेषा तात ! दरिद्रता ॥२३३॥
दैन्यं परिभवो मौढ्यं, प्रायशो बह्वपत्यता ।
हृदयन्यूनता याञ्चा, लाभाभावो दुरिच्छता ॥२३४॥
बुभुक्षारतिसन्तापाः, कुटुम्बपरिदेवनम् ।
अस्या इत्यादयो वत्स !, भवन्ति परिचारकाः ॥२३५॥ युग्मम् ॥
अस्ति पुण्योदयाख्येन, प्रयुक्तः पृथिवीतले ।
जनाह्लादकरोऽत्यन्तमैश्वर्याख्यो नरोत्तमः ॥२३६॥
स सौष्ठवमहोत्सेकहृदयोन्नतिगौरवैः ।
जनवाल्लभ्यलालित्यमहेच्छादिविवेष्टितः ॥२३७॥
सुभूरिधनसम्भारपूरितं जनताधिकम् ।
करोति सुखितं मान्यं, लोकमुद्दामलीलया ॥२३८॥
इयं हि चेष्टते तात !, परिवारसमेयुषी ।
तदुद्दलनचातुर्यमाबिभ्राणा दरिद्रता ॥२३९॥
न तेन सार्धमेतस्याः, सहावस्थानमीक्ष्यते ।
एतत्त्रासादसौ वत्स !, दूरतः प्रपलायते ॥२४०॥
ततोऽनया हतैश्वर्यास्ते जना दुःखपीडिताः ।
गाढं विह्वलतां यान्ति, विधुरीभूतमानसाः ॥२४१॥
दुराशापाशबद्धत्वाद्भूयो धनलवेच्छया ।
नानोपायेषु वर्तन्ते, ताम्यन्ति च दिवानिशम् ॥२४२॥
ते च पापोदयेनैषामुपाया बहवोऽप्यलम् ।
प्रबलेन विपाट्यन्ते, खे घना इव वायुना ॥२४३॥
ततो रुण्टन्त्यमी मूढाः, खिद्यन्ते मनसाऽधिकम् ।
शोचन्ति पुरतोऽन्येषां, वाञ्छन्ति परसम्पदः ॥२४४॥

कुतो घृतं कुतस्तैलं, कुतो धान्यं क्व चेन्धनम् ? ।
कुटुम्बचिन्तया दग्धा, इति रात्रौ न शेरते ॥२४५॥
कुर्वन्ति निन्द्यकर्माणि, धर्मकर्मपराङ्मुखाः ।
व्रजन्ति शोच्यतां लोके, लघीयांसस्तृणादपि ॥२४६॥
परप्रेष्यकरा दीनाः, क्षुत्क्षामा मलपूरिताः ।
भूरिदुःखशतैर्ग्रस्ताः, प्रत्यक्षा इव नारकाः ॥२४७॥
भवन्ति ते जनास्तात !, येषामेषा दरिद्रता ।
ऐश्वर्याख्यं निहन्त्युच्चैः, करोत्यालिङ्गनं मुदा ॥२४८॥

दुर्भगतास्वरूपम् ।

तदेवमीरिता तात !, तुभ्यमेषा दरिद्रता ।
इयं दुर्भगतेदानीं, गद्यमाना निशम्यताम् ॥२४९॥
रुष्टेन भवचक्रेऽत्र, केषाञ्चिद्देहिनामलम् ।
प्रयुक्तेयं विशालाक्षी, तेन नाममहीभुजा ॥२५०॥
बहिरङ्गं भवेदस्यास्तात ! चित्रं प्रयोजकम् ।
वैरूप्यदुःस्वभावत्वदुष्कर्मवचनादिकम् ॥२५१॥
तत्तु नैकान्तिकं ज्ञेयं, स एव परमार्थतः ।
हेतुरैकान्तिकोऽमुष्या, नामनामा महीपतिः ॥२५२॥
वीर्यं तु वर्णयन्त्यस्या, ज्ञाततत्त्वा मनीषिणः ।
अवल्लभमतिद्वेष्यं, यदेषा कुरुते जनम् ॥२५३॥
दीनताभिभवो लज्जा, चित्तदुःखासिकाऽतुला ।
न्यूनता लघुता वेषविज्ञानफलहीनता ॥२५४॥
इत्याद्याः परिवारेऽस्या, भवन्ति बहवो जनाः ।
पुरेऽत्र यद्बलादेषा, बम्भ्रमीति बलोद्धुरा ॥२५५॥
अस्ति प्रयुक्ता तेनैव, सुप्रसन्नेन देहिनाम् ।
नाम्ना सुभगता नाम्ना, प्रख्याता जनमोदिनी ॥२५६॥
सा सौष्ठवमनस्तोषगर्वगौरवसम्मदैः ।
आयत्यपरिभूताद्यैः, परिवारितविग्रहा ॥२५७॥
व्रजन्ती भवचक्रेऽत्र, जनमानन्दनिर्भरम् ।
करोति सुखितं मान्यं, निःशेषजनवल्लभम् ॥२५८॥

तस्याश्च प्रतिपक्षत्वादियं दुर्भगताऽधमा ।
उन्मूलनकरी तात !, करिणीव लताततेः ॥२५९॥
अतः सोन्मूलिता येषामेनया हितकारिणी ।
ते प्रकृत्यैव जायन्ते, जनानां गाढमप्रियाः ॥२६०॥
स्वभर्त्रेऽपि न रोचन्ते, परेभ्यो नितरां पुनः ।
बन्धुभ्योऽपि न भासन्ते, जना दुर्भगताहताः ॥२६१॥
गम्यत्वात्ते सपत्नानां, वल्लभानामवल्लभाः ।
नयन्ति क्लेशतः कालमात्मनिन्दापरायणाः ॥२६२॥
तदेषाऽपि समासेन, वत्स ! दुर्भगता मया ।
तुभ्यं निगदिता याऽसावुद्दिष्टा सप्तमी पुरा ॥२६३॥
एवं च स्थिते-जरा रुजा मृतिश्चेति, खलता च कुरूपता ।
दरिद्रता दुर्भगता, उद्दिष्टाः क्रमशो यथा ॥२६४॥
एता या यत्प्रयुक्ता वा, यद्वीर्या यत्परिच्छदाः ।
चेष्टन्ते यस्य बाधायै, निर्दिष्टाः क्रमशस्तथा ॥२६५॥ युग्मम् ॥
एताश्चैवं विवल्गन्ते, विपक्षक्षयमुच्चकैः ।
कुर्वाणा भवचक्रेऽत्र, लोकपीडनतत्पराः ॥२६६॥
प्रकर्षेणोदितं माम !, किमासां विनिवारकाः ।
लोकपाला न विद्यन्ते, नगरेऽत्र नृपादयः ? ॥२६७॥
विमर्शेनोदितं वत्स !, नैताः शक्या नृपादिभिः ।
निवारयितुमित्यत्र, कारणं ते निवेदये ॥२६८॥
ये केचिद्वीर्यभूयिष्ठाः, प्रभवो भुवनोदरे ।
तेष्वपि प्रभवन्त्येताः, सर्वेषु प्रसभं मुदा ॥२६९॥
सर्वत्र विचरन्तीनामासामुद्दामलीलया ।
गजानामिव मत्तानां, नास्ति मल्लो जगत्त्रये ॥२७०॥
स्वप्रयोजनवीर्येण, विलसन्तीर्निरङ्कुशं ।
को नाम भुवने साक्षादेताः स्खलयितुं क्षमः ? ॥२७१॥

निश्चयव्यवहारौ ।

प्रकर्षेणोक्तं-माम ! तत्किं पुरुषेण न यतितव्यमेवामूषां निराकरणे ? विमर्शेनोक्तं-वत्स ! निश्चयतो निराकरणे न यतितव्यमेव, यतो न शक्यत एवा-वश्यंभाविनीनामासां निराकरणं कर्तुं, विमृश्यकारी च पुरुषः कथमशक्येऽर्थे

प्रवर्तते ? न हि कर्मपरिणामकालपरिणतिस्वभावलोकस्थितिभवितव्यतादिसम्पूर्ण-कारणसामग्रीबलप्रवर्तितानामवश्यमाविर्भवन्तीनाममूषामन्येषां वा कार्यविशेषाणां निराकरणे यतमानः पुरुषः प्रयासादृते कञ्चिदर्थं पुष्णाति । प्रकर्षः प्राह-माम ! पूर्वं भवता प्रत्येकमासां जरारुजादीनामपराण्येवान्तरङ्गबहिरङ्गाणि प्रवर्तकानि निर्दिष्टानि तत्कथमिदानीं कर्मपरिणामादीनि प्रवर्तकत्वेनोच्यन्ते ? विमर्शेनोक्तं-तानि विशेषकारणानीतिकृत्वा प्राधान्येनोक्तानि, परमार्थतस्तु यथानिर्दिष्टकर्म-परिणामादिकारणकलापव्यापारमन्तरेण न नयननिमेषोन्मेषमात्रमपि कार्यजातं किञ्चिज्जगति जायते । प्रकर्षः प्राह-माम ! यद्येवं ततः पुरुषेण किमात्मनो निजवर्गीणस्य वाऽमूरभ्यर्णवर्तिनीरापतन्तीरुपलक्ष्य न कर्तव्य एव कश्चिदासां निवारणोपायः ? किं नान्वेषणीया एव वैद्यौषधमन्त्रतन्त्ररसायनचतुर्विधदण्ड-नीत्यादयः समुपस्थितजरारुजामृत्यादिनिर्घातनोपायाः ? किं सर्वथा पादप्रसारिकैवात्र श्रेयस्करी ? किमकिञ्चित्कर एव पुरुषो हेयोपादेयहानोपादाने ? ननु प्रत्यक्ष-विरुद्धमिदं, यतः प्रवर्तन्त एव पुरुषा हिताहितयोरवाप्तिनिराकरणकामतया, प्रवृत्ताश्चोपायेन प्राप्नुवन्ति हितमर्थं, निराकुर्वन्ति चोपस्थितमप्युपायत एवाहितमिति । विमर्शेनोक्तं-वत्स ! विश्रब्धो भव, मोत्तालतां यासीः, परामृश वचनैदम्पर्यं, निश्चयतो हि मयोक्तं यथा-मा प्रवर्तिष्ट पुरुषः, व्यवहारतस्तु तत्प्रवृत्तिं को वारयति ? **पुरुषेण हि सर्वत्र पुरुषापराधमलः सदनुष्ठाननिर्मलजलेन क्षालनीयः**, तदर्थं हि तत्प्रवृत्तिः यतो नाकलयत्यसौ तदा भाविकार्यपरिणामं, ततो व्यवहारतः सर्वहेयोपादेयहानोपादानसाधनं समाचरत्येव । किञ्च-चिन्तितं चानेन, यदुताहं न प्रवर्ते तथाप्यसावप्रवर्तमानो नासितुं लभते, यतः कर्मपरिणामादिकारणसामग्र्या वेतालाविष्ट इव हठात्प्रवर्तत एव, न चाकिञ्चित्करः पुरुषः, किं तर्हि ? स एव प्रधानः, तदुपकरणत्वात्कर्मपरिणामादीनां, न च पादप्रसारिता[१] श्रेयस्करी, व्यवहारतः पुरुषप्रवृत्तेर्हिताहितनिर्वर्तनापवर्तनक्षमत्वात्, निश्चयतस्तु निःशेषकारण-कलापपरिणामसाध्यत्वात् कार्याणां, अन्यथा पूर्वमाकलिते पुरुषेण वैपरीत्येन तु परिणते पश्चात्प्रयोजने न विधेयौ हर्षविषादौ समालम्बनीयो निश्चयाभिप्रायो यथेत्थमेवानेन विधातव्यमितिभावनया विधेयो मध्यस्थभावः, न चैतच्चिन्तनीयं-यद्येवमहमकरिष्यं ततो नेत्थमभविष्यदिति, यतस्तथाऽवश्यंभाविनः कार्यस्य कुतोऽन्यथाकरणम् ? नियता हि निश्चयाकूतेन नियतकारणसामग्रीजन्या च सकल-कालं तथैवानन्तकेवलिज्ञानगोचरीभूता च समस्ताऽपि जगति बहिरङ्गान्तरङ्गकार्य-

१. ०रिका प्र. ।

पर्यायमाला, सा यया परिपाट्या व्यवस्थिता यैश्च कारणैराविर्भावनीया तयैव परिपाट्या तान्येव च कारणान्यासाद्याविर्भवति, कुतस्तस्यामन्यथाभावः ? अतोऽतीतचिन्ता मोहविलसितमेव । व्यवहारतोऽपि हितावाप्तयेऽहितनिषेधाय च प्रवर्तमानेन पुरुषेण सुपर्यालोचितकारिणा नानैकान्तिकानात्यन्तिके तत्साधने भेषजमन्त्रतन्त्ररसायनदण्डनीत्यादौ महानादरो विधेयः, अपि त्वैकान्तिकात्यन्तिकं तत्साधनमन्वेषणीयं, सर्वथा तदनुष्ठानोपायेन[१] तत्र यातव्यं यत्रैते जरारुजादयः सर्वेऽप्युपद्रवा न प्रभवन्ति ।

मुक्तिस्वरूपम् ।

प्रकर्षः प्राह–माम ! कुत्र पुनरेते न प्रभवन्ति ? विमर्शेनोक्तम्–

अस्ति सन्नगरी रम्या, निर्वृतिर्नाम विश्रुता ।
अनन्तानन्दसन्दोहपरिपूर्णा निरत्यया ॥१॥
तस्यां न प्रभवन्त्येव, संस्थितानामुपद्रवाः ।
जरारुजाद्याः सा यस्मात्सर्वोपद्रववर्जिता ॥२॥
तस्यां च गन्तुकामेन, सेव्याः सद्वीर्यवृद्धये ।
पुरुषेण सदा तत्त्वबोधश्रद्धानसत्क्रियाः ॥३॥
ततो विवृद्धवीर्याणां, तस्या मार्गेऽपि तिष्ठताम् ।
तनूभवन्ति दुःखानि, वर्धते सुखपद्धतिः ॥४॥
इदं तु नगरं भद्र !, भवचक्रं चतुर्विधम् ।
सदैवामुक्तमेताभिस्तथाऽन्यैर्भूर्युपद्रवैः ॥५॥
को वात्र गणयेत्तात !, क्षुद्रोपद्रवकारिणाम् ।
पुरे सङ्ख्यानमप्येषां, स्वस्थानमिदमीदृशम् ॥६॥
प्रकर्षः प्राह मामेदं, नगरं ननु सर्वथा ।
एवं कथयतो दुःखबहुलं कथितं त्वया ॥७॥
साधु साधूदितं वत्स !, बुद्धं वत्सेन भाषितम् ।
विज्ञातं भवचक्रस्य, सारमित्याह मातुलः ॥८॥
प्रकर्षः प्राह यद्येवं, ततोऽत्र नगरे जनाः ।
वसन्तः किं सुनिर्विण्णाः, किं वा नेति निवेद्यताम् ॥९॥
विमर्शेनोदितं वत्स !, निर्वेदो नास्ति देहिनाम् ।
अत्रापि वसतां नित्यं, तत्राकर्णय कारणम् ॥१०॥

१. तदनु० प्र० ।

भवानिर्वेदः ।

य एते कथितास्तुभ्यं, महामोहादिभूभुजः ।
अन्तरङ्गाः स्ववीर्येण, वशीकृतजगत्त्रयाः ॥११॥
एतेषां कौशलं किञ्चिदपूर्वं जनमोहने ।
विद्यते तद्वशेनैते, निर्विद्यन्ते न नागराः ॥१२॥
एते हि चरटप्राया, दुःखदाः शत्रवोऽतुलाः ।
महामोहादयो वत्स !, भवचक्रनिवासिनाम् ॥१३॥
तथापि प्रतिभासन्ते, तेषां मोहितचेतसाम् ।
यथैते सुहृदोऽस्माकं, वत्सलाः सुखहेतवः ॥१४॥
इदं च नगरं वत्स !, दुःखसङ्घातपूरितम् ।
तथाप्यत्र स्थिता लोका, मन्यन्ते सुखसागरम् ॥१५॥
निश्चिन्ता निर्गमोपाये, वसनेनात्र मोदिताः ।
निवसन्ति सदा तुष्टा, महामोहादिबान्धवैः ॥१६॥
योऽपि निर्गमनोपायं, भवचक्रात्प्रभाषते ।
तस्याप्येतेऽपि रुष्यन्ति, यथैष सुखवञ्चकः ॥१७॥
तच्च तच्च प्रकुर्वन्ति, महायत्नेन सर्वथा ।
येनात्रैव भवत्येषां, वासः पापेन कर्मणा ॥१८॥
तदेवं निजवीर्येण, महामोहादिशत्रुभिः ।
क्रोडीकृता न जानन्ति, किञ्चिदेते तपस्विनः ॥१९॥
शब्दादिसुखसम्भोगं, तुच्छं दुःखात्मकं सदा ।
एते मनसि मन्यन्ते, यथेदममृतोपमम् ॥२०॥
ततोऽमी यावदेतेषां, प्रभवो वत्स ! भूभुजः ।
भवचक्रे न निर्विण्णास्तावल्लोकाः कदाचन ॥२१॥
प्रकर्षः प्राह यद्येवं, ततोऽमीषां दुरात्मनाम् ।
सदोन्मत्तकतुल्यानां, किमस्माकं विचिन्तया ? ॥२२॥
केवलं माम ! सर्वेषां, महामोहादिभूभुजाम् ।
दर्शितं भवचक्रेऽत्र, मम वीर्यं त्वया स्फुटम् ॥२३॥

मिथ्यात्ववर्णनम् ।

यस्त्वसौ वर्णितः पूर्वं, महामोहमहत्तमः ।
वष्टः कुदृष्टिपत्नीको, मिथ्यादर्शननामकः ॥२४॥

तेन यद्भवचक्रेऽत्र, स्ववीर्येण विजृम्भितम् ।
तन्मेऽद्यापि त्वयाऽऽख्यातं, नापि संदर्शितं मम ॥२५॥
ततोऽहं द्रष्टुमिच्छामि, श्रोतुं च गुणरूपतः ।
तद्वशीभूतलोकानां, चरितं माम ! साम्प्रतम् ॥२६॥
विमर्शः प्राह नगरं, समस्तमिदमञ्जसा ।
प्रायेण वर्तते तस्य, वशे नास्त्यत्र संशयः ॥२७॥
तथाहि-यदिदं वर्णितं तेऽत्र, मया पुरचतुष्टयम् ।
तत्र सर्वत्र विद्यन्ते, लोकास्तद्वशवर्तिनः ॥२८॥
तथापि ये विशेषेण, तस्याज्ञाकारिणो जनाः ।
तेषां स्थानानि ते भद्र !, दर्शयामि परिस्फुटम् ॥२९॥
ततश्चोर्ध्वं विशेषेण, कृत्वाऽसौ दक्षिणं करम् ।
तर्जन्या दर्शयत्येवं, तानि स्थानानि यत्नतः ॥३०॥
अमूनि मानवावासे, दृश्यन्ते यानि सुन्दर ! ।
अभ्यन्तरपुराणीह, षडवान्तरमण्डले ॥३१॥
एतानि वत्स ! लोकानां, तेषां स्थानानि लक्षय ।
मिथ्यादर्शनसञ्ज्ञेन, ये वशीकृतचेतसः ॥३२॥

प्रकर्षेणोक्तं-माम ! किन्नामकान्येतानि पुराणि ? । किमभिधाना वैतेषु लोकाः प्रतिवसन्ति ? विमर्शेनोक्तं-वत्स ! समाकर्णय-

एकमत्र पुरे तावन्नैयायिकमितीरितम् ।
नैयायिकाश्च गीयन्ते, ते जना येऽत्र संस्थिताः ॥३३॥
अन्यद्वैशेषिकं नाम, पुरमत्राभिधीयते ।
वैशेषिकाश्च ते लोका, येऽस्य मध्ये व्यवस्थिताः ॥३४॥
तथाऽपरं जनैः साङ्ख्यं, पुरमत्र प्रकाशितम् ।
साङ्ख्याश्च ते विनिर्दिष्टा, लोका येऽत्र वसन्ति भोः ॥३५॥
इहापरं पुनर्बौद्धं, पुरमाख्यायते जनैः ।
प्रसिद्धा बौद्धसञ्ज्ञाश्च, ते जना येऽस्य मध्यगाः ॥३६॥
मीमांसकपुरं नाम, तथाऽन्यत्परिकीर्तितम् ।
मीमांसकाश्च गीयन्ते, ते लोका येऽत्र संस्थिताः ॥३७॥
लोकायतमिति प्रोक्तं, पुरमत्र तथाऽपरम् ।
बार्हस्पत्याश्च ते लोका, ये वास्तव्याः पुरेऽत्र भोः ॥३८॥

तदेतेषु पुरेषूच्चैर्येऽमी लोकाः प्रकीर्तिताः ।
ते विशेषेण कुर्वन्ति, मिथ्यादर्शनशासनम् ॥३९॥
यच्च प्रोक्तं मया पूर्वं, सभार्यस्य विजृम्भितम् ।
तस्य सर्वं तदेतेषु, लोकेषु ननु दृश्यते ॥४०॥
प्रकर्षेणोक्तं-षडत्र यानि श्रूयन्ते, मण्डले लोकवार्तया ।
दर्शनानि किमेतानि, तान्याख्यातानि मे त्वया ॥४१॥
विमर्शेनोदितं वत्स !, कथ्यते ते परिस्फुटम् ।
एतानि पञ्च तान्येव, मीमांसकपुरं विना ॥४२॥
अर्वाक्कालिकमेतद्धि, मीमांसकपुरं मतम् ।
तेन दर्शनसङ्ख्यायामेतल्लोकैर्न गण्यते ॥४३॥
तथाहि-जैमिनिर्वेदरक्षार्थं, दूषणोद्धारणेच्छया ।
चकार किल मीमांसां, दृष्ट्वा तीर्थिकविप्लवम् ॥४४॥
तस्मादेतानि पञ्चैव, मीमांसकपुरं विना ।
लोकैर्दर्शनसङ्ख्यायां, गण्यन्ते नात्र संशयः ॥४५॥

षड्दर्शनवर्णनम् ।

प्रकर्षः प्राह यद्येवं, ततो ब्रूहि क्व वर्तते ।
तत्पुरं माम ! यल्लोकैर्गीयते षष्ठदर्शनम् ? ॥४६॥
विमर्शेनाभिहितं-यदिदं दृश्यतेऽत्रैव, विवेकवरपर्वते ।
निर्मलं शिखरं तुङ्गमप्रमत्तत्वनामकम् ॥४७॥
विस्तीर्णमिदमत्यर्थमत्रैव च निवेशितम् ।
पुरं लोकोत्तरं वत्स !, तज्जैनमभिधीयते ॥४८॥
तस्य ते कथयिष्यामि, ये गुणाः शेषजित्वराः ।
तथापि लोकरूढ्यैव, षष्ठं हि तदुदाहृतम् ॥४९॥
अन्यच्च तत्र ये लोकास्तेषामेष महत्तमः ।
न बाधकः प्रकृत्यैव, मिथ्यादर्शननामकः ॥५०॥
प्रकर्षेणोक्तम्-अधःस्थितेषु बाध्यन्ते, पुरेषु यदमी जनाः ।
शिखरस्थे न बाध्यन्ते, माम ! किं तत्र कारणम् ॥५१॥
विमर्शेनोक्तम्-अस्त्यत्र निर्वृतिर्लोके, नगरी सुमनोहरा ।
सा च भुक्तेरतिकान्ता, महामोहादिभूभुजाम् ॥५२॥

निर्द्वन्द्वानन्दसम्पूर्णा, सततं निरुपद्रवा ।
एभिश्चाकर्णिता सर्वैः, सा लोकैः पुरवासिभिः ॥५३॥
ततो लोकायतं मुक्त्वा, ये शेषपुरवासिनः ।
नगरीं गन्तुमिच्छन्ति, तामेते वत्स ! निर्वृतिम् ॥५४॥
एते च सर्वे तां गन्तुमन्तरङ्गैर्महापथैः ।
स्वकल्पितैः प्रवाञ्छन्ति, परस्परविरोधिभिः ॥५५॥
ततश्च–अमीभिर्वत्स ! भूमिष्ठैर्ये[१] मार्गाः परिकल्पिताः ।
निर्वृतेः प्रापकास्ते हि, न घटन्ते सुयुक्तितः ॥५६॥
विवेकपर्वतोत्तुङ्गशिखरस्थितसत्पुरे ।
वसद्भिर्यः पुनर्दृष्टः, सन्मार्गोऽतिमनोहरः ॥५७॥
स निर्वृतिं नयत्येव, लोकं नास्त्यत्र संशयः ।
पक्षपातविमुक्तेन, मया तेनेदमुच्यते ॥५८॥
यथाऽमी बाधिता लोका, येऽधःस्थपुरवर्तिनः ।
मिथ्यादर्शनसञ्ज्ञेन, न गिरिस्थे महापुरे ॥५९॥
यतः–तन्मिथ्यादर्शनस्यैव, माहात्म्यं स्फुटमुच्यते ।
यदेते न विजानन्ति, सन्मार्गं निर्वृतेर्जनाः ॥६०॥
दिङ्मूढा इव मन्यन्ते, कुमार्गमपि तत्त्वतः ।
सन्मार्ग इति यच्चैते, तत्तस्यैव विजृम्भितम् ॥६१॥
ये त्वेते शिखरे लोका, वर्तन्ते वत्स ! सत्पुरे ।
एषामेतद् द्वयं नास्ति, तेनेमे तस्य दूरगाः ॥६२॥
एतानि च पुराण्यत्र, प्रत्यासन्नानि तेन ते ।
दर्शितानि मया वत्स !, नेयत्ता परिकीर्तिता ॥६३॥
किं तर्हि ?–उपलक्षणमेतानि, विज्ञातव्यानि भावतः ।
मिथ्यादर्शनवश्यानामन्येषामपि तादृशम् ॥६४॥
यतः–यान्येतानि पुराण्यत्र, दृश्यन्ते वत्स ! भूतले ।
नान्यत्र देशकालेषु, स्थानकानि बहूनि च ॥६५॥
एतत्तु शिखरस्थायि, सत्पुरं भद्र ! सर्वदा ।
अप्रच्युतमनुत्पन्नं, शाश्वतं परमार्थतः ॥६६॥

१. भूरिष्ठैः प्र. ।

प्रकर्षेणोदितं माम !, येऽमीभिः परिकल्पिताः ।
स्वबुद्ध्या निर्वृतेर्मार्गा, लोकैः पुरनिवासिभिः ॥६७॥
तानहं श्रोतुमिच्छामि, प्रत्येकं सकुतूहलः ।
ततो मेऽनुग्रहं कृत्वा, भवानाख्यातुमर्हति ॥६८॥
विमर्शः प्राह यद्येवं, ततः कृत्वा समाहितम् ।
चेतस्त्वं वत्स ! बुध्यस्व, मार्गान्वक्ष्ये परिस्फुटम् ॥६९॥

तत्र नैयायिकैस्तावदेष कल्पितो वत्स ! निर्वृतिमार्गः, यदुत–प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वपरिज्ञानान्निःश्रेयसाधिगमः । तत्रार्थोपलम्भहेतुः प्रमाणं, तच्चतुर्धा, तद्यथा–प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि । तत्र प्रत्यक्षम्–इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षं, तत्पूर्वकं त्रिविधमनुमानं, तद्यथा–पूर्ववच्छेषवत्सामान्यतोदृष्टं च, तत्र पूर्ववत्कारणात्कार्यानुमानं, यथा मेघोन्नतेर्भविष्यति वृष्टिरिति, शेषवत्कार्यात्कारणानुमानं, यथा विशिष्टान्नदीपूरदर्शनादुपरि वृष्टो देव इति । सामान्यतोदृष्टं नाम यथा देवदत्तादौ गतिपूर्विकां देशान्तरप्राप्तिमुपलभ्य दिनकरेऽपि सा गतिपूर्विकैव समधिगम्यते, प्रसिद्धसाधर्म्यात्साध्यसाधनमुपमानं, यथा गौस्तथा गवय इति, आप्तोपदेशः शब्द आगम इत्यर्थः । तदेवमिदं चतुर्विधं प्रमाणमभिहितम् ।

तथाऽऽत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम् ।

किं स्यादित्यनवधारणात्मकः प्रत्ययः संशयः, किमयं स्थाणुः स्यादुत पुरुष इति ।

येन प्रयुक्तः प्रवर्तते तत्प्रयोजनम् । अविप्रतिपत्तिविषयापन्नो दृष्टान्तः ।

सिद्धान्तश्चतुर्विधः, तद्यथा–सर्वतन्त्रसिद्धान्तः, प्रतितन्त्रसिद्धान्तः, अधिकरणसिद्धान्तः, अभ्युपगमसिद्धान्तश्चेति ।

प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः ।

संशयादूर्ध्वं भवितव्यताप्रत्ययस्तर्कः, यथा भवितव्यमत्र स्थाणुना पुरुषेण वेति ।

संशयतर्काभ्यामूर्ध्वं निश्चयतः प्रत्ययो निर्णयः, यथा पुरुष एवायं स्थाणुरेव वा ।

तिस्रः कथाः–वादजल्पवितण्डाः । तत्र शिष्याचार्ययोः पक्षप्रतिपक्षपरिग्रहेणाभ्यासख्यापनाय वादकथा, विजिगीषुणा सार्धं छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः स एव स्वपक्षप्रतिपक्षस्थापनाहीनो वितण्डा ।

अनैकान्तिकादयो हेत्वाभासाः ।

नवकम्बलो देवदत्त इत्यादि छलम् ।

दूषणाभासास्तु जातयः ।

निग्रहस्थानानि पराजयवस्तूनि, तद्यथा–प्रतिज्ञाहानिः[१] प्रतिज्ञान्तरं[२], प्रतिज्ञाविरोधः[३], प्रतिज्ञासंन्यासः[४], हेत्वन्तरम्[५], अर्थान्तरं[६], निरर्थकम्[७] अविज्ञातार्थम[८]पार्थकम्[९], अप्राप्तकालं[१०], न्यूनम[११]धिकं[१२], पुनरुक्तम्[१३], अननुभाषणम्[१४], अप्रतिज्ञानं[१५], अप्रतिभा[१६], कथाविक्षेपो[१७], मतानुज्ञा[१८], पर्य्यनुयोज्योपेक्षणं[१९], निरनुयोज्यानुयोगः[२०], अपसिद्धान्तो[२१], हेत्वाभासाश्चेति[२२] निग्रहस्थानानि । तदेते प्रमाणादयः षोडश पदार्था नैयायिकदर्शनसमासः ।

वैशेषिकैः पुनरयं वत्स ! परिकल्पितो निर्वृतिनगरीगमनमार्गः, यदुत–द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां पदार्थानां तत्त्वपरिज्ञानान्निःश्रेयसाधिगमः । स हि निर्वृतिर्निःश्रेयसरूपा ।

तत्र पृथिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मन इति नव द्रव्याणि ।

रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारगुरुत्वद्रवत्वस्नेहवेगशब्दाः पञ्चविंशतिर्गुणाः ।

उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति पञ्च कर्माणि ।

सामान्यं द्विविधं–परमपरं च, तत्र परं सत्तालक्षणं, अपरं द्रव्यत्वादीति ।

नित्यद्रव्यवृत्तयोऽन्त्या विशेषाः ।

अयुतसिद्धानामाधाराधेयभूतानां यः सम्बन्ध इहप्रत्ययहेतुः स समवायः ।

लैङ्गिकप्रत्यक्षे द्वे एव प्रमाणे । इति वैशेषिकदर्शनसमासार्थः ।

साङ्ख्यैस्तु वत्स ! निजबुद्ध्या परिकल्पितोऽयं निर्वृतिनगर्याः पन्थाः, यदुत–पञ्चविंशतितत्त्वपरिज्ञानान्निःश्रेयसाधिगमः ।

तत्र त्रयो गुणाः–सत्त्वं रजस्तमश्च । तत्र प्रसादलाघवप्रणयानभिष्वङ्गाद्वेषप्रीतयः कार्यं सत्त्वस्य, शोकतापभेदस्तम्भोद्वेगापद्वेषाः कार्यं रजसः, मरणसादनबीभत्सदैन्यगौरवाणि तमसः कार्यम् । ततः सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः, सैव प्रधानमित्युच्यते । प्रकृतेश्च महानाविर्भवति, बुद्धिरित्यर्थः । बुद्धेश्चाहङ्कारः । ततोऽहङ्कारादेकादशेन्द्रियाणि, तद्यथा–पञ्च बुद्धीन्द्रियाणि स्पर्शनरसनघ्राणचक्षुःश्रोत्ररूपाणि, पञ्च कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थलक्षणानि मनश्चाविर्भवति ।

तथा तत एवाहङ्कारात्तमोबहुलात्पञ्च तन्मात्राणि स्पर्शरसरूपगन्धशब्दलक्षणान्याविर्भवन्ति । तेभ्यश्च पृथिव्यादीनि पञ्च महाभूतानि । तदेषा चतुर्विंशतितत्त्वात्मिका प्रकृतिः ।

तथा परः पुरुषश्चैतन्यस्वरूपः, स चानेको जन्ममरणकरणानां नियमदर्शनाद्धर्मादिषु प्रवृत्तिनानात्वाच्च। प्रकृतिपुरुषयोश्चोपभोगार्थः संयोगः पङ्ग्वन्धयोरिव, उपभोगश्च शब्दाद्युपलम्भो गुणपुरुषान्तरोपभोगश्च । प्रत्यक्षानुमानागमाः प्रमाणानि । इति साङ्ख्यदर्शनसङ्क्षेपार्थः ॥

बौद्धैः पुनर्भद्र ! परिकल्पितेयं निर्वृतिनगरीवर्तनी, यदुत–द्वादशायतनानि, तद्यथा–पञ्चेन्द्रियाणि, पञ्च शब्दादयो, मनो, धर्मायतनं च, धर्मास्तु सुखादयो विज्ञेयाः । प्रत्यक्षानुमाने द्वे एव प्रमाणे । इति बौद्धदर्शनसमासार्थः ॥

अथवा वैभाषिकसौत्रान्तिकयोगाचारमाध्यमिकभेदाच्चतुर्विधा बौद्धा भवन्ति ।

तत्र वैभाषिकमतमिदं, यदुत–क्षणिकं वस्तु, तद्यथा–जातिर्जनयति, स्थितिः स्थापयति, जरा जर्जरयति, विनाशो नाशयति । तथाऽऽत्माऽपि तथाविध एव पुद्गलश्चासावभिधीयते ॥

सौत्रान्तिकमतं पुनरिदं–रूपवेदनाविज्ञानसञ्ज्ञासंस्काराः सर्वशरीरिणामेते पञ्च स्कन्धा विद्यन्ते, न पुनरात्मा। त एव हि परलोकगामिनः। तथा क्षणिकाः सर्वे संस्काराः, स्वलक्षणं परमार्थतः। अन्यापोहः शब्दार्थः। सन्तानोच्छेदो मोक्ष इति।

योगाचारमतं त्विदं–विज्ञानमात्रमिदं भुवनं, न विद्यते बाह्यार्थः । वासनापरिपाकतो नीलपीतादिप्रतिभासाः । आलयविज्ञानं सर्ववासनाधारभूतम् । आलयविज्ञानविशुद्धिरेव चापवर्ग इति ।

माध्यमिकदर्शने तु–सर्वशून्यमिदं, स्वप्नोपमः प्रमाणप्रमेयप्रविभागः । 'मुक्तिस्तु शून्यतादृष्टिस्तदर्थं शेषभावना' इति बौद्धविशेषाणां मतसङ्क्षेपार्थः ॥

लोकायतैः पुनर्वत्स ! सा निर्वृतिनगरी नास्तीति प्रख्यापितं लोके, यतोऽमी ब्रुवते–नास्ति निर्वृतिर्नास्ति जीवो, नास्ति परलोको, नास्ति पुण्यं, नास्ति पापमित्यादि । किं तर्हि ? पृथिव्यापस्तेजो वायुरिति तत्त्वानि, तत्समुदाये शरीरेन्द्रियविषयसञ्ज्ञा। तेभ्यश्चैतन्यं मद्याङ्गेभ्यो मदशक्तिवत्। जलबुद्बुदवज्जीवाः। प्रवृत्तिनिवृत्तिसाध्या प्रीतिः पुरुषार्थः, स च काम एव, नान्यो मोक्षादिः । तस्मान्नान्यत्पृथिव्यादिभ्यस्तत्त्वमस्ति, दृष्टहान्यदृष्टकल्पनासम्भवादिति। प्रत्यक्षमेव चैकं प्रमाणमिति लोकायतमतसमासः ।

मीमांसकानां पुनरेष मार्गः, यदुत–वेदपाठानन्तरं धर्मजिज्ञासा कर्तव्या । यतश्चैवं ततस्तस्य निमित्तपरीक्षा। निमित्तं च चोदना। यत उक्तं–"चोदनालक्षणोऽर्थो धर्मः" । चोदना च क्रियायां प्रवर्तकं वचनमाहुर्यथा– 'अग्निहोत्रं जुहुयात्स्वर्गकामः'

इत्यादि। तेन धर्मो लक्ष्यते, नान्येन प्रमाणेन, प्रत्यक्षादीनां विद्यमानोपलम्भनत्वादिति। प्रत्यक्षानुमानशब्दोपमानार्थापत्त्यभावाः षट् प्रमाणानि। इति मीमांसकमतसमासः॥

अमीभिः पुनर्वत्स ! विवेकमहापर्वतारूढैरप्रमत्तत्वशिखरस्थितैर्जैनपुर-निवासिभिर्जैनलोकैरयं दृष्टो निर्वृतिनगरीगमनमार्गः, यदुत-जीवाजीवास्रव-बन्धसंवरनिर्जरामोक्षास्तत्त्वम्। तत्र सुखदुःखज्ञानादिपरिणामलक्षणो जीवः। तद्विपरीतस्त्वजीवः। मिथ्यादर्शनाविरतिप्रमादकषाययोगा बन्धहेतवः स आस्रवः। आस्रवकार्यं बन्धः। आस्रवविपरीतः संवरः। संवरफलं निर्जरा। निर्जराफलं मोक्ष इत्येते सप्त पदार्थाः। तथा विधिप्रतिषेधानुष्ठानपदार्थाविरोधश्च। अत्र जैन-दर्शने स्वर्गकेवलार्थिना तपोध्यानादि कर्तव्यं 'सर्वे जीवा न हन्तव्या' इति वचनात्। 'सततसमितिगुप्तिशुद्धा क्रिया असपत्नो योग' इति वचनात्। उत्पादविगमध्रौव्ययुक्तं सत्। एकं द्रव्यमनन्तपर्यायमर्थ इति। प्रत्यक्षपरोक्षे द्वे एव प्रमाणे इति जैनमतस्य दिग्दर्शनमात्रम्॥

तत्रैते प्रथमास्तावच्चत्वारो वत्स ! वादिनः।
नैयायिकादयो नैव, निर्वृतेर्मार्गवेदकाः॥१॥
यतः-एकान्तनित्यमिच्छन्ति, पुरुषं तत्र गामुकम्।
सर्वत्रगं च वाञ्छन्ति, तथाऽन्ये क्षणनश्वरम्॥२॥
नित्यश्चासौ कथं गच्छेत्तस्यामविचलो यतः।
सर्वत्रगश्च यो भद्र !, स क्व गच्छेत्कुतोऽपि वा ?॥३॥
नश्वरोऽपि विनष्टत्वान्न तस्यां गन्तुमर्हति।
तस्मादेते न जानन्ति, मार्गं तस्यास्तपस्विनः॥४॥
लोकायतास्तु दूरेण, वर्तन्ते वत्स ! निर्वृतेः।
ये हि पापहतात्मानो, निराकुर्वन्ति तामपि॥५॥
किञ्च- **लोकायतमतं प्राज्ञैर्ज्ञेयं पापौघकारणम्।**
निर्द्वन्द्वानन्दपूर्णाया, निर्वृतेः प्रतिषेधकम्॥६॥
तस्माद्दुष्टाशयकरं, क्लिष्टसत्त्वविचिन्तितम्।
पापश्रुतं सदा धीरैर्वर्ज्यं नास्तिकदर्शनम्॥७॥
परमार्थेन सा वत्स ! नेष्टा मीमांसकैरपि।
यैः सर्वज्ञं निराकृत्य, वेदप्रामाण्यमीरितम्॥८॥
तदेवमेते सर्वेऽपि, भूमिष्ठपुरवासिनः।

अनेन कारणेनोक्ता, मिथ्यादर्शनमोहिताः॥९॥

निर्वृतिमार्गः ।
एते तु शिखरारूढाः, पुरे वास्तव्यका जनाः ।
यं वदन्ति स निर्मिथ्यो, निर्वृतेः प्रगुणः पथः ॥१०॥
ततश्च–यथावस्थितसन्मार्गवेदिनां वीर्यशालिनाम् ।
महत्तमो न बाधायै, मिथ्यादर्शननामकः ॥११॥
ज्ञानश्रद्धानपूतास्ते, निःस्पृहा भवचारके ।
चारित्रयानमारुह्य, निर्वृतिं यान्ति मानवाः ॥१२॥
यथा च सन्मा(त्यो मा)र्गोऽयं, यथा चान्ये न तद्विधाः ।
इदं च पुरतो वत्स !, यद्यहं ते विचारये ॥१३॥
ततो जन्म ममात्येति, न विचारस्य निष्ठितिः ।
तेनेदं ते समासेन, प्रविभज्य निवेद्यते ॥१४॥ युग्मम् ॥
ज्ञानदर्शनचारित्रलक्षणो ह्यान्तरो मतः ।
विद्वद्भिर्निर्वृतेर्मार्गः, प्रगुणः सुपरिस्फुटः ॥१५॥
स दृष्टः पर्वतारूढैर्न दृष्टो भूमिवासिभिः ।
तेनैते तत्र गन्तारो, न गन्तारो भुवि स्थिताः ॥१६॥
तदेते कथितास्तुभ्यं, भवचक्रं मया जनाः ।
ये मिथ्यादर्शनाख्येन, तेन भद्र ! विडम्बिताः ॥१७॥
प्रकर्षः प्राह मामेदं, भवचक्रे मया पुरम् ।
सर्वं विलोकितं दृष्टं, वीर्यमान्तरभूभुजाम् ॥१८॥
केवलं तदिदं जातं, महाहास्यकरं परम् ।
आभाणकं जगत्यत्र, यद्बालैरपि गीयते ॥१९॥
गन्त्रीमनुष्यसामग्र्या, यो वधूमाहरिष्यति ।
तस्यैव विस्मृता हन्त, सा वधूरिति कौतुकम् ॥२०॥
तथाहि–महामोहादिजेतारो, महात्मानो नरोत्तमाः ।
द्रष्टव्या भवचक्रेऽत्र, सन्तोषसहिताः किल ॥२१॥
एतदर्थमिहायातौ, मामावामत्र पत्तने ।
न दृष्टास्ते महात्मानो, न च सन्तोषभूपतिः ॥२२॥
अतोऽधुनापि तान्मामो, मदनुग्रहकाम्यया ।
गत्वा ते यत्र वर्तन्ते, तत्स्थानं दर्शयत्वलम् ॥२३॥

विमर्शेनोदितं वत्स !, यदिदं शिखरे स्थितम् ।
जैनं पुरं भवन्त्येव, नूनमत्र तथाविधाः ॥२४॥

साधुवर्णनम् ।

तस्मादत्रैव गच्छाव, येनेदं ते कुतूहलं ।
साक्षाद्दर्शनतो वत्स !, निःशेषं परिपूर्यते ॥२५॥
एवं भवतु तेनोक्ते, तौ गतौ तत्र सत्पुरे ।
दृष्टाश्च साधवस्तत्र, निर्मलीमसमानसाः ॥२६॥
विमर्शः प्राह भद्रैते, ते लोका यैर्महात्मभिः ।
निक्षिप्ता निजवीर्येण, महामोहादिभूभुजः ॥२७॥
सर्वे भगवतामेषां, बान्धवा वत्स ! जन्तवः ।
एते त्रसेतराणां च, बान्धवाः सर्वदेहिनाम् ॥२८॥
समस्ता मातरोऽमीषां, नरामरपशुस्त्रियः ।
एतेऽपि सूनवस्तासां, भगवन्तो नरोत्तमाः ॥२९॥
बाह्ये परिग्रहे वत्स !, निजेऽपि च शरीरके ।
चित्तं न लग्नमेतेषां, पद्मवज्जलपङ्कयोः ॥३०॥
सत्यं भूतहितं वाक्यममृतक्षरणोपमम् ।
एते परीक्ष्य भाषन्ते, कार्ये सति मिताक्षरम् ॥३१॥
असङ्गयोगसिद्ध्यर्थं, सर्वदोषविवर्जितम् ।
आहारमेते गृह्णन्ति, लौल्यनिर्मुक्तचेतसः ॥३२॥
किञ्चेह बहुनोक्तेन ?, चेष्टा या या महात्मनाम् ।
सा सा भगवतामेषां, महामोहादिसूदनी ॥३३॥

तेन वत्स ! भगवतामेतेषां सम्बन्धिन्याऽपेक्षया तस्यां चित्तवृत्तिमहाटव्यामेवं जानीहि, यदुत–अत्यन्तशुष्का सा प्रमत्तता नदी, विरलीभूतं तद्विलसितपुलिनं, परिभग्नश्चित्तविक्षेपमण्डपः, निरस्ता तृष्णावेदिका, विघटितं विपर्यासविष्टरं, सञ्चूर्णिता चाविद्यागात्रयष्टिः, प्रलीनो महामोहराजः, उच्चाटितो महामिथ्या-दर्शनपिशाचः, निर्नष्टो रागकेसरी, निर्भिन्नो द्वेषगजेन्द्रः, विपाटितो मकरध्वजः, विदारितो विषयाभिलाषः, निर्वासिता महामूढतादयस्तद्भार्याः, विहिंसितो हास-भटः, विकर्तिते जुगुप्सारती, निषूदितौ भयशोकौ, विदलिता दुष्टाभिसन्धिप्रभृत-यश्चरटाः, पलायितानि डिम्भरूपाणि, विद्राविता ज्ञानसंवरणादयस्ते त्रयो दुष्टनर-पतयः, अनुकूलीभूतास्ते चत्वारः ससानी मध्यवर्तिनो वेदनीयाद्याः, व्यपगतं

चतुरङ्गमपि तत्सकलं बलं, प्रशान्ता बिब्बोकाः, विगलिता विलासाः, तिरोभूताः समस्तविकाराः ।

किं बहुना ? सर्वथा-

यद्दृष्टं भवता तस्यां, वर्णितं च मया पुरा ।
वस्तु किञ्चित्समस्तानां, दुःखदं बाह्यदेहिनाम् ॥१॥
चित्तवृत्तिमहाटव्यां, तत्सर्वमिह संस्थिताः ।
प्रलीनं वत्स ! पश्यन्ति, नूनमेते महाधियः ॥२॥ युग्मम् ॥
सा सर्वोपद्रवैर्मुक्ता, श्वेता रत्नौघपूरिता ।
एतेषां ध्यानयोगेन, चित्तवृत्तिः प्रभासते ॥३॥
तदेते ते महात्मानो, ये मया वत्स ! वर्णिताः ।
पूर्वं तपोधनाः सम्यक्, पश्य विस्फारितेक्षणः ॥४॥
प्रकर्षेणोक्तं-चारु चारु कृतं माम !, विहितो मदनुग्रहः ।
जनितः धूतपापोऽहमेतेषां दर्शनात्त्वया ॥५॥
कृतं मानसनिर्वाणं, विहितः पटुलोचनः ।
आनन्दामृतसेकेन, गात्रं निर्वापितं च मे ॥६॥
केवलं दर्शनीयोऽसौ, ममाद्यापि ननु त्वया ।
यो वर्णितो महावीर्यो, माम ! सन्तोषभूपतिः ॥७॥

चित्तसमाधानमण्डपः सन्तोषभूपः ।

विमर्शेनोक्तं-य एष दृश्यते वत्स !, सद्दृष्टेः सुखदायकः ।
शुभ्रश्चित्तसमाधानो, नाम विस्तीर्णमण्डपः ॥८॥
सर्वेषां वल्लभोऽमीषां, जनानां पुरवासिनाम् ।
स सन्तोषमहाभूपो, नूनमत्र भविष्यति ॥९॥
प्रकर्षः प्राह यद्येवं, ततोऽत्रैव प्रविश्यताम् ।
एवं भवतु वत्सेति, बभाषे तस्य मातुलः ॥१०॥
प्रविश्य चोचिते देशे, ताभ्यां दृष्टः स मण्डपः ।
निजप्रभावविक्षिप्तजनसन्तापसुन्दरः ॥११॥
तत्र च-राजमण्डलमध्यस्थं, दीप्तिनिर्धूततामसम् ।
वेष्टितं भूरिलोकेन, सच्चित्तानन्ददायकम् ॥१२॥
विशालवेदिकारूढमुपविष्टं वरासने ।
दत्तास्थानं नरेन्द्रं तौ, पश्यतः स्म चतुर्मुखम् ॥१३॥

ततः प्रकर्षस्तं वीक्ष्य, मनसा हर्षनिर्भरः ।
मनाक् सञ्जातसन्देहो, मातुलं प्रत्यभाषत ॥१४॥
अहो रम्यमिदं जैनं, पुरं यत्रेदृशः प्रभुः ।
ईदृक्षो मण्डपो लोका, वास्तव्या यत्र चेदृशाः ॥१५॥
एवं च स्थिते–यत्रेदृशं पुरं माम !, विवेकवरपर्वते ।
किं सोऽयं भवचक्रेऽत्र, वर्तते दोषपूरिते ॥१६॥
विमर्शेनोदितं वत्स ! यस्मिन्नेष महागिरिः ।
वर्तते तदहं वक्ष्ये, स्थानमस्य निशामय ॥१७॥
चित्तवृत्तिमहाटव्यां, वर्तते परमार्थतः ।
भवचक्रे तु विद्वद्भिरुपचारेण कथ्यते ॥१८॥

सात्त्विकपुरवर्णनम् ।

यतोऽत्र विद्यते वत्स !, सल्लोकपरिपूरितम् ।
अन्तरङ्गं सुविस्तीर्णं, पुरं सात्त्विकमानसम् ॥१९॥
तत्रायं संस्थितो वत्स !, विवेकवरपर्वतः ।
आधाराधेयसम्बन्धस्तेनैवं परिकीर्तितः ॥२०॥

प्रकर्षेणोदितं–माम ! यद्येवं ततो यदिदमस्य पर्वतस्याधारभूतं सात्त्विकमानसं पुरं, ये च तत्सेविनो बहिरङ्गलोकाः, यश्चायं विवेकमहागिरिः, यच्चेदमप्रमत्तशिखरं यच्चादो जैनं पुरं, ये चात्र स्थिता बहिरङ्गजनाः, यश्चायं चित्तसमाधानमहामण्डपो, या चेयं वेदिका, यच्चेदं सिंहासनं, यश्चायं नरेन्द्रो, यश्चायमस्य परिवारस्तदिदं सर्वं मम जन्मापूर्वं ततो ममानुग्रहधिया प्रत्येकं विशेषतस्तद्वर्णयितुमर्हति मामः ।

विमर्शेनोक्तं–वत्स ! यद्येवं ततः समाकर्णय–
यदिदं पर्वताधारं, पुरं सात्त्विकमानसम् ।
तदन्तरङ्गरत्नानां, सर्वेषामाकरो मतम् ॥२१॥
अनेकदोषपूर्णेऽपि, भवचक्रे व्यवस्थितम् ।
नेदं स्वरूपतो वत्स !, दोषसंश्लेषभाजनम् ॥२२॥
अधन्या भवचक्रेऽत्र, वर्तमाना मनुष्यकाः ।
इदं स्वरूपतो वत्स !, न पश्यन्ति कदाचन ॥२३॥
यानि निर्मलचित्तादिपुराण्यन्तरभूमिषु ।

अत्रैव प्रतिबद्धानि, तानि जानीहि भावतः ॥२४॥

स कर्मपरिणामाख्यो, राजा नेदं महापुरम् ।
सभुक्तिकं ददात्येकं, महामोहादिभूभुजाम् ॥२५॥
किं तर्हि ?–स्वयमेव भुनक्तीदं, तथाऽन्यैर्वरभूमिपैः ।
शुभाशयादिभिर्वत्स ! भोजयेच्च सभुक्तिकम् ॥२६॥
इदं हि जगतः सारमिदं च निरुपद्रवम् ।
इदमेव कृताह्लादं, बहिर्जनमनोहरम् ॥२७॥
तदिदं ते समासेन, पुरं सात्त्विकमानसम् ।
निवेदितं मया वत्स !, शृणु चात्राधुना जनम् ॥२८॥
ये लोका निवसन्त्यत्र, पुरे सात्त्विकमानसे ।
बहिरङ्गा भवन्त्येषां, शौर्यवीर्यादयो गुणाः ॥२९॥
बहिरङ्गा जनास्ते हि, निवसन्त्यत्र सत्पुरे ।
पुरमाहात्म्यमात्रेण, गच्छन्ति विबुधालये ॥३०॥
अन्यच्च वसतामत्र, पुरे सात्त्विकमानसे ।
प्रत्यासन्नतया याति, विवेको दृष्टिगोचरे ॥३१॥
ततश्च–यद्यारोहन्त्यमुं लोका, विवेकवरपर्वतम् ।
ततो जैनं समासाद्य, पुरं यान्ति सुखास्पदम् ॥३२॥
एवं च स्थिते–पुरप्रभावमात्रेण, सदैते सुन्दरा जनाः ।
विवेकशिखरारूढाः, पुनः स्युरतिसुन्दराः ॥३३॥
किञ्च–अन्येषां पापिनां वत्स !, भवचक्रनिवासिनाम् ।
सदा न प्रतिभातीदं, जनानां जैनसत्पुरम् ॥३४॥
निवसन्ति पुनर्येऽत्र, पुरे सात्त्विकमानसे ।
बहिरङ्गजनास्तेषां, भातीदं जैनसत्पुरम् ॥३५॥
तदमी भाविकल्याणा, लोका मार्गानुयायिनः ।
वास्तव्यकाः पुरे येऽत्र, सदा प्रकृतिसुन्दरे ॥३६॥
तदेते कथितास्तुभ्यं, पुरे सात्त्विकमानसे ।
लोकाः महागिरे रूपं, समाकर्णय साम्प्रतम् ॥३७॥

विवेकशिखरवर्णनम् ।

तावद्दारुणदुःखार्ता, भवचक्रनिवासिनः ।
जना यावन्न पश्यन्ति, ते विवेकमहागिरिम् ॥३८॥

यदा पुनः प्रपश्यन्ति, ते विवेकमहागिरिम् ।
तदा न रमते तेषां, भवचक्रे मतिर्नृणाम् ॥३९॥
ततश्च–विहाय भवचक्रं ते, समारुह्य महागिरिम् ।
विमुच्य दुःखं जायन्ते, निर्द्वन्द्वानन्दभागिनः ॥४०॥
यतोऽत्र निर्मले तुङ्गे, स्थितानां वत्स ! देहिनाम् ।
भवचक्रमिदं सर्वं, करस्थमिव भासते ॥४१॥
ततो विविधवृत्तान्तं, दुःखसङ्घातपूरितम् ।
विलोक्येदं विरज्यन्ते, नगरात्तेऽमुतो जनाः ॥४२॥
विरक्ताश्च भवन्त्यत्र, प्रतिबद्धा महागिरौ ।
विवेके भावतः सौख्यहेतुरेष च सद्गिरिः ॥४३॥
ततश्च–विवेकसद्गिरेर्वत्स !, माहात्म्येनास्य ते जनाः ।
भवन्ति सुखिनोऽत्यन्तं, भवचक्रेऽपि संस्थिताः ॥४४॥
तदेष सर्वलोकानां, सुखहेतुर्महागिरिः ।
विवेको वर्णितस्तुभ्यमधुना शिखरं शृणु ॥४५॥
इदं हि शिखरं तात !, सर्वदोषनिबर्हणम् ।
उत्त्रासकारणं मन्ये, दुष्टान्तरमहीभुजाम् ॥४६॥
यतः–विवेकारूढलोकानां, यद्युपद्रवकारिणः ।
आगच्छेयुः क्वचिद्भद्र !, महामोहादिशत्रवः ॥४७॥
ततस्ते निर्दयैर्भूत्वा, विवेकारूढजन्तुभिः ।
शिखरादप्रमत्तत्वाल्लोट्यन्तेऽस्मान्न संशयः ॥४८॥ युग्मम् ॥
ततस्ते चूर्णिताशेषशरीरावयवाः पुनः ।
दूरतः प्रपलायन्ते, शिखरं वीक्ष्य कातराः ॥४९॥

जैनपुरवर्णनम् ।

तदिदं नूनमेतेषां, दलनार्थं विनिर्मितम् ।
विवेकवासिशत्रूणामन्तरङ्गमहीभुजाम् ॥५०॥
किञ्च–शुभ्रं विशालमुत्तुङ्गं, सर्वलोकसुखावहम् ।
वत्सेदमप्रमत्तत्वशिखरं गाढसुन्दरम् ॥५१॥
तदिदं ते समासेन, कथितं शिखरं मया ।

अधुना वर्ण्यते जैनं, पुरं तत्त्वं निशामय ॥५२॥

इदं हि सत्पुरं वत्स !, निरन्तानन्दकारणम् ।
दुर्लभं भवचक्रे तु, जन्तुभिः पुण्यवर्जितैः ॥५३॥
यतः-कालेन भूयसा लोकाः, पर्यटन्तः कथञ्चन ।
आसादयन्ति कृच्छ्रेण, पुरं सात्त्विकमानसम् ॥५४॥
स्थित्वा तत्र पुनर्यान्ति, भवचक्रे निरन्तके ।
एनं वत्स ! न पश्यन्ति, विवेकवरपर्वतम् ॥५५॥
भूरिभिर्विहितैस्तात !, ततश्चेत्थं गमागमैः ।
कदाचित्तेऽत्र पश्येयुर्विवेकवरपर्वतम् ॥५६॥
नारोहन्ति च दृष्टेऽपि, तथान्ये वत्स ! सद्गिरौ ।
प्रयान्ति च विदन्तोऽपि, भवचक्रे स्ववैरिणः ॥५७॥
आरोहेयुः कदाचिच्च, तत्रारूढाः सुदुर्लभम् ।
शिखरं ते न पश्येयुरिदं वत्सातिसुन्दरम् ॥५८॥
दृष्टेऽपि नानुतिष्ठन्ति, तत्रारोहणमुच्चकैः ।
शैथिल्येनैव तिष्ठन्ति, भवचक्रे सकौतुकाः ॥५९॥
यदा तु धन्याः शिखरमारोहन्ति मनोहरम् ।
इदं वत्स ! जना जैनं, पश्यन्त्येव तदा पुरम् ॥६०॥
सा चैषा भवचक्रेऽत्र, वर्तमानैः सुदुर्लभा ।
सामग्री जन्तुभिर्वत्स !, याऽस्य दर्शनकारिणी ॥६१॥
तेनेदं सततानन्दकारणं जैनसत्पुरम् ।
भवचक्रे मया तुभ्यं, दुर्लभं प्रतिपादितम् ॥६२॥
इदं रत्नौघसम्पूर्णमिदं सर्वसुखास्पदम् ।
इदमेव जगत्यत्र, सारात्सारतरं मतम् ॥६३॥
तदिदं ते समासेन, वर्णितं जैनसत्पुरम् ।
अधुना येऽत्र वास्तव्या, लोकास्तानवधारय ॥६४॥
एते हि सततानन्दाः, सर्वाबाधाविवर्जिताः ।
पुरप्रभावतो वत्स !, वर्तन्ते जैनसज्जनाः ॥६५॥
प्रस्थिता नगरीं सर्वे, निर्वृतिं कृतनिश्चयाः ।
आरात्प्रयाणकैः केचिद्वसन्ति विबुधालये ॥६६॥
वीर्यं वीक्ष्य भयोद्भ्रान्तैर्महामोहादिशत्रुभिः ।
एते जैना जना वत्स ! दूरतः परिवर्जिताः ॥६७॥

प्रकर्षेणोदितं माम !, नैतदेवं यतः क्वचित् ।
यथैव ते मया दृष्टा, भवचक्रनिवासिनः ॥६८॥
महामोहादिभिर्ग्रस्तास्तथैतेऽपि न संशयः ।

तथाहि–एतेष्वपि जैनलोकेषु दृश्यन्ते सर्वाणि तत्कार्याणि, यस्मादेतेऽपि मूर्च्छन्ति भगवद्‌बिम्बेषु, रज्यन्ते स्वाध्यायकरणेषु, स्निह्यन्ति साधर्मिकजनेषु, प्रीयन्ते सदनुष्ठानेषु, तुष्यन्ति गुरुदर्शनेषु, हृष्यन्ति सदर्थोपलम्भेषु, द्विषन्ति व्रतातिचारकरणेषु, क्रुध्यन्ति सामाचारीविलोपेषु, रुष्यन्ति प्रवचनप्रत्यनीकेषु, माद्यन्ति कर्मनिर्जरणेषु, अहङ्कुर्वन्ति प्रतिज्ञातनिर्वाहणेषु, अवष्टभ्नन्ति परीषहेषु, स्मयन्ते दिव्याद्युपसर्गेषु, गूहयन्ति प्रवचनमालिन्यं, वञ्चयन्तीन्द्रियधूर्त्तगणं, लुभ्यन्ति तपश्चरणेषु, गृध्यन्ति वैयावृत्त्याचरणेषु, अभ्युपपद्यन्ते सद्‌ध्यानयोगेषु, तृष्यन्ति परोपकारकरणेषु, निघ्नन्ति प्रमादचौरवृन्दं, बिभ्यति भवचक्रभ्रमणात्, जुगुप्सन्ते विमार्गचारितां, रमन्ते निर्वृतिनगरीगमनमार्गे, उपहसन्ति विषयसुख-शीलतां, उद्विजन्ते शैथिल्याचरणात्, शोचन्ति चिरन्तनदुश्चरितानि, गर्हन्ते निज-शीलस्खलितानि, निन्दन्ति भवचक्रनिवासं, आराधयन्ति जिनाज्ञायुवतिं, प्रतिसेवन्ते द्विविधशिक्षाललनाम् ।

तदेवं सर्वकार्याणि, महामोहादिभूभुजाम् ।
एतेषु माम ! दृश्यन्ते, जैनेषु सुपरिस्फुटम् ॥६९॥
तत्कथं भवता प्रोक्तमेवं सति ममाग्रतः ।
यथैते दूरतस्त्यक्ता, महामोहादिशत्रुभिः ॥७०॥
विमर्शेनोदितं वत्स !, य एते भवतोदिताः ।
महामोहादयस्तेऽन्ये, वत्सला जैनबान्धवाः ॥७१॥

मोहाद्या बान्धवाः ।

एते हि द्विविधा वत्स !, महामोहादयो मताः ।
एकेऽरयोऽत्र जन्तूनामपरेऽतुलबान्धवाः ॥७२॥
यतः–प्रथमा भवचक्रेऽत्र, पातयन्ति सदा जनम् ।
अप्रशस्ततया तेषां, प्रकृतिः खलु तादृशी ॥७३॥
इतरे निर्वृतिं लोकं, नयन्ति निकटे स्थिताः ।
प्रशस्तास्ते यतस्तेषां, प्रकृतिः साऽपि तादृशी ॥७४॥
तदेते शत्रुभिस्त्यक्ता, बन्धुभिः परिवेष्टिताः ।
महामोहादिभिर्वत्स !, मोदन्ते जैनसज्जनाः ॥७५॥

एवं च-अमी सकलकल्याणभाजिनो जैनसज्जनाः ।
निवेदिता मया तुभ्यमधुना शृणु मण्डपम् ॥७६॥
अयं चित्तसमाधानो, मण्डपः सर्वदेहिनाम् ।
सम्प्राप्तः कुरुते सौख्यमतुलं निजवीर्यतः ॥७७॥
अस्यैव भूपतेर्नूनमास्थानार्थं विनिर्मितः ।
वेधसा त्रिजगद्बन्धोरादरादेष मण्डपः ॥७८॥
नास्त्येव भवचक्रेऽत्र, सुखगन्धोऽपि सुन्दर ! ।
यावच्चित्तसमाधानो, नैष सम्प्राप्यते जनैः ॥७९॥
तदेष लेशतो वत्स !, वर्णितो वरमण्डपः ।
एषा निःस्पृहता नाम, वेदिका ते निवेद्यते ॥८०॥
ये लोका वेदिकां वत्स !, स्मरन्त्येनां पुनः पुनः ।
तेषां शब्दादयो भोगाः, प्रतिभान्ति विषोपमाः ॥८१॥
न तेषु वर्तते चित्तं, क्षीयते कर्मसञ्चयः ।
जायन्ते निर्मलत्वेन, भवचक्रपराङ्मुखाः ॥८२॥
येषामेषा स्थिता चित्ते, धन्यानां वत्स ! वेदिका ।
नेन्द्रैर्न देवैर्नो भूपैर्नान्यैस्तेषां प्रयोजनम् ॥८३॥
एषाऽपि नूनमस्यैव, निविष्टा वरभूपतेः ।
आस्थानार्थं विधात्रेति, वत्स ! सुन्दरवेदिका ॥८४॥
इयं निःस्पृहता तात !, वर्णिता ते सुवेदिका ।
जीववीर्यमिदं नाम, साम्प्रतं शृणु विष्टरम् ॥८५॥

जीववीर्यविष्टरम् ।

जीववीर्यमिदं येषां, परिस्फुरति मानसे ।
सुखमेव परं तेषा, दुःखानामुद्भवः कुतः ? ॥८६॥
अयं हि राजा दीप्ताङ्गो, दृश्यते यश्चतुर्मुखः ।
निविष्टोऽत्र जगद्बन्धुर्दत्तास्थानो मनोरमः ॥८७॥
यः शुभ्रः परिवारोऽस्य, यद्राज्यं या विभूतयः ।
यच्चातुलं महत्तेजो, विष्टरं तत्र कारणम् ॥८८॥
किञ्चात्र बहुनोक्तेन ?, पुरं लोका महागिरिः ।
शिखरं सत्पुरं लोका, मण्डपो वरवेदिका ॥८९॥

राजाऽयं सह सैन्येन, राज्यं भुवनसुन्दरम् ।
जगच्छिष्टमिदं सर्वं, माहात्म्येनास्य नन्दति ॥९०॥
तथाहि-यद्येतन्न भवत्यत्र, जीववीर्यं वरासनम् ।
महामोहादिभिः सर्वं, तदिदं परिभूयते ॥९१॥
विद्यमाने पुनर्वत्स !, जीववीर्यवरासने ।
महामोहादयो नैव, प्रविशन्त्यत्र मण्डपे ॥९२॥
अन्यच्च-क्वचित्तिरस्कृतं तात !, महामोहादिभिर्बलम् ।
इदमाविर्भवत्येव, जीववीर्यप्रभावतः ॥९३॥
इदं सिंहासनं वत्स !, यावदत्र प्रकाशते ।
तावद्धि सर्वतोभद्रं, राजा सैन्यं गिरिः पुरम् ॥९४॥
तदिदं वर्णितं वत्स !, जीववीर्यवरासनम् ।
परिवारयुतो राजा, साम्प्रतं ते निवेद्यते ॥९५॥

भावार्थावबोधः ।

प्रकर्षेण चिन्तितम्-अये ! यान्येतानि प्रतिपादितान्यनेन मे वस्तूनि तेषामेष भावार्थो मम स्फुरति हृदये, यदुत-

अकामनिर्जरापेक्षं, जन्तुवीर्यं यदुत्कटम् ।
मिथ्यादृष्टेर्विना ज्ञानं, तद्धि सात्त्विकमानसम् ॥९६॥
ये तेन संयुता लोका, वास्तव्यास्ते प्रकीर्तिताः ।
त एव तत्प्रभावेण, प्रयान्ति विबुधालये ॥९७॥
धनपुत्रकलत्रादेः, शरीरात्कर्मणस्तथा ।
अन्योऽहं भेदतो दुष्टा, महामोहादिशत्रवः ॥९८॥
अज्ञातजैनसिद्धान्ते, कर्मनिर्जरणाज्जने ।
या स्यादेवंविधा बुद्धिः, स विवेक इहेष्यते ॥९९॥ युग्मम् ॥
विवेकादप्रमत्तत्वं, कषायादिनिवर्तने ।
यद्भवेल्लघुदोषाणां, शिखरं तदुदाहृतम् ॥१००॥
चतुर्वर्णमहासङ्घप्रमोदपरकारणम् ।
द्वादशाङ्गं पुनर्जैनं, वचनं पुरमुच्यते ॥१०१॥
वास्तव्यका जनास्तत्र, ये तदादेशकारिणः ।

त एव च चतुर्वर्णा, यथोक्तगुणभूषणाः ॥१०२॥

एष एव च सारोऽत्र, यथार्थो वरमण्डपः ।
यतः-विना चित्तसमाधानं, पुरमेतन्न शोभते ॥१०३॥
वेदिका चासनं चेदं, कथितं प्रकटाक्षरैः ।
यथार्थमेव विज्ञेयमिदं द्वितयमञ्जसा ॥१०४॥
ततो येन मया सर्वमिदं भावार्थसंयुतम् ।
बुद्धं सोऽहं नृपं सैन्यं, भोत्स्ये नास्त्यत्र संशयः ॥१०५॥
ततश्च-बोधावष्टम्भतुष्टात्मा, स प्राह निजमातुलम् ।
माम ! वर्णय राजानं, येनाहमवधारये ॥१०६॥

चारित्रधर्मराजवर्णनं दानादीनि वक्त्राणि ।

ततस्तन्मातुलेनोक्तं, वत्स ! योऽयं नराधिपः ।
लोके चारित्रधर्मोऽयं, प्रसिद्धोऽत्यन्तसुन्दरः ॥१०७॥
अनन्तवीर्यो विख्यातः, प्रगुणो जगते हितः ।
समृद्धः कोशदण्डाभ्यां, ज्ञेयः सर्वगुणाकरः ॥१०८॥
यान्यस्य वत्स ! दृश्यन्ते, चत्वारि वदनानि भोः ! ।
तेषां नामानि ते वक्ष्ये, वीर्याणि च निबोध मे ॥१०९॥
दानं शीलं तपस्तात !, चतुर्थं शुद्धभावनम् ।
एतानि ननु वक्त्राणां, नामान्येषां यथाक्रमम् ॥११०॥
तत्राद्यं दापयत्यत्र, पात्रेभ्यो जैनसत्पुरे ।
सज्ज्ञानं मोहनाशार्थमभयं जगतः प्रियम् ॥१११॥
तथा-सद्धर्माधारदेहानां, यदुपग्रहकारणम् ।
आहारवस्त्रपात्रादि, दीयतामिति भाषते ॥११२॥
दीनान्धकृपणेभ्यश्च, दीयमानं कृपापरैः ।
आहारादिकमेतद्भो !, वदनं न निषेधति ॥११३॥
गवाश्वभूमिहेमानि, यच्चान्यदपि तादृशम् ।
तन्नेच्छति गुणाभावाद्दीयमानमिदं मुखम् ॥११४॥
अन्यच्च-सदाशयकरं वक्त्रमाग्रहच्छेदकारकम् ।
इदं जगति लोकानामनुकम्पाप्रवर्तकम् ॥११५॥
दानाख्यं तदिदं भद्र !, वर्णितं प्रथमं मुखम् ।
भूपतेरस्य शीलाख्यं, द्वितीयमधुना शृणु ॥११६॥

य एते साधवो वत्स !, वर्तन्ते जैनसत्पुरे ।
यदिदं भाषते वक्त्रं, तत्ते सर्वं प्रकुर्वते ॥११७॥
अष्टादश सहस्राणि, नियमानां नरोत्तमाः ।
अस्यादेशेन कुर्वन्ति, सदैते वत्स ! साधवः ॥११८॥
इदमेव हि सर्वस्वमिदमेव विभूषणम् ।
इदमालम्बनं वत्स !, साधूनां शीलमुत्तमम् ॥११९॥
तेभ्यः सम्पूर्णमादेशं, सुखमेतत्प्रयच्छति ।
किञ्चिन्मात्रं प्रकुर्वन्ति, वचोऽस्य मुनिशेषकाः ॥१२०॥
शीलाख्यं वदनं वत्स !, तदिदं वर्णितं मया ।
तृतीयं तु तपोनाम, वदनं तन्निबोध मे ॥१२१॥
चारित्रधर्मराजस्य, वक्त्रमेतन्मनोहरम् ।
आकाङ्क्षार्त्तिविनाशेन, जनेऽत्र कुरुते सुखम् ॥१२२॥
विशिष्टज्ञानसंवेगशमसातकरं परम् ।
तपःसञ्ज्ञमिदं वक्त्रमव्याबाधसुखावहम् ॥१२३॥
इदमस्य नरेन्द्रस्य, वदनं वीक्ष्य सज्जनाः ।
आराध्य च महासत्त्वा, निर्वृतिं यान्ति लीलया ॥१२४॥
तदिदं ते तपोनाम, भूपतेर्वदनं मया ।
कथितं साम्प्रतं वक्ष्ये, चतुर्थं शुद्धभावनम् ॥१२५॥
स्मृतं निरीक्षितं भक्त्या, सज्जनैरिदमञ्जसा ।
निःशेषपापसङ्घातदलनं कुरुते मुखम् ॥१२६॥
अस्यादेशादिमे जैना, भावयन्तीह सज्जनाः ।
"समस्तवस्तुविस्तारमतितुच्छं विनश्वरम् ॥१२७॥
नास्तीह शरणं लोके, दुःखपीडितदेहिनाम् ।
एकश्च जायते जन्तुर्म्रियते च भवोदधौ ॥१२८॥
यदिदं देहिनां किञ्चिच्चित्ताबन्धविधायकम् ।
शरीरं धनमन्यद्वा, सर्वं तद्भिन्नमात्मनः ॥१२९॥
मूत्रान्त्रक्लेदजम्बालपूरितं च कलेवरम् ।
तदत्रात्यन्तबीभत्से, शुचिगन्धो न विद्यते ॥१३०॥
माता भूत्वा पुनर्भार्या, भवत्यत्र भवोदधौ ।

कर्मास्रवो भवत्येव, पापानुष्ठानकारिणाम् ॥१३१॥

निवृत्तानां सदाचाराज्जायते वरसंवरः ।
तपसा तु भवत्येव, सततं कर्मनिर्जरा ॥१३२॥
मृता जाताश्च सर्वेषु, लोकोद्देशेषु जन्तवः ।
भक्षितानि च सर्वेषु, रूपिद्रव्याणि जन्तुना ॥१३३॥
संसारसागरोत्तारकारकश्च जिनोदितः ।
धर्मः सुदुर्लभा चात्र, बोधिः सर्वज्ञदर्शने" ॥१३४॥ अष्टभिः कुलकम् ॥
ये चैवं भावयन्त्यत्र, श्रद्धासंशुद्धबुद्धयः ।
आदेशं वदनस्यास्य, ते धन्यास्ते मनस्विनः ॥१३५॥
चारित्रधर्मराजस्य, वदनं चारुदर्शनम् ।
इदं वत्स ! प्रकृत्यैव, सर्वसौख्यकरं परम् ॥१३६॥
तदेष वदनैर्वत्स !, चतुर्भिः पुरवासिनाम् ।
एषां निःशेषसौख्यानि, करोत्येव महानृपः ॥१३७॥
किञ्च-सर्वेषामेव सुखदो, भुवनोदरचारिणाम् ।
वत्स ! चारित्रधर्मोऽयममृतं कस्य दुःखदम् ? ॥१३८॥
तथापि पापिनः सत्त्वा, भवचक्रनिवासिनः ।
एके नैनं विजानन्ति, निन्दन्त्यन्ये विपुण्यकाः ॥१३९॥
तदेष ते महाराजश्चतुर्वदनसुन्दरः ।
वर्णितः साम्प्रतं वक्ष्ये, परिवारमथाधुना ॥१४०॥

विरतिः ।

यैषा विलोक्यते वत्स !, शुद्धस्फटिकनिर्मला ।
अर्धासने निविष्टाऽस्य, नारी सर्वाङ्गसुन्दरा ॥१४१॥
इयं हि विरतिर्नाम, भार्याऽस्य वरभूपतेः ।
समानगुणवीर्या च, भूभुजाऽनेन वर्तते ॥१४२॥
तथाहि-आह्लादजननी लोके, निर्वृतेर्मार्गदेशिका ।
गता तादात्म्यमेतेन, न भिन्नेयं प्रतीयते ॥१४३॥

चारित्रपञ्चकम् ।

य एते पञ्च दृश्यन्ते, राजानोऽभ्यर्णवर्तिनः ।
एतस्यैव नरेन्द्रस्य, स्वाङ्गभूता वयस्यकाः ॥१४४॥
तत्र च-आद्यः सामायिकाख्योऽयं, भूपतिर्जैनसत्पुरे ।
निःशेषपापविरतिं, वत्स ! कारयते सदा ॥१४५॥

छेदोपस्थापनो नाम, द्वितीयो वत्स ! भूपतिः ।
पापानुष्ठानसङ्घातं, विशेषेण निषेधति ॥१४६॥
परिहारविशुद्धीयस्तृतीयस्तु नरेश्वरः ।
साधूनां दर्शयत्युग्रं, तपोऽष्टादशमासिकम् ॥१४७॥
यस्त्वेष दृश्यते वत्स !, चतुर्थो वरभूपतिः ।
स सूक्ष्मसम्परायाख्यः, सूक्ष्मपापाणुनाशकः ॥१४८॥
अत्यन्तनिर्मलो वत्स !, निर्धूताशेषकल्मषः ।
एष सारो यथाख्यातः, पञ्चमो वरभूपतिः ॥१४९॥
शरीरं जीवितं प्राणाः, सर्वस्वं तत्त्वमुत्तमम् ।
चारित्रधर्मराजस्य, पञ्चाप्येते वयस्यकाः ॥१५०॥
यस्त्वेष निकटे वत्स !, दृश्यते मूलभूपतेः ।
सोऽस्यैव यतिधर्माख्यः, सुतो राज्यधरः परः ॥१५१॥

दशधा यतिधर्मः ।

बहिर्विलोकिता भद्र !, ये त्वया मुनिपुङ्गवाः ।
अत्यन्तवल्लभस्तेषामेष राजसुतः सदा ॥१५२॥
यैरेष दशभिर्वत्स !, परिवारितविग्रहः ।
मानुषाणि प्रकुर्वन्ति, तानि यत्तन्निबोध मे ॥१५३॥
योषिदाद्या क्षमा नाम, मुनीनामपि वल्लभा ।
तेषामुपदिशत्येषा, सदा रोषनिवारणम् ॥१५४॥
डिम्भरूपमिदं तात !, द्वितीयमिह मार्दवम् ।
करोति निजवीर्येण, साधूनामतिनम्रताम् ॥१५५॥
तृतीयमार्जवं नाम, डिम्भरूपमिदं सदा ।
सर्वत्र सरलं भावं, विधत्ते वत्स ! सद्धियाम् ॥१५६॥
एषा तु मुक्तता तात !, चतुर्थी ललना सदा ।
निःसङ्गं बहिरन्तश्च, मुनीनां कुरुते मनः ॥१५७॥
तपोयोग इति ख्यातः, संशुद्धः पञ्चमो नरः ।
युक्तो द्वादशभिर्वत्स !, स्वाङ्गिकैर्वरमानुषैः ॥१५८॥
एतेषां च प्रभावेण, मानुषाणां नरोत्तमः ।

यदेष कुरुते जैने, पुरे तत्ते निवेदये ॥१५९॥

सर्वाहारपरित्यागान्निःस्पृहं कुरुते जनम् ।
वीर्यं च वर्धयत्येष, कारयन्न्यूनभोजनम् ॥१६०॥
अस्यादेशेन कुर्वन्ति, नानाऽभिग्रहसुन्दरम् ।
मुनयो वृत्तिसङ्क्षेपं, शमसातविवर्धनम् ॥१६१॥
तथा-रसभोगं न कुर्वन्ति, मोहोद्रेकादिकारणम् ।
अस्यादेशान्निषेवन्ते, कायक्लेशं सुखावहम् ॥१६२॥
कषायेन्द्रिययोगैश्च, संलीनास्तात ! साधवः ।
विविक्तचर्यया नित्यमासते तेन चोदिताः ॥१६३॥
प्रायश्चित्तं च दशधा, विनयं च चतुर्विधम् ।
वैयावृत्यं च कुर्वन्ति, दशधैवास्य वीर्यतः ॥१६४॥
पञ्चप्रकारं स्वाध्यायं, द्वेधा ध्यानं च सत्तमम् ।
सततं कारयत्येष, मुनिलोकं नरोत्तमः ॥१६५॥
गणोपधिशरीराणामाहारस्य च निःस्पृहाः ।
प्राप्ते काले प्रकुर्वन्ति, त्यागमेतेन चोदिताः ॥१६६॥
लेशोद्देशादिदं वत्स !, तपोयोगविचेष्टितम् ।
वर्णितं विस्तरेणास्य, वर्णने नास्ति निष्ठितिः ॥१६७॥
यस्त्वयं दृश्यते वत्स !, षष्ठोऽमीषां मनोरमः ।
वल्लभो मुनिलोकस्य, संयमाख्यो नरोत्तमः ॥१६८॥
स सप्तदशभिर्युक्तो, मानुषैर्जिनसत्पुरे ।
यथा विजृम्भते तात !, तत्ते सर्वं निवेदये ॥१६९॥
पापास्रवपिधानेन, शा[१]न्तबोधनिराकुलम् ।
पञ्चेन्द्रियविरोधेन, सन्तुष्टं विगतस्पृहम् ॥१७०॥
कषायतापप्रशमाच्चित्तनिर्वाणबन्धुरम् ।
मनोवाक्काययोगानां, नियमेन मनोहरम् ॥१७१॥
सततं धारयत्येष, मुनिलोकं नरोत्तमः ।
संयमाढ्यः स्ववीर्येण,[२] निमग्नं धृतिसागरे ॥१७२॥
अथवा-इलाजलानलगतामनिलाखिलशाखिनाम् ।
हिंसां द्वित्रिचतुष्पञ्चहृषीकाणां निषेधति ॥१७३॥

१. शान्तबोधा० प्र. । २. तेषु स्थितानां ।

अचित्तमपि यद्वस्तु, हिंसाकरमसुन्दरम् ।
ग्रहणं तस्य यत्नेन, वारयत्येष संयमः ॥१७४॥
प्रेक्षणं स्थण्डिलादीनां, गृहस्थानामुपेक्षणम् ।
स्थानादिकरणे सम्यक्, तद्भूमीनां[1] प्रमार्जनम् ॥१७५॥
आहारोपधिशय्यानामशुद्धाधिकभावतः ।
परिष्ठापनमन्तश्च, मनोवाक्कायन्त्रणम् ॥१७६॥
विमुक्तभवकर्तव्यैः, सततं सुसमाहितैः ।
मुनिभिः कारयत्येष, सर्वमेतन्नरोत्तमः ॥१७७॥
तदिदं लेशतो वत्स !, चरितं परिकीर्तितम् ।
नरस्य संयमाख्यस्य, शेषाणां शृणु साम्प्रतम् ॥१७८॥
य एष सप्तमो वत्स !, दृश्यते पुरुषोत्तमः ।
यतिधर्मपरीवारे, सत्यनामातिसुन्दरः ॥१७९॥
हितं मिताक्षरं काले, जगदाह्लादकारणम् ।
अस्यादेशेन भाषन्ते, वचनं मुनिपुङ्गवाः ॥१८०॥
शौचाभिधानो यो वत्स !, वर्तते चाष्टमो नरः ।
द्रव्यभावात्मिकां शुद्धिमस्यादेशेन कुर्वते ॥१८१॥
यदिदं नवमं तात !, डिम्भरूपं मनोहरम् ।
आकिञ्चन्यमिदं नाम, मुनीनामतिवल्लभम् ॥१८२॥
अवाप्तसौष्ठवं वत्स !, बाह्यान्तरपरिग्रहम् ।
मुनिभिर्मोचयत्येतच्छुद्धस्फटिकनिर्मलम् ॥१८३॥
इदं तु दशमं तात !, गर्भ(डिम्भ)रूपं मनोहरम् ।
ब्रह्मचर्यमिति ख्यातं, मुनीनां हृदयप्रियम् ॥१८४॥
दिव्यौदारिकसम्बन्धं, मनोवाक्काययोगतः ।
अब्रह्म वारयत्येतत्कृतकारणमोदनैः ॥१८५॥
तदेष दशभिर्वत्स !, मानुषैः परिवारितः ।
पुरेऽत्र विलसत्येवं, यतिधर्मः स्वलीलया ॥१८६॥

सद्भावसारता ।

एषाऽत्र विलसद्दीप्तिर्बालिकाऽमललोचना ।
सद्भावसारता नाम, भार्याऽस्य मुनिवल्लभा ॥१८७॥

१. आधाकर्मादिदोषादतिरिक्तसद्भावाद्वा ।

अस्यां जीवति जीवन्त्यां, मरणेऽस्या न जीवति ।
अत्यर्थं रतचित्तोऽस्यां, राजसूनुरयं सदा ॥१८८॥
किञ्चेह बहुनोक्तेन ?, दाम्पत्यमिदमीदृशम् ।
निर्मिथ्यस्नेहगर्भार्थं, न दृष्टं कुत्रचिन्मया ॥१८९॥
यः पुनर्दृश्यते तात !, द्वितीयोऽयं कुमारकः ।
गृहिधर्माभिधानोऽसौ, कनिष्ठोऽस्य सहोदरः ॥१९०॥
यदेष कुरुते वत्स !, युक्तो द्वादशमानुषैः ।
जैनेन्द्रसत्पुरे चित्तं, लसन्नुद्दामलीलया ॥१९१॥
तदहं वर्णयिष्यामि, पुरतस्ते वरेक्षण ! ।
चेतः समाहितं कृत्वा, तच्च वत्सावधारय ॥१९२॥ युग्मम् ॥
अत्यन्तस्थूलहिंसायाः, क्वचिद्विरतिसुन्दरम् ।
स्थूलालीकनिवृत्तं च, करोत्येष पुरे जनम् ॥१९३॥
स्थूलस्तेयनिवृत्तं च, परदारपराङ्मुखम् ।
क्वचित्सङ्क्षिप्तसमानं च, सकलेऽपि परिग्रहे ॥१९४॥
परित्यक्तनिशाभक्तं, कृतमानं च संवरे ।
युक्तोपभोगसम्भोगं, कर्मानुष्ठानकारकम् ॥१९५॥
अनर्थदण्डविरतं, सामायिकरतं सदा ।
देशावकाशिके सक्तं, पौषधे कृतनिश्चयम् ॥१९६॥
अतिथेः संविभागेन, परिपूतमनोमलम् ।
करोत्येष जनं वत्स !, गृहिधर्मोऽत्र सत्पुरे ॥१९७॥
किञ्च-यो यावन्तं करोत्यत्र, निर्देशं शक्तितो जनः ।
तस्य तावत्करोत्येष, फलं नास्त्यत्र संशयः ॥१९८॥

सद्गुणरक्तता ।

या त्वेषा बालिका वत्स !, विस्फारितवरेक्षणा ।
दृश्यतेऽस्यैव भार्येयं, नाम्ना सद्गुणरक्तता ॥१९९॥
वत्सला मुनिलोकस्य, गुरूणां विनयोद्यता ।
भर्तरि स्नेहबद्धेयं, वत्स ! सद्गुणरक्तता ॥२००॥

सम्यग्दर्शनसुदृष्टी ।

तदेतौ जैनलोकानां, राजपुत्रौ सभार्यकौ ।
विज्ञातव्यौ प्रकृत्यैव, सततानन्दकारकौ ॥२०१॥

अनयोश्च सदा पित्रा, विहितः परिपालकः ।
अयं महत्तमो वत्स !, सम्यग्दर्शननामकः ॥२०२॥
अनेन रहितावेतौ, दृश्येते न कदाचन ।
एतौ हि वर्धयत्येष, निकटस्थोऽतिवत्सलः ॥२०३॥
अन्यच्च-यानि ते कथितान्यत्र, सप्त तत्त्वानि सत्पुरे ।
दृढनिश्चयमेतेषु, भवचक्रपराङ्मुखम् ॥२०४॥
शमसंवेगनिर्वेदकृपाऽऽस्तिक्यविराजितम् ।
मैत्रीप्रमोदकारुण्यमाध्यस्थ्यैर्भावितात्मकम् ॥२०५॥
सदा प्रयाणकारूढं, निर्वृतौ गमनेच्छया ।
करोत्येष जनं वत्स !, सम्यग्दर्शननामकः ॥२०६॥ त्रिभिर्विशेषकम् ॥
या त्वेषा दृश्यते वत्स !, शुभवर्णा मनोहरा ।
इयमस्यैव सद्भार्या, सुदृष्टिर्नाम विश्रुता ॥२०७॥
इयं हि जैनलोकानां, सन्मार्गे वीर्यशालिनी ।
चित्तस्थैर्यकरी ज्ञेया, विधिना पर्युपासिता ॥२०८॥
एवं च स्थिते-योऽसौ निवेदितस्तुभ्यं, कुदृष्टिसहितः पुरा ।
विचित्रचरितस्तात !, महामोहमहत्तमः ॥२०९॥
तदाचारविरुद्धं हि, सर्वमस्य विचेष्टितम् ।
विज्ञेयं जगदानन्दं, सुविचारितसुन्दरम् ॥२१०॥
स तन्त्रयति यत्नेन, महामोहबलं सदा ।
चारित्रधर्मराजस्य, बलमेष महत्तमः ॥२११॥
सम्यग्दर्शनसञ्ज्ञस्य, तस्मादत्र व्यवस्थितः ।
स एव शत्रुः परमो, मिथ्यादर्शननामकः ॥२१२॥
एवं च स्थिते-त्रिरूपश्च भवत्येष, किञ्चिदासाद्य कारणम् ।
क्षयेण प्रतिपक्षस्य, प्रशमेनोभयेन वा ॥२१३॥

सद्बोधावगती ।

तच्च रूपत्रयं वत्स !, जायेतास्य स्वभावतः ।
यद्वा सम्पादयत्येष, मन्त्री सद्बोधनामकः ॥२१४॥
अयं हि सचिवो वत्स !, सद्बोधो भुवनोदरे ।

तन्नास्ति यन्न जानीते, पुरुषार्थप्रसाधकम् ॥२१५॥

भवद्भूतभविष्यत्सु, भावेषु भवभाविषु ।
विज्ञातुं प्रभवत्येष, सूक्ष्मव्यवहितेषु च ॥२१६॥
किञ्चात्र बहुनोक्तेन ?, जगदेष चराचरम् ।
अनन्तद्रव्यपर्यायं, वीक्षते विमलेक्षणः ॥२१७॥
निपुणो नीतिमार्गेषु, वत्सलश्च महीपतेः ।
चिन्तको राज्यकार्याणां, बले च विहितादरः ॥२१८॥
प्रियो महत्तमस्योच्चैस्तस्य च स्थिरताकरः ।
सकलेऽपि जगत्यत्र, सचिवो नास्त्यमूदृशः ॥२१९॥
किञ्च-ज्ञानसंवरणस्यायं, प्रतिपक्षतया स्थितः ।
क्षयोपशमतस्तस्य, क्षयाच्च द्विविधो मतः ॥२२०॥
इयं तु निकटे वत्स !, निर्मलाङ्गी सुलोचना ।
मन्त्रिणोऽवगतिर्नाम, भार्याऽस्यैव वरानना ॥२२१॥
स्वरूपं जीवितं प्राणाः, सर्वस्वं वर्ततेऽनघा ।
इयमस्य सदा पत्नी, शरीराव्यतिरेकिणी ॥२२२॥
तथा-य एते पञ्च दृश्यन्ते, त इमे पुरुषोत्तमाः ।
अस्यैव तु सद्बोधस्य, स्वाङ्गीभूता वयस्यकाः ॥२२३॥
आद्योऽत्राभिनिबोधोऽयं, वयस्यः पुरवासिनाम् ।
इन्द्रियानिन्द्रियज्ञानं, जनानां जनयत्यलम् ॥२२४॥
द्वितीयः पुरुषो भद्र !, प्रसिद्धोऽयं सदागमः ।
यस्यादेशे स्थितं सर्वं, पुरमेतन्न संशयः ॥२२५॥
कार्याणि मन्त्रयत्येष, निखिलान्यपि भूभुजाम् ।
वचःपाटवयुक्तोऽयं, मूकाः शेषा मनुष्यकाः ॥२२६॥
यतः सदागमस्यास्य, दृष्ट्वा वचनकौशलम् ।
सद्बोधोऽनेन भूपेन, मन्त्रित्वे स्थापितः पुरा ॥२२७॥
अयं सदागमोऽमीषां, सर्वेषां वत्स ! भूभुजाम् ।
बहिश्च जैनलोकानां, ज्ञेयं[१] परमकारणम् ॥२२८॥
अनेन रहितं वत्स !, न कदाचिदिदं बलम् ।
पुरं चेदं जगत्यत्र, स्वरूपेण प्रकाशते ॥२२९॥

१. ज्ञेयः प्र. ।

तदेष सर्वकार्याणामुपदेष्टा सदागमः ।
द्वितीयः पुरुषो वत्स !, प्रधानोऽनेन हेतुना ॥२३०॥
तृतीयोऽवधिनामायं, सद्बोधस्य वयस्यकः ।
अनेकरूपविस्तारकारकोऽयमुदाहृतः ॥२३१॥
क्वचिद्दीर्घं क्वचिद्ह्रस्वं, क्वचित् स्तोकं क्वचिद्बहु ।
वस्तुजातं जगत्यत्र, विलोकयति लीलया ॥२३२॥
चतुर्थः पुरुषो वत्स !, मनःपर्यायनामकः ।
साक्षात्करोति वीर्येण, परेषां यन्मनोगतम् ॥२३३॥
मनुष्यलोके नास्त्यत्र, चित्तं तत्तात ! किञ्चन ।
अनेन यन्न दृश्येत, धीमता भाववेदिना ॥२३४॥
पञ्चमः पुरुषो वत्स !, केवलो नाम विश्रुतः ।
निःशेषज्ञेयविस्तारमेष पश्यति सर्वदा ॥२३५॥
निर्वृतिं नगरीं यान्ति, ये जना जैनसत्पुरात् ।
तेषामेष प्रकृत्यैव, नायकः पुरुषोत्तमः ॥२३६॥
तदेष पञ्चभिर्वत्स !, वयस्यैः परिवारितः ।
सद्बोधसचिवो लोके, साक्षादिव दिवाकरः ॥२३७॥
प्रकर्षेणोदितं माम !, स सन्तोषमहीपतिः ।
न दर्शितस्त्वयाऽद्यापि, यत्र मेऽत्यन्तकौतुकम् ॥२३८॥
ततस्तन्मातुलेनोक्तं, वत्स ! योऽयं पुरः स्थितः ।
संयमस्य स विज्ञेयः, सन्तोषो नात्र संशयः ॥२३९॥
प्रकर्षेणोक्तं–यस्योपरि समायाता, महामोहादिभूभुजः ।
विक्षेपेण स सन्तोषो, नैष किं मूलनायकः ? ॥२४०॥
विमर्शेनोदितं वत्स !, नैवायं मूलनायकः ।
चारित्रधर्मराजस्य, पदातिरिति गृह्यताम् ॥२४१॥
शूरो नीतिपरो दक्षः, सन्धिविग्रहवेदकः ।
तेनैष तन्त्रपालत्वे, नियुक्तो मूलभूभुजा ॥२४२॥
सम्पूर्णबलसामग्र्या, भ्रमतोद्दामलीलया ।
अनेन स्पर्शनादीनि, तानि दृष्टानि कुत्रचित् ॥२४३॥
ततोऽभिभूय तान्येष, स्वमाहात्म्येन निर्वृतौ ।
नयति स्म जनं कञ्चिद्बलेनैषां महाभुजाम् ॥२४४॥

ततो विज्ञाय वृत्तान्तमेनं ते जनवार्तया ।
महामोहादिभूपालाश्चलिता रणकाम्यया ॥२४५॥
ततस्तैः स्वधिया वत्स !, कल्पितो मूलनायकः ।
पदातिरपि सन्तोषस्तत्रेदं हन्त कारणम् ॥२४६॥
तावन्मात्रं जनो वेत्ति, यावन्मात्रं किलेक्षते ।
यतः सितोदरोऽपीह, कृष्णः सर्पोऽभिधीयते ॥२४७॥
अनेन स्पर्शनादीनि, निहतानीति वार्तया ।
अस्योपरि यथा रोषस्तेषां शेषेषु नो तथा ॥२४८॥
सन्तोषमुररीकृत्य, ततो विग्रहवाञ्छया ।
महामोहादयो वत्स !, स्वपुरेभ्यो विनिर्गताः ॥२४९॥
चित्तवृत्तिमहाटव्यां, रणमेषामनेकशः ।
सञ्जातं न च सञ्जातौ, स्फुटौ जयपराजयौ ॥२५०॥
यतः-क्वचिज्जयति सन्तोषस्तन्त्रपालोऽरिसंहतिम् ।
प्रभवन्ति क्वचित्तेऽपि, महामोहादिभूभुजः ॥२५१॥
एवं च स्थिते-सदा सैन्यद्वयस्यास्य, रुषाऽन्योऽन्यं जिगीषतः ।
कालो गच्छति पद्माक्ष !, न जाने किं भविष्यति ? ॥२५२॥
स एष दर्शितस्तुभ्यं, मया सन्तोषतन्त्रपः ।
आख्यातश्चास्य वृत्तान्तो, यत्र तेऽत्यन्तकौतुकम् ॥२५३॥

निष्पिपासिता ।

या त्वस्य पार्श्वे पद्माक्षी, दृश्यते वत्स ! बालिका ।
सा निष्पिपासिता नाम, भार्याऽस्यैव वरानना ॥२५४॥
शब्दरूपरसस्पर्शगन्धेषु सुधियां मनः ।
निस्तृष्णाकं[१] करोत्येषा, रागद्वेषविवर्जितम् ॥२५५॥
लाभालाभे सुखे दुःखे, सुन्दरेऽसुन्दरेऽपि च ।
तथाऽऽहारादिके जाते, सन्तुष्टिं जनयत्यलम् ॥२५६॥
तदेवं वत्स ! बुध्यस्व, निर्विकल्पेन चेतसा ।
चारित्रधर्मराजोऽत्र, नायकः परमार्थतः ॥२५७॥
अस्य च-यतिधर्मः सुतो ज्यायान्, गृहिधर्मः कनिष्ठकः ।
मन्त्री सद्बोधनामायं, निविष्टो राज्यचिन्तकः ॥२५८॥

१. निस्तृष्णाकम् प्र. ।

महत्तमस्तु विज्ञेयः, सम्यग्दर्शननामकः ।
सन्तोषस्तन्त्रपालोऽयमेवं वत्सावधारय ॥२५९॥
महामोहादयः सर्वे, यथा भुवनतापकाः ।
तथैते वत्स ! विज्ञेया, भुवनाह्लादकारिणः ॥२६०॥
एते हि जगदालम्बा, एते हितविधायकाः ।
एते समस्तजन्तूनां, पारमार्थिकबान्धवाः ॥२६१॥
एते निरन्तसंसारसागरोत्तारकारकाः ।
अनन्ताह्लादसन्दोहदायका जगतो मताः ॥२६२॥
चारित्रधर्मराजाद्याः, सर्वेऽप्येते नरेश्वराः ।
सुखहेतव एवात्र, सर्वेषामपि देहिनाम् ॥२६३॥
तदेते स्वाङ्गिकास्तात !, तावदित्थं मयाऽखिलाः ।
चारित्रधर्मराजस्य, बान्धवास्ते निवेदिताः ॥२६४॥
ये त्वमी वेदिकाऽभ्यर्णे, वर्तन्ते मण्डपस्थिताः ।
शुभाशयादयस्तात !, तेऽप्यस्यैव पदातयः ॥२६५॥
अस्यादेशेन कुर्वन्ति, सुन्दराणि सदा जने ।
एते कार्याणि भूपाला, निर्मिथ्यममृतोपमाः ॥२६६॥
किञ्च–मनुष्या योषितो डिम्भा, ये लोकाः सुखहेतवः ।
विवर्तन्ते समस्तास्ते, मध्येऽमीषां महीभुजाम् ॥२६७॥
ततश्च–असङ्ख्यातजनं वत्स !, पूरितं भूरिभूमिपैः ।
निःशेषमिदमास्थानं, को हि वर्णयितुं क्षमः ॥२६८॥

चारित्रनृपसैन्यम् ।

ततो मयेदं ते वत्स !, समासेन निवेदितम् ।
गच्छावः साम्प्रतं द्वारे, यदि पूर्णं कुतूहलम् ॥२६९॥
एवं भवतु तेनोक्ते, विनिर्गत्य विलोकितम् ।
चतुरङ्गं बलं ताभ्यां, तदीयं तच्च कीदृशम् ॥२७०॥
गाम्भीर्यौदार्यशौर्यादिनामभिः स्यन्दनैः सदा ।
प्रेङ्खद्घणघणारावपूरिताशेषदिक्पथम् ॥२७१॥
यशःसौष्ठवसौजन्यप्रश्रयादिमहागजैः ।
विलसत्कण्ठनिर्घोषसंरुद्धभुवनोदरम् ॥२७२॥

बुद्धिपाटववाग्ग्मित्वनैपुण्यादितुरङ्गमैः ।
महाहेषारवापूर्णसत्प्रजाकर्णकोटरम् ॥२७३॥
अचापलमनस्वित्वदाक्षिण्यादिपदातिभिः ।
अलब्धगाधविस्तीर्णस्मिमितोदधिविभ्रमम् ॥२७४॥ चतुर्भिः कलापकम् ॥
ततश्चैवंविधं वीक्ष्य, चतुरङ्गं महाबलम् ।
प्रकर्षश्चेतसा तुष्टः, प्रोवाच निजमातुलम् ॥२७५॥
यथेष्टमधुना माम !, पूरितं मे कुतूहलम् ।
यदत्र किञ्चिद्द्रष्टव्यं, तत्सर्वं दर्शितं त्वया ॥२७६॥
तथाहि-दर्शितं भवचक्रं मे, नानावृत्तान्तसङ्कुलम् ।
महामोहादिवीर्यं च, कारणैरपरापरैः ॥२७७॥
विवेकपर्वतश्चायं, दर्शितो मे मनोहरः ।
निवेदितं च सल्लोकैः, पूर्णं सात्त्विकमानसम् ॥२७८॥
शिखरं चाप्रमत्तत्वं, जैनं चेदं महापुरम् ।
युक्तं महात्मभिर्लोकैर्दर्शितं मम सुन्दरम् ॥२७९॥
तथा चित्तसमाधानो, मण्डपो वेदिका च मे ।
त्वया निःस्पृहताऽऽख्याता, जीववीर्यं च विष्टरम् ॥२८०॥
वर्णितश्च महाराजः, साक्षात्करणपूर्वकम् ।
प्रत्येकं वर्णिताः सर्वे, भूपालास्तस्य सेवकाः ॥२८१॥
इदं च दर्शितं रम्यं, चतुरङ्गं महाबलम् ।
एवं च कुर्वता माम !, नास्ति तद्यन्न मे कृतम् ॥२८२॥
जनितः पूतपापोऽहं, कृतो बृहदनुग्रहः ।
कृपापरीतचित्तेन, पूरिता मे मनोरथाः ॥२८३॥
तथापि रमणीयेऽत्र, वस्तुमिच्छामि साम्प्रतम् ।
दिनानि कतिचिन्माम !, लीलया जैनसत्पुरे ॥२८४॥
किञ्च-स्थितो मासद्वयं यावत्, सद्विचारपरायणः ।
पुरे तथा तथा प्राज्ञो, जायेऽहं त्वत्प्रसादतः ॥२८५॥
अहं च परमां काष्ठां, नेयो मामेन सर्वथा ।
अतो जैनपुरे तावदत्र त्वं वस्तुमर्हसि ॥२८६॥
ततस्तन्मातुलेनोक्तं, या तवेच्छा प्रवर्तते ।
तामेष त्वत्सुखाकाङ्क्षी, किं भनक्ति वशो जनः ? ॥२८७॥

महाप्रसाद इत्युक्त्वा, ततस्तत्रैव सत्पुरे ।
स्थितो मासद्वयं यावत्स प्रकर्षः समातुलः ॥२८८॥

ग्रीष्मवर्णनम् ।

इतश्च मानवावासे, वसन्तो लङ्घितस्तदा ।
आदेशेन महादेव्याः, प्राप्तो ग्रीष्मः सुदारुणः ॥२८९॥
यत्र ग्रीष्मे-जगत्कोष्ठकमध्यस्थो, लोहगोलकसन्निभः ।
ध्मायते चण्डवातेन, जगद्दाहकरो रविः ॥२९०॥
जायते पत्रशाटस्तरूणामलं हीयते देहिनां यत्र देहे बलं,
पीयते प्राणिभिर्भूरिधाराजलं शुष्यते चास्यमेषां तृषाऽत्यर्गलम् ।
दह्यते तीव्रतापेन, सर्वो जनः खिद्यते स्वेदनिर्वेदितं तन्मनो,
वान्ति वाताः सतप्ता जगत्तापिनः शुष्कपत्रावलीमर्मरारविणः ॥२९१॥
अपि च-भानोरिव प्रतापेन, सन्तुष्टं वर्धितं दिनम् ।
स्वामिनोऽभ्युदये सर्वः, सन्तोषादभिवर्धते ॥२९२॥

यत्र च विदलिता मल्लिकाः, विकसिता जात्यपाटलाः, श्यामलितं कुसुमभरेण शिरीषवनं, सुभगीभूताश्चन्द्रकिरणाः, हृदयदयिता जलाशयाः, मनोऽभिरुचिता मौक्तिकहारयष्टयः, अतिवल्लभानि विमलहर्म्यतलानि, प्रियतमानि चन्दनविलेपनानि, अमृतायन्ते तालवृन्तव्यजनकानि, सुखायन्ते शिशिरकिसलयकुसुमस्रस्तराः, लगन्ति बहिःशरीरनिहिता अपि जनानामन्तर्मानसे चन्दनजलार्द्रा इति ।

ततश्चैवंविधे काले, भागिनेयमभाषत ।
गच्छावः साम्प्रतं वत्स !, स्वस्थानमिति मातुलः ॥२९३॥
प्रकर्षः प्राह गमने, दारुणोऽवसरोऽधुना ।
तन्नाहं माम ! शक्नोमि, गन्तुमेवंविधेऽध्वनि ॥२९४॥
ततो मासद्वयं तिष्ठ, माम ! सन्तापदारुणम् ।
येनाहं शीतलीभूते, दिक्चक्रे यामि सत्वरम् ॥२९५॥
किञ्च-विचारपरयोः स्थानमावयोर्गुणकारणम् ।
अत्र जैनपुरे माम !, मा मंस्था निष्प्रयोजनम् ॥२९६॥
यतः-मम स्थैर्यं भवेदेवं, पुरस्यास्य गुणोत्करे ।
ततस्तातोऽपि जायेत, मद्गुणादत्र बद्धधीः ॥२९७॥

प्रावृड्वर्णनम् ।

एवं भवतु तेनोक्ते, ततस्तत्रैव सत्पुरे ।
तिष्ठतोः प्रावृडायाता, तयोः सा हन्त कीदृशी ॥२९८॥

घनतुङ्गपयोधरभारधरा, लसदुज्ज्वलविद्युदलङ्करणा ।
कृतसन्ततगर्जितधीररवा, दृढगोपितभास्करजाररता ॥२९९॥
रटदुद्भटदर्दुरषिङ्गनरा, चलशुभ्रबलाहकहासपरा ।
गिरिकोटरनृत्तशिखण्डिवरा, बहुलोकमनोहररूपधरा ॥३००॥
सुसुगन्धिकदम्बपरागवहा, विटकोटिविदारणमोदसहा ।
इति रूपविलासलसत्कपटा, भुवनेऽत्र रराज यथा कुलटा ॥३०१॥
अथ तां तादृशीं वीक्ष्य, प्रावृषं हृष्टमानसः ।
प्रकर्षो गमनोद्युक्तः, प्रोवाच निजमातुलम् ॥३०२॥
गम्यतामधुना माम !, त्वरितं तातसन्निधौ ।
यतोऽमी शीतलीभूता, वर्तन्ते सुगमाः पथाः ॥३०३॥
विमर्शेनोदितं वत्स !, मैवं वोचः कदाचन ।
यतोऽधुना व्यवच्छिन्नौ, विशेषेण गमागमौ ॥३०४॥
तथाहि-सुच्छन्नगृहमध्यस्थाः, स्वाधीनदयिताननाः ।
वर्षासु धन्या गण्यन्ते, जनैर्ये न प्रवासिनः ॥३०५॥
तथाहि-पश्यतु वत्स ! जलपूरितमार्गेषु, पङ्कक्लिन्नेषु गच्छतः ।
स्खलित्वा पतितानेते, हसन्ति कुटजोत्कराः ॥३०६॥
निपतद्वारिधारौघहता ये यान्ति पापिनः ।
देशान्तरेषु तान्मेघो, मारयामीति गर्जति ॥३०७॥
एवं व्यवस्थिते तात !, मुच्यतां गमनादरः ।
यथेयन्तं स्थितः कालं, तिष्ठात्रैव तथाऽधुना ॥३०८॥
किञ्च-गच्छन्नत्र बहुः कालो, न दोषाय गुणावहः ।
यतः सोऽनुक्षणं वत्स !, जायते तव वृद्धये ॥३०९॥
एवं भवतु तेनोक्ते, पुनर्मासचतुष्टयम् ।
स्थित्वा समागतौ गेहे, हृष्टौ स्वस्रीयमातुलौ ॥३१०॥
अथ प्रविष्टौ तौ गेहे, दत्तास्थाने शुभोदये ।
भार्यायुक्ते च तस्यैव, निकटस्थे विचक्षणे ॥३११॥
ततो विधाय सद्भक्त्या, प्रणामं विहिताञ्जली ।
तेषां पुरो निविष्टौ तौ, विनयाच्छुद्धभूतले ॥३१२॥
बलादुत्थाप्य बुद्ध्याऽसौ, विमर्शः स्निग्धचेतसा ।
आलिङ्गितः प्रयत्नेन, तद्भार्या च पुनः पुनः ॥३१३॥

प्रकर्षोऽपि समालिङ्ग्य, स्नेहनिर्भरमानसैः ।
निजाङ्के स्थापितः सर्वैः, परिपाट्याऽतिवल्लभः ॥३१४॥
आघ्रातो मूर्धदेशे च, कुशलं च मुहुर्मुहुः ।
आनन्दोदकपूर्णाक्षैः, पृष्टः सर्वैः समातुलः ॥३१५॥
ततो यथा विनिर्गत्य, गेहाद्बाह्येषु हिण्डितौ ।
ततोऽन्तरङ्गदेशेषु, यथा पर्यटितौ पुनः ॥३१६॥
यथा पुरद्वयं दृष्टं, यथा दृष्टा महाटवी ।
विलोकितं यथा स्थानं, महामोहादिभूभुजाम् ॥३१७॥
रसनामूलशुद्धिश्च, यथा सम्यग्विनिश्चिता ।
यथेयं वर्तते पुत्री, रागकेसरिमन्त्रिणः ॥३१८॥
कुतूहलवशेनैव, भवचक्रं यथा गतौ ।
निरीक्षितं च तत्सर्वं, नानावृत्तान्तसङ्कुलम् ॥३१९॥
यथा दृष्टा महात्मानो, विवेकवरपर्वते ।
चारित्रधर्मराजस्य, यथा स्थानं विलोकितम् ॥३२०॥
यथा दृष्टः स सन्तोषो, यच्च तेन विचेष्टितम् ।
यच्च कारणमुद्दिश्य, भूरिकालोऽतिवाहितः ॥३२१॥

जडे रसनालोलतामहिमा ।

तदिदं तेन निःशेषं, विमर्शेन परिस्फुटम् ।
पुरो विचक्षणादीनां, विस्तरेण निवेदितम् ॥३२२॥ सप्तभिः कुलकम् ॥
इतश्च मांसमद्याद्यैर्लालयंस्तामसौ जडः ।
रसनां लोलतावाक्यैर्न चेतयति किञ्चन ॥३२३॥
स तस्या लालने सक्तः, कुर्वाणः कर्म गर्हितम् ।
न पश्यति महापापं, न लज्जां न कुलक्रमम् ॥३२४॥
अन्यदा लोलतावाक्यैर्मद्यविह्वलचेतसा ।
महाजं मारयामीति, मारितः पशुपालकः ॥३२५॥
ततश्च तमजारक्षं, पशुभ्रान्त्या निपातितम् ।
निरीक्ष्य लोलतादुःखाज्जडेनेदं विचिन्तितम् ॥३२६॥
ललिता[१] रसना नूनं, मांसैर्नानाविधैर्मया ।
इदं तु मानुषं मांसं, नैव दत्तं कदाचन ॥३२७॥

१. लालिता प्र. ।

ततोऽधुना ददामीदमस्यै पश्यामि यादृशः ।
अनेन जायते तोषो, रसनायाः सुखावहः ॥३२८॥
ततः संस्कृत्य तद्दत्तं, तेन जाता प्रमोदिता ।
रसना लोलता तुष्टा, सोऽपि हर्षमुपागतः ॥३२९॥
भूयश्च लोलतावाक्यैरपरापरमानुषान् ।
निहत्य भार्यया सार्धं, खादन् जातः स राक्षसः ॥३३०॥
ततो बालजनेनापि, निन्दितो बन्धुवर्जितः ।
लोकेन परिभूतश्च, स जातः पापकर्मणा ॥३३१॥
अन्यदा लोलतायुक्तो, मनुष्याणां जिघांसया ।
प्रविष्टश्चौरवद्रात्रौ, गृहे शूरकुटुम्बिनः ॥३३२॥
ततः प्रसुप्तं तत्सूनुं, गृहीत्वा निःसरन् बहिः ।
स दृष्टस्तेन शूरेण, जडः क्रोधान्धचेतसा ॥३३३॥
ततः कलकलारावं, कुर्वता सह बान्धवैः ।
तेनास्फोट्य निबद्धोऽसौ, मारितो यातनाशतैः ॥३३४॥
प्रभाते च स वृत्तान्तः, सञ्जातः प्रकटो जने ।
तथापि किञ्चिच्छूरस्य, न कृतं जडबन्धुभिः ॥३३५॥
किं तर्हि ? प्रत्युत तैश्चिन्तितं, यदुत-

विचक्षणविचारः ।

शूरेण विहितं चारु, यदसौ कुलदूषणः ।
अस्माकं लाघवोत्पादी, जडः पापो निपातितः ॥३३६॥
अमुं च जडवृत्तान्तं, निरीक्ष्य स विचक्षणः ।
ततश्च चिन्तयत्येवं, निर्मलीमसमानसः ॥३३७॥
अये !-इह लोके जडस्येदं, रसनालालने फलम् ।
सञ्जातं परलोके तु, दुर्गतिः सञ्जनिष्यति ॥३३८॥
ततोऽत्यर्थं विरक्तोऽसौ, रसनालालनं प्रति ।
स्थितो विचक्षणस्तावत्, यावत्तौ समुपागतौ ॥३३९॥
ततश्च-कथितायां विमर्शेन, मूलशुद्धौ सविस्तरम् ।
रसनां त्यक्तुकामोऽसौ, पितरं प्रत्यभाषत ॥३४०॥
तात ! दृष्टविपाकेयं, रसना साम्प्रतं जडे ।
दुहिता दोषपुञ्जस्य, रागकेसरिमन्त्रिणः ॥३४१॥

तदेनामधुना दुष्टां, भार्यां दुष्टकुलोद्भवाम् ।
सर्वथा त्यक्तुमिच्छामि, ताताहं त्वदनुज्ञया ॥३४२॥
ततः शुभोदयेनोक्तं, भार्येति प्रथिता जने ।
तवेयं रसना तस्मान्नाकाण्डे त्यागमर्हति ॥३४३॥
अतः क्रमेण मोक्तव्या, त्वयेयं वत्स ! सर्वथा ।
तदत्र प्राप्तकालं ते, तदाकर्णय साम्प्रतम् ॥३४४॥
ये ते तुभ्यं महात्मानो, विमर्शेन निवेदिताः ।
विवेकपर्वतारूढा, महामोहादिसूदनाः ॥३४५॥
तेषां मध्ये स्थितस्येयं, तदाचारेण तिष्ठतः ।
दुष्टापि रसना वत्स !, न ते किञ्चित्करिष्यति ॥३४६॥
तस्मादारुह्य यत्नेन, तं विवेकमहागिरिम् ।
रसनादोषनिर्मुक्तस्तिष्ठ त्वं सकुटुम्बकः ॥३४७॥
ततो विचक्षणेनोक्तं, तात ! दूरे स पर्वतः ।
कथं कुटुम्बसहितस्तत्राहं गन्तुमुत्सहे ॥३४८॥
शुभोदयोऽब्रवीद्वत्स !, न कार्यं भवता भयम् ।
विमर्शो यस्य ते बन्धुश्चिन्तामणिरिवातुलः ॥३४९॥
यतोऽस्य विद्यते वत्स !, विमर्शस्य वराञ्जनम् ।
तद्बलाद्दर्शयत्येष, तमिहैव महागिरिम् ॥३५०॥
प्रकर्षेणोदितं तात !, सत्यमेतन्न संशयः ।
अनुभूतं मयाऽप्यस्य, योगाञ्जनविजृम्भितम् ॥३५१॥

विमलालोकलाभः ।

किं बहुना ?–यावदेष महावीर्यं, न प्रयुङ्क्ते वराञ्जनम् ।
तावदेव न दृश्यन्ते, ते पर्वतपुरादयः ॥३५२॥
यदा तु विमलालोकमयं युङ्क्ते तदञ्जनम् ।
तदा सर्वत्र भासन्ते, ते पर्वतपुरादयः ॥३५३॥
ततो विचक्षणेनोक्तो, विमर्शो भद्र ! दीयताम् ।
मह्यं तदञ्जनं तूर्णं, यद्यस्ति तव तादृशम् ॥३५४॥
ततोऽनुग्रहबुद्ध्यैव, सादरं प्रतिपादितम् ।
विचक्षणाय निःशेषं, विमर्शेन तदञ्जनम् ॥३५५॥

ततस्तदुपयोगेन, क्षणादेव पुरः स्थितम् ।
विचक्षणेन यद्दृष्टं, तदिदानीं निबोधत ॥३५६॥
यत्तल्लोकशताकीर्णं, पुरं सात्त्विकमानसम् ।
यश्चासौ विमलस्तुङ्गो, विवेको नाम पर्वतः ॥३५७॥
यच्च तच्छिखरं रम्यमप्रमत्तत्वनामकम् ।
यच्चोपरिष्टात्तस्यैव, निविष्टं जैनसत्पुरम् ॥३५८॥
ये च लोका महात्मानः, साधवस्तन्निवासिनः ।
यश्च चित्तसमाधानो, मध्यस्थस्तत्र मण्डपः ॥३५९॥
या च निःस्पृहता नाम, वेदिका तत्र संस्थिता ।
तस्याश्चोपरि यच्चारु, जीववीर्यं महासनम् ॥३६०॥
चारित्रधर्मराजश्च, परिवारविवेष्टितः ।
ये च तस्य गुणाः शुभ्रा, ये च तेषां महीभुजाम् ॥३६१॥
तदिदं भो महाराज !, तदानीं नरवाहन ! ।
विचक्षणेन निःशेषं, साक्षादेवावलोकितम् ॥३६२॥ षड्भिः कुलकम् ॥

विचक्षणप्रव्रज्या ।

ततश्च भो भो महानरेन्द्र नरवाहन ! स विचक्षणः सहैव तेन शुभोदयेन पित्रा युक्त एव तया निजचारुतया मात्रा आलिङ्गित एव तया प्रियभार्यया बुद्ध्या सहित एव तेन श्वशुर्येण विमर्शेन अन्वित एव वक्षःस्थलशायिना तेन प्रकर्षेण प्रियतमतनयेन समुपेत एव वदनकोटरवने वर्तमानया रसनाभार्यया सर्वथा सकुटुम्बक एव केवलं तामेकां लोलतां दासचेटीं परित्यज्य निराकृत्य च परुषक्रियया सम्प्राप्य गुणधरनामानमाचार्यं प्रव्रजितः । तेन स्थितस्तेषां जैनपुर-निवासिनां भगवतां साधूनां मध्ये किलाहं प्रव्रजित इति मन्यमानः, ततः शिक्षितः समस्तोऽपि तेन तेषामाचारो, निषेवितः परमभक्त्या, विसर्जिता सा रसना सर्वथा विहिताऽत्यर्थमकिञ्चित्करी । ततः स्थापितस्तेन गुरुणा निजपदे स विचक्षणः, स चान्यत्रापि दृश्यमानः परमार्थतस्तत्रैव विवेकगिरिशिखरवासिनि जैनपुरे द्रष्टव्यः ।

आचार्यनृपजल्पः ।

यतो भो महाराज नरवाहन ! स विचक्षणोऽहमेव विज्ञेयः, एते च ते महात्मानः साधवो मन्तव्याः, ततो महाराज ! यद्भवद्भिरभ्यधायि, यदुत-किं ते वैराग्यकारणमिति, तदिदं मम वैराग्यकारणं, इयं चेदृशी मदीया प्रव्रज्येति । एवं च व्यवस्थिते-

भार्यादोषेण यो नाथ !, प्रव्रज्यां समुपागतः ।
न च साऽपि परित्यक्ता, सर्वथा येन पापिनी ॥३६३॥
यश्च पालयेद[1]ऽद्यापि, कुटुम्बं तदवस्थितम् ।
तस्य मे कीदृशी नाम, प्रव्रज्या भूप ! कथ्यताम् ! ॥३६४॥
तथापि ते महाराज ! यन्ममोपरि गौरवम् ।
तर्कयन्ना[2]पि तत्राहं, न जाने बत कारणम् ॥३६५॥
यतः-सदोषेऽपि गुणारोपी, जगदाह्लादकारकः ।
किमेषोऽचिन्त्यसौन्दर्यः, सज्जनप्रकृतेर्गुणः ॥३६६॥
तथाहि-नूनमेषा सतां दृष्टिश्चापयष्टिरपूर्विका ।
अकारणेऽपि या नित्यं, गुणारोपपरायणा ॥३६७॥
किं वा भुवनवन्द्यस्य, गुणोऽयं हतविद्विषः ।
अस्यैव जैनलिङ्गस्य, यत्रैते संस्थिता वयम् ? ॥३६८॥
तथाहि-सुरेन्द्रा अपि वन्दन्ते, तं भक्तिभरपूरिताः ।
करस्थं यस्य पश्यन्ति, जैनेन्द्रं लिङ्गमञ्जसा ॥३६९॥
किञ्चान्यत्कारणं किञ्चिद्गृहस्थाचारधारकः ।
येनेदृशोऽपि ते राजन्नहं दुष्करकारकः ॥३७०॥

एवं च वदति भगवति विगलितमदचेतसि विचक्षणसूरौ नरवाहनराजेन चिन्तितम्-अहो निजचरितकथनेन भगवता जनितो मे मोहविलयः, अहो भगवतां वचनविन्यासः, अहो विवेकित्वम्, अहो मय्यनुग्रहपरता, अहो दृष्टपरमार्थतेति । विज्ञातश्च मया सर्वस्यास्य भगवद्भाषितस्य गर्भार्थः । ततोऽभिहितमनेन-

भदन्त ! यादृशं लोके, सम्पन्नं ते कुटुम्बकम् ।
अधन्यास्तादृशं नूनं, प्राप्नुवन्ति न मादृशाः ॥३७१॥
इदं च पोषयन्नत्र, जैनलिङ्गे च संस्थितः ।
भदन्त ! भगवानेव, गृहस्थो भवतीदृशः ॥३७२॥
अन्यच्च-कृताऽकिञ्चित्करी येन, रसनाऽपि महात्मना ।
अत्यन्त[3]दुर्जया, लोके, लोलता च निराकृता ॥३७३॥
महामोहादिवर्गं च, जित्वा यो जैनसत्पुरे ।
स्थितोऽसि साधुमध्यस्थः, कुटुम्बसहितो मुने ! ॥३७४॥

१. पालयते प्र. । २. ०न्नापि प्र. । ३. ०न्तादु० प्र. ।

स चेत्त्वं न भवस्यत्र, हन्त दुष्करकारकः ।
कीदृशास्ते भवन्त्यन्ये, ब्रूहि दुष्करकारकाः ? ॥३७५॥
यश्चायं तव सम्पन्नो, वृत्तान्तो जगदद्भुतः ।
एतद्वृत्तान्तयुक्ता ये, ते वन्द्याः प्रतिभान्ति मे ॥३७६॥
तद्भदन्त ! किमेतेषां, साधूनामयमीदृशः ।
सम्पन्न एव वृत्तान्तः, किंवा नेति निवेद्यताम् ॥३७७॥
ततो विचक्षणेनोक्तं, सर्वेषामयमीदृशः ।
साधूनां भूप ! सम्पन्नो, वृत्तान्तो नास्ति संशयः ॥३७८॥
अन्यच्च-सम्पद्यते तवापीह, वृत्तान्तोऽयं नरेश्वर ! ।
यदि त्वं कुरुषे सद्यो, यादृशं मादृशैः कृतम् ॥३७९॥
दर्शयामि क्षणेनैवं, तं विवेकमहागिरिम् ।
ततस्तज्जायते तेऽत्र, स्वयमेव कुटुम्बकम् ॥३८०॥
ततश्च-महामोहादिवर्गं च, स्वयमेव विजेष्यसि ।
लोलतां च निराकृत्य, रंस्यसे साधुमध्यगः ॥३८१॥
ततो भगवतो वाक्यमाकर्ण्येदं मनोरमम् ।
स्वचित्ते चिन्तयत्येवं, नरवाहनपार्थिवः ॥३८२॥
अहो भगवता प्रोक्तमिदमत्र परिस्फुटम् ।
य एवोत्सहते दोर्भ्यां, तस्यैव प्रभुता करे ॥३८३॥
ततो भागवतीं दीक्षां, गृहाण किल भूपते ! ।
तव सम्पद्यते येन, सम्पन्नं यत्तु मादृशाम् ॥३८४॥
अहो भगवता चारु, ममादिष्टं महात्मना ।
गृह्णाम्येवाधुना दीक्षामिति चित्तेऽवधारितम् ॥३८५॥
ततो विघटितानिष्टदुष्टपापाणुसञ्चयः ।
अवोचत गुरुं नत्वा, स राजा नरवाहनः ॥३८६॥
भदन्त ! यदि [1]या काचिद्विद्यते योग्यतेदृशी ।
ततः करोम्यहं तादृक्, कृतं यादृग् भवादृशैः ॥३८७॥
किञ्चानेन !-दीयतां जिनदीक्षा मे, क्रियतां मदनुग्रहः ।
ततो युष्मत्प्रसादेन, सर्वं चारु भविष्यति ॥३८८॥

१. मे प्र. ।

सूरिणाऽभिहितं भूप !, सुन्दरस्ते विनिश्चयः ।
युक्तमेतद्धि भव्यानां, कृत्यमेतद्भवादृशाम् ॥३८९॥
नूनं मदीयवाक्यस्य, सद्भावार्थोऽवधारितः ।
सञ्जातस्तेन ते भूप !, महोत्साहोऽयमीदृशः ॥३९०॥
तथाहि-तादृक्षु वल्गमानेषु, महामोहादिशत्रुषु ।
को वा नाश्रयते दुर्गं, सुक्षेमं जैनसत्पुरम् ? ॥३९१॥
निश्चिन्तो गृहवासेऽत्र, को वा दुःखौघपूरिते ? ।
आसीत विदिते जैने, सत्पुरे सुखसागरे ॥३९२॥
अलं कालविलम्बेन, राजन्नत्र महाभये ।
एवं ते ज्ञाततत्त्वस्य, युक्तमत्र प्रवेशनम् ॥३९३॥
ततो भागवतं वाक्यं, श्रुत्वा सन्तुष्टचेतसा ।
तदेतच्चिन्तितं राज्ञा, दीक्षाग्रहणकाम्यया ॥३९४॥
राज्ये कं स्थापयामीति, को वा योग्योऽस्य मत्सुतः ।
ततो विस्फारिता दृष्टिर्नीलाब्जदललासिनी ॥३९५॥
अथागृहीतसङ्केते ! तदाऽहं रिपुदारणः ।
तथा निषण्णस्तत्रैव, निर्भाग्यो रोररूपकः ॥३९६॥
इतश्च-कृशोऽप्यसौ शरीरेण, तथा तातस्य पश्यतः ।
पुण्योदयो वयस्यो मे, मनाक् सस्फुरतां गतः ॥३९७॥
ततश्च-दृष्टो निरीक्ष्यमाणेन, तातेनामलचेतसा ।
ततो मां वीक्ष्य तातस्य, पुनः प्रत्यागतं मनः ॥३९८॥
चिन्तितं च ततस्तेन, स एष रिपुदारणः ।
मया बहिष्कृतो गेहात्तपस्वी शोच्यतां गतः ॥३९९॥
हा हा मयेदं नो चारु, कृतं यत्सुतभर्त्सनम् ।
विषवृक्षोऽपि संवर्ध्य, स्वयं छेत्तुमसाम्प्रतम् ॥४००॥
तदिदं प्राप्तकालं मे, तथेदं जनकोचितम् ।
इदमेव सतां युक्तमिदं दुष्कृतशोधनम् ॥४०१॥

रिपुदारणस्य राज्याभिषेकः ।

यदुत-एनं राज्येऽभिषिञ्चामि, सम्पूज्य रिपुदारणम् ।
ततश्च कृतकृत्योऽहं, दीक्षां गृह्णामि निर्मलाम् ॥४०२॥

भद्रेऽगृहीतसङ्केते !, तथाऽहं दोषपुञ्जकः ।
तातस्य तादृशं चित्तं, तत्रेदं हन्त कारणम् ॥४०३॥
नवनीतसमं मन्ये, सुकुमारं सतां मनः ।
तत्पश्चात्तापसम्पकार्द्, द्रवत्येव न संशयः ॥४०४॥
आत्मा स्फटिकशुद्धोऽपि, सदोषः प्रतिभासते ।
परस्तु दोषपुञ्जोऽपि, निर्मलोऽमलचेतसाम् ॥४०५॥
परोपकारसाराणां, कारणेऽपि च निष्ठुरम् ।
कृतं कर्म करोत्येव, पश्चात्तापं महाधियाम् ॥४०६॥
ततश्चाहूय तातेन, निजोत्सङ्गे निवेशितः ।
तदाऽहं प्रश्नितश्चेत्थं, सूरिर्गद्गदभाषिणा ॥४०७॥
भदन्त ! विदितस्तावन्नूनमेष भवादृशाम् ।
ज्ञानालोकवतां लोके, यादृशो रिपुदारणः ॥४०८॥
तदस्य सत्कुले जन्म, सामग्रीयं मनोहरा ।
सञ्जाता किं पुनर्जातं, तादृशं चरितं पुरा ? ॥४०९॥
सूरिणाऽभिहितं भूप !, न दोषोऽस्य तपस्विनः ।
शैलराजमृषावादावस्य सर्वस्य कारणम् ॥४१०॥
तातेनोक्तम्-अनर्थसार्थहेतुभ्यां, भदन्तेह कदा पुनः ।
आभ्यां पापवयस्याभ्यां, वियोगोऽस्य भविष्यति ॥४११॥
सूरिराह-महाराज !, वियोगोऽद्यापि दुर्लभः ।
शैलराजमृषावादौ, यतोऽस्यात्यन्तवल्लभौ ॥४१२॥
कारणेन पुनर्येन, वियोगोऽस्य भविष्यति ।
भूरिकाले गते तत्ते, सम्प्रत्येव निवेदये ॥४१३॥
शुद्धाभिसन्धिर्विख्यातो, नगरे शुभ्रमानसे ।
राजाऽस्ति तस्य द्वे भार्ये, वरतावर्यते किल ॥४१४॥

मृदुतासत्यते कन्ये ।

मृदुतासत्यते नाम, तस्य द्वे कन्यके शुभे ।
विद्येते भुवनानन्दकारिके चारुदर्शने ॥४१५॥
साक्षादमृतरूपे ते, ते सर्वसुखदायिके ।
अत्यन्तदुर्लभे भूप !, मृदुतासत्यते जनैः ॥४१६॥

एवं च स्थिते-कदाचिदेष ते कन्ये, लप्स्यते रिपुदारणः ।
तल्लाभे च वयस्याभ्यामाभ्यामेष वियोक्ष्यते ॥४१७॥
यतः-गुणसन्दोहभूते ते, तथेमौ दोषपुञ्जकौ ।
तस्मात्ताभ्यां सहावस्था, नानयोर्भूप ! पापयोः ॥४१८॥
ततः प्रयोजनस्यास्य, कश्चिदन्यो विचिन्तकः ।
यत्तु तेऽभिमतं भूप !, तदेवाचर साम्प्रतम् ॥४१९॥
तच्छ्रुत्वाऽचिन्तयद्राजा, स तदा नरवाहनः ।
अहो कष्टमहो कष्टं, सूनोर्मम तपस्विनः ॥४२०॥
यस्येदृशौ रिपू नित्यं, पार्श्वस्थौ दुःखदायिनौ ।
अहो वराको नैवासौ, यथार्थो रिपुदारणः ॥४२१॥
ततः किं क्रियतामत्र ?, नैवास्त्यस्य प्रतिक्रिया ।
त्यक्तसङ्गोऽधुनाऽहं तत्करोमि हितमात्मने ॥४२२॥

नरवाहनदीक्षा ।

ततोऽभिषिच्य मां राज्ये, कृत्वा सर्वं यथोचितम् ।
विचक्षणगुरोः पार्श्वे, निष्क्रान्तो नरवाहनः ॥४२३॥
ततश्च-विवेकशिखरस्थोऽपि, स विचक्षणसूरिणा ।
सार्धं बाह्येषु देशेषु, विजहार महामतिः ॥४२४॥
ममापि राज्ये सम्पन्ने, लब्धावसरसौष्ठवौ ।
शैलराजमृषावादौ, नितरामभिवर्धितौ ॥४२५॥
तृणतुल्यं जगत्सर्वं, पश्यामि सुतरां ततः ।
जलगण्डूषसङ्काशमनृतं प्रतिभाति मे ॥४२६॥
एवं च-षिङ्गैरुत्प्रास्यमानस्य, निन्द्यमानस्य पण्डितैः ।
तुष्टस्य धूर्त्तवचनैरलीकैश्चाटुकर्मभिः ॥४२७॥
पुण्योदयस्य माहात्म्याद्राज्यं पालयतो मम ।
गतानि कतिचिद्भद्रे !, वर्षाणि किल लीलया ॥४२८॥

तपनचक्र्यागमः ।

इतश्चोग्रप्रतापाग्निः, सार्वभौमो द्विषन्तपः ।
चक्रवर्ती तदा लोके, तपनो नाम भूपतिः ॥४२९॥
स सर्वबलसामग्र्या, महीदर्शनलीलया ।
भ्रमंस्तत्र समायातः, पुरे सिद्धार्थनामके ॥४३०॥

ततो विदिततद्वार्तैरहं मन्त्रिमहत्तमैः ।
हितकारितया प्रोक्तो, विज्ञातनृपनीतिभिः ॥४३१॥
यदुत-चक्रवर्ती जगज्ज्येष्ठस्तपनोऽयं महीपतिः ।
तदस्य क्रियतां देव !, गत्वा सन्मानपूजनम् ॥४३२॥
पूज्योऽयं सर्वभूपानामर्चितस्तव पूर्वजैः ।
विशेषतो गृहायातः, साम्प्रतं मानमर्हति ॥४३३॥
अहं तु शैलराजेन, विधुरीकृतचेतनः ।
आध्मातस्तब्धसर्वाङ्गस्तानाभाषे तदेदृशम् ॥४३४॥
यदुत-अरे विमूढाः ! को नाम, तपनोऽयं ममाग्रतः ? ।
येनास्य पूजनं कूर्यामहं न पुनरेष मे ॥४३५॥

तदाकर्ण्य मन्त्रिमहत्तमैरुक्तं-देव ! मा मैवं वदतु देवः, अस्य हि पूजनमकुर्वता देवेन लङ्घितः पूर्वपुरुषक्रमः, परित्यक्ता राजनीतिः, प्रलयं नीताः प्रकृतयः, समुज्झितं राज्यसुखं, परिहापितो विनयः, अपकर्णितमस्मद्वचनं भवति, तन्नैवं वदितुमर्हति देवः, क्रियतामस्माकमनुरोधेन तपनराजस्याभ्युद्गमनं देवेनेति वदन्तः पतिताः सर्वेऽपि मम चरणयोः । ततो मृदूभूतो मनाङ् मे शैलराजीयहृदयावलेपनावष्टम्भः, केवलं सञ्ज्ञितोऽहं मृषावादेन । ततो मयाऽभिहितं-न ममात्र क्षणे चित्तोत्साहस्तद्गच्छत यूयं, कुरुत यथोचितम्, अहं तु पश्चादागमिष्यामि, दत्तास्थाने राजनि प्रवेक्ष्यामीति । ततो यदाज्ञापयति देव इति वदन्तो निर्गतास्तपनाभिमुखं मन्त्रिमहत्तमा राजलोकश्च, सन्ति च तस्य तपननृपतेर्विविधदेशभाषावेषवर्णस्वरभेदविज्ञानान्तर्धानविज्ञातारो बहवश्चरविशेषाः । ततः केनचिच्चरेण विदितोऽयं वृत्तान्तो निवेदितस्तपनाय ।

रिपुदारणचेष्टाः ।

इतश्च मन्त्रिमहत्तमैर्विहिता तपनराजस्य प्रतिपत्तिरुपस्थापितानि महार्हप्राभृतानि, समावर्जितं हृदयं, दत्तं चास्थानं तपननरेन्द्रेण, पृष्टा रिपुदारणवार्ता । मन्त्रिमहत्तमैरुक्तं-देव ! देवपादप्रसादेन कुशली रिपुदारणः, समागच्छति चैष देवपादमूलमिति । ततो दत्ता ममाह्वायकाः, विजृम्भितौ शैलराजमृषावादौ, ततस्ते मयाऽभिहिताः, यदुत-

अरे वदत तान् गत्वा, सर्वान्मन्त्रिमहत्तमान् ।
यथा-केनात्र प्रहिता यूयं, दुरात्मानो नराधमाः ॥४३६॥

ततो मया नागन्तव्यमेव, तूर्णमागच्छत यूयं, इतरथा नास्ति भवतां जीवितमिति। तदाकर्ण्य गतास्तत्समीपमाह्वायकाः, निवेदितं मन्त्रिमहत्तमानां मदीयवचनं, ततस्ते तत्रास्थाने सर्वे लोकाः सत्रासाः सोद्वेगा नष्टजीविताशाः परस्पराभिमुखमीक्षमाणा अहो रिपुदारणस्य मर्यादेति चिन्तयन्तः किमधुना कर्तव्यमिति विमूढाः सर्वेऽपि मदीयमन्त्रिमहत्तमा लक्षितास्तपननरेन्द्रेण । ततोऽभिहितमनेन-भो भो लोका ! धीरा भवत, मा भैषुर्न दोषोऽयं भवतां, प्रतीतं मे रिपुदारणस्य शीलं ततोऽहं स्वयमेव तेन भलिष्यामि, केवलं भवद्भिरवस्तुनिर्बन्धपरैर्न भाव्यं, मोक्तव्यस्तस्योपरि स्वामिबहुमानः, नोचितोऽसौ राजलक्ष्म्याः, न योग्यो युष्मद्विधपदातीनाम् । तथाहि-शुभ्ररूपाणां, रतानां शुद्धमानसे ।
न जातु राजहंसानां, काको भवति नायकः ॥४३७॥

तन्मुञ्चत सर्वथा तस्योपरि स्नेहभावं, ततो मयि विरक्तत्वात्तेषामभिहितं-सर्वैरपि-यदाज्ञापयति देव इति ।

ततोऽभिहितस्तपनराजेन योगेश्वरनामा तन्त्रवादी कर्णे, यदुत-गत्वा तस्येदमिदं कुरुष्वेति । योगेश्वरेणोक्तं-यदाज्ञापयति देवः, ततः समागतो मत्समीपे सह भूरिराजपुरुषैर्योगेश्वरः, दृष्टोऽहं कृतावष्टम्भः शैलराजेन, समालिङ्गितो मृषावादेन, परिवेष्टितश्चोत्प्रासनपरैर्बहिरङ्गैः षिङ्गलोकैः । ततः पुरतः स्थित्वा तेन योगेश्वरेण तन्त्रवादिना प्रहतोऽहं मुखे योगचूर्णमुष्ट्या, ततोऽचिन्त्यतया मणिमन्त्रौषधीनां प्रभावस्य तस्मिन्नेव क्षणे सञ्जातो मे प्रकृतिविपर्ययः, सम्पन्नं शून्यमिव हृदयं, प्रतिभान्ति विपरीता इवेन्द्रियार्थाः क्षिप्त इव महागह्वरे न जानाम्यात्मस्वरूपं, तपनसत्कोऽयं योगेश्वर इति भीतो मदीयः परिवारः, स्थितः किंकर्तव्यतामूढो, मोहितश्च तेन योगशक्त्या ।

ततो विहितभृकुटिना आः पाप ! दुरात्मन्नागच्छसि त्वं देवपादमूलमिति वदता ताडितोऽहं वेत्रलतया योगेश्वरेण, सम्पन्नं मे भयं, गतो दैन्यं पतितस्तच्चरणयोः । अत्रान्तरे नष्टोऽसौ मद्वयस्यः पुण्योदयः, तिरोभूतौ शैलराजमृषावादौ, ततः सञ्ज्ञिता योगेश्वरेणात्ममनुष्यकाः, ततोऽहं क्षणेनैव सञ्जातोन्मादो वेदयमानस्तीव्रमन्तस्तापं विहितस्तैः पुरुषैर्यथाजातः कृतः पञ्चजटो विलिप्तो भूत्या, चर्चितो माषपुण्ड्रकैः, प्रवृत्तास्ते तालारवं कर्तुं समवतारितोऽहं रासमध्ये । ततो मां नाटयन्तः प्रारब्धास्ते मनुष्यास्त्रितालकं रासं दातुं, कथम् ?-
यो हि गर्वमविवेकभरेण करिष्यते,-
बाधकं च जगतामनृतं च वदिष्यते।

नूनमत्र भव एव स तीव्रविडम्बनां,
प्राप्नुवीत निजपापभरेण भृशं जनः ॥४३८॥ ध्रुवकः ॥

एवं च सोल्लासमुद्गायन्तस्ते वल्गमानाः कुण्डकमध्ये मां कृत्वा विजृम्भितुं प्रवृत्ताः, ततोऽहं पतामि तेषां प्रत्येकं पादेषु, नृत्यामि हास्यकरं जनानां, समुल्लसामि तेषूल्लसमानेषु, ददामि च तालाः, ततस्तैरभिहितं-
पश्यतेह भव एव जनाः कुतूहलं,-
शैलराजवरमित्रविलासकृतं फलम् ।
यः पुरैष गुरुदेवगणानपि नो नतः,-
सोऽद्य दासचरणेषु नतो रिपुदारणः ॥४३९॥
पुनर्ध्रुवकः-'यो हि गर्वमविवेकभरेण करिष्यत' इत्यादि ।
ततो ममापि मुखं स्फुटित्वेदमागतं, यदुत-
शैलराजवशवर्तितया निखिले जने,
हिण्डितोऽहमनृतेन वृथा किल पण्डितः ।
मारिता च जननी हि तथा नरसुन्दरी,
तेन पापचरितस्य ममात्र विडम्बनम् ॥४४०॥
पुनर्ध्रुवकः-'यो हि गर्वमविवेकभरेण करिष्यत' इत्यादि ।
ततो रासदायकाः प्रोक्ता विदितपूर्ववृत्तान्तेन योगेश्वरेण-
अरे रे एवं गायत, इदं च कुरुत-
योऽत्र जन्ममतिदायिगुरूनवमन्यते,
सोऽत्र दासचरणाग्रतलैरपि हन्यते ।
यस्त्वलीकवचनेन जनानुपतापयेत्,
तस्य तपननृप इत्युचितानि विधापयेत् ॥४४१॥
पुनर्ध्रुवकः-'यो हि गर्व'मित्यादि ।

ततश्चेदं गायन्तस्ते गाढं पार्ष्णिप्रहारैर्मां निर्दयं चूर्णयितुं प्रवृत्ताः, ततो निबिडलोहपिण्डैरिव समकालं निपतद्भिरेतावद्भिः पादैर्दलितं मे शरीरं, विमूढा गाढतरं मे चेतना, तथापि ते राजपुरुषा नरकपाला इव मम कुण्डकान्निःसारमयच्छन्तस्तथैवोल्ललमाना मां बलादाखेटयन्तस्त्रितालकं रासं ददमाना एव प्रासास्तपननरेन्द्रास्थानं, दर्शितं तत्र विशेषतस्तत्प्रेक्षणकं, प्रवृत्तं प्रहसनं, ईदृशस्यैव योग्योऽयं दुरात्मेति सञ्जातो जनवादः । ततो योगेश्वरेण रासकदायकमध्ये स्थित्वाऽभिहितं, यथा-नो नतोऽसि पितृदेवगणं न च मातरं, किं हतोऽसि ? रिपुदारण ! पश्यसि कारणम् ।

नृत्य नृत्य विहिताहति देवपुरोऽधुना,
निपत निपत चरणेषु च सर्वमहीभुजाम् ॥४४२॥

पुनर्ध्रुवकः-'यो हि गर्वमविवेकभरेण करिष्यत' इत्यादि ।

ततोऽहमुन्मादवशेन जीवितभयेन च दैन्यमुररीकृत्य नाटितोऽनेकधा, पतितोऽन्त्यजानामपि चरणेषु, सञ्जातश्चावस्तुभूतः, तपननरेन्द्रेण तु मदीय एव कनिष्ठो भ्राता कुलभूषणो नामाभिषेचितः सिद्धार्थपुरे राज्ये ।

रिपुदारणस्य भवान्तरसङ्क्रमः ।

ततो भद्रेऽगृहीतसङ्केते ! तथा तैर्गाढपार्ष्णिप्रहारैर्जर्जरितशरीरस्य मे निपतितमुदरे रक्तं सञ्जातः सन्तापातिरेकः । ततो जीर्णा मे सैकभववेद्या गुटिका दत्ता च ममान्या गुटिका भवितव्यतया, तन्माहात्म्येन गतोऽहं तस्यां पापिष्ठ-निवासायां नगर्यां महातमःप्रभाभिधाने पाटके, समुत्पन्नः पापिष्ठकुलपुत्रकरूपः, स्थितस्तत्रैव त्रयस्त्रिंशत्सागरोपमाणि कन्दुकवदुल्ललमानोऽधस्तादुपरि च वज्र-कण्टकैस्तुद्यमानः, तदित्थमवगाहितो मयाऽतितीव्रतरदुःखभरसागरः । ततस्तत्पर्यन्ते जीर्णायां पूर्वदत्तगुटिकायां दत्ता ममान्या गुटिका भवितव्यतया, तत्तेजसा समागतोऽहं पञ्चाक्षपशुसंस्थाने नगरे । दर्शितस्तत्र जम्बुकाकारधारको भवितव्यतया । एवं च भद्रेऽगृहीतसङ्केते ! केलिपरतया तया निजभार्यया भवितव्यतया तस्यां पापिष्ठनिवासायां नगर्यामुपर्युपरि स्थितेषु सप्तसु पाटकेषु तथा पञ्चाक्षपशुसंस्थाने विकलाक्षनिवासे एकाक्षनिवासे मनुजगतौ, किं बहुना ? तदसंव्यवहारनगरं विहायापरेषु प्रायेण सर्वस्थानेषु जीर्णायां जीर्णायां तस्यामेकभववेद्याभिधानायां कर्मपरिणाममहाराजसमर्पितायां गुटिकायां पुनरपरापरां गुटिकां योजयन्त्या अरघट्टघटीयन्त्रन्यायेन भ्रामितोऽहमनन्तं कालं प्रतिस्थानमनन्तवाराः, सर्वस्थानेषु च पर्यटतो मे जघन्या जातिर्निन्दितं कुलम्, अत्यन्तहीनं बलं, गर्हितं रूपं, निन्द्यं तपश्चरणम्, आजन्म दारिद्र्यं, सततं च मूर्खता, अलाभसन्तापदारुणं याचकत्वं, सकलजनानिष्टत्वं च गुटिकाप्रयोगेणैव प्रकटितं भवितव्यतया, तथा जिह्वोत्पाटनं, तप्तताम्रपानं, मूकत्वं, मन्मनत्वं, जिह्वोच्छेदमित्यादि च विधापितवती ।

एवं च वदति संसारिजीवे प्रज्ञाविशालया चिन्तितम्-अहो मानमृषावादयो-र्दारुणता, तथाहि-तद्वशवर्तिनाऽनेन संसारिजीवेन हारितो मनुष्यभवः, प्राप्तास्तत्रैव नानाविडम्बनाः, अवगाहितोऽनन्तः संसारसागरोऽनुभूतानि विविधदुःखानि, प्राप्तानि गर्हितानि जात्यादीनीति ।

संसारिजीवः प्राह-ततोऽन्यदा दर्शितोऽहं भवचक्रपुरे मनुष्यरूपतया सञ्जाता मे तत्र मध्यमगुणता ततस्तुष्टा ममोपरि भवितव्यता, आविर्भावितस्तया पुनरपि स सहचरो मे पुण्योदयः । ततोऽभिहितमनया-आर्यपुत्र ! गन्तव्यं मनु-जगतौ भवता वर्धमानपुरे, स्थातव्यं तत्र यथासुखासिकया, अयं च तवानुचरः पुण्योदयो भविष्यति । मयाऽभिहितं-यदाज्ञापयति देवी । ततो जीर्णायां प्राचीनगुटिकायां दत्ता पुनरेकभववेद्या सा ममापरा गुटिका भवितव्यतयेति !

भवगहनमनन्तं पर्यटद्भिः कथञ्चिन्नरभवमतिरम्यं प्राप्य भो भो मनुष्याः ! ।
निरुपमसुखहेतावादरः संविधेयो, न पुनरिह भवद्भिर्मानजिह्वाऽनृतेषु ॥४४३॥
इतरथा बहुदुःखशतैर्हता, मनुजभूमिषु लब्धविडम्बनाः ।
मदरसानृतगृद्धिपरायणा, ननु भविष्यथ दुर्गतिगामुकाः ॥४४४॥
एतन्निवेदितमिह प्रकटं मया भो !
मध्यस्थभावमवलम्ब्य विशुद्धचित्ताः ।
मानानृते रसनया सह संविहाय,
तस्माज्जिनेन्द्रमतलम्पटतां कुरुध्वम् ॥४४५॥

इत्युपमितिभवप्रपञ्चायां कथायां मानमृषावादर-सनेन्द्रियविपाकवर्णनस्तुरीयः प्रस्तावः समाप्तः ॥४॥

◦ ◦ ◦

पञ्चमः प्रस्तावः ।

अथ तल्लोकविख्यातं, सर्वसौन्दर्यमन्दिरम् ।
बहिरङ्गं जगत्यस्ति, वर्धमानं पुरोत्तमम् ॥१॥
[1]पूर्वाभाषी शुचिः प्राज्ञो, दक्षिणो जातिवत्सलः ।
नरवर्गः सदा यत्र, जैनधर्मपरायणः ॥२॥
विनीतः शीलसम्पन्नः, सर्वावयवसुन्दरः ।
सल्लज्जाभूषणो यत्र, धार्मिकः सुन्दरीजनः ॥३॥
तत्र दर्पोद्धुरारातिकरिकुम्भविदारणः ।
अभून्निर्व्याजसद्वीर्यो, धवलो नाम भूपतिः ॥४॥
यः शशाङ्कायते नित्यं, स्वबन्धुकुमुदाकरे ।
कठोरभास्कराकारं, बिभर्ति रिपुतामसे ॥५॥

विमलवामदेवजन्मादि ।

तस्यास्ति सर्वदेवीनां, मध्ये लब्धपताकिका ।
सौन्दर्यशीलपूर्णाङ्गी, देवी कमलसुन्दरी ॥६॥
तस्या गर्भे समुद्भूतः, सद्भूतगुणमन्दिरम् ।
सुतोऽस्ति विमलो नाम, तयोर्देवीनरेन्द्रयोः ॥७॥
स तदा बालकालेऽपि, वर्त्तमानो महामतिः ।
लघुकर्मतया धन्यो, न स्पृष्टो बालचेष्टितैः ॥८॥
अथ तत्र पुरे ख्यातः, समस्तजनपूजितः ।
आसीद् गुणाश्रयः श्रेष्ठी, सोमदेवो महाधनः ॥९॥
धनेन धनदं धन्यो, रूपेण मकरध्वजम् ।
धिया सुरगुरुं धीरो, यो विजिग्ये गतस्मयः ॥१०॥
तस्यानुरूपा शीलाढ्या, लावण्यामृतशालिनी ।
भर्तृभक्ताऽभवद्भार्या, नाम्ना कनकसुन्दरी ॥११॥
ततोऽहं गुटिकादानाद्भवितव्यतया तया ।
तस्याः प्रवेशितः कुक्षौ, भद्रे ! पुण्योदयान्वितः ॥१२॥
अथ सम्पूर्णकालेन, प्रविभक्तशरीरकः ।
स्थितश्चाहं बहिर्योने, रङ्गमध्ये यथा नटः ॥१३॥
ततः किल प्रसूताऽहं, जातो मे पुत्रकोऽनघः ।
इति भावनया चित्ते, जनन्या प्रविलोकितः ॥१४॥

१. पूर्वमेव 'स्वागतम्' इत्याद्युक्त्वातिथिसत्काराय भाषकः ।

सोऽपि पुण्योदयो जातः, केवलं नैक्षितस्तया ।
जनदृष्ट्या न दृश्यन्ते, तेऽन्तरङ्गजना यतः ॥१५॥
ज्ञातोऽहं सोमदेवेन, परिवारनिवेदितः ।
ततश्च कारितस्तेन, सुतजन्ममहोत्सवः ॥१६॥
दत्तानि भूरिदानानि, पूजिता गुरुसंहतिः ।
प्रनृत्ता बान्धवाः सर्वे, वादितानन्दमर्दलाः ॥१७॥
अथातीतेऽतितोषेण, द्वादशाहे च सोत्सवम् ।
ततो मे विहितं नाम, वामदेव इति स्फुटम् ॥१८॥
ततः संवर्धमानोऽहमत्यन्तसुखलालितः ।
यावद्भद्रे ! समापन्नो, व्यक्तचैतन्यसङ्गतः ॥१९॥
तावद्दृष्टौ मया भद्रे !, कृष्णाकारधरौ नरौ ।
तयोश्च निकटे वक्रा, नारी वलितदेहिका ॥२०॥
चिन्तितं च मया हन्त, किमिदं मानुषत्रयम् ।
मत्समीपे समायातं, किं वाऽऽश्रित्य प्रयोजनम् ? ॥२१॥
अथैकस्तत्र मां गाढं, बलादालिङ्ग्य मानवः ।
निपत्य पादयोस्तेषां, ततश्चेत्थमभाषत ॥२२॥
मित्र ! प्रत्यभिजानीषे, किं मां किं नेति वा पुनः ? ।
मयोक्तं नेति तच्छ्रुत्वा, सञ्जातः शोकविह्वलः ॥२३॥
मयोक्तं तात ! किं जातस्त्वमेवं शोकविह्वलः ? ।
तेनोक्तं चिरदृष्टोऽपि, यतोऽहं विस्मृतस्तव ॥२४॥
मयोक्तं कुत्र दृष्टोऽसि, त्वं मया वरलोचन !? ।
तेनोक्तं कथयाम्येष, समाकर्णय साम्प्रतम् ॥२५॥
पुरेऽसंव्यवहारे त्वमासीर्वास्तव्यकः पुरा ।
तत्रासन्मादृशास्तात !, बहवस्ते वयस्यकाः ॥२६॥
केवलं तत्र नाभूवमहमद्यापि ते सखा ।
अन्यदा निर्गतोऽसि त्वं, पूरे भ्रमणकाम्यया ॥२७॥
ततश्चैकाक्षवासे त्वं, विकलाक्षपुरे भ्रमन् ।
पञ्चाक्षपशुसंस्थाने, कदाचित्पुनरागतः ॥२८॥
तत्र ये गर्भजाः सन्ति, सञ्ज्ञिनः कुलपुत्रकाः ।
अन्यस्थानानि पर्यट्य, तेषु प्राप्तोऽसि सुन्दर ! ॥२९॥

अथ तत्र स्थितस्यायं, जातस्तव वयस्यकः ।
तिरोभूतपरत्वेन, न सम्यग् लक्षितस्त्वया ॥३०॥
ततो भ्रमणशीलत्वात्तातानन्तेषु धामसु ।
अनन्तवारान् भ्रान्तोऽसि, सह स्वीयमहेलया ॥३१॥
कुतूहलवशेनाथ, पुरे सिद्धार्थनामके ।
बहिरङ्गे गतस्तात !, कदाचित्त्वं सभार्यकः ॥३२॥
नरवाहनराजस्य, भवने त्वं तदा स्थितः ।
दिनानि कतिचिन्नाम्ना, प्रसिद्धो रिपुदारणः ॥३३॥
संसारिजीव इत्येतत्तात ! ते नाम पूर्वकम् ।
वासके वासके नाम, जायते चापरापरम् ॥३४॥
ततस्तत्र स्थितेनाहं, भवता वरलोचन ! ।
वयस्य ! प्रत्यभिज्ञातो, मृषावाद इति स्फुटम् ॥३५॥
ततस्तत्र मया सार्धं, ललितोऽसि वरानन ! ।
सञ्जाता च परा प्रीतिर्मदीये ज्ञानकौशले ॥३६॥
पृष्टश्चाहं त्वया तोषाद्यथेदं तव कौशलम् ।
जातं कस्य प्रसादेन, ममानन्दविधायकम् ॥३७॥
मयोक्तं प्रतिपन्नाऽस्ति, भगिनी मे महत्तमा ।
मूढतानन्दिनी माया, रागकेसरिणोऽङ्गजा ॥३८॥
इदं तस्याः प्रसादेन, सञ्जातं मम कौशलम् ।
सा हि संनिहिता नित्यं, मम मातेव वत्सला ॥३९॥
यत्र यत्र मृषावादस्तत्र तत्रेह मायया ।
भवितव्यमिति प्रायो, विज्ञातं बालकैरपि ॥४०॥
त्वयोक्तं दर्शनीयेति, साऽऽत्मीया भगिनी मम ।
मयाऽपि प्रतिपन्नं तत्तावकीनं वचस्तदा ॥४१॥
ततस्तद्वचनं तात !, स्मरन्नेषोऽहमागतः ।
भगिनीं पुरतः कृत्वा, दर्शयामीति ते किल ॥४२॥
यावता-स तदा तादृशः स्नेहस्तव तात ! मया सह ।
तत्तादृशाः समुल्लापाः, सा च मैत्री मनोहरा ॥४३॥
तथापि-न त्वं प्रत्यभिजानीषे, दृष्टमप्यधुना जनम् ।
महत्तमतोऽपि स्यात्किं शोकभरकारणम् ? ॥४४॥

तदेष मन्दभाग्योऽहं, भवता परिवर्जितः ।
क्व यामि क्व च तिष्ठामि ?, सञ्जातश्चिन्तयाऽऽतुरः ॥४५॥
मयोक्तं न स्मरामीमं, वृत्तान्तं भद्र ! भावतः ।
तथापि हृदये मेऽस्ति, यथा त्वं चिरसङ्गतः ॥४६॥
यतः-दृष्टिर्मे शीतलीभूता, चित्तमानन्दपूरितम् ।
त्वयि भद्र ! मृषावादे, जाते दर्शनगोचरे ॥४७॥
नूनं जातिस्मरा मन्ये, दृष्टिरेषा शरीरिणाम् ।
प्रिये हि विकसत्येषा, दृष्टे दन्दह्यतेऽप्रिये ॥४८॥
तस्मादत्र न कर्तव्यः, शोको भद्रेण वस्तुनि ।
वयस्यः प्राणतुल्यस्त्वं, ब्रूहि यत्ते प्रयोजनम् ॥४९॥
तेनोक्तमियदेवात्र, मम तात ! प्रयोजनम् ।
यदेषाऽऽत्मीयभगिनी, दर्शिता तेऽतिवत्सला ॥५०॥
मायेति सुप्रसिद्धाऽपि, जनैश्चरितरञ्जितैः ।
इयं बहुलिका तात !, प्रियनाम्नाऽभिधीयते ॥५१॥
तदेनया समं तात !, वर्तितव्यं यथा मया ।
अहं तिरोभविष्यामि, नास्ति मेऽवसरोऽधुना ॥५२॥
किं तु-यत्रेयमास्ते तत्राहं, स्थित एवेह तत्त्वतः ।
परस्परानुविद्धं हि, स्वरूपमिदमावयोः ॥५३॥
अयं तु पुरुषस्तात !, कनिष्ठो मे सहोदरः ।
युक्तस्ते मित्रभावस्य, तेन सन्दर्शितो मया ॥५४॥
स्तेयनामा महावीर्यस्तिरोभूतः स्थितः पुरा ।
प्रस्तावमधुना ज्ञात्वा, सोऽयं तात ! समागतः ॥५५॥
तदेषोऽपि त्वया नित्यं, यथाऽहमवलोकितः ।
तथैव स्नेहभावेन, द्रष्टव्यः प्रियबान्धवः ॥५६॥
मयोक्तं-येयं ते भगिनी भद्र !, सा ममापि न संशयः ।
यस्ते सहोदरो भ्राता, स ममाप्येष बान्धवः ॥५७॥
तेनोक्तम्-अहो महाप्रसादो मे, विहितो मदनुग्रहः ।
सञ्जातः कृतकृत्योऽहमेवं सति नरोत्तम ! ॥५८॥
इत्युक्त्वा स मृषावादस्तिरोभावमुपागतः ।
ततो मे हृदि सञ्जातो, वितर्कः स च कीदृशः ? ॥५९॥

अहो मे धन्यता नूनं, सम्पन्नं जन्मनः फलम् ।
भगिनीभ्रातरौ यस्य, समापन्नौ ममेदृशौ ॥६०॥
ततो विलसतस्ताभ्यां, सार्धं मे मनसीदृशाः ।
जाता वितर्ककल्लोला, भद्रे ! विभ्रान्तचेतसः ॥६१॥
वञ्चयामि जगत्सर्वं, नानारूपैः प्रतारणैः ।
परेषां धनसर्वस्वं, मुष्णामि च यथेच्छया ॥६२॥
ततोऽहं वञ्चनेऽन्येषां, हरणे चान्यसम्पदाम् ।
प्रवर्तमानो निःशङ्कस्तुलितो लोकबान्धवैः ॥६३॥
ततस्तत्तादृशं वीक्ष्य, मामकीनं कुचेष्टितम् ।
गणितस्तृणतुल्योऽहं, तैः सर्वैर्लोकबान्धवैः ॥६४॥

विमलवामदेवयोः सख्यम् ।

इतश्च नृपतेर्भार्या, या सा कमलसुन्दरी ।
साऽभूत्कनकसुन्दर्याः, सर्वकालं सखी प्रिया ॥६५॥
ततोऽसौ तनयस्तस्या, विमलो राजदारकः ।
जातो मे मातृसम्बन्धात्सखा निर्व्याजवत्सलः ॥६६॥
सदोपकारपरमः, स्नेहनिर्भरमानसः ।
स महात्मा मया सार्धं, शाठ्यहीनः प्रमोदते ॥६७॥
अहं तु तस्या वीर्येण, भगिन्याः शठमानसः ।
विमलेऽपि मलापूर्णः, सञ्जातः कौटिलाशयः ॥६८॥
निर्मिथ्यशाठ्यभावेन, तदेवं वर्तमानयोः ।
अनेकक्रीडनासारमावयोर्यान्ति वासराः ॥६९॥
ततश्च-कौमारे वर्तमानेन, विमलेन महात्मना ।
आसाद्य सदुपाध्यायं, गृहीताः सकलाः कलाः ॥७०॥
योषितां नयनानन्दं, मीनकेतनमन्दिरम् ।
लावण्यसागराधारं, तारुण्यकमवाप सः ॥७१॥

क्रीडानन्दनकाननम् ।

अथान्यदा मया सार्धं, ललमानो महामतिः ।
स क्रीडानन्दनं नाम, सम्प्राप्तो वरकाननम् ॥७२॥
तच्च कीदृशम् ?-अशोकनागपुन्नागबकुलाङ्कोल्लराजितम् ।
चन्दनागरुकर्पूरतरुषण्डमनोहरम् ॥७३॥

द्राक्ष्यमण्डपविस्तारवारितातपसुन्दरम् ।
विलसत्केतकीगन्धगृद्ध्याऽन्धीकृतषट्पदम् ॥७४॥
अनेकतालहिंतालनालिकेरमहाद्रुमैः ।
यदाह्वयति हस्ताभैः, सस्पर्धमिव नन्दनम् ॥७५॥
अपि च-विविधाद्भुतचूतलतागृहकं, क्वचिदागतसारसहंसबकम् ।
सुमनोहरगन्धरणद्भ्रमरं, द्युसदामपि विस्मयतोषकरम् ॥७६॥
स च तत्र मया सहितो विमलः, सरलो मनसा बहुपूतमलः ।
उपगत्य तदा सुचिरं विजने, रमते स्म मृगाक्षि ! मनोज्ञवने ॥७७॥
अत्रान्तरे किं सम्पन्नम् ?-
नूपुरारवसंमिश्रः, साशङ्को निभृतो ध्वनिः ।
कयोश्चिज्जल्पतोर्दूरादागतः कर्णकोटरम् ॥७८॥

ततो विमलेनाभिहितं-वयस्य ! वामदेव ! कस्यायं ध्वनिः श्रूयते ? मयोक्तं-कुमार ! अस्फुटाक्षरतया न सम्यग् मयापि लक्षितो, बहूनां चात्र ध्वनिः सम्भाव्यते। यतोऽत्र काननाभोगे विचरन्ति यक्षाः, परिभ्रमन्ति नरवराः, सम्भाव्यन्ते विबुधा, रमन्ते सिद्धा, हिण्डन्ति पिशाचाः, सम्भवन्ति भूता, गायन्ति किन्नराः, पर्यटन्ति राक्षसा, निवसन्ति किम्पुरुषा, विलसन्ति महोरगा, ललन्ते गान्धर्वाः, क्रीडन्ति विद्याधराः, तस्मात्पुरतो गत्वा निरूपयावः, येन निश्चीयते कस्यायं शब्द इति, प्रतिपन्नमनेन, गतौ स्तोकं भूमिभागं, दृष्टा पदपद्धतिः। विमलेनोक्तं-वयस्य ! वामदेव ! मनुषमिथुनस्य कस्यचिदेषा पदपद्धतिः, यतः-
पश्यैकानि पदान्यत्र, कोमलानि लघूनि च ।
दृश्यन्ते वालुकामध्ये, सूक्ष्मरेखाङ्कितानि च ॥७९॥
तथाऽन्यानि पुनर्व्यक्तचक्राङ्कुशझषादिभिः ।
लाञ्छितानि विभाव्यन्ते, पदानि विरलानि च ॥८०॥
लगन्ति च न देवानां, पदानीह भुवस्तले ।
सामान्यपुरुषाणां च, नेदृशी पदपद्धतिः ॥८१॥

तदत्र वयस्य वामदेव ! विशिष्टेन केनचिन्नरमिथुनेन भाव्यं, मयोक्तं-कुमार ! सत्यमेवमिदमग्रतो गत्वा निरूपयावः, ततो गतौ पुनः स्तोकं भूभागं, दृष्टमतिघनतरुगहनमध्ये लतागृहकं, निरूपितं लतावितानविवरेण, तत्र च निलीनं दृष्टमपहसितरतिमन्मथसौन्दर्यं तन्मिथुनं, विलोकितं विमलेन नखाग्रेभ्यो वालाग्राणि यावत्, न दृष्टौ मिथुनेनावां, अपसृतौ कतिचित्पदानि, विमलेनोक्तं-वयस्य ! न

सामान्याविमौ स्त्रीपुरुषौ, यतोऽनयोः शरीरे विशिष्टानि लक्षणान्युपलभ्यन्ते, मयोक्तं कीदृशानि नरनार्योर्लक्षणानि भवन्ति ?, महत्कुतूहलं मे, ततस्तान्येव ताव-न्निवेदयतु कुमारः, विमलेनोक्तम्-

पुरुषलक्षणानि ।

लक्षग्रन्थसमाख्यातं, विस्तरेण वरानन ! ।
पुंलक्षणं झटित्येव, कस्तद्वर्णयितुं क्षमः ? ॥८२॥
तथैव लक्षणं नार्या, विज्ञेयं बहुविस्तरम् ।
तद्वर्णनं हि को नाम, पारयेत्कोऽवधारयेत् ? ॥८३॥
अतः समासतस्तुभ्यं, यदि गाढं कुतूहलम् ।
ततोऽहं कथयाम्येष, लक्षणं नरयोषितोः ॥८४॥
मयोक्तम्-अनुग्रहो मे, विमलेनोक्तं-
रक्तस्निग्धमवक्रं च, पद्माभं मृदु कोमलम् ।
प्रशस्तं वर्णितं प्राज्ञैः, सुश्लिष्टं पादयोस्तलम् ॥८५॥
शशिवज्राङ्कुशच्छत्रशङ्खादित्यादयस्तले ।
पादयोर्यस्य दृश्यन्ते, स धन्यः पुरुषोत्तमः ॥८६॥
एत एव च चन्द्राद्या, यद्यसम्पूर्णभिन्नकाः ।
भवेयुः पश्चिमा भोगाः, सम्पद्यन्ते तदा नरे ॥८७॥
रासभो वा वराहो वा, जम्बुको वा परिस्फुटम् ।
दृश्येत पादतलयोर्यस्यासौ दुःखितो नरः ॥८८॥
मयोक्तं-लक्षणे प्रस्तुते वक्तुं, त्वयेदमपलक्षणम् ।
किमुक्तम् ? विमलः प्राह, समाकर्णय कारणम् ॥८९॥
लक्ष्यते दृष्टमात्रस्य, नरस्येह शुभाशुभम् ।
येन तल्लक्षणं प्रोक्तं, तद्द्वेधा सुन्दरेतरम् ॥९०॥
ततश्चेदं समासेन, सुखदुःखनिवेदकम् ।
शरीरसंस्थितं चिह्नं, लक्षणं विदुषां मतम् ॥९१॥
तेनापलक्षणस्यापि, यदिदं प्रतिपादितम् ।
युक्तं तद्भद्र ! जानीहि, प्रस्तुते नरलक्षणे ॥९२॥
मयोक्तं-कुमार ! परिहासोऽयं, व्युत्पत्त्यर्थं मया कृतः ।
तद्ब्रूहि सर्वं यद्वाच्यं, द्विगुणोऽयमनुग्रहः ॥९३॥
विमलेनोक्तम्-उत्तुङ्गाः पृथुलास्ताम्राः, स्निग्धा दर्पणसन्निभाः ।
नखा भवन्ति धन्यानां, धनभोगसुखप्रदाः ॥९४॥

सितैः श्रमणता ज्ञेया, रूक्षपुष्पितकैः[1] पुनः ।
जायते किल दुःशीलो, नखैर्लोकेऽत्र मानवः ॥९५॥
मध्ये सङ्क्षिप्तपादस्य, स्त्रीकार्ये मरणं भवेत् ।
निर्मांसावुत्कटौ पादौ, न प्रशस्तावुदाहृतौ ॥९६॥
कूर्मोन्नतौ घनौ स्निग्धौ, मांसलौ समकोमलौ ।
सुश्लिष्टौ चरणौ धन्यौ, नराणां सुखसाधकौ ॥९७॥
ये काकजङ्घाः पुरुषास्तथैवोद्बद्धपिण्डिकाः ।
ये दीर्घस्थूलजङ्घाश्च, दुःखितास्तेऽध्वगामिनः ॥९८॥
ये हंसशिखिमातङ्गवृषगत्यनुकारिणः ।
नरास्ते सुखिनो लोके, दुःखिनोऽन्ये प्रकीर्तिताः ॥९९॥
जानुद्वयं भवेद्गूढं, गुल्फौ वा सुसमाहितौ ।
यस्यासौ सुखितो ज्ञेयो, घटजानुर्न सुन्दरः ॥१००॥
ह्रस्वं राजीवसच्छायमुन्नतं मणिके[2] शुभम् ।
वक्रं दीर्घं विवर्णं च, न लिङ्गमिह शस्यते ॥१०१॥
दीर्घायुष्का भवन्तीह, प्रलम्बवृषणा नराः ।
उत्कटाभ्यां पुनस्ताभ्यां, ह्रस्वायुष्काः प्रकीर्तिताः ॥१०२॥
मांसोपचितविस्तीर्णं, शुभकारि कटीतटम् ।
तदेव दारिद्र्यकरं, विज्ञेयं ह्रस्वसङ्कटम् ॥१०३॥
यस्योदरं भवेत्तुल्यं, सिंहव्याघ्रशिखण्डिनाम् ।
तथैव वृषमत्स्यानां, भोगभोगी स मानवः ॥१०४॥
वृत्तोदरोऽपि भोगानां, भाजनं किल गीयते ।
शूरो निवेदितः प्राज्ञैर्मण्डूकसमकुक्षिकः ॥१०५॥
गम्भीरा दक्षिणावर्ता, नाभिरुक्तेह सुन्दरा ।
वामावर्ता च तुङ्गा च, नेष्टा लक्षणवेदिभिः ॥१०६॥
विशालमुन्नतं तुङ्गं, स्निग्धलोमशमार्दवम् ।
वक्षःस्थलं भवेद् धन्यं, विपरीतमतोऽपरम् ॥१०७॥
कूर्मसिंहाश्वमातङ्गसमपृष्ठाः शुभा नराः ।
उद्बद्धबाहवो दुष्टा, दासास्तु लघुबाहवः ॥१०८॥
प्रलम्बबाहवो धन्याः, प्रशस्ता दीर्घबाहवः ।
[3]अकर्मकठिनौ हस्तौ, विज्ञेयाः पादवन्नखाः ॥१०९॥

१. चित्रविचित्रैः । २. अग्रभागे । ३. कर्मणो मृतिक्रियाया अभावः ।

दीर्घो मेषसमः स्कन्धो, निर्मांसो भारवाहकः ।
मांसलो लक्षणज्ञानां, लघुस्कन्धो मतः किल ॥११०॥
कण्ठो दुःखकरो ज्ञेयः, कृशो दीर्घश्च यो भवेत् ।
स कम्बुसन्निभः श्रेष्ठो, वलित्रयविराजितः ॥१११॥
लघ्वोष्ठो दुःखितो नित्यं, पीनोष्ठः सुभगो भवेत् ।
विषमोष्ठो भवेद्भीरुर्लम्बोष्ठो भोगभाजनम् ॥११२॥
शुद्धाः समाः शिखरिणो, दन्ताः स्निग्धा घनाः शुभाः ।
विपरीताः पुनर्ज्ञेया, नराणां दुःखहेतवः ॥११३॥
द्वात्रिंशद्रदनो राजा, भोगी स्यादेकहीनकः ।
त्रिंशता मध्यमो ज्ञेयस्ततोऽधस्तान्न सुन्दरः ॥११४॥
स्तोकदन्ता अतिदन्ता, श्यामदन्ताश्च ये नराः ।
मूषकैः समदन्ताश्च, ते पापाः परिकीर्तिताः ॥११५॥
बीभत्सैश्च करालैश्च, दन्तैर्विषमसंस्थितैः ।
तेऽत्यन्तपापिनो ज्ञेया, दुष्टशीला नराधमाः ॥११६॥
या पद्मदलसच्छाया, सूक्ष्मा सा शास्त्रवेदिनाम् ।
भवेज्जिह्वा विशालाक्ष !, चित्रिता मद्यपायिनाम् ॥११७॥
शूराणां पद्मसच्छायं, भवेत्तालु मनोरमम् ।
कृष्णं कुलक्षयकरं, नीलं दुःखस्य कारणम् ॥११८॥
हंससारसनादानुकारिणः सुस्वरा नराः ।
भवन्ति सुखिनः काकखरनादास्तु दुःखिताः ॥११९॥
दीर्घया सुखितो नित्यं, सुभगस्तु विशुद्धया ।
नसा चिपिटया पापश्चौरः कुञ्चितनासिकः ॥१२०॥
नीलोत्पलदलच्छाया, दृष्टिरिष्टा मनस्विनाम् ।
मधुपिङ्गा प्रशस्तैव, पापा मार्जारसन्निभा ॥१२१॥
सद्दृष्टिर्जिह्मदृष्टिश्च, रौद्रदृष्टिश्च केकरा[1] ।
दीनातिरक्ता रूक्षा च, पिङ्गला च विगर्हिता ॥१२२॥
इन्दीवराभा धन्यानां, गम्भीरा चिरजीविनाम् ।
विपुला भोगिनां दृष्टिरुच्छ(ज्ज्व)ला स्तोकजीविनाम् ॥१२३॥
काणाद्वरतरोऽन्धः स्यात्केकरादपि काणकः ।
वरमन्धोऽपि काणोऽपि, केकरोऽपि न कातरः ॥१२४॥

१. वक्रा ।

अबद्धलक्ष्या सततं, घूर्णते कारणं विना ।
रूक्षाभा म्लानरूपा च, सा दृष्टिः पापकर्मणाम् ॥१२५॥
अधो निरीक्षते पापः, सरलमृजुरीक्षते ।
ऊर्ध्वं निरीक्षते धन्यस्तिरश्चीनं तु कोपनः ॥१२६॥
दीर्घे पृथुलरूपे च, मानसौभाग्यशालिनाम् ।
भ्रुवौ नराणां हीने तु, योषिदर्थे महापदाम् ॥१२७॥
लघुस्थूलौ महाभोगौ, कर्णौ तौ धनभागिनाम् ।
आखुकर्णे भवेन्मेधा, लोमशौ चिरजीविनाम् ॥१२८॥
ललाटपट्टो विपुलश्चन्द्राभः सम्पदाकरः ।
दुःखिनामतिविस्तीर्णः, सङ्क्षिप्तः स्वल्पजीविनाम् ॥१२९॥
वामावर्तो भवेद्यस्य, वामायां दिशि मस्तके ।
निर्लक्षणः क्षुधाक्षामो, भिक्षामट्यात्स रूक्षिकाम् ॥१३०॥
दक्षिणो दक्षिणे भागे, यस्यावर्तस्तु मस्तके ।
तस्य नित्यं प्रजायेत, कमलाकरवर्तिनी ॥१३१॥
यदि स्याद्दक्षिणे वामो, दक्षिणो वामपार्श्वके ।
पश्चात्काले ततस्तस्य, भोगा नास्त्यत्र संशयः ॥१३२॥
स्फुटिता[1] रूक्षमलिनाः, केशा दारिद्र्यहेतवः ।
सुखदास्ते मृदुस्निग्धा, वह्न्याभाः केलिहेतवः ॥१३३॥
अन्यच्च-उरोमुखललाटानि, पृथूनि सुखभागिनाम् ।
गम्भीराणि पुनस्त्रीणि, नाभिः सत्त्वं स्वरस्तथा ॥१३४॥
केशदन्तनखाः सूक्ष्मा, भवन्ति सुखहेतवः ।
कण्ठः पृष्ठं तथा जङ्घे, ह्रस्वं लिङ्गं च पूजितम् ॥१३५॥
रक्ता जिह्वा भवेद्धन्या, पाणिपादतलानि च ।
पृथुलाः पाणिपादास्तु, धन्यानां दीर्घजीविनाम् ॥१३६॥
स्निग्धदन्तः शुभाचारः, सुभगः स्निग्धलोचनः ।
नरोऽतिदीर्घो ह्रस्वश्च, स्थूलः कृष्णश्च निन्दितः ॥१३७॥
त्वचि रोमसु दन्तेषु, जिह्वायां चिकुरेषु च ।
नेत्रयोश्चातिरूक्षा ये, ते न धन्याः प्रकीर्तिताः ॥१३८॥
पञ्चभिः शतमुद्दिष्टं, चतुर्भिर्नवतिस्तथा ।
त्रिभिः षष्टिः समुद्दिष्टा, लेखाङ्कैर्भालवर्तिभिः ॥१३९॥

१. पृथक् पृथक् स्थिताः ।

चत्वारिंशत्पुनः प्रोक्तं, वर्षाणि नरजीवितम् ।
ताभ्यां द्वाभ्यां तथैकेन, त्रिंशद्वर्षाणि सुन्दर ! ॥१४०॥ युग्मम् ॥
किं च-अस्थिष्वर्थाः सुखं मांसे, त्वचि भोगाः स्त्रियोऽक्षिषु ।
गतौ यानं स्वरे चाज्ञा, **सर्वं सत्त्वे प्रतिष्ठितम्** ॥१४१॥
गतेर्धन्यतरो वर्णो, वर्णाद्धन्यतरः स्वरः ।
स्वराद्धन्यतरं सत्त्वं, **सर्वं सत्त्वे प्रतिष्ठितम्** ॥१४२॥
यथा वर्णस्तथा रूपं, यथा रूपं तथा मनः ।
यथा मनस्तथा सत्त्वं, **यथा सत्त्वं तथा गुणाः** ॥१४३॥
तदिदं ते समासेन, वर्णितं नरलक्षणम् ।
अधुना योषितां भद्र !, लक्षणं मे निशामय ॥१४४॥
मयोक्तं-कुमार ! भवता तावदाधारमिह कीर्तितम् ।
सर्वस्य लक्षणस्यास्य, सत्त्वमत्यन्तनिर्मलम् ॥१४५॥
तच्च किं यादृशं जातं, तादृगेवावतिष्ठते ? ।
किं वा कथञ्चिद्वर्धेत, नराणामिह जन्मनि ? ॥१४६॥

सत्त्वशुद्धिहेतवः ।

विमलेनोक्तं-सन्ति संवर्धनोपायाः, सत्त्वस्यात्रैव जन्मनि ।
ते चेमे ज्ञानविज्ञानधैर्यस्मृतिसमाधयः ॥१४७॥
ब्रह्मचर्यं दया दानं, निःस्पृहत्वमृतं तपः ।
औदासीन्यं च सर्वत्र, सत्त्वसंशुद्धिहेतवः ॥१४८॥
एतैरविमलं सत्त्वं, शुद्ध्युपायैर्विशुध्यति ।
मृज्यमान इवादर्शः, क्षारचेलकरादिभिः ॥१४९॥
यतः-भावस्नेहं निराकृत्य, रूक्षयन्ति न संशयः ।
भावा एतेऽन्तरात्मानं, सेव्यमानाः पुनः पुनः ॥१५०॥
रूक्षीभूतात्पतत्यस्मादात्मनो मलसञ्चयः ।
ततः शुद्धा भवेल्लेश्या, सा च सत्त्वमिहोच्यते ॥१५१॥

पुरुषलक्षणानि ।

शुद्धे च सत्त्वे कुर्वन्ति, लक्षणानि बहिर्गुणम् ।
अपलक्षणदोषाश्च, जायन्ते नैव बाधकाः ॥१५२॥
तदेवं भद्र ! विद्यन्ते, ते भावा यैर्विवर्धते ।
समस्तगुणसम्भाराधारं तत्सत्त्वमुत्तमम् ॥१५३॥

एवं च वदति विमले-

मया भद्रे ! न विज्ञातो, भावार्थस्तत्र कश्चन ।
तथापि भगिनीदोषात्तं प्रतीदं प्रजल्पितम् ॥१५४॥
कुमार ! साधु साधूक्तं, नष्टो मे संशयोऽधुना ।
तत्तावद्वर्णयेदानीं, लक्षणं मम योषिताम् ॥१५५॥
अन्यच्च कीदृशं तावदिदं ते प्रतिभासते ।
मिथुनं लक्षणैर्येन, जातस्ते विस्मयोऽतुलः ॥१५६॥

विमलेनोक्तं आकर्णय-

चक्रवर्ती भवत्येव, नरोऽमूदृशलक्षणैः ।
ललनाऽपीदृशी भद्र !, भार्या तस्यैव जायते ॥१५७॥
तेन मे विस्मयो जातो, दृष्ट्वेदं मिथुनोत्तमम् ।
निशामय ततो भद्र !, लक्षणं योषितोऽऽधुना ॥१५८॥

स्त्रीलक्षणानि ।

मयोक्तं कथयतु कुमारः, विमलेनोक्तं-

मुखमर्धं शरीरस्य, सर्वं वा मुखमुच्यते ।
ततोऽपि नासिका श्रेष्ठा, नासिकातोऽपि लोचने ॥१५९॥
चक्रं पद्म ध्वजं छत्रं, स्वस्तिकं वर्धमानकम् ।
यासां पादतले विन्द्याः, ताः स्त्रियो राजयोषितः ॥१६०॥
दासत्वं पृथुलैः पादैर्वक्रैः शूर्पनिभैस्तथा ।
शुष्कैर्दारिद्र्यमाप्नोति, शोकं चेति मुनेर्वचः ॥१६१॥
अङ्गुल्यो विरला रूक्षा, यस्याः कर्मकरी तु सा ।
स्थूलाभिर्दुःखमाप्नोति, दारिद्र्यं च न संशयः ॥१६२॥
श्लक्ष्णाभिः संहताभिश्च, सुवृत्ताभिस्तथैव च ।
रक्ताभिर्नातिदीर्घाभिरङ्गुलीभिः सुखान्विताः ॥१६३॥
पीनौ सुसंहतौ स्निग्धौ, सिरारोमविवर्जितौ ।
हस्तिहस्तनिभौ यस्या, जङ्घोरू सा प्रशस्यते ॥१६४॥
विस्तीर्णमांसला गुर्वी, चतुरस्राऽतिशोभना ।
समुन्नतनितम्बा च, कटिः स्त्रीणां प्रशस्यते ॥१६५॥
उदरेण शिरालेन, निर्मांसेन क्षुधार्दिता ।
विलग्नमध्यशोभेन, तेनैव सुखभागिनी ॥१६६॥

---

१. दृश्यमानशिरावृन्देन ।

कुनखैः सव्रणैः स्विन्नैर्विस्तीर्णै रोमशैः खरैः ।
विकृतैः पाण्डुरै रूक्षैर्नार्यो हस्तैः सुदुःखिताः ॥१६७॥

यावच्चैवं किल विस्तरेण निवेदयिष्यति मम नारीलक्षणं विमलस्तावदकाण्ड एव किं सम्पन्नम् ?-

आकाशे भास्कराकारौ, निष्कृष्टासी बिभीषणौ ।
नरौ विलोकितौ तूर्णमागच्छन्तौ तदा मया ॥१६८॥

अकाण्डे वृत्तान्तः ।

ततः ससम्भ्रमं तदभिमुखमवलोकयता मयाऽभिहितं-कुमार ! कुमारेति, ततो विमलेनापि विस्फारिता किमेतदिति चिन्तयता तदभिमुखं विमलकोमलकमल-दलविलासलासिनी दृष्टिः, अत्रान्तरे प्राप्तौ लतागृहकस्योपरि तौ पुरुषौ, ततोऽ-भिहितमेकेन-अरे रे निर्लज्ज पुरुषाधम ! नास्ति नश्यतोऽपि भवतो मोक्षः, तदिदानीं सुदृष्टं कुरु जीवलोकं, स्मरेष्टदेवतां, पुरुषो वा भवेति । एतच्चाकर्ण्यासौ लतागृहकमध्यवर्ती पुरुषो धीरा भवेति संस्थाप्य तां ललनामरे रे न विस्मर्त-व्यमिदमात्मजल्पितं, पश्यामः को वाऽत्र नश्यतीति ब्रुवाणः समाकृष्य करवाल-मुत्पतितस्तदभिमुखं,

ततस्ताभ्यां समं तस्य, विलसत्खड्गवारणम् ।
प्रेङ्खत्खणखणारावसिंहनादातिभीषणम् ॥१६९॥
अनेककरणोद्दामवल्गनोद्धतिबन्धुरम् ।
जातमायोधनं भीममाकाशे कृतविस्मयम् ॥१७०॥ युग्मम् ॥

तयोश्चैकः पुरुषो मुहुर्मुहुर्लतागृहकं प्रवेष्टुमभिवाञ्छति स्म, ततः सा बाला भयविह्वला वेपमानपयोधरा हरिणिकेव सिंहत्रासिता दशस्वपि दिक्षु चक्षुः क्षिपन्ती निर्गत्य पलायितुं प्रवृत्ता, ततो दृष्ट्वा विमलकुमारमभिहितमनया-त्रायस्व पुरुषो-त्तम ! त्रायस्व, गताऽस्मि तवाहं शरणं, विमलेनोक्तं-सुन्दरि ! धीरा भव, नास्त्य-धुना ते भयं, अत्रान्तरे तद्ग्रहणार्थं प्राप्तः स पुरुषः, स च विमलकुमार-गुणगणावर्जितया तस्मिन्नेव गगने स्तम्भितो वनदेवतया ।

ततो विस्फारिताक्षोऽसौ, विलक्षो विगतक्रियः ।
चित्रभित्ताविव न्यस्तो, गगनस्थः स्थितो नरः ॥१७१॥

अत्रान्तरे स तस्य द्वितीयः पुरुषो निर्जितस्तेन मिथुनकेन पलायितुं प्रवृत्तो लग्नस्तत्पृष्ठतो मिथुनको दृष्टः स्तम्भितनरेण, गृहीतोऽसौ रोषोत्कर्षेण, प्रवृत्ता पृष्ठतो गमनेच्छा, लक्षितो देवतया तद्भावः, ततश्चोत्तम्भितोऽसौ वनदेवतया प्रवृत्तः पृष्ठतो वेगेन इतश्च लङ्घितौ दृष्टेर्गोचरमितरौ गतः, सोऽपि तदनुमार्गेणाऽदर्शनं, ततः

सा बाला आर्यपुत्र ! हा आर्यपुत्र ! क्व यासि मां मुक्त्वा मन्दभाग्यामिति प्रलपितुं प्रवृत्ता, संस्थापिता कथञ्चिद्विमलेन मया च, गता कियत्यपि वेला । अत्रान्तरे-

जयश्रिया परीताङ्गो, लसत्कान्तिमनोहरः ।
समागतः स वेगेन, तस्या मिथुनको नरः ॥१७२॥

ततस्तं दृष्ट्वा सा बालिकाऽमृतसेकसिक्तेव गता परमपरितोषं, निवेदितश्च तया तस्मै वृत्तान्तः । ततः स पुरुषो विमलकुमारं प्रणम्येदमाह-

बन्धुर्भ्राता पिता माता, जीवितं च नरोत्तम ! ।
त्वं मे येन प्रिया धीर !, रक्षितेयं मम त्वया ॥१७३॥
अथवा-दासोऽहं किङ्करो वश्यः, प्रेष्यस्ते कर्मकारकः ।
तद्दीयतां ममादेशः, किं करोमि तव प्रियम् ? ॥१७४॥

रत्नचूडवृत्तान्तारम्भः ।

विमलेनोक्तं-महासत्त्व ! अलमत्र सम्भ्रमेण के वयमत्र रक्षितुम् ? रक्षितेयं स्वमाहात्म्येनैव भवता । केवलं महत्कौतुकं मे कथयतु भद्र ! कोऽयं वृत्तान्तः ? किं वा ते गतस्य सम्पन्नमिति, तेनोक्तं-यद्येवं ततो निषीदतु कुमारो महतीयं कथा ततो निषण्णाः सर्वेऽपि लतागृहके, स प्राह कुमाराकर्णय - अस्ति शरच्छशधर-करनिकरधवलो रजतमयो वैताढ्य नाम पर्वतः, तत्र चोत्तरदक्षिणे द्वे श्रेणी, तयोश्च षष्टिः पञ्चाशच्च यथाक्रमं विद्याधरपुराणि वसन्ति, तत्र दक्षिणश्रेण्यामस्ति गगन-शेखरं नाम पुरं, तत्र मणिप्रभो राजा, तस्य कनकशिखा देवी, तस्याश्च रत्नशेखर-स्तनयो रत्नशिखामणिशिखे च दुहितरौ, तत्र रत्नशिखा मेघनादस्य दत्ता, मणिशिखा त्वमितप्रभस्य । ततस्तयो रत्नशिखामेघनादयोर्जातोऽहं तनयः, प्रतिष्ठितं मे नाम रत्नचूड इति, मणिशिखामितप्रभयोस्तु द्वौ सूनू जातावचलश्च चपलश्च । रत्नशेखरस्य च रतिकान्ता पत्नी, तस्याश्चेयमेका चूतमञ्जरी दुहिता जातेति, सहक्रीडितानि सर्वाण्यपि वयं बालकाले, प्राप्तानि कुमारभावं, गृहीताः कुलक्रमायाता विद्याः । इतश्च रत्नशेखरस्य बालवयस्योऽस्ति चन्दनो नाम सिद्धपुत्रकः, स च-

सर्वज्ञागमसद्भावभावितो निपुणस्तथा ।
निमित्ते ज्योतिषे मन्त्रे, सतन्त्रे नरलक्षणे ॥१७५॥
ततस्तदीयसम्पर्कात्सञ्जातो रत्नशेखरः ।
गाढं रक्तो दृढं भक्तो, धर्मे सर्वज्ञभाषिते ॥१७६॥
ततो मदीयताताय, मेघनादाय सादरम् ।
दत्तस्तेनापि सद्धर्मो, भगिन्यै मह्यमेव च ॥१७७॥

इतश्च-निर्दिष्टश्चन्दनेनाहं, किञ्चिदालोक्य लक्षणम् ।
यथाऽयं दारको विद्याचक्रवर्ती भविष्यति ॥१७८॥

अत्रान्तरे मयोक्तं-कुमार ! संवदति तत्तावकीनं वचनं, विमलेनोक्तं-वयस्य वामदेव ! न मामकीनं तत्, किं तर्हि ?, आगमवचनम्, अत्र च कुतो विसंवादः ? रत्नचूडेनोक्तं-ततस्तेन मदीयमातुलेन रत्नशेखरेण साधर्मिकोऽयमुचितोऽयं सलक्षणोऽयमिति मत्वा दत्ता मह्यमियं चूतमञ्जरी, परिणीता मया, ततः प्रकुपितावचलचपलौ, न च मां परिभवितुं शक्नुतः मृगयेते छिद्राणि, ततो मया छलघाताशङ्कया मुक्तो मुखरनामा चरः, तेन चागत्य निवेदितं मे यथा-कुतश्चिदवाप्ता ताभ्यामचलचपलाभ्यां काली विद्या, तत्साधनार्थं तौ कुत्रचिद्गताविति, मयोक्तं-भद्र ! यदा तावागच्छतस्तदा निवेदनीयं भवता । मुखरेणोक्तं-यदाज्ञापयति देवः, ततोऽद्य प्रभातसमये निवेदितं तेन मे, यथा-देव ! समायातौ तौ, सिद्धा काली विद्या, जातं तयोर्मन्त्रणं, अभिहितमचलेन यथा-चपल ! मया रत्नचूडेन सह योद्धव्यं, भवता तु चूतमञ्जरी हरणीयेति, एतदाकर्ण्य देवः प्रमाणम्, ततो मया चिन्तितं-शक्तोऽहं सविद्ययोरपि तयोर्निराकरणे, केवलं न मारयितव्यौ मातृष्वसुः पुत्रौ तौ तावदचलचपलौ मया धर्मक्षतिभयाल्लोकापवादभयाच्च, दुष्टशीलश्चासौ चपलः, ततश्छलेन हृत्वा यद्येनां चूतमञ्जरीं विनाशयिष्यति ततो मे गृह्णतो मुञ्चतश्चैनां लाघवं सम्पत्स्यते, न चान्यो-ऽस्ति मे सहायो यो युध्यमानस्य मे चूतमञ्जरीं रक्षति, तस्मादत्रावसरे ममापक्रमणं श्रेयः, ततो गृहीत्वा चूतमञ्जरीमपक्रान्तोऽहं, दृष्टपूर्वं च मयेदं बहुशः क्रीडानन्दन-मुद्यानं, ततोऽत्र समागत्य स्थितो लतागृहके यावदनुमार्गेणैव मे समागतौ तावचलचपलौ, समाहूतश्चाहं गतोऽहं तदनुमार्गेण यावत्प्राप्तोऽसौ मया उत्तेजितः परुषवचनै- र्वलितो मदभिमुखं पुनर्लग्नमायोधनं ततो मया दत्त्वा बन्धमा-स्फोटितोऽसावचलो गगनवर्तिनैव सतिरस्कारं सस्पर्धं निष्ठुरमचलेन, ततस्तद्वचन-माकर्णयतो मे हृदयं कीदृशं सम्पन्नम् ?-

इतः प्रियतमास्नेहतन्तुनिर्बन्धकीलितम् ।
इतश्च शत्रुदुर्वाक्यैः, सङ्ग्रामरसभासुरम् ॥१७९॥
न तिष्ठति न वा याति, मूढं कर्तव्यताकुलम् ।
दोलारूढमिवाभाति, क्षणं मे हृदयं तदा ॥१८०॥

तथापि गाढामर्षवशेन समुत्पतितोऽहं तदभिमुखं लग्नमायोधनं दृष्टं च तत्प्रायो युष्माभि- र्यावन्नष्टोऽचलो गगनस्थेनैव भूतले, ततस्तस्य चूर्णितान्यङ्गोपाङ्गानि, विगलितं पौरुषं, सञ्जातं दैन्यं, न वहन्ति विद्या, निष्पन्दं शरीरं, ततो मया चिन्तितं-सर्वथा तथा सम्पन्नो यथा न पुनरागच्छति, किं तु ?-

हतं मुष्टिभिराकाशं, कण्डिताश्च तुषा मया ।
योऽस्याहं पृष्ठतो लग्नस्तां हित्वा चूतमञ्जरीम् ॥१८१॥
यतः सैकाकिनी बाला, भयेनैव मरिष्यति ।
अथवा चपलः पापः, स तां नूनं हरिष्यति ॥१८२॥

यद्वा किमत्र वक्तव्यं, हृतैव ननु बालिका । तदधुना क्व याति स दुरात्मेति विचिन्त्य चलितोऽहं वेगेन यावद्दृष्टो मया सम्मुखमागच्छंश्चपलः, ततो मया चिन्तितम्-अये किमेष चपलः समागतः किं न दृष्टाऽनेन चूतमञ्जरी किं वाऽनिच्छन्ती सुरतं रोषान्निपातिताऽनेन पापेन ? सर्वथा तस्यां स्वाधीनायां जीवन्त्यां वा न कथञ्चिदस्यागमनं युज्यते, तथाहि-

शून्ये दधिघटीं दृष्ट्वा, काकः स्थगनवर्जिताम् ।
लब्धास्वादोऽपि तां मुक्त्वा, कथमन्यत्र गच्छति ॥१८३॥

ततो निश्चितं-न जीवति मे प्रियतमा, यावच्चैवमहं चिन्तयामि तावदापतितश्चपलः, लग्नं युद्धं, ततः सोऽपि मया तथैवास्फोटितो भूतले जाता तस्यापि सैव वार्ता, ततो हा हन्त किं मृता सा ? किं नष्टा सा किं विनष्टा सा किं क्वचिद्गोपायिता सा किमन्यस्य कस्यचित्करीभूतेति प्रियतमागोचरानेककुविकल्पलोलकल्लोलजालमालाकुलचेतोनदीस्रोतः-प्लवे प्लवमानः प्राप्तोऽहमिममुद्देशं दृष्टा प्रियतमा ततः समुच्छ्वसितं हृदयेन, पुलकितमङ्गेन, स्थिरीभूतं चेतनया, कृतमास्पदं शरीरे सुखासिकया, विगतं चित्तोद्वेगेनेति, कथितं चानया मे सवृत्तान्तं भवदीयमाहात्म्यं, तदेष मया निवेदितः समासेन प्रस्तुतवृत्तान्तः । एवं च स्थिते-

विमलरत्नचूडसम्बन्धः ।

तदेनां रक्षता तात !, रक्षितं मम जीवितम् ।
कृता कुलोन्नतिर्धीर !, दत्तं मे निर्मलं यशः ॥१८४॥
किंवाऽत्र बहुनोक्तेन ?, नास्ति तद्वस्तु किञ्चन ।
महानुभाव ! लोकेऽत्र, यन्न मे विहितं त्वया ॥१८५॥
सुप्रसिद्धं चेदं लोके, यदुत-

कृते प्रत्युपकारोऽत्र, वणिग्धर्मो न साधुता ।
ये तु तत्रापि मुह्यन्ति, पशवस्ते न मानुषाः ॥१८६॥

तद्दीयतां ममादेशः, क्रियतां मदनुग्रहः ।
येन सम्पादयत्येष, प्रियं ते किङ्करो जनः ॥१८७॥

विमलेनोक्तम्–अहो कृतज्ञशेखर ! अलमतिसम्भ्रमेण, किं वा न सम्पन्नमस्माकं युष्मद्दर्शनेन ? किमतोऽप्यपरं प्रियतरमस्ति ? तथाहि–

वचः सहस्रेण सतां न सुन्दरं, हिरण्यकोट्याऽपि न वा निरीक्षितम् ।
अवाप्यते सज्जनलोकचेतसा, न कोटिलक्षैरपि भावमीलनम् ॥१८८॥

किंवाऽत्र मया विहितं ते ? येनैवमात्मानं पुनः पुनः सम्भ्रमयति भद्रः, इत्येवं वदति विमले कुतः सुजनेऽर्थित्वम् ? कर्तव्यश्चास्य मया कश्चित्प्रत्युपकारो, न भवत्यन्यथा मे चित्तनिवृत्तिरिति मन्यमानेन प्रकटितं रत्नचूडेनैकं रत्नं हस्ततले, तच्च कीदृशम् ?–

विमलाय रत्नदानम् ।

किं नीलं किमिदं रक्तं, किं पीतं यदिवा सितम् ।
किं कृष्णमिति सुव्यक्तं, लोकदृष्ट्या न लक्ष्यते ॥१८९॥
द्योतिताशेषदिक्चक्रं, सर्ववर्णविराजितम् ।
लसदच्छप्रभाजालैर्दिक्षु बद्धेन्द्रकार्मुकम् ॥१९०॥
तच्च दर्शयित्वाऽभिहितं रत्नचूडेन–कुमार !
सर्वरोगहरं धन्यं, जगद्दारिद्र्यनाशनम् ।
गुणैश्चिन्तामणेस्तुल्यमिदं रत्नं सुमेचकम् ॥१९१॥
दत्तं ममेदं देवेन, तोषितेन स्वकर्मणा ।
इह लोके करोत्येतत्सर्वाशापूरणं नृणाम् ॥१९२॥

तदस्य ग्रहणेन ममानुग्रहं करोतु कुमारो, नान्यथा मे धृतिः सम्पद्यते, विमलेनोक्तं–महात्मन्न कर्तव्यो भवताऽऽग्रहो न च विधेया चेतस्यवभावना दत्तमिदं त्वया गृहीतं मया केवलं तवैवेदं सुन्दरमतः सङ्गोप्यतामिदं मुच्यतामतिसम्भ्रमः । ततश्चूतमञ्जर्योक्तं–कुमार ! न कर्तव्यो भवताऽऽर्यपुत्रस्यायमभ्यर्थनाभङ्गः, तथाहि–

निःस्पृहा अपि चित्तेन, दातरि प्रणयोद्यते ।
सन्तो नाभ्यर्थनाभङ्गं, दाक्षिण्यादेव कुर्वते ॥१९३॥
एवं च चूतमञ्जर्यां, वदन्त्यां विमलः किल ।
किमुत्तरं ददामीति, यावच्चिन्तयते हृदि ॥१९४॥
तावद्वस्त्राञ्चले तस्य, रत्नचूडेन सादरम् ।
तद्रत्नं बद्धमेवोच्चैर्दिव्यकर्पटके स्थितम् ॥१९५॥

अथ तादृशरत्नस्य, लाभेऽपि विगतस्पृहम् ।
मध्यस्थं हर्षनिर्मुक्तं, विमलं वीक्ष्य चेतसा ॥१९६॥
स रत्नचूडः स्वे चित्ते, तद्गुणैर्गाढभावितः ।
तदा विचिन्तयत्येवं, विस्मयोत्फुल्ललोचनः ॥१९७॥
अहो अपूर्वं माहात्म्यमहो निःस्पृहताऽतुला ।
इदमस्य कुमारस्य, लोकातीतं विचेष्टितम् ॥१९८॥
यद्वा यस्येदृशं जातं, चित्तरत्नं महात्मनः ।
तस्यास्य बाह्यैर्लोकेऽत्र, किं वा रत्नैः प्रयोजनम् ? ॥१९९॥
एतदेवंविधं चित्तं, जायते पुण्यकर्मणाम् ।
प्रायोऽनेकभवैर्धर्मकर्मरञ्जितचेतसाम् ॥२००॥
ये तु पापाः सदा जीवाः, शुद्धधर्मबहिष्कृताः ।
तेषां न सम्भवेत्प्रायो, निर्मलं चित्तमीदृशम् ॥२०१॥

रत्नचूडेन विमलोदन्तपृच्छा ।

ततश्चैवमवधार्य चिन्तितं रत्नचूडेन–अये ! पृच्छामि तावदेनमस्य कुमारस्य सहचरं, यदुत–कुत्रत्योऽयं कुमारः ? किंनामा ? किंगोत्रः ? किमर्थमिहागतः ? किंवाऽस्यानुष्ठानमिति, ततः पृष्टोऽहं यथाविवक्षितमेकान्ते कृत्वा रत्नचूडेन, मयाऽपि कथितं तस्मै यथा–अत्रैव वर्धमानपुरे क्षत्रियस्य धवलनृपतेः पुत्रोऽयं विमलो नामा, अभिहितं चाद्यानेन यथा–वयस्य वामदेव ! यदिदं क्रीडानन्दनमुद्यानमतिरमणीयं जनवादेन श्रूयते तन्मम जन्मापूर्वं, ततोऽद्य गच्छावस्तद्दर्शनार्थं, मयोक्तं–यदाज्ञापयति कुमारः, ततः समागताविह, श्रुतो युवयोः शब्दः, तदनुसारेण गच्छद्भ्यां दृष्टा पदपद्धतिस्तथा लक्षितं नरमिथुनं ततो लतागृहके दृष्टौ युवां निरूपितौ कुमारेण कथितं मे लक्षणं निर्दिष्टं च यथाऽयं चक्रवर्तीयं चास्यैव भार्या भविष्यति । तदिदमिहास्यागमनप्रयोजनम्, अनुष्ठानं पुनरस्य सर्वं यथा चेष्टितं श्लाघनीयं विदुषामभिमतं लोकानामाह्लादकं बन्धूनामभिरुचितं वयस्यानां स्पृहणीयं मुनीनामपीति, केवलं न प्रतिपन्नमनेनाद्यापि किञ्चिद्दर्शनम् । रत्नचूडेन चिन्तितम्–अये ! सर्वं सुन्दरमाख्यातमनेन–तदिदमत्र प्राप्तकालं दर्शयाम्यस्य भगवद्बिम्बम्, उचितोऽयं तद्दर्शनस्य सम्पत्स्यतेऽस्य तद्दर्शनेन महानुपकारः, एवं च कुर्वतो ममापि प्रत्युपकारकरणमनोरथः परिपूर्णो भविष्यतीति विचिन्त्याभिहितोऽनेन विमलकुमारः, यथा–कुमार ! इह क्रीडानन्दने समागतः–क्व–(कदा)चित्पूर्वं मदीय[illegible] [illegible]क्रमः । प्रतिभातमिदमतिकमनीयं काननं

ततोऽत्र पुनः पुनर्विद्याधराणामवतारणार्थं महाभवनं विधाय प्रतिष्ठितं तेन भगवतो युगादिनाथस्य बिम्बम्, अत एव बहुशोऽहमिहागतः पूर्वं ततो ममानुग्रहेण तद्द्रष्टुमर्हति कुमारः । विमलेनोक्तं-यद्वदत्यार्यः, तदाकर्ण्य हृष्टो रत्नचूडः, ततो गता वयं भवनाभिमुखं ततो दृष्टं भगवतो मन्दिरं, तच्च कीदृशम् ?-

युगादिदेवभवने प्रवेशः ।

विमलस्फटिकच्छायं, स्वर्णराजिविराजितम् ।
तडिद्वलयसंयुक्तं, शरदम्बुधरोपमम् ॥२०२॥
विलसद्वज्रवैडूर्यपद्मरागमणित्विषा ।
नष्टान्धकारसम्बन्धमुद्द्योतितदिगन्तरम् ॥२०३॥

अपि च-लसदच्छाच्छनिर्मलस्फटिकमणिनिर्मितकुट्टिमसङ्क्रान्तविलसत्तपनीयस्तम्भं स्तम्भविन्यस्तविद्रुमकिरणकदम्बकरक्तमुक्ताफलावचूलमवचूलविरचितमरकतमयूखश्यामायमानसितचमरनिकरं सितचमरनिकरदण्डचामीकरप्रभापिञ्जरितादर्शमण्डलमादर्शमण्डलगतविराजमानारुणमणिहारनिकुरुम्बं हारनिकुरुम्बावलम्बितविशदहाटककिङ्किणीजालमिति । तत्र चैवंविधे भुवननाथस्य भवने प्रविश्य तैरवलोकितं भगवतो युगादिनाथस्य बिम्बं, तच्च-

दिक्षु प्रेङ्खत्प्रभाजालं, शातकुम्भविनिर्मितम् ।
शान्तं कान्तं निराटोपं, निर्विकारं मनोहरम् ॥२०४॥

ततः सर्वैरपि विहितो हर्षभरविस्फारिताक्षैः प्रणामः, वन्दितं च विशदानन्दपुलकोद्भेदसुन्दरं वपुर्दधानाभ्यां विधिवच्चूतमञ्जरीरत्नचूडाभ्याम्, तच्चेदृशं सचराचरभुवनबन्धोर्भगवतो बिम्बं निरूपयतो विमलकुमारस्य सहसा समुल्लसितं जीववीर्यं, विदारितं भूरिकर्मजालं, वृद्धिमुपगता सद्बुद्धिः, प्रादुर्भूतो दृढतरं गुणानुरागः, ततश्चिन्तितमनेन- अहो भगवतोऽस्य देवस्य रूपम्, अहो सौम्यता, अहो निर्विकारता, अहो सातिशयत्वम्, अहो अचिन्त्यमाहात्म्यता, तथाहि-

आकार एव व्याचष्टे, निष्कलङ्को मनोहरः ।
अनन्तमस्य देवस्य, गुणसम्भारगौरवम् ॥२०५॥
वीतरागो गतद्वेषः, सर्वज्ञः सर्वदर्शनः ।
सुनिश्चितमयं देवो, बिम्बादेवावगम्यते ॥२०६॥
यावत्स चिन्तयत्येवं, मध्यस्थेनान्तरात्मना ।

विमलः क्षालयन्नुच्चैर्मलमात्मीयचेतसः ॥२०७॥

तावत्तस्य समुत्पन्नं, स्वजातेः स्मरणं तदा ।
अतीतभवसन्तानवृत्तान्तस्मृतिकारणम् ॥२०८॥ युग्मम् ॥
अथ सञ्जातमूर्च्छोऽसावचिन्त्यरसनिर्भरः ।
पतितो भूतले सद्यः, सर्वेषां कृतसम्भ्रमः ॥२०९॥
अथ वायुप्रदानेन, सञ्जातः स्पष्टचेतनः ।
पृष्टं किमेतदित्येवं, रत्नचूडेन सादरम् ॥२१०॥
ततः प्रादुर्भवद्भक्तिः, स्फुटरोमाञ्चभूषणः ।
हर्षोत्फुल्लविशालाक्षः, प्रबद्धाञ्जलिबन्धुरः ॥२११॥
विमलो रत्नचूडस्य, गृहीत्वा चरणद्वयम् ।
आनन्दोदकपूर्णाक्षः, प्रणनाम मुहुर्मुहुः ॥२१२॥
प्राह च-शरीरं जीवितं बन्धुर्नाथो माता पिता गुरुः ।
देवता परमात्मा च, त्वं मे नास्त्यत्र संशयः ॥२१३॥
येनेदं दर्शनादेव, पापप्रक्षालनक्षमम् ।
त्वया मे दर्शितं धीर !, सद्बिम्बं भवभेदिनः ॥२१४॥

विमलस्य सम्यक्त्वोत्पादः ।

एतद्धि दर्शयता रत्नचूड ! भवता दर्शितो मे मोक्षमार्गः, कृतं परमसौजन्यं, छेदिता भववल्लरी, उन्मूलितं दुःखजालं, दत्तं सुखकदम्बकं, प्रापितं शिवधामेति । रत्नचूडेनोक्तं-कुमार ! नाहमद्यापि विशेषतोऽवगच्छामि, किमत्र सम्पन्नं भवतः ? विमलेनोक्तम्-आर्य ! सम्पन्नं मे जातिस्मरणं, स्मृतोऽद्यदिनमिवातीतो भूरिभव-सन्तानः, यतः "पुनरपि निवेशिता मया भक्तिभरनिर्भरेण भूरिभवेषु वर्तमानेन भगवद्बिम्बे दृष्टिः, निर्मलीकृतं सम्यग्ज्ञाननिर्मलजलेन चित्तरत्नं, रञ्जितं सम्यग्दर्शनेन मानसं, सात्मीकृतं सदनुष्ठानं, भावितो भावनाभिरात्मा, वासितं तत्साधुपर्युपासनया-ऽन्तःकरणं, सात्मीभूता मे समस्तभूतेषु मैत्री, गतोऽङ्गाङ्गीभावं गुणाधिकेषु प्रमोदः, धारितं बहुशश्चित्ते क्लिश्यमानेषु कारुण्यं, दृढीभूता दुर्विनीतेषूपेक्षा, निश्चलीभूतं वैषयिकसुखदुःखयोरौदासीन्यं, तथा परिणतः प्रशमः, परिचितः संवेगः, चिरसंस्तुतो भवनिर्वेदः, प्रगुणिता करुणा, अनुगुणितमास्तिक्यं, प्रगुणी-भूता गुरुभक्तिः, क्षेत्रीभूतौ तपःसंयमाविति" । ततो यावद्दृष्टं मयेदं भुवनभर्तु-र्भगवतो निष्कलङ्कं बिम्बं तावदहं सिक्त इवामृतरसेन, पूरित इव रत्या, स्वीकृत इव सुखासिकया, भृत इव प्रमोदेन । ततः स्फुरितं मम हृदये यदुत–

रागद्वेषभयाज्ञानशोकचिह्नैर्विवर्जितः ।
प्रशान्तमूर्त्तिर्देवोऽयं, लोचनानन्ददायकः ॥२१५॥
दृश्यमानो यथा धत्ते, ममाह्लादं तथा पुरा ।
नूनं क्वचिन्मया मन्ये, दृष्टोऽयं परमेश्वरः ॥२१६॥
एवं च चिन्तयन्नेव, लोकातीतं रसान्तरम् ।
प्रविष्टोऽनुभवद्वारसंवेद्यमतिसुन्दरम् ॥२१७॥
यतो भवात्समारभ्य, प्राप्तं सम्यक्त्वमुत्तमम् ।
ततः स्मृता मया सर्वे, तदारान्निखिला भवाः ॥२१८॥

तदिदं महात्मन्नत्र मे सम्पन्नम्, अतः कृतं तन्मे भवता यत्परमगुरवः कुर्वन्तीति ब्रुवाणो रत्नचूडचरणयोर्निपतितः पुनर्विमलकुमारः । ततो नरोत्तम ! अलमलमतिसम्भ्रमेणेति वदता समुत्थापितोऽसौ रत्नचूडेन साधर्मिक इति वन्दितः, सविनयमभिहितं च-कुमार ! सम्पन्नमधुना मे समीहितं, परिपूर्णा मनोरथाः, कृतस्ते प्रत्युपकारो यदेवं मादृशजनोऽपि ते परिचिततत्त्वमार्गप्रत्यभिज्ञाने कारण-भावं प्रतिपन्न इति, स्थाने च कुमारस्यायं हर्षातिरेकः, यतः-

सत्कलत्रे सुते राज्ये, द्रविणे रत्नसञ्चये ।
अवाप्ते स्वर्गसौख्ये च, नैव तोषो महात्मनाम् ॥२१९॥

तथाहि-तुच्छानि स्वल्पकालानि, सर्वाणि परमार्थतः ।
एतानि तेन धीराणां, नैव तोषस्य कारणम् ॥२२०॥
जैनेन्द्रं पुनरासाद्य, मार्गं भीमे भवोदधौ ।
सुदुर्लभं महात्मानो, जायन्ते हर्षनिर्भराः ॥२२१॥
तथाहि-सम्प्राप्तस्तत्क्षणादेव, मार्गः सर्वज्ञभाषितः ।
शमसातामृतास्वादसंवेदनकरो नृणाम् ॥२२२॥
अनन्तानन्दसम्पूर्णमोक्षहेतुश्च निश्चितः ।
अतः सतां कथं नाम, न हर्षोल्लासकारणम् ? ॥२२३॥

अन्यच्च-

सत्त्वानुरूपं वाञ्छन्ति, फलं सर्वेऽपि जन्तवः ।
श्वा हि तुष्यति पिण्डेन, गजघातेन केसरी ॥२२४॥

मूषको व्रीहिमासाद्य, नृत्यत्युत्तालहस्तकः ।

गजेन्द्रोऽवज्ञया भुङ्क्ते, चलदत्तं सुभोजनम् ॥२२५॥

तथा–अदृष्टतत्त्वा ये मूढाः, स्तोकचित्ता मनुष्यकाः ।
धनराज्यादिकं प्राप्य, जायन्ते ते मदोत्कटाः ॥२२६॥
त्वं तु पूर्वं–चिन्तामणिसमे रत्ने, लब्धे मध्यस्थतां गतः ।
न लक्षितो मया धीर !, हर्षदोषकलङ्कितः ॥२२७॥
अधुनैवं पुनर्धन्यः, स्फुटरोमाञ्चसुन्दरः ।
सन्मार्गलाभे तुष्टोऽसि, साधु साधु नरोत्तम ! ॥२२८॥

केवलमत्र जने नैवमतिगुरुत्वमारोपणीयं कुमारेण, किमत्र मया विहितं कुमारस्य ? निमित्तमात्रमत्र सम्पन्नोऽहं, स्वयमेव योग्योऽसि त्वमेवंविधकल्याण-परम्परायाः, मयाऽपि हि तावकीनां पात्रतामुपलक्ष्यायं विहितो यत्नः, तथाहि–
स्वयंविज्ञातसद्भावा, लोकान्तिकसुरैस्तदा ।
यदि नाम प्रबोध्यन्ते, तीर्थनाथाः कथञ्चन ॥२२९॥
तथापि ते सुरास्तेषां, न भवन्ति महात्मनाम् ।
गुरवस्तादृशे पक्षे, द्रष्टव्योऽयं त्वया जनः ॥२३०॥ युग्मम् ॥

उपकारकीर्त्तनम् ।

विमलेनोक्तं–महात्मन्मा मैवं वोचः न सदृशमिदमस्योदितं भवता, नहि भगवति बोधयितव्ये लोकान्तिकसुराणां निमित्तभावः, भवता तु दर्शयता भगवद्बिम्बं सम्पादितमेव ममेदं सकलं कल्याणम्, इह च–
निमित्तमात्रतां योऽपि, धर्मे सर्वज्ञभाषिते ।
प्रतिपद्येत जीवस्य, स गुरुः पारमार्थिकः ॥२३१॥
एवं मे विदधानस्त्वं, गुरुरेव न संशयः ।
उचितं तु सतां कर्तुं, सद्गुरोर्विनयादिकम् ॥२३२॥
तस्मादुचितमेवेदं सर्वं तावकोपकारस्येति । किं च–
एषा भगवतामाज्ञा, सामान्यस्यापि सुन्दरम् ।
कार्यः साधर्मिकस्येह, विनयो वन्दनादिकः ॥२३३॥
किं पुनस्ते महाभाग !, नैवं सद्धर्मदायिनः ।
युज्यते विनयः कर्तुं, निर्मिथ्यस्यापि सद्गुरोः ॥२३४॥
रत्नचूडेनोक्तं–मा मैवमादिशतु कुमारः, तथाहि–
गुणप्रकर्षरूपस्त्वं, पूजनीयः सुरैरपि ।
त्वमेव गुरुरस्माकं, तन्नैवं वक्तुमर्हसि ॥२३५॥

विमलेनोक्तं-गुणप्रकर्षरूपाणां, कृतज्ञानां महात्मनाम् ।
इदमेव स्फुटं लिङ्गं, यद्गुरोर्भक्तिपूजनम् ॥२३६॥
स महात्मा स पुण्यात्मा, स धन्यः स कुलोद्गतः ।
स धीरः स जगद्वन्द्यः, स तपस्वी स पण्डितः ॥२३७॥
यः किङ्करत्वं प्रेष्यत्वं, कर्मकारत्वमञ्जसा ।
दासत्वमपि कुर्वाणः, सद्गुरूणां न लज्जते ॥२३८॥
स कायः श्लाघितः पुंसां, यो गुरोर्विनयोद्यतः ।
सा वाणी या गुरोः स्तोत्री, तन्मनो यद्गुरौ रतम् ॥२३९॥
अनेकभवकोटीभिरुपकारपरैरपि ।
धर्मोपकारकर्तॄणां, निष्क्रयो न विधीयते ॥२४०॥

विमलस्य दीक्षाग्रहणाभिलाषः ।

अन्यच्चेदमधुना पर्यालोच्यं भवता सार्धं मया यदुत-विरक्तं तावन्मे भवचारकवासाच्चित्तं, गृहीता दुःखात्मकतया विषयाः, भावितो लोकोत्तरामृतास्वादरूपतया प्रशमः, न स्थातव्यमधुना गृहपञ्जरे, ग्रहीतव्या भागवती दीक्षा, केवलं सन्ति मे तातप्रभृतयो बहवो बान्धवाः, तेषां कः प्रतिबोधनोपायः स्यात् ? एवं हि तेषां मया बन्धुत्वकार्यमाचरितं भवति यदि तेऽपि मन्निमित्तकं भगवद्भाषिते धर्मे प्रतिबुध्यन्ते, नान्यथा । रत्नचूडेनोक्तम्-अस्ति बुधो नामाचार्यः, स यदीह कथञ्चिदागच्छेत्ततस्तानपि तव ज्ञातीनवश्यं प्रतिबोधयेत्, स हि भगवान्निधिरतिशयानामाकरश्चित्तज्ञतानैपुण्यस्य, प्रकर्षः प्राणिप्रशमलब्धेरियत्ताभूमिर्वचनविन्यासस्येति । विमलेनोक्तम्-आर्य ! क्व पुनरसौ दृष्टो बुधसूरिर्भवता ? रत्नचूडेनोक्तं-

बुधसूरिस्वरूपकथनम् ।

अत्रैव क्रीडनन्दनेऽस्यैव च भगवद्भवनस्य द्वारभूमिभागे दृष्टोऽसौ मया, यतः समागतोऽहमतीताष्टम्यां सपरिकरो भगवत्पूजनार्थमिह मन्दिरे, प्रविशता च दृष्टं मया बृहत्तपोधनमुनिवृन्दं, तस्य च मध्ये स्थितः कृष्णो वर्णेन, बीभत्सो दर्शनेन, त्रिकोणेन शिरसा, वक्रदीर्घया शिरोधरया, चिपिटया नासिकया, विरलविकरालेन दशनमण्डलेन, लम्बेनोदरेण, सर्वथा कुरूपतयोद्वेगहेतुर्दृश्यमानः केवलं परिशुद्धमधुरगम्भीरेण ध्वनिना विशदेन वर्णोच्चारणेनार्थसमर्पिकया गिरा धर्ममाचक्षाणो दृष्टो मयैकस्तपस्वी, सञ्जातश्च मे चेतसि वितर्कः, यथा बत-भगवतो न गुणानुरूपं रूपम् । प्रविष्टोऽहं चैत्यभवने, निवेशिता भक्तिसारं भगवद्बिम्बे दृष्टिः, अवतारितं निर्माल्यं, विधापितं सम्मार्जनं, कारितमुपलेपनं,

विरचिता पूजा, विकीर्णः पुष्पप्रकरः, प्रज्वालिता मङ्गलप्रदीपाः, समुल्लासितः सुगन्धिधूपः, निःशेषितं पूर्वकरणीयं, प्रमार्जितमुपवेशनस्थानं, न्यस्तानि भूमौ जानुकरतलानि, निबद्धा भगवद्वदने दृष्टिः, प्रवर्धितः सद्भावनया शुभपरिणामः, सञ्जातो भक्त्यतिशयः, प्लावितमानन्दोदकबिन्दुनिष्यन्दसन्दोहेन लोचनयुगलं, सम्पन्नं कदम्बकुसुमसन्निभं बृहदानन्दविशदपुलकोद्भेदसुन्दरं मे शरीरं, पठितो भावार्थानुस्मरणगर्भं भक्तिनिर्भरतया शक्रस्तवः, कृतः पञ्चाङ्गप्रणिपातः, निषण्णो भूतले, स्तुतः सर्वज्ञप्रणीतप्रवचनोन्नतिकरैर्योगमुद्रया प्रधानस्तोत्रैर्भावसारं भगवान्, रञ्जितं भगवद्गुणैरन्तःकरणं, विहितो भूयः पञ्चाङ्गप्रणिपातः, तदवस्थेनैव वन्दिताः प्रमोदवृद्धिजनकाः सूरिप्रभृतयः, समुत्थितो जिनमुद्रया सम्पादितं चैत्यवन्दनं, तदन्ते कृतं प्रणिधानं मुक्ताशुक्तिमुद्रया ।

अत्रान्तरे मत्परिवारेण निर्वर्तितं भगवतो बलिविधानं, सज्जीकृतं स्नात्रोपकरणं, विस्तारिता विचित्रवस्त्रालङ्कारोल्लोचाः, प्रारब्धं सङ्गीतकं, समापूरिताः कलकाहलाः,चालिताः सुघोषघण्टाः, राणितानि कणकणकभाणकानि, ध्वानिता दिव्यदुन्दुभयः, नादिता मधुरशङ्खाः, वादिताः पटुपटहाः, आस्फालिता घर्घरिकया मृदङ्गाः, समुच्छलितानि कंसालकानि, विजृम्भितः स्तोत्ररवः, प्रवर्तितो मन्त्रजापः, विमुक्तं कुसुमवर्षं झणझणायिता मधुपावली, अभिषेचितं महार्हरसगन्धौषधिसत्तीर्थोदकैर्विधिना जगज्जीवबन्धोर्भगवतो बिम्बं, प्रवृत्ता मन्थरं चूतमञ्जरी, विलसितमुद्दामानन्दोचितं, शेषविलासिनीजनेन दत्तानि महादानानि, कृतमुचितकरणीयम् । एवं महता विमर्देन विधाय भगवदभिषेकपूजनं निर्गतोऽहं साधुवन्दनार्थं यावत्तावत्तथैव तस्य सुसाधुवृन्दस्य मध्ये स्थितः स तपस्वी निविष्टः कनककमले रतिविरहित इव मकरकेतनो, रोहिणीवियोजित इव मृगलाञ्छनः, शचीविनाकृत इव पुरन्दरः, उत्तमकार्तस्वरभास्वरेणाकारेण उल्लसन्महाप्रभाप्रवाह उल्लसद्देहप्रभाप्रवाहः पिञ्जरितमुनिमण्डलः, कूर्म्मोन्नतेन चरणतलेन, गूढशिराजालेन, प्रशस्तलाञ्छनलाञ्छितेन, दर्प्पणाकारनखेन, सुश्लिष्टाङ्गुलिना चरणयुगलेन वरकराकारेण जङ्घोरुद्वयेन कठिनपीनसुवृत्तविस्तीर्णेन, केसरीकिशोरलीलाविडम्बनाकटीतटेन, त्रुटितमनोहरेणोदरदेशेन, विशालेन वक्षःस्थलेन, प्रलम्बेन भुजदण्डयुगलेन, मत्तमहेभकुम्भास्फालनसहाभ्यां कराभ्यां, त्रिवलिविराजितेन कण्ठेनाधरितशशधरारविन्दशोभेन वदनेन, उत्तुङ्गसुसंस्थितेन नासावंशेन, सुश्लिष्टमांसप्रलम्बेन कर्णयुगलेनापहसितकुवलयदलाभ्यां लोचनाभ्यां, संहतसमया स्फुरत्किरणजालरञ्जिताधरपुटया दन्तपङ्क्त्या, सुश्लिष्टाष्टमीशशधरसन्निभेन ललाटपट्टेन,

अधस्तनावयवचूडामणिनोत्तमाङ्गभावेन, किं बहुना ? सर्वथोपमाऽतीतरूपधारी दृष्टोऽसौ मया तथैव धर्म्ममाचक्षाणः, प्रत्यभिज्ञातश्च तेन पूर्वावधारितेन ध्वनिना, सञ्जातो मे मनसि विस्मयः ।

बुधसूरिरूपपरावर्त्तः ।

ततश्चिन्तितं मया–अये ! स एवायं तपस्वी कथं पुनरीदृशकमनीयरूपः क्षणादेव सम्पन्न इति । अथवा किमत्राश्चर्यम् ? निवेदितं मे पूर्वं धर्मगुरुणा चन्दनेन, यथा–भवन्ति भगवतां सुसाधूनां लब्धयः, तन्माहात्म्येन च "भवन्त्येते यथेच्छया विविधरूपधारिणो, जायन्ते परमाणुवत्सूक्ष्माः, सम्पद्यन्ते पर्वतवद्गुरवः, वर्त्तन्ते अर्कतूलवल्लघवः, पूरयन्ति स्वदेहविस्तारेण भुवनम्, आज्ञापयन्ति किङ्करमिव देवेश्वरं, निमज्जन्ति कठिनशिलातले, कुर्वन्त्येकघटाद्घटशतसहस्रं, दर्शयन्त्येक-पटात्पटशतसहस्रम्, आकर्णयन्ति सर्वाङ्गोपाङ्गैः, हरन्ति स्पर्शमात्रेण निःशेषरोगगणं, गच्छन्ति पवनवद् गगने, सर्वथा नास्ति किञ्चिदसाध्यमेतेषां भगवतां सुसाधूनां, प्राप्तलब्धयो ह्येते सर्वस्य करणपटवो भवन्ति ।" अतोऽयं मुनिसत्तमः पूर्वं तथा कुरूपो मया दृष्टोऽधुना पुनरेवंविधरूपधारी दृश्यते तन्नूनं प्राप्तलब्धिरेष भगवानित्यहो भगवतोऽतिशयः ।

ततः प्रहृष्टचेतसा वन्दितो मया भगवानन्यमुनयश्च, अभिनन्दितोऽहं सर्वैः स्वर्गापवर्गमार्गसंसर्गनिसर्गहेतुना धर्मलाभेन, निविष्टो भूतले; श्रुता चामृतकल्पा आक्षेपकारिणी भव्यचित्तानां, विक्षेपजननी विषयाभिलाषस्य, अभिलाषोत्पादनी शिवसुखे, निर्वेदसम्पादनी भवप्रपञ्चे, बाधनी विमार्गस्य भगवतो धर्मदेशना, रञ्जितोऽहं तस्य गुणप्राग्भारेण, पृष्टश्च निकटोपविष्टः शनैरेको मुनिर्मया, यदुत–कोऽयं भगवान् किंनामा कुत्रत्यो वेति ? तेनोक्तं–सूरिरेष गुरुरस्माकं बुधो नाम, स धरातलपुरवास्तव्यस्तदधिपतेरेव शुभविपाकनृपतेस्तनयो निजसाधुतानन्दन-स्तृणवदपहाय राज्यं निष्क्रान्तः साम्प्रतमनियतविहारेण विहरतीति । ततोऽहमाकर्ण्य तच्चरितं, दृष्ट्वा तदतिशयं, निरीक्ष्य रूपं, श्रुत्वा धर्मदेशनाकौशलं, सञ्चिन्त्य च हृदये यथाऽहो रत्नाकरकल्पमिदं भगवतां दर्शनं यत्रैवंविधानि पुरुषरत्नान्युपलभ्यन्ते, ततः सञ्जातो भगवदर्हत्प्रणीते मार्गे मेरुशिखरवन्निष्प्रकम्पः स्थिरीभूतश्च धर्मे तेनैव बुधसूरिदर्शनेन मदीयः सर्वोऽपि परिकरः, ततोऽभिवन्द्य भगवन्तं गतोऽहं स्व-स्थानं, भगवानपि क्वचिदन्यत्र विहरतीति । तेनाहं ब्रवीमि यद्यसौ बुधसूरिराग-च्छेत्ततस्ते बन्धुवर्गं बोधयति, परोपकारकरणैकव्यसनी हि स भगवान्, यतस्तदापि मम मत्परिकरस्य च सद्धर्मे स्थैर्यार्थं विहितं तेन तत्तादृशं वैक्रियरूपमिति ।

विमलेनोक्तम्-आर्य ! सोऽपि कथञ्चिदिहागमनाय भवतैवाभ्यर्थनीयः, रत्नचूडेनोक्तं-यदादिशति कुमारः केवलमस्मद्वियोगेन साम्प्रतं विधुरस्तातो विसंस्थुलाऽम्बा वर्त्तते तद्गच्छामि तावदहं तयोः सन्धीरणार्थं स्वस्थाने, ततः करिष्यामि युष्मदादेशं, नात्र कुमारेण विकल्पो विधेय इति । विमलेनोक्तम्-आर्य ! किं गन्तव्यम् ?। रत्नचूडः प्राह-कुमार !

विमलाद्वियोगो रत्नचूडस्य ।

युष्मत्सङ्गामृतक्षोदलब्धास्वादस्य मेऽधुना ।
गन्तव्यमिति वक्तव्ये, भारती न प्रवर्तते ॥२४१॥
तथाहि-जडोऽपि सज्जने दृष्टे, जायते तोषनिर्भरः ।
उदिते विकसत्येव, शशाङ्के कुमुदाकरः ॥२४२॥
स तत्र क्षणमात्रेण, प्रीतिसम्बद्धमानसः ।
जीवन्नेव न तं मुक्त्वा, नूनमन्यत्र गच्छति ॥२४३॥
किं च-संसारेऽनन्तदुःखौघपूरितेऽप्यमृतं परम् ।
इदमेकं बुधैरुक्तं, यत्सद्भिश्चित्तमीलनम् ॥२४४॥
कोऽर्घं कर्तुं समर्थोऽत्र, सतां सङ्गस्य भूतले ।
यदि (चेत्) तद्विघटने हेतुर्न स्याद्विरहमुद्गरः ॥२४५॥
चिन्तामणिमहारत्नममृतं कल्पपादपम् ।
स दृष्टं सन्त्यजेन्मूढः, सज्जनं यो विमुञ्चति ॥२४६॥
कुमारविरहोत्त्रासाज्जिह्वा लगति तालुके ।
तवापि पुरतो मेऽद्य, गन्तव्यमिति जल्पतः ॥२४७॥
इदं वज्राशनेस्तुल्यमिदमत्यन्तनिष्ठुरम् ।
यन्मे भवादृशामग्रे, गच्छाम इति जल्पनम् ॥२४८॥
तथापि-तातामबाचित्तसन्तापरूपं सञ्चिन्त्य कारणम् ।
महद्गन्तव्यमेवेति, मयेदमभिधीयते ॥२४९॥

विमलेनोक्तम्-आर्य ! यद्येवं ततो गम्यतां भवता, केवलं न विस्मरणीय-मिदमार्येण मदीयमभ्यर्थनमानेतव्यः स कथञ्चिदत्र बुधसूरिरिति । रत्नचूडेनोक्तं-कुमार ! कोऽत्र विकल्पः ? ततो भाविसुजनदर्शनविच्छेदकातरहृदया चूतमञ्जरी सबाष्पगद्गदया गिरा विमलं प्रत्याह-कुमार !

सहोदरोऽसि मे भ्राता, देवरोऽसि नरोत्तम ! ।
शरीरं जीवितं नाथस्त्वं मे भवसि सुन्दर ! ॥२५०॥

तदेष गुणहीनोऽपि, स्मरणीयः क्वचिज्जनः ।
भवादृशां महाभाग !, धन्या हि स्मृतिगोचरे ॥२५१॥

विमलेनोक्तम्–आर्य !–

गुरुश्च गुरुपत्नी च, यदि न स्मृतिगोचरे ।
ततो मे कीदृशो धर्मः, किं वा सौजन्यमुच्यताम् ॥२५२॥

एवं च कृत्वा मयापि सह सम्भाषणं गतौ चूतमञ्जरीरत्नचूडौ । मम पुनरगृहीतसङ्केते ! भद्रे ! समाकर्णयतोऽपि तथा विमलरत्नचूडयोः सम्बन्धिनं धर्मजल्पं गुरुकर्मतया दूरभव्यतया च मत्तस्येव सुप्तस्येव विक्षिप्तचित्तस्येव मूर्च्छितस्येव प्रोषितस्येव मृतस्येव न तदा परिणतमेकमपि धर्मपदं हृदये वज्रशिलाशकलघटितमिव मनागपि न द्रावितं जिनवचनामृतरससेकेनापि चित्तम् । ततो विशेषतः संस्तुत्य भगवन्तं निर्गतश्चैत्यभवनान्मया सहितो विमलः । ततोऽभिहितमनेन–वयस्य वामदेव ! यदिदं रत्नचूडेन मह्यं दत्तं रत्नं महाप्रभाव-मिदमाख्यातं तेन ततः कदाचिदिदमुपयुज्यते क्वचिन्महति प्रयोजने मम च नास्थाऽधुना रत्नादिके ततो गृहीतमिदमनादरेण कथञ्चिन्नङ्क्ष्यति तस्मादत्रैव कुत्रचित्प्रदेशे निधाय गच्छाव इति । मयोक्तं–यदादिशति कुमारः, ततो विमोच्य वस्त्राञ्चलं समर्पितं तद्रत्नं मे विमलेन, निखातं मयैकत्र भूप्रदेशे कृतो निरुपलक्ष्यः स प्रदेशः, प्रविष्टौ नगरे, गतोऽहं स्वभवने, कृतः स्तेयबहुलिकाभ्यां मम शरीरेऽनुप्रवेशः, ततश्चिन्तितं मया–तद्रत्नं रत्नचूडेन, सर्वकार्यकरं परम् ।

निवेदितं समक्षं मे, तुल्यं चिन्तामणेर्गुणैः ॥२५३॥
तत्तादृशमनर्घेयं, रत्नं को नाम मुञ्चति ? ।
हरामि त्वरितं गत्वा, किं ममापरचिन्तया ? ॥२५४॥

ततोऽवलम्ब्य जघन्यतां, विस्मृत्य विमलस्नेहम्, अविगणय्य सद्भावार्पणम्, अपर्यालोच्यायतिम्, अनाकलय्य महापापम्, अविचार्य कार्याकार्यम्, अधिष्ठितः स्तेयबहुलिकाभ्यां, गतोऽहं तं प्रदेशमुत्खातं तद्रत्नं निखातमन्यत्र प्रदेशे, चिन्तितं च मया कदाचिदधुनैवागच्छति विमलस्ततो रिक्तेऽस्मिन्दृष्टे प्रदेशे भवेदस्य विकल्पो यथा वामदेवेन गृहीतं तद्रत्नं, यदि पुनरत्र प्रदेशे यथेदं कर्पटावगुण्ठितं निखातं तथैवान्यस्तत्प्रमाणः पाषाणो निखन्यते ततो विमलस्य तं दृष्ट्वा भवेदेवं-विधो वितर्कः–यथा तद्रत्नं ममैवापुण्यैरेवं पाषाणीभूतमिति, एवं च विचिन्त्य मया निखातस्तत्प्रमाणः कर्पटावगुण्ठितस्तत्र प्रदेशे पाषाणः, समागतो गृहं, लङ्घितं तद्दिनं, समायाता रजनी, स्थितोऽहं पर्यङ्के ।

वामदेवकृतो रत्नापहारः ।

समुत्पन्ना मे चिन्ता-अये विरूपकं मया कृतं यन्नानीतं तद्रत्नं, दृष्टः केनचिदहं तथा कुर्वाणः, ग्रहीष्यति कश्चिदन्यस्तद्रत्नं, तदधुना किं करोमीति वितर्ककल्लोलमालाकुलितचित्तवृत्तेश्चित्तसन्तापेन विनिद्रस्यैवातीता सर्वाऽपि शर्वरी। प्रभाते च समुत्थायातित्वरितं गतोऽहं पुनस्तं प्रदेशम् । इतश्च समागतो मद्भवने विमलः, न दृष्टोऽहमनेन, पृष्टो मत्परिजनः क्व वामदेव इति, कथितमनेन-यथा क्रीडानन्दनोद्यानाभिमुखं गत इति । ततः समागतो ममानुमार्गेण विमलः, स चागच्छन् दूरे दृष्टो मया, ततः सञ्जाता ममाकुलता, विस्मृतो रत्नप्रदेशः, समुत्खातः पाषाणो, गोपितः कटीपट्यां, कृतो निरुपलक्षः स प्रदेशः, गतोऽहमन्यत्र गहनान्तरे, सम्प्राप्तो विमलः, दृष्टोऽहमनेन, लक्षितो भयतरललोचनः, ततोऽभिहितमनेन-वयस्य ! वामदेव ! किमेकाकी त्वमिहागतः ? किं वा भीतोऽसि ? मयोक्तं-श्रुतः प्रभाते मया त्वमिहागतस्तेनाहमप्यागतस्ततो न दृष्टस्त्वमत्र तेन सञ्जातो मम हृदये त्रासः क्व कुमारो गत इति चिन्तया साम्प्रतं तु त्वयि दृष्टे यदि परं स्वस्थो भविष्यामीति, विमलेनोक्तं-यद्येवं ततः सुन्दरमिदं सम्पन्नं यदिहागतौ साम्प्रतं गच्छावो भगवद्भवने । मयोक्तम्-एवं भवतु ।

ततो गतौ जिनमन्दिरे, प्रविष्टोऽभ्यन्तरे विमलः, स्थितोऽहं द्वारदेशे, चिन्तितं मया-नूनं विज्ञातोऽहमनेन ततो नश्यामि त्वरितमितरथा ममेदमेष रत्नमुद्दालयिष्यति न चात्र पुरे तिष्ठतो ममास्त्यस्मान्मोक्षः, अतः [१]पतामि निर्देश इति, ततः पलायितोऽहं वेगेन, क्रान्तो बहुविषयं, ऊढस्त्रीणि रात्रिन्दिनानि, गतोऽष्टाविंशतिं योजनानि, छोटितो रत्नग्रन्थिः, दृष्टो निष्ठुरपाषाणः, ततो हा हतोऽस्मीति गतो मूर्च्छां, लब्धा कृच्छ्रेण चेतना, गृहीतः पश्चात्तापेन, प्रारब्धः पलायितुं, भ्रष्टोऽहं कथञ्चित्ततः स्थानात् तत्पुनर्गृह्णामीत्यभिप्रायेण वलितः स्वदेशाभिमुखम् । इतश्च जिनसदनान्निर्गतेन न दृष्टोऽहं विमलेन, ततः सञ्जाता विमलस्य चिन्ता-क्व पुनर्गतो वामदेव इति, गवेषितः सर्वत्र कानने न चोपलब्धः, ततो भवने पुरे च सर्वत्र गवेषितो यावत्तत्रापि न दृष्टः, ततः सर्वदिक्षु प्रहिता ममान्वेषकपुरुषाः, प्राप्तोऽहमेकै- र्भीतस्तेभ्यः, अभिहितस्तै- र्यथा वामदेव ! शोकार्त्तस्त्वद्वियोगेन विमलो वर्तते वयमानेतारस्त्वानेन प्रहितास्तेन गम्यतामिति । ततो मया चिन्तितम्-अये ! न लक्षितोऽहं विमलेन, ततो विगतं मे भयं, नीतोऽहं तैर्विमलसमीपे, दृष्टो विमलेन, समालिङ्गितः स्नेहेन, मुक्तमुभाभ्यां नयनैर्विमलसलिलं, किं तु मया कपटेन प्रियमीलकमुदा विमलेन,

१. गच्छामि परदेशे ।

निवेशितोऽहमर्धासने, अभिहितश्चानेन-वयस्य ! वामदेव ! वर्णय किमनुभूतं भवता ? मयोक्तं-कुमाराकर्णय अस्ति तावत्प्रविष्टस्त्वं जिनमन्दिरे, ततो यावत्तत्र किलाहमपि प्रविशामि तावद्दृष्टा मया तूर्णमागच्छन्ती गगनतलेऽम्बरचरी, सा च कीदृशी-

प्रकाशयन्ती दिक्चक्रं, रूपलावण्यशालिनी ।
आकृष्टकरवाला च, यमजिह्वेव भीषणा ॥२५५॥

ततस्तां दृष्ट्वा यावदहमभिलाषोत्त्राससङ्कीर्णं रसान्तरमनुभवामि तावदुत्पाटितस्तया नेतुमारब्धो गगनमार्गेण, ततोऽहं-

हा कुमार कुमारेति, रटन्नुच्चैः सुविह्वलः ।
नीत एव तया दूरं, भो विद्याधरयोषिता ॥२५६॥
किं च-पयोधरभरेणोच्चैः, सस्नेहमवगूहितः ।
चूम्बितश्च बलाद्वक्त्रे, प्रार्थितो रतकाम्यया ॥२५७॥
तथा रक्तापि सा बाला, विषरूपा प्रभासते ।
कुमार ! वरमित्रेण, त्वया विरहितस्य मे ॥२५८॥

चिन्तितं च तदा मया, यदुत-

अनुरक्ता सुरूपा च, यद्यप्येषा तथापि मे ।
वरमित्रवियुक्तस्य, न सुखाय प्रकल्पते ॥२५९॥

अत्रान्तरे समायाताऽन्याऽम्बरचरी, विलोकितोऽहमनया, गता साऽपि मय्यभिलाषं, प्रवृत्ता चोद्दालने, ततश्च-आः पापे कुत्र यासीति, शब्दसन्दर्भभीषणम् ।
जातं परस्परं युद्धं, तयोः खचरयोषितोः ॥२६०॥

ततो व्याकुलितायां निश्चुटितोऽहं हस्तात्पतितो भूतले चूर्णितो गात्रभारेण, चिन्तितं मया-यद्यपि दलितोऽहं न शक्नोमि वेदनया नंष्टुं तथापि यावदनयोरेका न गृह्णाति मां तावन्नश्यामि येन जीवन्नेव विमलकुमारवरवयस्यं पश्यामि, ततः पलायितोऽहं त्वरया दृष्टश्चामीभिर्मनुष्यैः प्रापितः कुमारसमीपं, तदिदं कुमार ! मयाऽनुभूतमिति। तच्छ्रुत्वा रञ्जितो विमलो मदीयनिष्कृत्रिमस्नेहेन, हृष्टा मेऽन्तर्गता बहुलिका किल प्रत्यायितोऽयं मया विमलो मुग्धबुद्धिरिति ।

वामदेवे रुष्टा देवी ।

अत्रान्तरे ग्रस्त इव मकरेण, दलित इव वज्रेण, समाघ्रात इव कृतान्तेन न जाने कां प्राप्तोऽहमवस्थाम् ? यतः-समुन्मूलयदिवान्त्राणि मे प्रादुर्भूतमुदरशूलं, उत्पाटयन्तीव लोचने प्रवृद्धा शिरोवेदना, प्रकम्पितानि सन्धिबन्धनानि, प्रचलितं रदनजालं, समुल्लसितः श्वाससमीरणः, भग्ने नयने, निरुद्धा भारती, समाकुलीभूतो

विमलः, कृतो हाहारवः, समागतो धवलराजः, मिलितो जनसमूहः, समाहूतं वैद्यमण्डलं, प्रयुक्तानि भेषजानि, न सञ्जातो विशेषः, स्मृतं विमलस्य तद्रत्नं, अयमवसरस्तस्येति मत्वा गतो वेगेन तत्प्रदेशं निरूपितं यत्नेन यावन्न दृश्यते तद्रत्नं, ततो जाता विमलस्य मदीयचिन्ता-कथमसौ जीविष्यति ? ततः समागतो मम समीपे । अत्रान्तरे विजृम्भितैका वृद्धनारी, मोटितमनया शरीरं, उद्वेल्लितं भुजयुगलं, मुत्कलीभूताः केशाः, कृतं विकरालरूपं, मुक्ताः फेत्काराराावः, वल्गितमुद्दामदेहया, भीतः सराजको जनः । ततो विधाय पूजामुत्पाद्य धूपं पृष्टाऽसौ-भट्टारिके ! का त्वमसीति, सा प्राह-वनदेवताऽहं, मयाऽयमेवं विहितो वामदेवो, यतोऽनेन पापेन सद्भावप्रतिपन्नोऽपि वञ्चितोऽयं सरलो विमलः, हृतमस्य रत्नं, निखातमन्यप्रदेशे, पुनर्गृहीत्वा नष्टः, पुनरानीतेन रचितमालजालं, एवं च कथितं तया वनदेवतया सविस्तरं मदीयं विलसितं, दर्शितं तत्र प्रदेशे रत्नम्, आह च-तदेष मया चूर्णनीयो दुष्टात्मा वामदेवः ।

विमलकारिता मुक्तिः ।

विमलेनोक्तं-सुन्दरि ! मा मैवं कार्षीः, महानेवं क्रियमाणे मम चित्तसन्तापः सम्पद्यते । ततो विमलाभ्यर्थनया मुक्तोऽहं वनदेवतया, निन्दितोऽहं लोकेन, धिक्कारितः शिष्टजनेन, हसितो बालसार्थेन, बहिष्कृतः स्वजनवर्गेण, जातस्तृणादपि जनमध्ये लघुतरोऽहमिति, तथापि महानुभावतया विमलो मामवलोकयति चिरन्तनस्थित्या, न दर्शयति विप्रियं, न मुञ्चति स्नेहभावं, न शिथिलयति प्रसादं, न रहयति मां क्षणमप्येकं, वदति च-वयस्व ! वामदेव ! न भवता मनागप्यज्ञजनवचनैश्चित्तोद्वेगो विधेयः, यतो दुराराधोऽयं लोकः, ततो भवादृशामेष केवलमवधीरणामर्हतीति । न च न प्रतीतं तस्य महात्मनो विमलस्य तदा मदीयचरितं, तथापि-

अहं बहुलिकादोषात्तादृशो दुष्टचेष्टितः ।
स तादृशो महाभागस्तत्रेदं विद्धि कारणम् ॥१॥
वारुण्यामुदयं गच्छेदस्तं प्राच्यां दिवाकरः ।
लङ्घयेच्च स्वमर्यादां, यद्वा क्षीरमहार्णवः ॥२॥
अथवा-वह्निपिण्डोऽपि जायेत, कदाचिद्धिमशीतलः ।
अलाबुवत्तरेन्नीरे, निक्षिप्तो मेरुपर्वतः ॥३॥
निर्व्याजस्नेहकारुण्यः, सद्दाक्षिण्यमहोदधिः ।
तथापि सुजनो भद्रे ! प्रतिपन्नं न मुञ्चति ॥४॥ त्रिभिर्विशेषकम् ॥

अन्यच्च-

जानन्नपि न जानीते, पश्यन्नपि न पश्यति ।
न श्रद्धत्ते च शुद्धात्मा, सज्जनः खलचेष्टितम् ॥५॥

ततोऽहं बन्धुभिस्त्यक्तो, लोके सञ्जातलाघवः ।
विचरामि तदा सार्धं, विमलेन महात्मना ॥६॥
अथान्यदा मया युक्तो, विमलो विमलेक्षणः ।
सम्प्राप्तस्तत्र जैनेन्द्रमन्दिरे वन्दनेच्छया ॥७॥
विधायाशेषकर्तव्यं, प्रणिपत्य जिनेश्वरम् ।
अथासौ स्तोतुमारब्धो, विमलः कलया गिरा ॥८॥

रत्नचूडागमनम् ।

अत्रान्तरे लसद्दीप्तिविद्योतितदिगन्तरः ।
स रत्नचूडः सम्प्राप्तः, खचरैः परिवेष्टितः ॥९॥
अथासौ मधुरध्वानमाकर्ण्य श्रुतिपेशलम् ।
ततः सञ्चिन्तयत्येवं, रत्नचूडः प्रमोदितः ॥१०॥
-अये ! स स्तौति धन्यात्मा, विमलो जन्तुबान्धवम् ।
भगवन्तं महाभागं, तत्तावच्छ्रूयतामिदम् ॥११॥
ततो निभृतसञ्चारो, मूकीकृत्य स्वखेचरान् ।
सहैव चूतमञ्जर्या, चित्रन्यस्त इव स्थितः ॥१२॥
अथ गम्भीरनिर्घोषः, स्फुटकण्टकभूषणः ।
आनन्दोदकपूर्णाक्षः, क्षिप्तदृष्टिर्जिनानने ॥१३॥
सद्भक्त्यावेशयोगेन, साक्षादिव पुरः स्थितम् ।
जिनेशं परमात्मानं, भगवन्तं सनातनम् ॥१४॥
सोपालम्भं सविश्रम्भं, सस्नेहं प्रणयान्वितम् ।
ततः संस्तोतुमारब्धो, विमलोऽमलमानसः ॥१५॥ त्रिभिर्विशेषकम् ॥

विमलकृता स्तुतिः ।

"अपारघोरसंसारनिमग्नजनतारक ! ।
किमेष घोरसंसारे, नाथ ! ते विस्मृतो जनः ? ॥१६॥
सद्भावप्रतिपन्नस्य, तारणे लोकबान्धव ! ।
त्वयाऽस्य भुवनानन्द !, केनापि विलम्ब्यते ॥१७॥

आपन्नशरणे हीने, करुणामृतसागर ! ।
न युक्तमीदृशं कर्तुं, जने नाथ ! भवादृशाम् ॥१८॥
भीमेऽहं भवकान्तारे, मृगशावकसन्निभः ।
विमुक्तो भवता नाथ !, किमेकाकी दयालुना ? ॥१९॥
इतश्चेतश्च निक्षिप्तचक्षुस्तरलतारकः ।
निरालम्बो भयेनैव, विनश्येऽहं त्वया विना ॥२०॥
अनन्तवीर्यसम्भार !, जगदालम्बदायक ! ।
विधेहि निर्भयं नाथ !, मामुत्तार्य भवाटवीम् ॥२१॥
न भास्करादृते नाथ !, कमलाकरबोधनम् ।
यथा तथा जगन्नेत्र ! त्वदृते नास्ति निर्वृतिः ॥२२॥
किमेष कर्मणां दोषः ?, किं ममैव दुरात्मनः ? ।
किं वाऽस्य हतकालस्य ? किं वा मे नास्ति भव्यता ? ॥२३॥
किं वा सद्भक्तिनिर्ग्राह्य !, सद्भक्तिस्त्वयि तादृशी ।
निश्चलाऽद्यापि सम्पन्ना ?, न मे भुवनभूषण ! ॥२४॥
लीलादलितनिःशेषकर्मजाल ! कृपापर ! ।
मुक्तिमर्थयते नाथ !, येनाद्यापि न दीयते ॥२५॥ त्रिभिर्विशेषकम् ॥
स्फुटं च जगदालम्ब !, नाथेदं ते निवेद्यते ।
नास्तीह शरणं लोके, भगवन्तं विमुच्य मे ॥२६॥
त्वं माता त्वं पिता बन्धुस्त्वं स्वामी त्वं च मे गुरुः ।
त्वमेव जगदानन्द !, जीवितं जीवितेश्वर ! ॥२७॥
त्वयाऽवधीरितो नाथ !, मीनवज्जलवर्जिते ।
निराशो दैन्यमालम्ब्य, म्रियेऽहं जगतीतले ॥२८॥
स्वसंवेदनसिद्धं मे, निश्चलं त्वयि मानसम् ।
साक्षाद्भूतान्यभावस्य, यद्वा किं ते निवेद्यताम् ? ॥२९॥
मच्चित्तं पद्मवन्नाथ !, दृष्टे भुवनभास्करे ।
त्वयीह विकसत्येव, विदलत्कर्मकोशकम् ॥३०॥
अनन्तजन्तुसन्तानव्यापाराक्षणिकस्य ते ।
ममोपरि जगन्नाथ !, न जाने कीदृशी दया ? ॥३१॥
समुन्नते जगन्नाथ !, त्वयि सद्धर्मनीरदे ।
नृत्यत्येष मयूराभो, मदोर्दण्डशिखण्डकः ॥३२॥

तदस्य किमियं भक्तिः ?, किमुन्मादोऽयमीदृशः ? ।
दीयतां वचनं नाथ !, कृपया मे निवेद्यताम् ॥३३॥
मञ्जरीराजिते नाथ !, सच्चूते कलकोकिलः ।
यथा दृष्टे भवत्येव, लसत्कलकलाकुलः ॥३४॥
तथैष सरसानन्दबिन्दुसन्दोहदायक ! ।
त्वयि दृष्टे भवत्येवं, मूर्खोऽपि मुखरो जनः ॥३५॥
तदेनं माऽवमन्येथा, नाथासम्बद्धभाषिणम् ।
मत्वा जडं जगज्ज्येष्ठ !, **सन्तो हि नतवत्सलाः** ॥३६॥
किं बालोऽलीकवाचाल, आलजालं लपन्नपि ।
न जायते जगन्नाथ !, पितुरानन्दवर्धकः ॥३७॥
तथाऽश्लीलाक्षरोल्लापजल्पाकोऽयं जनस्तव ।
किञ्चिद् वर्धयते नाथ !, तोषं किं नेति कथ्यताम् ? ॥३८॥
अनाद्यभ्यासयोगेन, विषयाशुचिकर्दमे ।
गर्ते सूकरसङ्काशं, याति मे चटुलं मनः ॥३९॥
न चाहं नाथ ! शक्नोमि, तन्निवारयितुं चलम् ।
अतः प्रसीद तद्देव !, देव ! वारय वारय ॥४०॥
किं ममापि विकल्पोऽस्ति ?, नाथ ! तावकशासने ।
येनैवं लपतोऽधीश !, नोत्तरं मम दीयते ॥४१॥
आरूढमियतीं कोटीं, तव किङ्करतां गतम् ।
मामप्येतेऽनुधावन्ति, किमद्यापि परीषहाः ? ॥४२॥
किं चामी प्रणताशेषजनवीर्यविधायक ! ।
उपसर्गा ममाद्यापि, पृष्ठं मुञ्चन्ति नो खलाः ॥४३॥
पश्यन्नपि जगत्सर्वं, नाथ ! मां पुरतः स्थितम् ।
कषायारातिवर्गेण, किं न पश्यसि पीडितम् ? ॥४४॥
कषायाभिद्रुतं वीक्ष्य, मां हि कारुणिकस्य ते ।
विमोचने समर्थस्य, नोपेक्षा नाथ ! युज्यते ॥४५॥
विलोकिते महाभाग !, त्वयि संसारपारगे ।
आसितुं क्षणमप्येकं, संसारे नास्ति मे रतिः ॥४६॥
किं तु किं करवाणीह ?, नाथ ! मामेष दारुणः ।
आन्तरो रिपुसङ्घातः, प्रतिबध्नाति सत्वरम् ॥४७॥

विधाय मयि कारुण्यं, तदेनं विनिवारय ।
उद्दामलीलया नाथ !, येनागच्छामि तेऽन्तिके ॥४८॥
तवायत्तो भवो धीर !, भवोत्तारोऽपि ते वशः ।
एवं व्यवस्थिते किं वा, स्थीयते ? परमेश्वर ! ॥४९॥
तद्दीयतां भवोत्तारो, मा विलम्बो विधीयताम् ।
नाथ ! निर्गतिकोल्लापं, न शृण्वन्ति भवादृशाः ?" ॥५०॥
इत्येवं विमलो यावत्सद्भावार्पितमानसः ।
भूतनाथमभिष्टुत्य, पञ्चाङ्गप्रणतिं गतः ॥५१॥
तावदुल्लसितानन्दपुलकोद्भेदसुन्दरः ।
सन्तुष्टस्तस्य भारत्या, रत्नचूडः सखेचरः ॥५२॥ युग्मम् ॥

रत्नचूडेनाभिनन्दनप्रदानम् ।

साधु साधु कृतं धीर !, स्तवनं भवभेदिनः ।
त्वयेत्येवं ब्रुवाणोऽसौ, प्रादुरासीत्तदा पुरः ॥५३॥
धन्यस्त्वं कृतकृत्यस्त्वं, जातोऽसि त्वं महीतले ।
यस्येदृशी महाभाग !, भक्तिर्भुवनबान्धवे ॥५४॥
मुक्त एवासि संसारान्निश्चितस्त्वं नरोत्तम ! ।
प्राप्य चिन्तामणिं नैव, नरो दारिद्र्यमर्हति ॥५५॥
एवं च कलवाक्येन, विमलं खचराधिपः ।
अभिनन्द्य ततो नाथं, वन्दित्वा भक्तिनिर्भरः ॥५६॥
तदन्ते विमलस्योच्चैर्वन्दनं प्रविधाय सः ।
प्रथमं वन्दितस्तेन, निविष्टः शुद्धभूतले ॥५७॥
ततो विहितकर्तव्या, निषण्णा चूतमञ्जरी ।
विद्याधरनरेन्द्राश्च, निषण्णा नतमस्तकाः ॥५८॥
अथ पृष्टतनूदन्तौ, जाततोषौ परस्परम् ।
विमलो रत्नचूडश्च, सम्भाषं कर्तुमुद्यतौ ॥५९॥
उक्तं च रत्नचूडेन, महाभाग ! निशम्यताम् ।
हेतुना येन सञ्जातं, मम कालविलम्बनम् ॥६०॥
नानीतो भवदादिष्टः, स सूरिर्बुधनामकः ।
तत्रापि कारणं किञ्चिन्महाभाग ! निशामय ॥६१॥

रत्नचूडस्य विद्याधरेन्द्रता ।

इतो गतोऽहं वैताढ्ये, दृष्टाऽम्बा शोकविह्वला ।
तातश्च मद्वियोगेन, तौ च सन्धीरितौ मया ॥६२॥
अथातीते दिने तस्मिन्, सङ्गमानन्दबन्धुरे ।
रात्रौ स्थितोऽहं शय्यायां, कृतदेवनमस्कृतिः ॥६३॥
ध्यायतः परमात्मानं, भगवन्तं जिनेश्वरम् ।
समागता च मे निद्रा, द्रव्यतो न तु भावतः ॥६४॥
तावद् भो भो महाभाग !, भुवनेश्वरभक्तक ! ।
उत्तिष्ठेति गिरं शृण्वन्, विबुद्धोऽहं मनोहराम् ॥६५॥
अथ विद्योतिताशेषदिक्चक्रप्रतिभास्वराः ।
तदाऽहं पुरतः साक्षात्पश्यामि बहुदेवताः ॥६६॥
ततः ससम्भ्रमोत्थानविहितातुलपूजनम् ।
ताभिर्मां श्लाघयन्तीभिरिदमुक्तं वचस्तदा ॥६७॥
धन्योऽसि कृतकृत्योऽसि, पूजनीयोऽसि मादृशाम् ।
यस्य भागवतो धर्मः, स्थिरस्ते नरसत्तम ! ॥६८॥
रोहिण्याद्या वयं विद्यास्तव पुण्येन चोदिताः ।
सर्वास्ते योग्यतां मत्वा, समायाताः स्वयंवराः ॥६९॥
आवर्जिता गुणैस्तात !, तावकीनैः सुनिर्मलैः ।
अत्यन्तमनुरक्तास्ते, सर्वाः सर्वात्मना वयम् ॥७०॥
यस्य भागवतो धीर !, नमस्कारो हृदि स्थितः ।
सदा जाज्वल्यते लोके, तस्य ते किमु दुर्लभम् ? ॥७१॥
एताः पञ्चनमस्कारमन्त्रमाहात्म्ययन्त्रिताः ।
आगत्य स्वयमेवेह, वयं किङ्करतां गताः ॥७२॥
करिष्यामः प्रवेशं ते, शरीरे पुरुषोत्तम ! ।
प्रतीच्छ भवितव्यं च, भवता चक्रवर्तिना ॥७३॥
एतच्चास्माभिरादिष्टं, विद्याधरबलं तव ।
पदातिभावमापन्नमायातं द्वारि वर्तते ॥७४॥
लसत्कुण्डलकेयूरकिरीटमणिभास्वराः ।
ततः प्रविश्य ते सर्वे, खेचरा मे नतिं गताः ॥७५॥

अत्रान्तरे प्रहतमुद्दामातोद्यशब्दं प्राभातिकतूरं, पठितं च कालनिवेदकेन यदुत-

एष भो ! भास्करो लोके, स्वभावादुदयं गतः ।
प्रबोधकारको नृणां, दृष्टिप्रसरदायकः ॥७६॥
सदनुष्ठानहेतुश्च, सर्वासामर्थसम्पदाम् ।
सम्पादक इति ख्यातः, सद्धर्म इव वर्तते ॥७७॥ ततः-
भो भो लोकाः ! समुत्थाय, सद्धर्मे कुरुतादरम् ।
येन वोऽतर्किता एव, सम्पद्यन्ते विभूतयः ॥७८॥

एतच्चाकर्ण्य चिन्तितं मया-अये ! भगवद्भाषितसद्धर्ममाहात्म्यमिदं यद्-अतर्कितोपनता एव सिद्धा ममैताः सर्वविद्याः, न चेदं मे हर्षस्थानं, विघ्नः खल्वेष समुपस्थितो मे, न भविष्यति विमलेन सार्धं दीक्षाग्रहणं, यतः पुण्यानुबन्धि पुण्यमपि भगवता सौवर्णिकनिगडतुल्यं व्याख्यातं, आदिष्टं च पूर्वमेव मे चन्दनेन विद्याधरचक्रवर्तित्वं, समर्थितं च महात्मना विमलेन, तत्का गतिः ? भवितव्यमेवमनेन । तदेवं चिन्तयत एव मे कृतो देवताभिः शरीरेऽनुप्रवेशः, प्रारब्धो विद्याधरसमूहैर्मे राज्याभिषेकः, कृतानि कौतुकानि, विहितानि माङ्गलिकानि, समुपनीतानि सत्तीर्थोदकानि, प्रकटितानि रत्नानि, सज्जीकृताः कनकरत्नकलशाः । एवं च महता विमर्देन निर्वर्तितो मे राज्याभिषेकः; ततः पूजयतो देवान्, सन्मानयतो गुरून्, स्थापयतो राजनीतिं, निरूपयतो भृत्यवर्गं, कुर्वतो यथार्हप्रतिपत्तिं, समाचरतोऽभिनवराज्योचितं सर्वं करणीयं लङ्घितानि मम कियन्त्यपि दिनानि ।

ततो निराकुलीभूतस्य मे संस्मृतो युष्मदादेशः, चिन्तितं च-अये ! नान्वेषितोऽसौ मया बुधसूरिः, न नीतो विमलसमीपम्, अहो मे प्रमत्तता । ततस्तद्गवेषणार्थं स्वयमेव भ्रान्तोऽहं भूरिभूमिमण्डलं, दृष्टश्चैकत्र नगरे मया बुधसूरिः, निवेदितो युष्मद्वृत्तान्तः, ततोऽभिहितमनेन-गच्छ त्वं तावदिदमिदं च विमलाय निवेदय, अहं तु पश्चादागमिष्यामि, अयमेव हि विमलबन्धूनां प्रतिबोधनोपायो नान्यः, ततः कर्णाभ्यर्णे स्थित्वा शनैः कथितो विमलाय रत्नचूडेन स प्रच्छन्नो बुधसूरिसन्देशकः, स तु मया नाकर्णित इति । प्राह च रत्नचूडः-तदनेन कारणेन सञ्जातो मे कालविलम्बोऽमुना च हेतुना नानीतो बुधसूरिरिति । विमलेनोक्तं-सुन्दरमनुष्ठितमार्येण, ततः प्रविष्टाः सर्वेऽपि नगरे, स्थित्वा च महाप्रमोदेन द्वित्राणि दिनानि गतः स्वस्थानं रत्नचूडः ।

विमलस्य वैराग्यम्-धवलराजकमलसुन्दर्योर्विचारः ।

विमलस्तु ततः प्रभृति गाढतरमभ्यस्ततया कुशलभावस्य, प्रहीणतया कर्मजालस्य, विशुद्धतया ज्ञानस्य, हेयतया विषयाणां, उपादेयतया प्रशमस्य,

अविद्यमानतया दुश्चरितानां, प्रबलतया जीववीर्यस्य, प्रत्यासन्नतया परमपदसम्पत्तेर्न बहुमन्यते राज्यश्रियं, न कुरुते शरीरसंस्कारं, न ललति विचित्रलीलाभिः, नाभिलषति ग्राम्यधर्मसम्बन्धगन्धमपीति, केवलं भवचारकविरक्तचित्तः शुभध्यानानुगतः कालं गमयति । तं च तथाविधमवलोक्य पितुर्धवलनृपतेर्मातुश्च कमलसुन्दर्याः समुत्पन्ना चिन्ता-यथैष विमलकुमारः सत्यपि मनोहरे तारुण्ये, विद्यमानेऽप्यपहसितधनदविभवे विभवे, पश्यन्नप्यधरितामरसुन्दरीलावण्या नरेन्द्रकन्यका, अधःकृतमकरकेतनोऽपि रूपातिशयेन, सङ्गतोऽपि कलाकलापेन, नीरोगोऽपि देहेन, सम्पूर्णोऽपीन्द्रियसामग्र्या, रहितोऽपि मुनिदर्शनेन नालीयते यौवनविकारैर्न निरीक्षतेऽर्धाक्षिनिरीक्षितेन, न जल्पति मन्मनस्खलितवचनेन, न सेवते गेयादिकला, न बहुमन्यते भूषणानि, न गृह्यते मदान्धतया, न विमुच्यते सरलतया, न विषहते विषयसुखनामापीति तत्किमिदमीदृशमस्य संसारातीतमलौकिकं चरितं, यावच्चैष प्रियपुत्रको विषयसुखविमुखः खल्वेवं मुनिवदवतिष्ठते तावदावयोरिदं निष्फलं राज्यम्, अकिञ्चित्करी प्रभुता, निष्प्रयोजना विभवा, मृतसमानं जीवितमिति, ततः कथं पुनरेष विषयेषु प्रवर्तिष्यते कुमार इति सम्पन्नो देवीनृपयो रहसि पर्यालोचः, स्थापितः सिद्धान्तः, यदुत-स्वयमेव तावदभिधीयतां विषयसुखानुभवं प्रति कुमारः, स हि विनीततया दाक्षिण्यधनतया च न कदाचन पित्रोर्वचनमतिलङ्घयिष्यतीति मत्वा ।

ततोऽन्यदाभिहितो रहसि जननीजनकाभ्यां विमलकुमारो यथा-पुत्र ! मनोरथशतैस्त्वमावयोर्जातोऽसि राज्यधूर्धरणक्षमश्च वर्तसे तत्किमिति नानुशीलयसि निजावस्थानुरूपम् ? किं नाधितिष्ठसि राज्यम् ? किं न कुरुषे दारसङ्ग्रहम् ? किं नानुभवसि विषयग्रामम् ? किं न वर्धयसि कुलसन्ततिम् ? किं नोत्पादयसि प्रजानामानन्दम् ? किं नाह्लादयसि बन्धुवर्गम् ? किं न पूरयसि प्रणयिजनम् ? किं न तर्पयसि पितृदेवान् ? किं न सन्मानयसि मित्रवर्गम् ? किं न जनयसि वचनमिदं कुर्वन्नावयोः प्रमोदसन्दोहमिति । विमलेन चिन्तितं-सुन्दरमिदमाभ्यामभिहितं, भविष्यत्ययमेव प्रतिबोधनोपायः, ततोऽभिहितमनेन-यदाज्ञापयति तातो यदादिशत्यम्बा तत्समस्तं मादृशां करणोचितं नात्र विकल्पः, किं तु ममायमभिप्रायः-यदि सर्वेषां स्वराज्ये दुःखितलोकानामपहृत्य बाधां सम्पाद्य च सुखं ततः स्वयं सुखमनुभूयते तत्सुन्दरं, एवं हि प्रभुत्वमाचरितं भवति, नान्यथा, तथाहि-

विधाय लोकं निर्बाधं, स्थापयित्वा सुखेऽखिलम् ।
यः स्वयं सुखमन्विच्छेत्स राजा प्रभुरुच्यते ।।७१।।

यस्तु लोके सुदुःखार्ते, सुखं भुङ्क्ते निराकुलः ।
प्रभुत्वं हि कुतस्तस्य ?, कुक्षिम्भरिरसौ मतः ॥८०॥

दुःखिसत्त्वान्वेषणम् ।

तदिदमत्र प्राप्तकालं वर्तते तावदेष सन्तापिताशेषभूमण्डलो ग्रीष्मसमयः। ततोऽहमत्रैव मनोनन्दनाभिधाने गृहोपवने युक्तो बन्धुवर्गेण, परिवृतो मित्रवृन्देन, सेवमानो घर्मसमयोचितां राजलीलां, सम्पादयामि ताताम्बयोः सम्बन्धिनमादेशं, केवलं नियुज्यन्तां राजपुरुषा ये सर्वं दुःखदौर्गत्योपहतं लोकं गवेषयित्वा समानीय च मया सार्धं सुखमनुभावयन्तीति । एतच्चाकर्ण्य प्रहृष्टो धवलराजः प्रमुदिता कमलसुन्दरी, ततोऽभिहितमाभ्यां–साधु वत्स ! गुरुवत्सल ! साधु चारु जल्पितं वत्सेन, युक्तमिदमीदृशमेव भवतो विवेकस्येति, ततस्तत्र मनोनन्दने गृहोपवने सज्जीकारितमतिविशालं नरेन्द्रेण हिमगृहं, तच्चाच्छादितं निरन्तरं नलिनीदलैः, समन्तादुपगूढं मरकतहरितैः कदलीवनैर्वेष्टितं सततवाहिन्या कर्पूर-पूरितोदकप्रवाहया गृहनद्या, विलेपितं मलयजकर्पूरक्षोदगार्या, कृतविभागमुशीर-मृणालनालकल्पितैर्भित्तिभागैः । ततस्तत्र तादृशे ग्रीष्मसन्तापहारिणि, शिशिर-सुखोत्कम्पकारिणि महति हिमभवने; विरचितानि शिशिरपल्लवशयनानि, कल्पितानि शिशिरसुखदमृदून्यासनानि, प्रवेशितः सह लोकसमूहेन विमलकुमारः, ततः सम-स्तेनापि जनसमुदयेन सहित एव विलिप्तः सरसचन्दनेन, गुण्डितः कर्पूररेणुना, मालितः सुरभिपाटलादामभिर्विराजितो मल्लिकाकुसुमस्तबकैरालिङ्गितः स्थूलमुक्ता-फलकलापेन, निवसितः सूक्ष्मकोमलवसनैर्वीज्यमानः शिशिरबिन्दुवर्षिभिस्ताल-वृन्तैर्लालितः स्वादुकोमलेनाहारेण, प्रीत इव सुरभिताम्बूलेन, प्रमोदित इव मनोहारिकाकलिगीतेन, सानन्द इव विविधकरणाङ्गहारहारिणा नृत्तेन, साह्लाद इव ललितविलासिनीलोककुवलयदललोललोचनमालावलोकनेन, प्रविष्ट इव सह लोकेनावगाहितुं रतिसागरम् । तदेवं जननीजनकयोः प्रमोदसन्दोहदानार्थं सर्वेषा-मपि लोकानामात्मनोऽप्यधिकतरं बहिःसुखं सम्पादयन्नासितुं प्रवृत्तो विमलकुमारः । प्रवेशयन्ति च यथादर्शं राजादेशेन नियुक्तपुरुषा दुःखदौर्गत्योपहतं तत्र लोकं, ततः क्रियते तेषां दुःखापनोदः सम्पाद्यते चानन्दातिरेक इति, एवं च-

नृपतोषविधायिविलासकरे, सुखसागरवर्तिनि राज्यधरे ।
अथ तत्र सुते सुभगे विमले, प्रमदः क्रियते नगरे सकले ॥८१॥

एवं चानन्दिते राजनि, तुष्टायां महादेव्यां, प्रमुदिते सकले जने, विमल-सुखसागरावगाहेन प्रविष्टाः कश्चिन्नियुक्तपुरुषास्तत्र हिमगृहे, दत्ता तैरन्तरा

जवनिका तया च व्यवहितमेकं पुरुषं संस्थाप्य कृतप्रणामैर्विज्ञपितं तैः, यथा-देव ! देवादेशेन विचरद्भिरस्माभिर्दृष्टोऽयमत्यन्तदुःखितः पुरुषः समानीतश्च देव-समीपं, न चैष गाढबीभत्सतया देवदर्शनयोग्य इति मत्वा जवनिकया व्यवहितो-ऽस्माभिरिह प्रवेशित इत्येतदाकर्ण्य देवः प्रमाणम् । धवलराजेनोक्तं-भो भद्राः ! क्व दृष्टोऽयं युष्माभिः ? कथं चात्यन्तदुःखित इति । ततोऽभिहितमेकेन-देव ! अस्ति तावदितो निर्गता वयं देवादेशेन दुःखदारिद्र्योपहतलोकानयनार्थं, निरूपितं नगरं, यावद्दृष्टं समस्तमपि तत्सततानन्दं, ततो गता वयमरण्ये, यावद्दृष्टो दूरादयं पुरुषः, कथम् ?,

वर्तमानेऽतिमध्याह्ने, भूतले वह्निसन्निभे ।
उत्तप्तलोहपिण्डाभे, जगत्तपति भास्करे ॥८२॥
निर्दाहिमुर्मुराकारे, सूक्ष्मधूलीमहाचये ।
पादत्राणविनिर्मुक्तो, गच्छन्नेष विलोकितः ॥८३॥ युग्मम् ॥

बुधसूरेरागमनम् ।

ततोऽयं दुःखित इतिकृत्वा दूरादुच्चैरभिहितोऽस्माभिः यदुत-भो भो भद्र ! तिष्ठ तिष्ठेति । अनेनोक्तं-भो भद्राः ! स्थितोऽहं यूयं तिष्ठतेति ब्रुवाणो गन्तुं प्रवृत्तः । ततो मया गत्वा वेगेन बलादानीतोऽयं महातरुमूले, निरूपितः सर्वै राजपुरुषैः यावद् "दवदग्धस्थाणुरिवातिकृष्णो वर्णेन, बुभुक्षाक्षामेणोदरेण, पिपासाशोषिते-नाधरोष्ठेन, अध्वखेदनिःसहेनाङ्गेन, बहिरन्तस्तापसूचकेन स्वेदजलेन, कुष्ठेन गलता कृमिजालोल्बणेन देहेन, अन्तःशूलनिवेदकैर्मुखभङ्गैः, प्रकम्पमानया जरा-जीर्णकपोलया गात्रयष्ट्या, महाज्वरसूचकेन दीर्घोष्णनिःश्वासजालेन, मलाविलेनाश्रु-गलनाविकलेन लोचनयुगलेन, प्रविष्टया नासिकया, शटितप्रायैः करचरणैरभिन-वलुञ्चितेन मस्तकेनात्यन्तमलिनैश्चीवरखण्डैर्ललमानेन कम्बलेन, गृहीतेन सदण्डे-नालाबुद्वयेन करतलावलम्बिनौर्णिकपिच्छेन" सर्वथा-

निधानं सर्वदुःखानां, दारिद्र्यस्य परा गतिः ।
अयमेवेति सर्वेषां, तदाऽस्माकं हृदि स्थितम् ॥८४॥
एनं वीक्ष्य नरं नाथ !, गाढं बीभत्सदर्शनम् ।
चिन्तितं च तदाऽस्माभिः, सोऽयं प्रत्यक्षनारकः ॥८५॥

राजसमीपे बुधसूरिकर्षणम् ।

ततोऽभिहितोऽस्माभिः-भद्र ! किमित्येवंविधे मध्याह्ने बम्भ्रमीषि ? किमिति शीतलच्छायायामुपविष्टः सुखासिकया न तिष्ठसीति ? अनेनोक्तं-भद्रा !

न खल्वहं स्वायत्तोऽस्मि गुरोरादेशेन पर्यटामि तदायत्तोऽहम्। अस्माभिश्चिन्तितम्-अये ! परवशोऽयं वराकः, अहो कष्टमिदमस्य महत्तरं दुःखकारणं यदीदृशावस्थस्यापि पराधीनत्वं नाम, ततोऽभिहितमस्माभिः-भद्र ! किं पुनरेवमहर्निशमादेशं कुर्वतस्ते स गुरुः करिष्यति ? अनेनोक्तं-भद्राः ! सन्ति मम कृतान्तसदृशा बलिनोऽष्टावृणिकास्तेभ्यो ग्रन्थिदानेन मां मोचयिष्यति । ततोऽस्माभिश्चिन्तितम्-अहो कष्टतरमिदमस्य वराकस्य महत्तमं दुःखकारणं यदेवंविधावस्थस्यापि दानग्रहणं तन्मोचनदुराशा चेति, सर्वथा नातः परतरो दुःखी जगति लभ्यते, ततोऽस्माभिरुक्तं-भद्र ! प्रवर्तस्व गच्छ राजकुले येन ते सर्वदुःखदारिद्र्यऋणविमोक्षः क्रियते । अनेनोक्तम्-अलं भवतां मदीयचिन्तया, न खलु भवादृशैर्मोचितो मुच्येऽहमिति ब्रुवाणो गन्तुं प्रवृत्तः । ततश्चिन्तितमस्माभिः-अरे ! सोन्माद इवायं दुरात्मा तथापि कर्तव्यं राजशासनं, नेतव्योऽयं देवसमीपमित्याकलय्यानीतोऽस्माभिरिति। धवलराजेनोक्तं-महत्कुतूहलं मे पश्याम्येनमपनयत जवनिकामिति, ततोऽपनीता तैर्जवनिका दृष्टो यथानिर्दिष्टस्वरूपः पुरुषो विस्मितः सपरिवारो राजा। विमलेन चिन्तितम्-अये ! समागतः स एष भगवान् बुधसूरिः; अहो भगवतो वैक्रियरूपकरणातिशयः, अहो ममोपरि करुणा अहो परोपकारकरणैकरसत्वम्, अहो स्वसुखकार्यनिरपेक्षता, अहो निर्व्याजसौजन्यातिरेक इति ॥ तथाहि-

स्वकार्यमवधीर्यैव, परकार्ये कृतोद्यमाः ।
भवन्ति सततं सन्तः, प्रकृत्यैव न संशयः ॥८६॥ अथवा-
स्वकार्यमिदमेतेषां, यत्परार्थे प्रवर्तनम् ।
भानोः किं किञ्चिदस्त्यन्यल्लोकोद्द्योतादृते फलम् ॥८७॥ अथवा-
निजे सत्यपि साधूनां, कार्ये नैवादरः क्वचित् ।
सलाञ्छनो जगद्द्योती, दृष्टान्तोऽत्र निशाकरः ॥८८॥
नाभ्यर्थिताः प्रवर्तन्ते, परकार्ये महाधियः ।
केन हि प्रार्थिता लोके, वृष्टये धीर ! नीरदाः ? ॥८९॥
स्वप्नेऽपि न स्वदेहस्य, सुखं वाञ्छन्ति साधवः ।
क्लिश्यन्ते यत्परार्थे ते, सैव तेषां सुखासिका ॥९०॥
यथाऽग्निर्दाहपाकाय, जीवनाय यथाऽमृतम् ।
स्वभावेन तथा लोके, परार्था साधुसंहतिः ॥९१॥
कथं ते नामृतं सन्तो ?, ये परार्थपरायणाः ।
तृणायापि न मन्यन्ते, ससुखे धनजीविते ॥९२॥

इत्येवं ते महात्मानः, परार्थे कृतनिश्चयाः ।
आत्मनोऽपि भवन्त्येव, नूनं सिद्धप्रयोजनाः ॥९३॥ अष्टभिः कुलकम् ॥

विमलकृतो मानसिकनमस्कारः ।

तदेष भगवानेवं, रूपमास्थाय वैक्रियम् ।
बोधनार्थं समायातो, मद्बन्धूनां कृतोद्यमः ॥९४॥

सन्दिष्टं चानेन मम भगवता रत्नचूडस्य हस्ते यथाऽहमागमिष्यामि रूपान्तरेण, भवता च दुःखितसत्त्वान्वेषणं कार्यं न चाहं विज्ञातोऽपि वन्दनीयः, न तावदात्मा परैर्लक्षयितव्यो भवता यावत्स्वार्थसिद्धिर्न सम्पन्नेति, ततः कृतो विमलेन बुधसूरेर्मानसिको नमस्कारः । कथम् ?

नमस्ते ज्ञातसद्भाव !, नमस्ते भव्यवत्सल ! ।
नमस्ते मूढजन्तूनां, सम्बोधकरणे पटो ! ॥९५॥
अज्ञानापारनीरेशसन्तारणपरायण ! ।
स्वागतं ते महाभाग !, चारु चारु त्वया कृतम् ॥९६॥ युग्मम् ॥

इति भगवताऽपि मनसैवाभिहितं-

संसारसागरोत्तारी, सर्वकल्याणकारकः ।
स्वकार्यसिद्ध्ये भद्र !, धर्मलाभोऽस्तु तेऽनघः ॥९७॥

अत्रान्तरे हिमभवनमध्ये प्रवेशितः स राजपुरुषैः पुरुषः, स च खेदनिःसहतया द्राट्कृत्य निषण्णो भूतले प्रचलायितुं प्रवृत्तः, ततस्तं तादृशमवलोक्य केचिदुपहसन्ति केचिच्छोचन्ति केचिन्निन्दन्ति केचिदवधीरयन्ति, तथाऽन्ये परस्परं जल्पन्ति, यदुत-

दुःखी दीनो रुजाक्रान्तः, श्रान्तः क्लान्तो बुभुक्षितः ।
एष प्रेक्षणकप्रायः, समायातो नराधमः ॥९८॥
क्वानीतः केन वाऽऽनीतः ?, किञ्चिदेष सुदुःखितः ।
न वराको विजानीते, केवलं प्रचलायते ॥९९॥

एतच्चाकर्ण्य तेन रूपान्तरवर्तिना बुधसूरिणा किं कृतम् ?-

प्रदीपभास्वरौ कृत्वा, लसन्तावक्षिगोलकौ ।
कोपाटोपात्तदास्थानं, ज्वलदेव निरीक्षितम् ॥१००॥

बुधसूरिगदितकठोरवचनानि । उक्तं च-

आः पापाः ! किमहं जातो, युष्मत्तोऽपि विरूपकः ? ।
दुःखितो वा ? यतो यूयं, मामेवं हसथाधमाः ॥१०१॥

कृष्णवर्णा बुभुक्षार्तास्तृष्णार्ताः खेदनिःसहाः ।
तापार्ताः कुष्ठिनो यूयं, नाऽहं भो मूढमानवाः ! ॥१०२॥
शूलक्रान्ता जराजीर्णा, महाज्वरविबाधिताः ।
सोन्मादा विकलाक्षाश्च, यूयं नाहं नराधमाः ! ॥१०३॥
यूयमेव परायत्ता, यूयमेव ऋणार्दिताः ।
यूयं च प्रचलायध्वे, नाहं भो मूढमानवाः ! ॥१०४॥
हे पापाः ! कलिता यूयं, नूनं कालेन बालिशाः ।
मुनिं मां दुर्बलं मत्वा, तेनैवं हसथाधुना ॥१०५॥
अथ तौ भास्कराकारौ, दृष्ट्वा तस्याक्षिगोलकौ ।
जाज्वल्यमानौ सहसा, प्रकाशितदिगन्तरौ ॥१०६॥
जिह्वां च विद्युदाभासां, दन्तपङ्क्तिं च भास्वराम् ।
दृष्ट्वा श्रुत्वा च तां वाचं, जगतः कम्पकारिणीम् ॥१०७॥
क्षणादेव तदास्थानं, भीतकम्पितमानसम् ।
सञ्जातं सिंहनादेन, यथा हरिणयूथकम् ॥१०८॥
ततो धवलराजेन, विमलं प्रति भाषितम् ।-
कुमार ! नैष कोऽपीह, नरः प्रकृतिमानुषः ॥१०९॥
तथाहि-मलाविलं पुरा चक्षुरधुना भास्कराधिकम् ।
अस्य देदीप्यते वत्स !, तेजसा वक्त्रकोटरम् ॥११०॥
अनेकरणसङ्घट्टभटकोटिविदारिणः ।
श्रुत्वाऽस्य भारतीं वत्स !, कम्पते मम मानसम् ॥१११॥
तदेष न भवत्येव, तावत्सामान्यमानवः ।
देवः कश्चिदिहायातः, प्रच्छन्नो मुनिवेषकः ॥११२॥
एवं च स्थिते-यावन्न तेजसा वत्स !, सर्वं भस्मीकरोत्ययम् ।
तावत्प्रसादयाम्येनं, क्रोधान्धं मुनिपुङ्गवम् ॥११३॥
विमलेनोक्तम्-एवमेतन्न सन्देहः, सम्यक्तातेन लक्षितम् ।
नैष सामान्यपुरुषो, विषमः कोऽप्ययं महान् ॥११४॥
ततश्च-
तूर्णं प्रसाद्यतामेष, यावन्नो याति विक्रियाम् ।
भक्तिग्राह्या महात्मानः, क्रियतां पादवन्दनम् ॥११५॥

तच्छ्रुत्वा विलसल्लोलकिरीटकरकुड्मलः ।
धावन्नुच्चैर्महाराजो, मुनेः पादनतिं गतः ॥११६॥
ततो दृष्ट्वा महाराजं, पतितं क्रमयोस्तथा ।
तथैव प्रणतं सूरेः, सर्वं जनकदम्बकम् ॥११७॥

धवलराजेन क्षमायाचना ।

उक्तं च नरपतिना–

क्षाम्यत्येनं महाभागो, दोषमज्ञजनैः कृतम् ।
ददातु च प्रसादेन, स्वीयं मे दिव्यदर्शनम् ॥११८॥
ततो यावन्नृपो भूमेरुत्थाय पुनरीक्षते ।
तावत्स कीदृशस्तेन, सलोकेन विलोकितः ? ॥११९॥
लोचनानन्दिलावण्यनिर्जितामरविग्रहः ।
विलसद्दीप्तिविस्तारः, साक्षादिव दिवाकरः ॥१२०॥
अशेषलक्षणोपेतः, सर्वावयवसुन्दरः ।
निषण्णः कमले दिव्ये, सत्कार्तस्वरभास्वरे ॥१२१॥
अथ तं तादृशं वीक्ष्य, कान्तरूपं मुनीश्वरम् ।
सनृपास्ते जना जाता, विस्मयोत्फुल्ललोचनाः ॥१२२॥

परस्परं च जल्पितुं प्रवृत्ताः, यदुत–

कथं वा तादृशः पूर्वम् ?, कथमेवंविधोऽधुना ? ।
नूनमेष महाभागो, देव एव न संशयः ॥१२३॥
ततः कृत्वा नरेन्द्रेण, ललाटे करकुड्मलम् ।
स पृष्टो भगवानेवं, कस्त्वं भो नाथ ! कथ्यताम् ? ॥१२४॥

मुनिरुवाच–

यतिरस्मि महाराज !, न देवो नापि दानवः ।
विशेषयतिरूपं तु, लिङ्गादेवावगम्यते ॥१२५॥

धवलराजेनोक्तम्–

यद्येवं किमिदं नाथ !, विहितं भवताऽद्भुतम् ।
ईदृशं रूपनिर्माणं, पूर्वं बीभत्सदर्शनम् ॥१२६॥
कृष्णवर्णादयो दोषा, निजदेहविवर्तिनः ।
अस्माकं भवताऽऽदिष्टाः, किं वा सञ्चिन्त्य कारणम् ? ॥१२७॥

कथं वा क्षणमात्रेण, दिव्यरूपधरः परः ।
भगवन्नाथ ! सम्पन्नो ?, मादृशां कृतविस्मयः ॥१२८॥
तदिदं मे प्रसादेन, सर्वं नाथ ! निवेदय ।
ममोत्पन्नं मनोमध्ये, महदत्र कुतूहलम् ॥१२९॥

बुधसूरिकथितं संसारिस्वरूपम्, कठोरवचनभावार्थः ।

मुनिराह महाराज !, कृत्वा मध्यस्थमानसम् ।
कथ्यमानमिदं सर्वं, समाकर्णय साम्प्रतम् ॥१३०॥
इदं विरचितं पूर्वं, मया रूपं नरेश्वर ! ।
निदर्शनार्थं जीवानां, संसारोदरवर्तिनाम् ॥१३१॥
यतः-एवम्भूता इमे सर्वे, जीवाः संसारवर्तिनः ।
तथापि न विजानन्ति, स्वरूपं मूढमानसाः ॥१३२॥
अतोऽमीषां प्रबोधार्थं, तादृग् बीभत्सदर्शनम् ।
दृष्टान्तभूतं भूतानां, रूपं भूत(प!)निरूपितम् ॥१३३॥
मुनिवेषधरं तच्च, यन्मया भूप ! निर्मितम् ।
कृष्णवर्णादयो दोषा, युष्माकं ये च योजिताः ॥१३४॥
तत्रापि कारणं भूप !, वर्ण्यमानं मया स्फुटम् ।
विधाय निपुणां बुद्धिं, धीर ! चित्तेऽवधारय ॥१३५॥ युग्मम्॥
मुनयो ये महात्मानो, बुद्धाः सर्वज्ञदर्शने ।
तपःसंयमयोगेन, क्षालिताखिलकल्मषाः ॥१३६॥
ते कृष्णवर्णा बीभत्साः, क्षुत्पिपासादिपीडिताः ।
कुष्ठिनोऽपि बहिर्भूप !, सुन्दराः परमार्थतः ॥१३७॥
एते तु लोका राजेन्द्र !, ये सद्धर्मबहिष्कृताः ।
गृहस्थाः पापनिरताः, विषयामिषगृध्नवः ॥१३८॥
एते यद्यपि दृश्यन्ते, नीरोगाः सुखनिर्भराः ।
तथापि तत्त्वतो ज्ञेया, दुःखिता रोगपीडिताः ॥१३९॥
किं च-कृष्णवर्णादयो दोषा, गृहिणां सन्ति ते यथा ।
तथा न सन्ति साधूनां, तदिदं ते निवेद्यते ॥१४०॥
बहिः कनकवर्णोऽपि, पण्डितैः परमार्थतः ।
अन्तः पापतमोलिप्तः, कृष्णवर्णोऽभिधीयते ॥१४१॥

बहिरङ्गारवर्णोऽपि, चित्ते स्फटिकनिर्मलः ।
नरो विचक्षणैर्भूप !, स्वर्णवर्णोऽभिधीयते ॥१४२॥
एवं च कृष्णवर्णोऽपि, साधुः संशुद्धमानसः ।
विज्ञेयः परमार्थेन, स्वर्णवर्णो नराधिप ! ॥१४३॥
गृहस्थस्तु सदा भूप !, पापारम्भपरायणः ।
हेमावदातदेहोऽपि, विज्ञेयः कृष्णवर्णकः ॥१४४॥
अनेन परमार्थेन, मयोक्तमिदमञ्जसा ।
न कृष्णवर्णोऽहं लोका !, यूयमेव तथाविधाः ॥१४५॥
तथा–सम्प्राप्तैरपि नो तृप्तिर्विषयैर्या नराधिप ! ।
विद्वद्भिः परमार्थेन, सा बुभुक्षा प्रकीर्तिता ॥१४६॥
तया बुभुक्षिताः सर्वे, भुवनोदरचारिणः ।
अमी वराकाः सद्धर्मविकला मूढजन्तवः ॥१४७॥
ते हि यद्यपि दृश्यन्ते, तृप्ताः सम्पूरितोदराः ।
तथापि तत्त्वतो ज्ञेया, बुभुक्षाक्षामितोदराः ॥१४८॥
साधवस्तु महात्मानः, सदा सन्तोषपोषिताः ।
न पीडितास्तया भूप !, भीमभावबुभुक्षया ॥१४९॥
तेन यद्यपि दृश्यन्ते, विरिक्तजठराः परम् ।
तथापि तत्त्वतो ज्ञेयास्ते तृप्ताः स्वस्थमानसाः ॥१५०॥
इदं कारणमालोच्य, बुभुक्षार्ताः पुरा मया ।
यूयमुक्ता धरानाथ !, तृप्तश्चात्मा प्रकाशितः ॥१५१॥
तथा–अनागतेषु भोगेषु, योऽभिलाषो नराधिप ! ।
सा पिपासेति विज्ञेया, भावकण्ठस्य शोषणी ॥१५२॥
तया पिपासिताः सर्वे, पिबन्तोऽप्युदकं जनाः ।
ये केचिद्भूप ! दृश्यन्ते, जैनधर्मबहिष्कृताः ॥१५३॥
मुनयस्तु सदा धन्या, भाविभोगेषु निःस्पृहाः ।
तेनोदकं विनाऽप्येते, पिपासादूरवर्तिनः ॥१५४॥
अतः पिपासिता यूयमहं तु न तृषार्दितः ।
मयेदं कारणं मत्वा, पुरा राजन्निवेदितम् ॥१५५॥
तथा–अलब्धमूलपर्यन्तो, दोषचौरशताकुलः ।
विषमो विषयव्यालो, दुःखधूल्या प्रपूरितः ॥१५६॥

अयं नरेन्द्र ! संसारो, विद्वद्भिर्भावचक्षुषा ।
अध्वा निरीक्षितो घोरः, खेदहेतुः शरीरिणाम् ॥१५७॥ युग्मम् ॥
एते च सततं जीवा, गृहीत्वा कर्मशम्बलम्[1] ।
वहन्तो भवमार्गेऽत्र, न कुर्वन्त्युत्प्रयाणकम् ॥१५८॥
तेनामी जैनसद्धर्मरहिता मूढजन्तवः ।
संसाराध्वमहाखेदखेदिताः सततं मताः ॥१५९॥
ततो यद्यपि दृश्यन्ते, गृहे शीतलमण्डपे ।
तथापि तत्त्वतो ज्ञेया, गच्छन्तः पथि ते सदा ॥१६०॥
मुनयस्तु सदा भूप !, विवेकवरपर्वते ।
आरूढाः सतताह्लादे, वर्तन्ते जैनसत्पुरे ॥१६१॥
तत्र चित्तसमाधानं, मण्डपं हिमशीतलम् ।
आसाद्य निर्वृतात्मानस्तिष्ठन्ति विगतश्रमाः ॥१६२॥
ततो यद्यपि दृश्यन्ते, ते बहिः खेदनिःसहाः ।
विज्ञेयाः खेदनिर्मुक्तास्तथापि परमार्थतः ॥१६३॥
तदिदं कारणं मत्वा, भवन्तः खेदनिःसहाः ।
अहं तु नेति राजेन्द्र !, मया पूर्वं निवेदितम् ॥१६४॥
तथा-क्रोधो मानस्तथा माया, लोभश्चेति चतुर्विधः ।
तापः संसारिणां भूप !, सर्वाङ्गीणः सुदारुणः ॥१६५॥
तेन दन्दह्यमानास्ते, तापार्ताः सततं मताः ।
यद्यपीह विलोक्यन्ते, चन्दनादिविलेपिताः ॥१६६॥
साधवस्तु महाराज !, सततं शान्तमानसाः ।
निष्कषाया महात्मानो, निस्तापाः पापसूदनाः ॥१६७॥
ततो यद्यपि दृश्यन्ते, ते बहिस्तापपीडिताः ।
तथापि परमार्थेन, विज्ञेयास्तापदूरगाः ॥१६८॥
इदमेव मया ज्ञात्वा, यूयं तापार्दिताः पुरा ।
अहं तु नेति राजेन्द्र !, प्रतिज्ञातमशङ्कया ॥१६९॥
तथा-कुविकल्पकृमिस्थानं, मिथ्यात्वं भूप ! देहिनाम् ।
गलदास्तिक्यजाम्बालं, कुष्ठमुक्तं मनीषिभिः ॥१७०॥

१. विश्रामस्थानम् ।

विनाशयति तद्भूप !, सद्बुद्धिवरनासिकाम् ।
घर्घराव्यक्तघोषं च, नरं धत्ते मदोद्धतम् ॥१७१॥
शमसंवेगनिर्वेदकारुण्यानि च मूलतः ।
हस्तपादसमान्येषां, शाटयत्येव देहिनाम् ॥१७२॥
तेन मिथ्यात्वकुष्ठेन, विद्वदुद्वेगहेतुना ।
आक्रान्ताः पृथिवीनाथ !, सदाऽमी मूढजन्तवः ॥१७३॥
ततो यद्यपि दृश्यन्ते, सर्वावयवसुन्दराः ।
तथापि भावतो ज्ञेयाः, कृमिजालक्षताङ्गकाः ॥१७४॥
सम्यग्भावेन पूतानां, मुनीनां पुनरीदृशम् ।
कुष्ठं नास्त्येव तेनामी, सर्वावयवसुन्दराः ॥१७५॥
ततश्च–कथञ्चिदपि यद्येते, बहिः कुष्ठसमन्विताः ।
भवेयुर्भावतो भूप !, तथापि न तथाविधाः ॥१७६॥
अत एव मया पूर्वमिदमालोच्य कारणम् ।
तथोक्ताः कुष्ठिनो यूयं, नाहं कुष्ठीति चोदितम् ॥१७७॥
तथा–परेषु द्वेषदुष्टानां, समृद्धिं वीक्ष्य देहिनाम् ।
ईर्ष्या या जायते भूप !, सा शूलमभिधीयते ॥१७८॥
ईर्ष्याशूलेन चाक्रान्ताः, परेषां व्यसने क्षमाः[1] ।
द्वेषाध्माताः प्रकुर्वन्ति, वक्त्रभङ्गं पुनः पुनः ॥१७९॥
तच्च नास्ति महाशूलं, मुनीनां धरणीपते ! ।
सर्वत्र समचित्तास्ते, **वीतद्वेषा हि साधवः** ॥१८०॥
इदं कारणमाश्रित्य, शूलाक्रान्ताः पुरा मया ।
यूयमुक्तास्तथाऽऽत्मा च, शूलहीनः प्रकाशितः ॥१८१॥
अनादिभवचक्रेऽत्र, यथाभूताः कथञ्चन ।
तथाद्यापि प्रवर्तन्ते, सदाऽमी भूप ! जन्तवः ॥१८२॥
कदाचिन्न पुनः प्राप्तं, विद्याजन्म मनोहरम् ।
नैतैर्विवेकतारुण्यं, न मृता भावमृत्युना ॥१८३॥
जराजीर्णास्ततो भूप !, यावत्संसारजीविनः ।
जन्तवोऽनन्तदुःखालीवलीपलितसङ्गताः ॥१८४॥

१. परेषां सङ्कटप्रदाने तोषमुपागताः ।

बहिस्ते तरुणाकारं, धारयन्तोऽपि मानवाः ।
विज्ञेयास्तत्त्वतो भूप !, जराजीर्णकपोलकाः ॥१८५॥
साधुभिर्भूपते ! लब्धं, विद्याजन्म मनोहरम् ।
प्राप्तं विवेकतारुण्यं, दीक्षासम्भोगसुन्दरम् ॥१८६॥
अप्राप्य तां जरां घोरां, तारुण्ये वर्तमानकाः ।
तथा च ते मरिष्यन्ति, यथोत्पत्तिर्न जायते ॥१८७॥
अतः सर्वे जराजीर्णा, ये भवे दीर्घजीविनः ।
सन्तस्तु यौवनारूढाः, कर्मनिर्दलनक्षमाः ॥१८८॥
तथा-यतोऽमी देहिनो मूढा, रागसन्तापतापिताः ।
तेनोच्यन्ते मया भूप !, महाज्वरविबाधिताः ॥१८९॥
सत्साधूनां पुनर्नैव, रागगन्धोऽपि विद्यते ।
ते बहिर्ज्वरवन्तोऽपि, विज्ञेयास्तेन विज्वराः ॥१९०॥ तथा-
यत् कृत्यं सदनुष्ठानं, तन्न कुर्वन्ति मूढकाः ।
वारिता अपि कुर्वन्ति, पापानुष्ठानमञ्जसा ॥१९१॥
ततोऽमी जगतीनाथ !, येऽपि पण्डितमानिनः ।
सोन्मादा इति विज्ञेयास्तेऽपि भावेन देहिनः ॥१९२॥
सदनुष्ठानरक्तानां, साधूनां पुनरीदृशः ।
नोन्मादोऽस्ति धरानाथ !, तस्मात्ते शुद्धबुद्धयः ॥१९३॥
जराजीर्णा रुजाक्रान्ताः, सोन्मादा इति तत्पुरा ।
यूयं नाहमिति प्रोक्तं, सर्वमेतेन हेतुना ॥१९४॥
तथा-पश्यन्तोऽपि विशालेन, चक्षुषा बहिरञ्जसा ।
अन्तर्वसुन्धरानाथ !, कामान्धा मूढजन्तवः ॥१९५॥
विकलाक्षा मया पूर्वं, तेनामी परिकीर्तिताः ।
साधूनां विकलाक्षत्वं, कामजन्यं न विद्यते ॥१९६॥
अतो यद्यपि दृश्यन्ते, ते बहिर्नष्टदृष्टयः ।
तथापि साधवो नैव, विकलाक्षा नराधिप ! ॥१९७॥
तेनामी जन्तवः प्रोक्ता, विकलाक्षा मया पुरा ।
आत्मा प्रकाशितो भूप !, सज्जाक्षश्चारुलोचनः ॥१९८॥
राजन्नेते परायत्ता, यथा गेहस्य जन्तवः ।
साधवस्त्वपरायत्तास्तथा ते कथ्यतेऽधुना ॥१९९॥

निःस्नेहं परमार्थेन, भिन्नकर्मविनिर्मितम् ।
इदं कलत्रपुत्रादि, चञ्चलं च कुटुम्बकम् ॥२००॥
अदृष्टपरमार्थानामत्यन्तं मनसः प्रियम् ।
तत्त्वभूतमिदं तेषां, मूढानां प्रतिभासते ॥२०१॥
ततस्तदर्थं क्लिश्यन्ते, दासाः कर्मकरा यथा ।
रात्रौ दिवा च मोहेन, पशुभूता वराककाः ॥२०२॥
आहारयन्ति न स्वस्था, रात्रौ निद्राविवर्जिताः ।
चिन्तयाऽऽकुलिता नित्यं, धनधान्यपरायणाः ॥२०३॥
तदेवं ते कुटुम्बस्य, सदैवादेशकारिणः ।
परायत्ता न जानन्ति, परमार्थममेधसः ॥२०४॥
तथाहि–माता भ्राता पिता भार्या, दुहिता पुत्र इत्यपि ।
सर्वेऽपि जन्तवो जाता, नरादिभवचक्रके ॥२०५॥
ततो विज्ञातसद्भावः, को हि नाम सकर्णकः ।
तदायत्तो भृशं भूत्वा, स्वकार्यं हारयेन्नरः ? ॥२०६॥
अत एव महात्मानस्तत्कलत्रादिपञ्जरम् ।
सम्परित्यज्य निःशेषं, जाता निःसङ्गबुद्धयः ॥२०७॥
त एव ह्यपरायत्तास्त एव कृतिनो नराः ।
त एव स्वामिनो भूप !, सर्वस्य जगतोऽनघाः ॥२०८॥
गुरूणां ते परायत्ता, भवन्तोऽपि महाधियः ।
निर्मुक्ता गृहपाशेन, तस्मादत्यन्तमुत्कलाः ॥२०९॥
इदं च हृदये कृत्वा, कारणं मानवेश्वर ! ।
यूयमुक्ताः परायत्ता, मयाऽऽत्मा तद्विलक्षणः ॥२१०॥
तथा–ये च तेऽष्टौ मया पूर्वमृणिकाः सम्प्रकाशिताः ।
विद्धि तान्यष्ट कर्माणि, दुःखदानीह देहिनाम् ॥२११॥
तैश्चामी सततं जीवाः, कदर्थ्यन्ते मुहुर्मुहुः ।
दानग्रहणिकैर्भूप !, कर्मभिस्तीव्रदारुणैः ॥२१२॥
बुभुक्षिताः क्वचिद्दीना, धार्यन्तेऽत्यन्तविह्वलाः ।
क्वचिद्गाढं प्रपीड्यन्ते, क्षिप्त्वा नरककोष्ठके ॥२१३॥
साधूनामपि ते सन्ति, ऋणिकाः किं तु नो तथा ।
कदर्थनं प्रकुर्वन्ति, शुद्धप्रायगुणां यतः ॥२१४॥

शोधयन्ति च ते नित्यं, साधवः कृतनिश्चयाः ।
ऋणं तत्तेन ते तेषामृणिका नैव बाधकाः ॥२१५॥
ऋणार्दिता मया पूर्वं, यूयमेतेन हेतुना ।
प्रोक्ता भूप ! तथाऽऽत्मा च, ऋणमुक्तः प्रकाशितः ॥२१६॥
यथा च प्रचलायन्ते, भावतोऽमी नरेश्वर ! ।
जैनधर्मबहिर्भूता, जन्तवस्तन्निशामय ॥२१७॥
"दुरन्तः कर्मसन्तानो, घोरः संसारसागरः ।
रौद्रा रागादयो दोषास्तरलं देहिनां मनः ॥२१८॥
चटुलश्चेन्द्रियग्रामो, दृष्टनष्टं च जीवितम् ।
चला विभूतयः सर्वा, देहश्च क्षणभङ्गुरः ॥२१९॥
शत्रुः प्रमादो जीवानां, दुस्तरः पापसञ्चयः ।
असंयतत्वं दुःखाय, भीमो नरककूपकः ॥२२०॥
अनित्याः प्रियसंयोगा, भवन्त्यप्रियसङ्गमाः ।
क्षणरक्तविरक्ताश्च, योषितो मित्रबान्धवाः ॥२२१॥
उग्रो मिथ्यात्ववेतालो, जरा करविवर्तिनी ।
भोगाश्चानन्तदुःखाय, दारुणो मृत्युभूधरः" ॥२२२॥
एतत्सर्वमनालोच्य, कृत्वा पादप्रसारिकाम् ।
विवेकचक्षुः संमील्य, स्वपन्ति ननु जन्तवः ॥२२३॥
महाघुरघुरारावं, कुर्वन्तो नष्टचेतनाः ।
कथञ्चिन्न प्रबुध्यन्ते, शब्दैरपि विवेकिनाम् ॥२२४॥
विबुद्धा अपि कृच्छ्रेण, घूर्णमानेन चक्षुषा ।
भूयो भूयः स्वपन्त्येव, ते महामोहनिद्रया ॥२२५॥ अन्यच्च-
कुतो वयं समायाताः ?, प्रापिताः केन कर्मणा ? ।
क्वागताः ? क्व च यास्यामो ?, विदन्त्येतन्न मूढकाः ॥२२६॥
ततो यद्यपि दृश्यन्ते, [१]वल्गामानाः पृथग्जनाः ।
तथापि तत्त्वतो भूप !, विज्ञेयाः प्रचलायिताः ॥२२७॥
साधूनां पुनरेषा भो !, महामोहतमोमयी ।
निद्रा नास्त्येव धन्यानां, तेन ते नित्यजागराः ॥२२८॥

१. उद्यमं कुर्वन्तः ।

सर्वज्ञागमदीपेन, साधवस्ते महाधियः ।
गत्यागती प्रपश्यन्ति, स्वस्यान्येषां च देहिनाम् ॥२२९॥
ततश्च-ते बहिर्निद्रया भूप !, सुप्ता अपि कथञ्चन ।
असुप्ता इति विज्ञेया, विवेकोन्मीलितेक्षणाः ॥२३०॥
इदमेव मया सर्वं, सञ्चिन्त्य हृदये पुरा ।
यूयं भोः ! प्रचलायध्वे, नाहमित्येव भाषितम् ॥२३१॥
तथा-यूयमेव न जानीथ, स्वरूपं मोहनिद्रिताः ।
मम प्रत्यक्षमेवेदं, विवेकस्फुटचक्षुषः ॥२३२॥
अन्यच्चैवं व्यवस्थिते-
ये सद्धर्मबहिर्भूतास्त एव परमार्थतः ।
देहिनो भूप ! विज्ञेया, दारिद्र्याक्रान्तमूर्तयः ॥२३३॥
तथाहि-ज्ञानदर्शनचारित्रवीर्यादीनि नरेश्वर ! ।
न सन्ति भावरत्नानि, तेषां पापहतात्मनाम् ॥२३४॥
तान्येव धनसाराणि, तान्येवैश्वर्यकारणम् ।
तान्येव सुन्दराणीह, तैर्विना कीदृशं धनम् ? ॥२३५॥
अतस्तै रहिता येऽत्र, दृश्यन्ते धनपूरिताः ।
विज्ञेयास्तेऽपि राजेन्द्र !, निर्धनाः परमार्थतः ॥२३६॥
तत्साधूनां पुनस्तानि, भावरत्नानि भूपते ! ।
चित्तापवरके नित्यं, जाज्वल्यन्ते महात्मनाम् ॥२३७॥
अतस्ते धनिनो धन्यास्त एव परमेश्वराः ।
ते शक्ता भुवनस्यापि, पोषणे नास्ति संशयः ॥२३८॥
मलिना मलिनैर्भूप !, बहिश्चीवरखण्डकैः ।
अलाबुहस्ता दृश्यन्ते, दरिद्रा इव मुग्धकैः ॥२३९॥
तथापि परमार्थेन, ते महारत्ननायकाः ।
विज्ञेयाः पण्डितैर्भूप !, मुनयः परमेश्वराः ॥२४०॥
किं च- तृणाग्राद्रत्नकोटीश्च, पातयन्ति स्वतेजसा ।
यदि कार्यं भवेत्ताभिस्तेषां भूप ! महात्मनाम् ॥२४१॥
अतः स्वकीयं दारिद्र्यमनालोच्य भवादृशैः ।
महाधनोऽपि मादृक्षः, कथमुक्तो दरिद्रकः ? ॥२४२॥

मलिनोऽपि स एवात्र, यः कर्ममलपूरितः ।
बहिः क्षालितसद्गात्रवस्त्रोऽपि जगतीपते ! ॥२४३॥
तुषारहारगोक्षीरनिर्मलीमसमानसः ।
बहिर्मलधरोऽप्यत्र, निर्मलो मानवेश्वर ! ॥२४४॥
तदिदं भावमालिन्यमविचार्याऽऽत्मनि स्थितम् ।
अहं हा हसितः केन, कारणेन पुरा जनैः ? ॥२४५॥
सुभगोऽपि जगत्यत्र, सद्धर्मनिरतो नरः ।
विवेकिनां समस्तानां, यस्मादत्यन्तवल्लभः ॥२४६॥
सुरासुरसमायुक्तं, जगदेतच्चराचरम् ।
बन्धुभूतं हि वर्तेत, सद्धर्मगतचेतसाम् ॥२४७॥
तस्मात्साधुः सदाचारो, लोके सौभाग्यमर्हति ।
तत्र ये कुर्वते द्वेषं, पापिष्ठास्ते नराधमाः ॥२४८॥
पुमानधर्मभूयिष्ठो, दुर्भगो भावतो मतः ।
निन्दन्ति तं यतः सर्वे, महाराज ! विवेकिनः ॥२४९॥
तस्मात्पापे रतः प्राणी, लोके दौर्भाग्यमर्हति ।
तमप्यत्र प्रशंसन्ति, ये ते पापा नराधिप ! ॥२५०॥ एवं च स्थिते-
धार्मिको मुनिवेषेण, प्रकटोऽपि पुरा जनैः ।
दुर्भगैः सुभगोऽप्यस्मि, केन कार्येण निन्दितः ? ॥२५१॥

एवं च स्थिते महाराज ! य इमे जिनवचनामृतबहिर्भूताः संसारोदरवर्तिनो जन्तवोऽनवरतं वराका बध्यन्ते दृढकर्मसन्तानरज्ज्वा, पीड्यन्ते विषयासन्तोष-बुभुक्षया, शुष्यन्ति विषयाशापिपासया, खिद्यन्ते निरन्तरभवचक्रभ्रमणेन, सततो-पतप्ताः कषायघर्मोष्मणा, गृह्यन्ते मिथ्यात्वमहाकुष्ठेन, तुद्यन्ते परेर्ष्याशूलेन, जीर्यन्ते दीर्घसंसारावस्थानेन, दन्दह्यन्ते रागमहाज्वरेण, अन्धीक्रियन्ते कामकाचपटलेन, आक्रम्यन्ते भावदारिद्र्येण, अभिभूयन्ते जराराक्षस्या, आच्छाद्यन्ते मोहतिमिरेण, आकृष्यन्ते हृषीकतुरङ्गमैः, पापच्यन्ते क्रोधतीव्रवह्निना, अवष्टभ्यन्ते मानमहापर्वतेन, वेष्ट्यन्ते मायाजालिकया, प्लाव्यन्ते लोभसागरप्लवेन, परिताप्यन्त इष्टवियोगवेदनया, दोदूयन्तेऽनिष्टसङ्गमतापेन[१], दोलायन्ते कालपरिणतिवशेन, तन्तम्यन्ते कुटुम्बपोषण-परायणतया, कदर्थ्यन्ते कर्मदानग्रहणिकैः, अभिद्रूयन्ते महामोहनिद्रया, कवली-क्रियन्ते मृत्युमहामकरेणेति-त इमे महाराज ! जन्तवो यद्यपि शृण्वन्ति वेणुवीणा-

१. उत्तमणैः ।

मृदङ्गकाकलीगीतानि, पश्यन्ति विभ्रमविब्बोककारिमनोहारिरूपाणि, आस्वादयन्ति सुसंस्कृतकोमलपेशलहृदयेष्टविशिष्टाहारप्रकारजातं, आजिघ्रन्ति कर्पूरागुरुकस्तूरिका-पारिजातमन्दारनमेरुहरिचन्दनसन्तानकसुमनोहरकोष्ठपुटपाकादिगन्धजातम्, आलिङ्गन्ति कोमलललितललनातूल्यादिस्पर्शजातं, तथा ललन्ते सह स्निग्धमित्रवृन्देन विलसन्ति मनोरमकाननेषु, विचरन्ति यथेष्टचेष्टया, क्रीडन्ति नानाक्रीडाभिः, भवन्ति सुखाभिमानेनानाख्येयरसवशनिर्भरा निमीलिताक्षास्तथाप्यमीषां जन्तूनां क्लेशरूप एवायं वृथा सुखानुशयः, एवंविधविविधदुःखहेतुशतव्रातपूरितानां हि महाराज ! कीदृशं सुखम् ? का वा मनोनिर्वृतिरिति ।

तदिमे दुःखपूरेण, पूरिताः परमार्थतः ।
मोहादेवावगच्छन्ति, जन्तवः सुखमात्मनः ॥२५२॥

व्याधैर्विलुप्यमानस्य, शक्तिनाराचतोमरैः ।
यत्सुखं हरिणस्येह, तत्सुखं भूप ! गेहिनाम् ॥२५३॥

गलेन गृह्यमाणस्य, निर्भिन्ने तालुमर्मके ।
यत्सुखं मूढमीनस्य, तत्सुखं भूप ! गेहिनाम् ॥२५४॥

एतावद्दुःखसङ्घातपातनिर्भिन्नमस्तकाः ।
सद्धर्मरहिता भूप !, गेहिनो नारकोपमाः ॥२५५॥

साधुभगवतां पूर्वोक्तोपद्रवाभावः ।

सत्साधूनां पुनर्भगवतां महाराज ! न सन्त्येवामी पूर्वोदिताः सर्वेऽपि क्षुद्रो-पद्रवाः, यतस्तेषां भगवतां प्रनष्टं मोहतिमिरम्, आविर्भूतं सम्यग्ज्ञानं, निवृत्तः सर्वत्राग्रहविशेषः, परिणतं सन्तोषामृतं, व्यपगता दुष्टक्रिया, त्रुटितप्राया भववल्लरी, स्थिरीभूतो धर्ममेघसमाधिः, तथा गाढानुरक्तमन्तरङ्गमन्तःपुरं यतस्तेषां भगवतां सन्तोषदायिनी धृतिसुन्दरी, चित्तप्रसादहेतुः श्रद्धा, आह्लादकारिणी सुखासिका, निर्वाणकारणं विविदिषा, प्रमोदविधायिनी विज्ञप्तिः, सद्बोधकारिणी मेधा, प्रमदातिरेकनिमित्तमनुप्रेक्षा, अनुकूलचारिणी मैत्री, अकारणवत्सला करुणा, सदानन्ददायिनी मुदिता, सर्वोद्वेगविघातिनी उपेक्षेति ।

तदेताभिः समायुक्ताः, सुन्दरीभिर्नरेश्वर ! ।
इष्टाभिर्दृढरक्ताभिर्मोदन्ते ते मुनीश्वराः ॥२५६॥

संसारसागरोत्तीर्णं, निर्वाणसुखसागरे ।
निमग्नं ते सदाऽऽत्मानं, मन्यन्ते मुनिपुङ्गवाः ॥२५७॥

नेन्द्राणां तन्न देवानां, नापि तच्चक्रवर्तिनाम् ।
सद्ध्यानपरिपूतानां, यत्सुखं शान्तचेतसाम् ॥२५८॥
ये स्वकेऽपि महात्मानो, वर्तन्ते देहपञ्जरे ।
परा इव सुखं तेषां, भूप ! कः प्रष्टुमर्हति ? ॥२५९॥
संसारगोचरातीतं, यत्सुखं वेदयन्ति ते ।
त एव यदि जानन्ति, रसं तस्य न चापरे ॥२६०॥
एवं व्यवस्थिते राजन् !, दुःखिभिः ! सुखपूरितः ।
परमार्थमनालोच्य, निन्दितोऽस्मि मुधा जनैः ॥२६१॥
किंवा सुखाभिमानेन, यूयमेवं विनाटिताः ।
न लक्षयथ राजेन्द्र !, परमार्थसुखं परम् ? ॥२६२॥
नृपतिरुवाच-भगवन् ! यद्येवं विषया दुःखं, प्रशमः सुखमुत्तमम् ।
तदेष लोकः सर्वोऽपि, कस्मान्नेदं प्रबुध्यते ? ॥२६३॥
मुनिराह महाराज !, महामोहवशादिदम् ।
न बुध्यते जनस्तत्त्वं, यथाऽसौ बठरो गुरुः ॥२६४॥

बठरगुरुकथानकम् ।

धवलराजेनोक्तं-भदन्त ! कोऽसौ बठरगुरुः ? कथं चासौ न बुध्यते स्म तत्त्वम् ? बुधसूरिराह-महाराजाकर्णय-अस्ति भवो नाम विस्तीर्णो ग्रामः, तस्य च मध्ये तत्स्वरूपं नाम शिवायतनं, तच्च सदा पूरितमनर्घेयरत्नैः, भृतं मनोज्ञैर्विविधखण्डखाद्यकैः, समायुक्तं द्राक्षापानादिपानकैः, समृद्धं धनेन, निचित्तं धान्येन, सम्पन्नं हिरण्येन, पर्याप्तं कनकेन, अन्वितं वरचेलेन, पुष्टमुपस्करेण-सर्वथा सर्वसामग्र्या, संयुक्तं सुखकारणम् ।
तद्देवमन्दिरं शैवं, तुङ्गं स्फटिकनिर्मलम् ॥२६५॥

तत्र च शिवभवने तस्य स्वामी सारगुरुर्नाम शैवाचार्यः सकुटुम्बकः प्रतिवसति । स चोन्मत्तको हितमपि वत्सलमपि सुन्दरमपि तदात्मीयं कुटुम्बकं न पालयति न च जानीते तस्य स्वरूपं न लक्षयति तां शिवभवनसमृद्धिं, ततो विज्ञातमिदं तस्य चेष्टितं तद्ग्रामवासिभिस्तस्करैः । ततो धूर्ततया तैरागम्य कृता तेन भौतेन सह मैत्री, तस्य चोन्मत्तकतयैव ते तस्कराः सुन्दरा वत्सला हितकारिणो वल्लभाश्च प्रतिभासन्ते । ततोऽपकर्ण्य तदात्मीयं कुटुम्बकं तैरेव सार्धमनवरतं विलसन्नास्ते । ततोऽसौ वारितो माहेश्वरै- र्यथा-भट्टारक ! चौराः खल्वेते, मा कार्षीरमीभिः सह सम्पर्कमिति । स तु न शृणोति तद्वचनं, ततो मूर्ख इति मत्वा

तैर्माहेश्वरैः सारगुरुरिति नामापहृत्य तस्य बठरगुरुरिति नाम स्थापितं, परित्यक्तं च सर्वमाहेश्वरैर्धूर्ततस्करपरिकरितं तन्मित्रभावमापन्नं बठरगुरुमुपलभ्य तद्देव-मन्दिरम्। ततो लब्धप्रसरैस्तैर्धूर्ततस्करैर्योग[1]दानेन तस्य वर्धितो गाढतरमुन्मादो वशीकृतं शिवायतनमभिभूतं तत्कुटुम्बकं क्षिप्तं मध्यापवरके तालितं तस्य द्वारं, ततो वशीभूतमस्माकं सर्वमिति मत्वा तुष्टचित्तैस्तैरेकः स्थापितो महाधूर्तस्तस्करो नायकः। ततः कृततालारवास्तस्याग्रतस्तं बठरगुरुं नाटयन्तस्तिष्ठन्ति, गायन्ति चेदं गीतकं, यदुत-

धूर्तभावमुपगम्य कथञ्चिदहो जना !
वञ्चयध्वमपि मित्रजनं हृतभोजनाः ।
मन्दिरेऽत्र बठरस्य यथेष्टविधायका,
एत एत ननु पश्यथ वयमिति नायकाः ॥२६६॥

क्वचित्पुनरेवं गायन्ति, यदुत-

बठरो गुरुरेष गतो वशतां, वसतिं वयमस्य सरत्नशताम् ।
निजधूर्ततया प्रकटं जगतां, खादेम पिबेम च हस्तगताम् ॥२६७॥

बठरगुरुमतिविपर्यासः ।

स पुनरधन्यो बठरगुरुर्न लक्षयति तामात्मविडम्बनां, नावबुध्यते निज-कुटुम्बव्यतिकरं, न जानीते समृद्धशिवायतनहरणं, नावगच्छति तेषां रिपुरूपतां, मन्यते च महामित्रभावं, ततो हृष्टतुष्टो रात्रौ दिवा च तेषां तस्कराणां कुटुम्बकस्य मध्यगतो नृत्यन्नास्ते । तत्र च ग्रामे चत्वारः पाटकाः प्रतिवसन्ति, तद्यथा-जघन्योऽतिजघन्य उत्कृष्ट उत्कृष्टतरश्चेति । ततोऽसौ बठरगुरुर्बुभुक्षाक्षामस्तान् भोजनं याचते । ततस्तैः समर्पितं तस्य तस्करैर्महाघटकर्परं, चर्चितो मषीपुण्ड्र-कैरभिहितश्च-वयस्य ! गुरो ! भिक्षामट । विहितमेतत्तेन । ततस्तैः परिवेष्टित एव गतोऽसौ तत्रातिजघन्यपाटके भिक्षार्थं, ततो गृहे गृहे नृत्यन्नसौ वेष्टितस्तै-र्विहिततालारवैर्विचरितुं प्रवृत्तः । सञ्ज्ञितास्तस्करैः षिङ्गलोका यथा-चूर्णयतैनं, ततस्तैः किं कृतम् ?-

यष्टिमुष्टिमहालोष्टप्रहारैस्ताडितो भृशम् ।
स वराको रटन्नुच्चैः, कृतान्तैरिव दारुणैः ॥२६८॥
अनुभूय महादुःखं, चिरं भिक्षाविवर्जितः ।
निर्गतः पाटकात्तस्मात्ततोऽसौ भग्नकर्परः ॥२६९॥

१. चूर्णौषधिप्रदानेन ।

ततः समर्पितं तैस्तस्करैस्तस्य शरावं नीतस्तत्र जघन्यपाटके तत्रापि न लभते भिक्षां, बाध्यते षिङ्गजनेन-

ततस्तत्रापि पर्यट्य, चिरं भग्ने शरावके ।
उत्कृष्टपाटके नीतस्तैर्दत्त्वा ताम्रभाजनम् ॥२७०॥
तत्रासौ विरलां भिक्षां, लभते छायया तया ।
यथाऽयं देवगेहस्य, रत्नपूर्णस्य नायकः ॥२७१॥
कदर्थ्यते च तत्रापि, षिङ्गलोकैस्तथा परैः ।
अथान्यदा क्वचित्तस्य, भग्नं तत्ताम्रभाजनम् ॥२७२॥
तत्र भग्ने पुनः पात्रे, दत्त्वा राजतभाजनम् ।
तथैव वेष्टितश्चौरैर्नीतोऽसौ तुर्यपाटके ॥२७३॥
तत्र चात्यन्तविख्यातः, किलायं रत्ननायकः ।
ततः सुसंस्कृतां भिक्षां, लभतेऽसौ गृहे गृहे ॥२७४॥
एवं ते तस्करास्तेषु, पाटकेषु पुनः पुनः ।
भ्रमयन्त्येव तं भौतं, नाटयन्तो दिवानिशम् ॥२७५॥
हसन्तश्चूर्णयन्तश्च, वल्गमाना गृहे गृहे ।
कृततालारवा हृष्टा, नानारूपैर्विडम्बनैः ॥२७६॥
स तथा क्रियमाणोऽपि, तस्करैर्बठरो गुरुः ।
भिक्षामात्रेण हृष्टात्मा, वल्गते पूरितोदरः ॥२७७॥

गायति च, कथम् ?-

अतिवत्सलको मम मित्रगणः, कुरुते विनयं च समस्तजनः ।
तदिदं मम राज्यमहो प्रकटं, भ्रियते जठरं सुधया विकटम् ॥२७८॥

अन्यच्च-आत्मानं मन्यते मूढो, मग्नं च सुखसागरे ।
द्वेष्टि तस्करदोषाणां, कथकं स जडो जनम् ॥२७९॥

न पुनरसौ वराको बहिर्भावितं रत्नादिसमृद्धादात्मीयभवनाच्च्यावितमनुरक्तसुन्दरनिजकुटुम्बात् पातितं दुःखसमुद्रे शोच्यमात्मानमाकलयतीति । तदेष महाराज ! निवेदितस्ते मया बठरगुरुर्येन सदृशोऽयं लोक इति । नृपतिराह-कथमेतत् ? भगवतोक्तम्-आकर्णय-

ग्रामोऽत्र भूप ! संसारो, विस्तीर्णस्तस्य मध्यगम् ।
स्वरूपं जीवलोकस्य, विज्ञेयं शिवमन्दिरम् ॥२८०॥

जीवलोके उपनयः ।

तदेव ज्ञानवीर्यादिरत्नपूरैश्च पूरितम् ।
सम्पूर्णं सर्वकामैश्च, परमानन्दकारणम् ॥२८१॥
जीवलोकश्च तत्स्वामी, भौताचार्यो निगद्यते ।
तस्य स्वाभाविकाः सर्वे, ये गुणास्तत्कुटुम्बकम् ॥२८२॥
तत्तु स्वाभाविकं तस्य, सुन्दरं हितकारि च ।
तथापि जीवलोकस्य, न चित्ते प्रतिभासते ॥२८३॥
सोऽयं लोकः सदोन्मत्तः, कर्मयोगेन वर्तते ।
न जानीते निजं रूपं, गुणरत्नादिपूरितम् ॥२८४॥
रागादिदोषाः सर्वेऽपि, तस्कराः परिकीर्तिताः ।
त एव हि महाधूर्ता, जीवलोकस्य वञ्चकाः ॥२८५॥
सुहृदस्ते प्रभासन्ते, जीवलोकस्य वल्लभाः ।
ते च गाढं प्रकुर्वन्ति, कर्मोन्मादस्य वर्धनम् ॥२८६॥
ते स्वरूपं वशीकृत्य, जीवलोकस्य ये गुणाः ।
कुटुम्बमन्तस्तत्क्षिप्त्वा, चित्तद्वारं निरुन्धते ॥२८७॥
तदेवं ते धरानाथ !, गुणसम्भारपूरितम् ।
स्वरूपं जीवलोकस्य, हृत्वा मन्दिरसन्निभम् ॥२८८॥
अभिभूय तिरोधाय, तस्य भावकुटुम्बकम् ।
बृहद्धूर्तोपमं राज्ये, महामोहं निधाय च ॥२८९॥
रागादिदोषाः सर्वेऽपि, तस्याग्रे हृष्टमानसाः ।
तं लोकं वर्धितोन्मादं, नाटयन्ति वशीकृतम् ॥२९०॥
स एष श्रूयते भूप !, महाकोलाहलः सदा ।
गीततालरवोन्मिश्रः, कृतो रागादितस्करैः ॥२९१॥
माहेश्वरास्तु विज्ञेया[१], ये जीवा जैनदर्शने ।
प्रबुद्धास्ते हि तं लोकं, वारयन्ति क्षणे क्षणे ॥२९२॥
कथम् ?-जीवलोक ! न युक्तस्ते, सङ्गो रागादितस्करैः ।
सर्वस्वहारका दुष्टास्तवैते भावशत्रवः ॥२९३॥
स तु कर्ममहोन्मादविह्वलीभूतचेतनः ।
हितं तत्तादृशं वाक्यं, जीवलोकोऽवमन्यते ॥२९४॥

१. विज्ञेयास्ते पा. ।

सुन्दराः सुहृदो धन्या, ममैते हितहेतवः ।
एवं हि मन्यते मूढो, रागादीनेष भावतः ॥२९५॥
ततो माहेश्वराकारैः, स सारगुरुसन्निभः ।
तैर्ज्ञाततत्त्वैर्मूर्खत्वाद्धठरो गुरुरुच्यते ॥२९६॥
तं लोकभौतं विज्ञाय, वृतं रागादितस्करैः ।
जैनमाहेश्वरास्तस्य, त्यजन्ति शिवमन्दिरम् ॥२९७॥
यथा च याचितास्तेन, क्षुधाक्षामेण भोजनम् ।
ते तस्कराः करे दत्तं, तैस्तस्य घटकर्परम् ॥२९८॥
विलिप्तश्च मषीपुण्ड्रैर्नीतो भिक्षाऽटनेन सः ।
तदिदं जीवलोकेऽपि, समानमिति गृह्यताम् ॥२९९॥
तथाहि-भोगाकाङ्क्षाक्षुधाक्षामो, जीवलोकोऽपि वर्तते ।
रागादीनेष यत्नेन, याचते भोगभोजनम् ॥३००॥
ततस्तेऽपि भवग्रामे, भिक्षाटनविधित्सया ।
निःसारयन्ति दर्पिष्ठास्तं लोकं भौतसन्निभम् ॥३०१॥
कथम् ?-कृष्णपापमषीलेपपुण्ड्रकैर्गाढचर्चितम् ।
विशालनरकायुष्कवितीर्णघटकर्परम् ॥३०२॥
तिर्यङ्नारकमानुष्यदेवसम्बन्धिनो भवाः ।
विज्ञेयास्ते भवग्रामे, चत्वारः पाटकास्त्वया ॥३०३॥
जघन्यातिजघन्यौ द्वौ, तत्राद्यौ परिकीर्तितौ ।
उत्कृष्टो मानुषो ज्ञेयस्तथोत्कृष्टतरः परः ॥३०४॥
कर्परं च शरावं च, ताम्रं राजतमेव च ।
भाजनं लोकभौतस्य, तदायुष्कमुदाहृतम् ॥३०५॥
स एष जीवलोकस्तैर्वेष्टितो भावतस्करैः ।
पापात्मा नरकं यायादाद्यपाटकसन्निभम् ॥३०६॥
तत्रासौ याचमानोऽपि, नाश्नुते भोगभोजनम् ।
घोरैर्नरकपालैश्च, पीड्यते षिङ्गसन्निभैः ॥३०७॥
तीव्रानन्तमहादुःखसङ्घातमनुभूय च ।
आयुष्ककर्परे भग्ने, निर्गच्छेच्च ततः क्वचित् ॥३०८॥
अथ तिर्यग्भवं प्राप्य, द्वितीयमिव पाटकम् ।
ततोऽसौ पर्यटेत्तत्र, भोगभोजनलम्पटः ॥३०९॥

अथ तत्रापि नैवासौ, लभते भोगभोजनम् ।
क्षुदादिषिङ्गलोकेन, केवलं परिपीड्यते ॥३१०॥
पुनश्च तिर्यगायुष्के, क्वचिन्निष्ठां गते सति ।
तृतीयपाटकाकारं, मानुष्यकमवाप्नुते ॥३११॥
अथ तत्र भवेदस्य, पुण्यलेशः कथञ्चन ।
आन्तरैश्वर्ययुक्तत्वे, सा छाया परिकीर्तिता ॥३१२॥
ततश्च–या छायाऽस्य महाराज !,सा पुण्यलवलक्षणा ।
तया हि जीवलोकोऽत्र, लभते भोगभोजनम् ॥३१३॥
तथा मनुष्यभावेऽपि, राजदायादतस्करैः ।
रागादिभिश्च पीड्येत, धूर्तोक्तजनसन्निभैः ॥३१४॥
स ताम्रभाजनाकारे, नरायुष्केऽतिलङ्घिते ।
गच्छेद्देवभवं लोकस्तुर्यपाटकसन्निभम् ॥३१५॥
अन्तरङ्गमहारत्नच्छाया तत्र गरीयसी ।
नरेन्द्र ! जीवलोकस्य, देवलोके विभाव्यते ॥३१६॥
ततस्तत्र भवे भूरि, लभते भोगभोजनम् ।
दधानो राजताकारममरायुष्कभाजनम् ॥३१७॥
एवमेष महाराज !, लोकभौतो दिवानिशम् ।
बुभुक्षितो भवग्रामे, बम्भ्रमीति पुनः पुनः ॥३१८॥
उन्मत्तः कर्मयोगेन, पापमष्या विलेपितः ।
रागादिभिः कृतारावैर्वेष्टितो धूर्ततस्करैः ॥३१९॥
हसन् गायन् रटन्नुच्चैर्नृत्यन्नुद्दामलीलया ।
तेषु तेषु महाराज !, योनिगेहेषु हिण्डते ॥३२०॥
यथा च हृदये तुष्टः, स भौतो भिक्षया तया ।
वराको नैव जानीते, हृतं रत्नभृतं गृहम् ॥३२१॥
अभिभूतं कुटुम्बं च, सुन्दरं गाढवत्सलम् ।
न लक्षयति चात्मानं, दुःखसागरमध्यगम् ॥३२२॥
केवलं मोहदोषेण, सन्तुष्टः सुखनिर्भरः ।
वल्गमानो जने गाढं, करोत्यात्मविडम्बनम् ॥३२३॥
तथाऽयमपि राजेन्द्र !, जीवलोकः कथञ्चन ।
संसारे यदवाप्नोति, तुच्छं वैषयिकं सुखम् ॥३२४॥

तथा–इन्द्रत्वं विबुधत्वं वा, राज्यं रत्नधनादिकम् ।
पुत्रं कलत्रमन्यद्वा, लभते यदि किञ्चन ॥३२५॥
ततोऽलीकाभिमानेन, किलाहं सुखनिर्भरः ।
मीलन्निःस्पन्दमन्दाक्षो, न चेतयति किञ्चन ॥३२६॥
ततश्च–अहो सुखमहो स्वर्गो, धन्योऽहमिति भावितः ।
एवं विचेष्टते भूप !, यथाऽयं तावको जनः ॥३२७॥
अनन्तदर्शनज्ञानवीर्यानन्दादिभिः सदा ।
भावरत्नैर्भृतं त्वात्मस्वरूपं नावबुध्यते ॥३२८॥
वराको न च जानीते, यथेदं भावतस्करैः ।
हृतं रागादिभिर्मेऽत्र, स्वरूपं मन्दिरोपमम् ॥३२९॥
क्षमामार्दवसत्यादिरूपं भावकुटुम्बकम् ।
न चायं बुध्यते लोकः, सुन्दरं हितवत्सलम् ॥३३०॥
इदं च न विजानीते, चित्तापवरके यथा ।
अमीभिरेव रागाद्यैरभिभूय तिरोहितम् ॥३३१॥
ततोऽयं तादृशैश्वर्यादनन्तानन्ददायिनः ।
भ्रंशितः सुखहेतोश्च, कुटुम्बात्तैर्वियोजितः ॥३३२॥
क्षिप्तश्चात्र भवग्रामे, दुःखसङ्घातपूरिते ।
तथापि लोको रागादीन्, वयस्यानिव मन्यते ॥३३३॥
भिक्षाभूतमिदं लब्ध्वा, तथा वैषयिकं सुखम् ।
हृष्टो नृत्यति मूढात्मा, यथासौ बठरो गुरुः ॥३३४॥
तदेवमेष राजेन्द्र !, जनस्तत्त्वं न बुध्यते ।
दुःखसागरमध्यस्थः, सुखित्वं तेन मन्यते ॥३३५॥

धवलराजस्वमोक्षचिन्ता ।

धवलराजेनोक्तं–भदन्त ! यद्येवं ततः सततमुन्मत्ता वयं, विषमा रागादितस्कराः, मुषितं स्वरूपशिवायतनं, नाशितं भावकुटुम्बकं, पर्यटामो भवग्रामे, सुदुर्लभा भोगभिक्षा, तल्लवलाभेन तुष्टा वयं निमग्नाः परमार्थतो दुःखसागरे अतः कथं पुनरितोऽस्माकं मोक्षो भविष्यतीति ? बुधसूरिणोक्तं–महाराज ! भविष्यति भवतामितो भवविडम्बनान्मोक्षो यदि यादृशं तस्य बठरगुरोर्वृत्तान्तान्तरं सम्पन्नं तादृशं भवतामपि सम्पद्यते । नृपतिराह–भदन्त ! किं पुनस्तस्य सम्पन्नम् ?

बठरगुरुकथाशेषः ।

भगवतोक्तं–महाराज ! तं तथाऽनवरतं तैर्धूर्ततस्करैः खलीक्रियमाणं बठरगुरुमुपलभ्य समुत्पन्ना कस्यचिदेकस्य महामाहेश्वरस्य तस्योपरि करुणा, यदुत–कथमस्य दुःखविमोक्षो जायेत ? ततः पृष्टोऽनेनैको महावैद्यः, दत्तस्तेनोपदेशः सम्यगवधारितोऽनेन, गृहीतमुपकरणं गतो रात्रौ शिवायतनम्, इतश्च बृहतीं वेलां नाटयित्वा बठरगुरुं श्रान्ता इव प्रसुप्तास्ते तस्मिन्नवसरे धूर्ततस्कराः, ततः प्रविष्टो माहेश्वरः, प्रज्वालितोऽनेन शिवमन्दिरे प्रदीपः, ततो दृष्टोऽसौ बठरगुरुणा माहेश्वरः, तथाभव्यतया च सञ्जातखेदेन याचितोऽसौ जलपानं, माहेश्वरः प्राह–भट्टारक ! पिबेदं तत्त्वरोचकं नाम सत्तीर्थोदकं पीतमनेन, ततः प्रनष्टः क्षणादुन्मादो, निर्मलीभूता चेतना, विलोकितं शिवमन्दिरं, दृष्टास्ते धूर्ततस्कराः, किमेतदिति पृष्टो माहेश्वरः ? कथितोऽनेन शनैः शनैः सर्वोऽपि वृत्तान्तः, ततोऽभिहितं शैवेन–तर्हि किं मयाऽधुना विधेयम् ? ततः समर्पितो माहेश्वरेणास्य वज्रदण्डः, प्राह च–भट्टारक ! वैरिणस्तवैते ततो निपातय मा विलम्बिष्ठाः । ततः समुत्थाप्य चूर्णिता वज्रदण्डेन ते सर्वेऽपि तस्कराः, शैवेन प्रविघाटितश्चित्तापवरकः, प्रकटीभूतं कुटुम्बकं, आविर्भूता रत्नराशयः, प्रविलोकिता सर्वापि निजशिवमन्दिरविभूतिः, सञ्जातः प्रमोदातिरेकः, ततो बहुतस्करं परित्यज्य तं भवग्रामं स्थितस्ततो बहिर्भूते निरुपद्रवे शिवालयाभिधाने गत्वा महामठे स सारगुरुरिति । तदयमीदृशो वृत्तान्तस्तस्य सम्पन्नः । नृपतिरुवाच–भदन्त कथमेष वृत्तान्तोऽत्र जने समानः ?

कथाशेषोपनयः ।

भगवानाह–महाराजाकर्णय–महामाहेश्वरस्थानीयोऽत्र सद्धर्मप्रबोधकरो गुरुर्द्रष्टव्यो, यतः–

विडम्ब्यमानं रागादितस्करैर्दुःखपीडितम् ।
भावैश्वर्यपरिभ्रष्टं, स्वकुटुम्बवियोजितम् ॥३३६॥
लोकभौतं भवग्रामे, वीक्ष्य भिक्षाचरोपमम् ।
तन्मात्रेणैव सन्तुष्टं, कर्मोन्मादेन विह्वलम् ॥३३७॥
सद्धर्मगुरुरेवात्र, जायते करुणापरः ।
अमुष्माद्दुःखसन्तानात्कथमेष वियोक्ष्यते ? ॥३३८॥

ततो जिनमहावैद्योपदेशादवधारयति सद्धर्मगुरुस्तत्रोपायं, ततो धूर्ततस्करेष्विव सुप्तेषु रागादिषु क्षयोपशममुपगतेषु प्रज्वालयति जीवस्वरूपशिवमन्दिरे सज्ज्ञान–

प्रदीपं, पाययति सम्यग्दर्शनामलजलं, समर्पयति चारित्रवज्रदण्डं, ततोऽयं जीव–

लोकः सज्ज्ञानप्रदीपोद्द्योतितस्वरूपशिवमन्दिरे महाप्रभावसम्यग्दर्शनसलिलपान-नष्टकर्मोन्मादो, गृहीतचारित्रदण्डभासुरो गुरुवचनेनैव निर्दलयति सस्पर्धमाहूय महामोहादिधूर्ततस्करगणं, तं च निर्दलयतोऽस्य जीवलोकस्य विशालीभवति कुशलाशयः, क्षीयन्ते प्राचीनकर्माणि, न बध्यन्ते नूतनानि, विलीयते दुश्चरितानुबन्धः, समुल्लसति जीववीर्यं, निर्मलीभवत्यात्मा, परिणमति गाढमप्रमादो, निवर्तन्ते मिथ्याविकल्पाः, स्थिरीभवति समाधिरत्नं, प्रहीयते भवसन्तानः; ततः प्रविघाटयत्येष जीवलोकश्चित्तापवरकावरणकपाटं, ततः प्रादुर्भवति स्वाभाविकगुणकुटुम्बकं, विस्फुरन्ति ऋद्धिविशेषाः, विलोकयति तानेष जीवलोको विमलसंवेदनालोकेन, ततः सञ्जायते निरभिष्वङ्गानन्दसन्दोहः, समुत्पद्यते बहुदोषभवग्रामजिहासा, उपशाम्यति विषयमृगतृष्णिका, रूक्षीभवत्यन्तर्यामी[1], विचटन्ति सूक्ष्मकर्मपरमाणवः, व्यावर्तते चिन्ता, सन्तिष्ठते विशुद्धध्यानं, दृढीभवति योगरत्नं, जायते महासामायिकं, प्रवर्ततेऽपूर्वकरणं, विजृम्भते क्षपकश्रेणी, निहन्यते कर्मजालशक्तिः, विवर्तते शुक्लध्यानानलः, प्रकटीभवति योगमाहात्म्यं, विमोच्यते सर्वथा घातिकर्मपाशेभ्यः क्षेत्रज्ञः स्थाप्यते परमयोगे, देदीप्यते विमलकेवलालोकेन, कुरुते जगदनुग्रहं, विधत्ते च केवलिसमुद्घातं, समानयति कर्मशेषं, सम्पादयति योगनिरोधं, समारोहति शैलेश्यवस्थां, त्रोटयति भवोपग्राहिकर्मबन्धनं, विमुञ्चति सर्वथा देहपञ्जरं; ततो विहाय भवग्राममेष जीवलोकः सततानन्दो निराबाधो गत्वा तत्र शिवालयाभिधाने महामठे सारगुरुरिव सभावकुटुम्बकः सकलकालं तिष्ठतीति।

अनेन हेतुना महाराज ! मयोक्तं-यथा यादृशं तस्य सारगुरोर्वृत्तान्तान्तरं सम्पन्नं तादृशं यदि भवतामपि सम्पद्येत ततो भवेदितो विडम्बनान्मोक्षो, नान्यथेति।

ततः श्रुत्वा मुनेर्वाक्यमिदमत्यन्तसुन्दरम् ।
हृष्टः स धवलो राजा, ते च लोकाः प्रमोदिताः ॥३३९॥
ततश्च-विदलत्कर्मजालैस्तैः, समस्तैर्भक्तिनिर्भरैः ।
इदमुक्तमनूचानैर्ललाटे कृतकुड्मलैः ॥३४०॥
येषां नो भगवान्नाथः, सम्पन्नोऽत्यन्तवत्सलः ।
तेषां न दुर्लभो नाम, वृत्तान्तोऽयं यतीश्वर ! ॥३४१॥
अतो भगवताऽस्माकं, निर्विकल्पेन चेतसा ।
दीयतामधुनाऽऽदेशो, मादृशैः किं विधीयताम् ? ॥३४२॥

१. अन्तर्यामी-आत्मा, कर्मबन्धजनककषायस्नेहशून्यो भवतीति हृदयम्।

बुधसूरिराह–चारु चारूदितं भद्राः !, सुन्दरा भवतां मतिः ।
विज्ञातं ननु युष्माभिः, सर्वं मामकभाषितम् ॥३४३॥
बुद्धो मदीयवाक्यार्थः, सभावार्थो नरोत्तम ! ।
साम्प्रतं हि महाराज !, सफलो मे परिश्रमः ॥३४४॥
इयानेव ममादेशो, भवद्भिः क्रियतामिह ।
यन्मया विहितं भूप !, तद्भवद्भिर्विधीयताम् ॥३४५॥
नृपतिरुवाच–भदन्त ! किं भवद्भिर्विहितम् ? बुधसूरिराह–
पर्यालोच्य मयाऽसारं, संसारं चारकोपमम् ।
दीक्षा भागवती भूप !, गृहीता तन्निबर्हिणी ॥३४६॥
युष्माकमपि चेज्जातो, मदीयवचनेन भोः ! ।
अनन्तदुःखविस्तारे, निर्वेदो भवचारके ॥३४७॥
ततो गृह्णीत तां दीक्षां, संसारोच्छेदकारिणीम् ।
हे लोका ! मा विलम्बध्वं, **धर्मस्य त्वरिता गतिः** ॥३४८॥ युग्मम् ॥
नृपतिरुवाच–यदादिष्टं भदन्तेन, स्थितं तन्मम मानसे ।
किञ्चित्तु भवता तावत्कथ्यतां मे कुतुहलम् ॥३४९॥
एते प्रबोधिता नाथ !, यत्नेन भवता वयम् ।
भवांस्तु बोधितः केन !, कथं वा कुत्र वा पुरे ? ॥३५०॥
किं वा जातः स्वयम्बुद्धो ?, भदन्त ! परमेश्वरः ।
सर्वं निवेद्यतां नाथ !, ममेदं हितकाम्यया ॥३५१॥ युग्मम् ॥
सूरिराह महाराज !, **साधूनामात्मवर्णनम्** ।
नैवेह युज्यते कर्तुं, तद्धि लाघवकारणम् ॥३५२॥
ममात्मचरिते तच्च, कथ्यमाने परिस्फुटम् ।
यतः सम्पद्यते तस्मान्न युक्तं तस्य कीर्तनम् ॥३५३॥
ततो धवलराजेन, प्रणम्य चरणद्वयम् ।
स पृष्टः कौतुकावेशान्निर्बन्धेन पुनः पुनः ॥३५४॥
अथ विज्ञाय निर्बन्धं, तादृशं तस्य भूपतेः ।
कुतूहलं जनानां च, ततः सूरिरभाषत ॥३५५॥
यद्यस्ति ते महाराज !, महदत्र कुतूहलम् ।
ततो निवेद्यते तुभ्यं, समाकर्णय साम्प्रतम् ॥३५६॥

बुधसूरिचरितम् ।

अस्ति लोके सुविख्यातं, विस्तीर्णमतिसुन्दरम् ।
अनेकाद्भुतवृत्तान्तं, पुरं नाम धरातलम् ॥३५७॥
तत्र प्रसिद्धमाहात्म्यो, जगदाह्लादकारकः ।
राजा शुभविपाकोऽस्ति, प्रतापाक्रान्तभूतलः ॥३५८॥
तस्यातिवल्लभा साध्वी, समस्ताङ्गमनोहरा ।
विद्यते विदिता लोके, सुन्दरी निजसाधुता ॥३५९॥
अन्यदा कालपर्यायादासाद्य निजसाधुताम् ।
समुत्पन्नो बुधो नाम, तत्सुतो लोकविश्रुतः ॥३६०॥
आकरो गुणरत्नानां, कलाकौशलमन्दिरम् ।
स वर्धमानः सञ्जातो, रूपेण मकरध्वजः ॥३६१॥
भ्राता शुभविपाकस्य, जगत्तापकरः परः ।
तथाऽशुभविपाकोऽस्ति, भीषणो जनमेजयः ॥३६२॥
तस्य विख्यातमाहात्म्या, लोकसन्तापकारिणी ।
देवी परिणतिर्नाम, विद्यते भीमविग्रहा ॥३६३॥
अथ ताभ्यां समुत्पन्नो, दारुणाकारधारकः ।
विषाङ्कुरोपमः क्रूरो, मन्दो नाम सुताधमः ॥३६४॥
आवासो दोषकोटीनां, गुणगन्धविवर्जितः ।
सम्पन्नो वर्धमानोऽसौ, तथापि मदविह्वलः ॥३६५॥
पितृव्यपुत्रभावेन, तयोश्च बुधमन्दयोः ।
यदृच्छया वा सम्पन्ना, भ्रात्रोर्मैत्री मनोहरा ॥३६६॥
सहितावेव तौ नित्यं, नगरे काननेषु च ।
ततो विचरतः स्वेच्छाक्रीडारसपरायणौ ॥३६७॥
अथास्ति धिषणा नाम, पुरे विमलमानसे ।
शुभाभिप्रायराजस्य, दुहिता चारुदर्शना ॥३६८॥
सा तेन यौवनस्थेन, बुधेन वरलोचना ।
गृहे स्वयंवरायाता, परिणीता कृतोत्सवा ॥३६९॥
तस्याश्च कालपर्यायात्, निःशेषगुणमन्दिरम् ।
मनोरथशतैर्जातो, विचारो नाम पुत्रकः ॥३७०॥

अथान्यदा निजे क्षेत्रे, क्रीडतोर्बुधमन्दयोः ।
यस्तदानीं समापन्नो, वृत्तान्तस्तं निबोधत ॥३७१॥
तस्य क्षेत्रस्य पर्यन्ते, दृष्टस्ताभ्यां मनोरमः ।
ललाटपट्टसन्नामा, विशालो वरपर्वतः ॥३७२॥
तस्योपरिष्टादुत्तुङ्गे, शिखरे सुमनोहरा ।
निलीनालिकुलच्छाया, कबर्याख्या वनावली ॥३७३॥
ललाटपट्टनामानं, पर्वतं तं निरीक्षितुम् ।
अथ तौ लीलया तत्र, प्रदेशे समुपागतौ ॥३७४॥
यावद्दृष्टा सुदीर्घाभिः, शिलाभिः परिनिर्मिता ।
तस्याधस्ताद्गता दूरं, नासिकाख्या महागुहा ॥३७५॥
अथ तां तादृशीं वीक्ष्य, रमणीयां महागुहाम् ।
तन्निरूपणलाम्पट्यं, सञ्जातं बुधमन्दयोः ॥३७६॥
अथाग्रे संस्थितौ तस्यास्तन्निरीक्षणलालसौ ।
यावद्दृष्टं सुगम्भीरं, तत्रापवरकद्वयम् ॥३७७॥
तथा–युक्तं तदन्धकारेण, लोचनप्रसरातिगम् ।
अदृश्यमानपर्यन्तं, द्वाराभ्यामुपलक्षितम् ॥३७८॥
ततो मन्दो बुधं प्राह, पश्याऽपवरकद्वयम् ।
अनेनैव विभक्तेयं, नासिकाख्या महागुहा ॥३७९॥
तदाकर्ण्य बुधेनोक्तं, भ्रातः ! सम्यग्विनिश्चितम् ।
एषा शिलाऽनयोर्मध्ये, विभागार्थं विनिर्मिता ॥३८०॥
एवं च जल्पतोर्वत्स, तदानीं बुधमन्दयोः ।
गुहातो निर्गता काचिद्दारिका चटुलाकृतिः ॥३८१॥
प्रणम्य पादयोस्तूर्णं, तयोः सा राजपुत्रयोः ।
पुरतो दर्शितप्रीतिस्ततश्चेत्थमभाषत ॥३८२॥

नासिकाघ्राणसङ्गमः ।

स्वागतं भवतोरत्र, विहितो मदनुग्रहः ।
प्रतिजागरणं मेऽद्य, युवाभ्यां यदनुष्ठितम् ॥३८३॥
ततो मन्दो लसत्तोषो, दृष्ट्वा वचनपाटवम् ।
तां दारिकां मृदूल्लापैः, सस्नेहं समभाषत ॥३८४॥

कथम् ?-निवेदयावयोर्बाले !, काऽसि त्वं वरलोचने ? ।
किमर्थं वा वसस्यत्र, गुहाकोटरचारिणी ? ॥३८५॥
एतच्च वचनं श्रुत्वा, सा शोकभरपीडिता ।
मूर्च्छया पतिता बाला, भूतले नष्टचेतना ॥३८६॥
ततो वायुप्रदानाद्यैर्मन्देनाश्वासिता पुनः ।
स्थूलमुक्ताफलानीव, साऽश्रुबिन्दूनमुञ्चत ॥३८७॥
भद्रे ! किमेतदित्येवं, पृच्छतश्च पुनः पुनः ।
मन्दस्य साऽब्रवीदेवं, स्नेहगद्गदया गिरा ॥३८८॥
नाथ ! मे मन्दभाग्यायाः, किं स्तोकं शोककारणम् ? ।
युवयोर्विस्मृताऽस्मीति, याऽहं स्वस्वामिनोरपि ॥३८९॥
अहं भुजङ्गता नाम, भवतोः परिचारिका ।
युवाभ्यामेव देवाभ्यां, गुहायां विनियोजिता ॥३९०॥
अस्यां हि भवतोरस्ति, घ्राणनामा वयस्यकः ।
तिष्ठामि युष्मदादेशात्तस्याहं परिचारिका ॥३९१॥
चिरकालप्ररूढं हि, युवयोस्तेन सङ्गतम् ।
यथा चेदं तथा नाथ !, समाकर्णय साम्प्रतम् ॥३९२॥
पुरेऽसंव्यवहाराख्ये, पुराऽभूद्भवतोः स्थितिः ।
ततः प्रचलितौ कर्मपरिणामस्य शासनात् ॥३९३॥
गतावेकाक्षसंस्थाने, विकलाक्षे पुनस्ततः ।
भूरिलोकाकुलं तत्र, विद्यते पाटकत्रयम् ॥३९४॥
द्वितीये पाटके सन्ति, बहवः कुलपुत्रकाः ।
तत्र त्रिकरणे नाम, तन्मध्ये संस्थितौ युवाम् ॥३९५॥
स कर्मपरिणामाख्यो, नरेन्द्रस्तत्र तिष्ठतोः ।
प्रसन्नो युवयोस्तेन, दत्तेयं वां महागुहा ॥३९६॥
अयं च घ्राणसञ्ज्ञोऽत्र, वयस्यो हितकारकः ।
युवयोर्विहितस्तेन, गुहायाः परिपालकः ॥३९७॥
सुखसागरहेतुश्च, युवयोरेष वत्सलः ।
वयस्योऽचिन्त्यमाहात्म्यस्ततः प्रभृति वर्तते ॥३९८॥
किं तु-राजादेशवशादेष, न गुहाया विनिर्गतः ।
तत्रैव वर्तमानोऽयं, युवाभ्यां लालितः पुरा ॥३९९॥

तथाविधेषु स्थानेषु, यत्र यत्र गतौ युवाम् ।
लालितस्तत्र तत्रायं, गन्धैर्नानाविधैः पुरा ॥४००॥
पुरीं मनुजगत्याख्यामन्यदा क्वचिदागतौ ।
तस्यां पुनर्विशेषेण, युवाभ्यामेष लालितः ॥४०१॥
अहं च विहिता स्नेहादस्यैव परिचारिका ।
युवाभ्यामेव मित्रस्य, मन्दभाग्या भुजङ्गता ॥४०२॥
तदेवं चिरमूढैषा, घ्राणेन सह मैत्रिका ।
युवयोरनुचरी लोके, प्रसिद्धाऽहं भुजङ्गता ॥४०३॥
तथापि देवौ यद्येवं, कुर्वाते गजमीलिकाम् ।
अतः परतरं नाथ !, किं शोकभरकारणम् ॥४०४॥
तस्माच्चिरन्तनस्थित्या, दृश्यतां किङ्करो जनः ।
युवाभ्यां नाथ ! निर्मिथ्यं, पाल्यतामेष बान्धवः ॥४०५॥
एवं वदन्ती साऽलीकस्नेहदर्शितसम्भ्रमा ।
पादेषु पतिता गाढं, बालिका बुधमन्दयोः ॥४०६॥

बुधकृता भुजङ्गतोपेक्षा ।

बुधेन चिन्तितं हन्त, दारिका नैव सुन्दरा ।
इयं हि धूर्ततासारा, कारणैः प्रविभाव्यते ॥४०७॥
यतः- **कपोलसूचितं हास्यं, सलज्जं मृदुभाषितम् ।**
भवतीह कुलस्त्रीणां, निर्विकारं निरीक्षितम् ॥४०८॥
एषा तु बृहदाटोपा, विलासोल्लासिलोचना ।
वागाडम्बरसारा च, ततो दुष्टा न संशयः ॥४०९॥
ततोऽवधार्य चित्तेन, बुधेनेत्थं महात्मना ।
कृताऽवधीरणा तस्याः, किञ्चिन्नो दत्तमुत्तरम् ॥४१०॥

मन्देन घ्राणभुजङ्गतालालनम् ।

मन्दस्तु पादपतितां, समुत्थाप्य भुजङ्गताम् ।
सञ्जातनिर्भरस्नेहस्ततश्चेदमवोचत ॥४११॥
विषादं मुञ्च चार्वङ्गि !, धीरा भव वरानने ! ।
एवं हि गदितुं बाले !, युक्तं ते चारुलोचने ! ॥४१२॥
वृत्तान्तो विस्मृतोऽप्येष, तथा सम्पादितस्त्वया ।
अनेन स्नेहसारेण, सोऽपि प्रत्यक्षतां गतः ॥४१३॥

तदत्र भवती तावन्निवेदयतु मेऽधुना ।
यदेष कुरुते भद्रे !, स्नेहक्रीतो जनस्तव ॥४१४॥
तयोक्तमियदेवात्र, कर्तव्यं नाथ ! साम्प्रतम् ।
अयं चिरन्तनस्थित्या, लालनीयो वयस्यकः ॥४१५॥
मन्दः प्राह यथा कार्यं, लालनं कमलानने ! ।
मयाऽस्य वरमित्रस्य, तत्सर्वं मे निवेदय ॥४१६॥
भुजङ्गताऽऽह सद्गन्धलुब्धबुद्धिरयं सदा ।
अतः सुगन्धिभिर्द्रव्यैः, क्रियतामस्य लालनम् ॥४१७॥
चन्दनागरुकर्पूरकुरङ्गमदमिश्रितम् ।
कुङ्कुमक्षोदगन्धाढ्यं, रोचतेऽस्मै विलेपनम् ॥४१८॥
एलालवङ्गकर्पूरसज्जातिफलसुन्दरम् ।
तथा सुगन्धि ताम्बूलं, स्वदतेऽस्मै मनोरमम् ॥४१९॥
सधूपा विविधा गन्धा, [१]वर्तिकाः पुष्पजातयः ।
यत्किञ्चित्सौरभोपेतं, तदेवास्यातिवल्लभम् ॥४२०॥
दुर्गन्धिवस्तुनामापि, नैवास्य प्रतिभासते ।
तस्मात्सुदूरतस्त्याज्यं, तदस्य सुखमिच्छता ॥४२१॥
तदेवं क्रियतां तावल्लालनं मित्रपालनम् ।
एतद्धि भवतोर्दुःखवारणं सुखकारणम् ॥४२२॥
यदेवं लालितेनेह, घ्राणेन भवतोः सुखम् ।
सम्भविष्यति तद्देव !, को हि वर्णयितुं क्षमः ? ॥४२३॥
मन्देनोक्तं विशालाक्षि !, सुन्दरं गदितं त्वया ।
सर्वं विधीयते सुभ्रु !, तिष्ठ भद्रे ! निराकुला ॥४२४॥
एवं च वदतो मन्दस्य-पादयोः पतिता भूयो, हर्षविस्फारितेक्षणा ।
महाप्रसाद इत्येवं, वदन्ती सा भुजङ्गता ॥४२५॥

बुधस्य विवेकः ।

बुधस्तु मौनमालम्ब्य, शून्यारण्ये मुनिर्यथा ।
अवस्थितो यतस्तेन, शठोऽयं लक्षितस्तथा ॥४२६॥
ततो न किञ्चिदुक्तोऽसौ [२]काकली विहिता परम् ।
बुधेन तु तदालोक्य, चित्तेनेदं विवेचितम् ॥४२७॥

---

१. 'अगरबत्ती' ति भाषायाम् । २. मन्दध्वनिः ।

अये !-क्षेत्रं मदीयं शैलश्च, मामिकेयं महागुहा ।
अतोऽस्यां यः स्थितो घ्राणः, स मे पाल्यो न संशयः ॥४२८॥
केवलं यदियं वक्ति, दारिका शाठ्यसारिका[१] ।
तन्मया नास्य कर्तव्यं, लालनं सुखकाम्यया ॥४२९॥
किं तु ?-यावत् क्षेत्रं न मुञ्चामि, तावदस्यापि पालनम् ।
कार्यं विशुद्धमार्गेण, लोकयात्रानुरोधतः ॥४३०॥
एवं निश्चित्य चित्तेन, बुधस्तं पालयन्नपि ।
घ्राणं न युज्यते दोषैर्लभते सुखमुत्तमम् ॥४३१॥
मन्दस्तु तां पुरस्कृत्य, शठचित्तां भुजङ्गताम् ।
घ्राणलालनलाम्पट्याल्लभते दुःखसागरम् ॥४३२॥
कथं-सुगन्धिद्रव्यसम्भारकरणोद्यतमानसः ।
तन्तम्यते वृथा मूढस्तन्निमित्तं दिवानिशम् ॥४३३॥
दुर्गन्धपरिहारं च, कुर्वाणः खिद्यते मुधा ।
शमसौख्यं न जानीते, हस्यते च विवेकिभिः ॥४३४॥
तथापि मोहदोषेण, सुखसन्दर्भनिर्भरम् ।
आत्मानं मन्यते मन्दः, प्रसक्तो घ्राणलालने ॥४३५॥

विचारेण घ्राणवृत्तोदितिः ।

इतश्च यौवनारूढो, विचारो राजदारकः ।
कथञ्चिल्लीलया गेहाद्देशकालिकयोगतः ॥४३६॥
बहिरङ्गान्तरङ्गेषु, स देशेषु पुनः पुनः ।
पर्यट्य क्वचिदायातः, स्वगेहे राजदारकः ॥४३७॥
अथ तत्र समायाते, प्रहृष्टौ धिषणाबुधौ ।
सञ्जातो बृहदानन्दः, सन्तुष्टं राजमन्दिरम् ॥४३८॥
ततश्च-वृत्ते महाविमर्देन, समागममहोत्सवे ।
सा ज्ञाता मैत्रिका तेन, घ्राणेन बुधमन्दयोः ॥४३९॥
ततो रहसि संस्थाप्य, तमात्मपितरं बुधम् ।
स विचारः प्रणम्येत्थं, प्रोवाच कृतकुड्मलः ॥४४०॥
तात यो युवयोर्जातो, घ्राणनामा वयस्यकः ।
सोऽयं न सुन्दरो दुष्टस्तत्राकर्णय कारणम् ॥४४१॥

१. कपटचतुरा ।

अस्ति तावदहं तात !, देशदर्शनकाम्यया ।
अपृष्ट्वा तातमम्बां च, निर्गतो भवनात्तदा ॥४४२॥
ततोऽनेकपुरग्रामखेटाकरमनोहरा ।
विलोकिता मया तात !, भ्रान्त्वा भ्रान्त्वा वसुन्धरा ॥४४३॥
अन्यदा भवचक्रेऽहं, सम्प्राप्तो नगरे पुरे ।
राजमार्गे मया दृष्टा, तत्रैका वरसुन्दरी ॥४४४॥
सा मां वीक्ष्य विशालाक्षी, परितोषमुपागता ।
रसान्तरं भजन्तीव, कीदृशी प्रविलोकिता ? ॥४४५॥
सिक्तेवामृतसेकेन, कल्पपादपमञ्जरी ।
हृष्टा नीरदनादेन, नृत्यन्तीव मयूरिका ॥४४६॥
प्रगे सहचरस्येव, मिलिता चक्रवाकिका ।
अम्भोदबन्धनेनेव, विमुक्ता चन्द्रलेखिका ॥४४७॥
राज्ये कृताभिषेकेव, क्षिप्तेव सुखसागरे ।
मया सा लक्षिता साध्वी, प्रीतिविस्फारितेक्षणा ॥४४८॥ त्रिभिर्विशेषकम् ॥
ततस्तां वीक्ष्य सम्पन्नो, ममापि प्रमदस्तदा ।
चित्तं ह्यार्द्रीभवेद्दृष्टे, सज्जने स्नेहनिर्भरे ॥४४९॥
ततः कृतप्रणामोऽहं, प्रोक्तो दत्ताशिषा तया ।
ब्रूहि वत्स ! कुतस्त्योऽसि ?, त्वं मे हृदयनन्दन ! ॥४५०॥

मार्गानुसारितासङ्गमः ।

मयोक्तमम्ब ! जातोऽहं, धिषणाया धरातले ।
पुत्रोऽहं बुधराजस्य, देशकालिकयोगतः ॥४५१॥
एतच्चाकर्ण्य सा नारी, विलसन्नयनोदका ।
स्नेहेन मां परिष्वज्य, चुम्बित्वा मस्तके मुहुः ॥४५२॥
ततः प्राह महाभाग !, चारु चारु कृतं त्वया ।
त्वमादावत्र मे वत्स !, विदितश्चित्तलोचनैः ॥४५३॥
जातिस्मरे जनस्यैते, लोचने हृदयं च भोः ।
यतोऽमूनि विजानन्ति, दृष्टमात्रं प्रियाप्रियम् ॥४५४॥
वत्स ! त्वं नैव जानीषे, मां प्रायेण विशेषतः ।
लघिष्ठोऽसि मया वत्स !, वियुक्तो बालकस्तदा ॥४५५॥

अहं हि मातुस्ते वत्स !, धिषणाया वयस्यिका ।
वल्लभा बुधराजस्य, नाम्ना मार्गानुसारिता ॥४५६॥
शरीरं जीवितं प्राणाः, सर्वस्वं मम साऽनघा ।
तव माता महाभाग !, पिता ते जीविताधिकः ॥४५७॥
तयोरेव समादेशादहं लोकविलोकनम् ।
कर्तुं विनिर्गता वत्स !, जातमात्रे पुरा त्वयि ॥४५८॥
अतो मे भागिनेयस्त्वं, पुत्रस्त्वं जीवितं तथा ।
सर्वस्वं परमात्मा च, सर्वं भवसि सुन्दर ! ॥४५९॥
सुन्दरं च कृतं वत्स !, देशदर्शनकाम्यया ।
यदेवं निर्गतो गेहाज्जिगीषुस्त्वं न संशयः ॥४६०॥
तथाहि-यो न निर्गत्य निःशेषां, विलोकयति मेदिनीम् ।
अनेकाद्भुतवृत्तान्तां, स नरः कूपदर्दुरः ॥४६१॥
यतः-क्व विलासाः क्व पाण्डित्यं, क्व बुद्धिः क्व विदग्धता ।
क्व देशभाषाविज्ञानं, क्व चैषाऽऽचारचारुता ? ॥४६२॥
यावद्धूर्तशताकीर्णा, नानावृत्तान्तसङ्कुला ।
नानेकशः परिभ्रान्ता, पुरुषेण वसुन्धरा ॥४६३॥ युग्मम् ॥
तथेदं सुन्दरतरं, वत्सेन विहितं हितम् ।
भवचक्रे यदायातस्त्वमत्र नगरे परे ॥४६४॥
इदं हि नगरं वत्स !, भूरिवृत्तान्तमन्दिरम् ।
अनेकाद्भुतभूयिष्ठं, विदग्धजनसङ्कुलम् ॥४६५॥
विलोकयति यः सम्यगेतद्धि नगरं जनः ।
तेन सर्वमिदं दृष्टं, भुवनं सचराचरम् ॥४६६॥
अथवा किमनेन बहुना ?-
धन्याऽस्मि कृतकृत्याऽस्मि, यस्या मे दृष्टिगोचरम् ।
स्वत एवागतोऽसि त्वं, वत्स ! सद्रत्नपुञ्जकः ॥४६७॥
मयोक्तमम्ब ! यद्येवं, ततो मे चारु वेधसा ।
इदं सम्पादितं हन्त, मीलितोऽहं यदम्बया ॥४६८॥
अधुना दर्शयत्वम्बा, प्रसादेन विशेषतः ।
ममेदं बत निःशेषं, भवचक्रं महापुरम् ॥४६९॥

ततः सा बाढमित्युक्त्वा, तात ! मार्गानुसारिता ।
समस्तं भवचक्रं मे, सवृत्तान्तमदर्शयत् ॥४७०॥

सात्त्विकमानसनगरादिदर्शनम् ।

अथैकत्र मया दृष्टं, पुरं तत्र महागिरिः ।
तच्छिखरे रमणीयं च, निविष्टमपरं पुरम् ॥४७१॥

ततो मयोक्तं–

निवेदयाम्ब ! किंनाम, पुरमेतदवान्तरम् ।
किंनामायं गिरिः किं च, शिखरे दृश्यते पुरम् ? ॥४७२॥
मार्गानुसारिता प्राह, वत्स ! नो लक्षितं त्वया ? ।
सुप्रसिद्धमिदं लोके, पुरं सात्त्विकमानसम् ॥४७३॥
एषोऽपि सुप्रसिद्धोऽत्र, विवेकवरपर्वतः ।
प्ररूढमप्रमत्तत्वमिदं च शिखरं जने ॥४७४॥
इदं तु भुवनख्यातं, वत्स ! जैनं महापुरम् ।
तव विज्ञातसारस्य, कथं प्रष्टव्यतां गतम् ? ॥४७५॥
यावत्सा कथयत्येवं, मम मार्गानुसारिता ।
तावज्जातोऽपरस्तत्र, वृत्तान्तस्तं निबोध मे ॥४७६॥
गाढं प्रहारनिर्भिन्नो, नीयमानः सुविह्वलः ।
पुरुषैर्वेष्टितो दृष्टो, मयैको राजदारकः ॥४७७॥

ततो मयोक्तं–

क एष दारको मातः !, किं वा गाढप्रहारितः ।
कुत्र वा नीयते लग्नाः, के वाऽमी परिचारकाः ? ॥४७८॥

संयमपराभवः ।

मार्गानुसारिता प्राह, विद्यतेऽत्र महागिरौ ! ।
राजा चारित्रधर्माख्यो, यतिधर्मस्तु तत्सुतः ॥४७९॥
तस्यायं संयमो नाम, पुरुषः ख्यातपौरुषः ।
एकाकी च क्वचिद्दृष्टो, महामोहादिशत्रुभिः ॥४८०॥
ततो बहुत्वाच्छत्रूणां, प्रहारैर्जर्जरीकृतः ।
अयं निर्वाहितो वत्स !, रणभूमेः पदातिभिः ॥४८१॥
अमी पदातयो वत्स !, नेष्यन्तीमं स्वमन्दिरे ।
अस्य यत्र पुरे जैने, सर्वे तिष्ठन्ति बान्धवाः ॥४८२॥

मयोक्तं—

अम्बिके ! दृष्टेमं यत्करिष्यन्ति, शत्रुभिः परिपीडितम् ।
चारित्रधर्मराजाद्या, बृहन्मे तत्र कौतुकम् ॥४८३॥
अतो महाप्रसादेन, नीत्वा मां गिरिमस्तके ।
अधुना दर्शयत्वम्बा, स्वामिनोऽस्य विचेष्टितम् ॥४८४॥

मार्गानुसारितयोक्तं–वत्सैवं क्रियते,

ततस्तदनुमार्गेण, विवेकगिरिमस्तके ।
आरूढा सा मया सार्धं, तत्र मार्गानुसारिता ॥४८५॥
अथ तत्र पुरे जैने, राजमण्डलमध्यगः ।
दृष्टश्चित्तसमाधाने, मण्डपे स महानृपः ॥४८६॥
नामतो गुणतः सर्वे, वर्णिताश्च पृथक् पृथक् ।
ममाग्रे ते महीपालास्तया विज्ञाततत्त्वया ॥४८७॥
इतश्च तैर्नरैस्तूर्णं, समानीतः स संयमः ।
दर्शितश्च नरेन्द्रस्य, वृत्तान्तश्च निवेदितः ॥४८८॥

चारित्रधर्मराजसभायां सम्भ्रमः ।

ततस्तं तादृशं ज्ञात्वा, शत्रुजन्यं पराभवम् ।
तत्रास्थाने समस्तास्ते, सुभटाः क्षोभमागताः ॥४८९॥
ततश्च–भीमध्वानैः कराघातप्रकम्पितमहीतलैः ।
तैर्जातं तत्सदः क्षोभविभ्रान्तोदधिसन्निभम् ॥४९०॥
केचिन्मुञ्चन्ति हुङ्कारं, कुपितान्तकसन्निभाः ।
भुजमास्फालयन्त्यन्ये, पुलकोद्भेदसुन्दराः ॥४९१॥
रोषरक्ताननाः केचिज्जाता भृकुटिभीषणाः ।
अन्ये तूत्तानितोरस्काः, खड्गे विन्यस्तदृष्टयः ॥४९२॥
क्रोधान्धबुद्धयः केचित्सम्पन्ना रक्तलोचनाः ।
अन्ये स्फुटाट्टहासेन, गर्जिताखिलभूधराः ॥४९३॥
अन्येऽन्तस्तापसंरम्भाद्विगलत्स्वेदबिन्दवः ।
केचिद्रक्ताङ्गभीमाभाः, साक्षादिव कृशानवः ॥४९४॥
अतस्तं तादृशं वीक्ष्य, क्षुभितं राजमण्डलम् ।
चारित्रधर्मराजेन्द्रं, सद्बोधः प्रत्यभाषत ॥४९५॥

देव ! नैष सतां युक्तो, धीराणां कातरोचितः ।
अकालनीरदारावसन्निभः क्षोभविभ्रमः ॥४९६॥
तस्मादेते निवार्यन्तामलमुत्तालमानसाः ।
राजानः क्रियतामेषामभिप्रायपरीक्षणम् ॥४९७॥
ततो निवारणाकूतलीलया प्रविलोकिताः ।
चारित्रधर्मराजेन, क्षणं मौनेन ते स्थिताः ॥४९८॥
उक्ताश्च ते तेन नराधिपेन-
यथा भो भो महीपाला !, ब्रूत यद्वो विवक्षितम् ।
एवं व्यवस्थिते कार्ये, किमत्र क्रियतामिति ? ॥४९९॥
एतच्चाकर्ण्य-सत्यशौचतपस्त्यागब्रह्माद्यास्ते नराधिपाः ।
प्रवृद्धरभसोत्साहा, योद्धुकामाः प्रभाषिताः ॥५००॥
इत्थं महापराधे तैः, संयमस्य कदर्थने ।
प्रसह्य विहिते देव !, किमद्यापि विलम्ब्यते ? ॥५०१॥
येऽपराधक्षमाऽपथ्यसेवया वृद्धिमागताः ।
तेषामुच्छेदनं देव !, केवलं परमौषधम् ॥५०२॥
अन्यच्चेह कुतस्तावत्सुखगन्धोऽपि मादृशाम् ? ।
न यावत्ते हताः पापा, महामोहादिशत्रवः ॥५०३॥
यावच्च देवपादानां, नेच्छा तत्र प्रवर्तते ।
नैव सम्पद्यते तावद्, घातस्तेषां दुरात्मनाम् ॥५०४॥ युग्मम् ॥
यतः-एकैकोऽपि भटो नाथ !,तावकीनो महाहवे ।
सर्वान्निर्दलयत्येव, कुरङ्गानिव केसरी ॥५०५॥
क्षणेन प्लावयन्तीमे, क्षुभिताम्भोधिविभ्रमाः ।
रिपुसैन्यं न चेदेषां, स्यात्तवाज्ञा विधारिका ॥५०६॥
एवं च ते महीपालाः, शौण्डीरा रणशालिनः ।
सर्वेऽपि स्वामिनोऽध्यक्षमेकवाक्यतया स्थिताः ॥५०७॥
रणकण्डूपरीताङ्गांस्तानेवं वीक्ष्य भूभुजः ।
दुर्दान्तमत्तमातङ्गनिर्दारिहरिसन्निभान् ॥५०८॥
स राजा मन्त्रिणा सार्धं, सद्बोधेन सभान्तरे ।
प्रविष्टो गुह्यमन्त्रार्थमाहूय च महत्तमम् ॥५०९॥

अथ तत्रापि सा तात !,साध्वी मार्गानुसारिता ।
अन्तर्धानं विधायोच्चैः, प्रविष्टा सहिता मया ॥५१०॥

सम्यग्दर्शनोक्तिः ।

ततस्तत्रोचितं राज्ञा, पृष्टौ मन्त्रिमहत्तमौ ।
स सम्यग्दर्शनस्तावद्राजानं प्रत्यभाषत ॥५११॥
देव ! यत्सुभटैः प्रोक्तं, सत्याद्यैः सत्यविक्रमैः ।
तदेव प्राप्तकालं ते, कर्तुं को ह्यत्र संशयः ? ॥५१२॥

यतः-

वध्यानां दुष्टचित्तानामपकारं सुदुःसहम् ।
शत्रूणामीदृशं प्राप्य, मानी कः स्थातुमिच्छति ? ॥५१३॥
वरं मृतो वरं दग्धो, मा सम्भूतो वरं नरः ।
वरं गर्भे विलीनोऽसौ, योऽरिभिः परिभूयते ॥५१४॥
स धूलिः स तृणं लोके, स भस्म स न किञ्चन ।
योऽरिभिर्मृद्यमानोऽपि, स्वस्थचित्तोऽवतिष्ठते ॥५१५॥

यस्यैकोऽपि भवेद्राज्ञः, शत्रुः सोऽपि जिगीषति ।
तत्ते न युज्यते स्थातुमनन्ता यस्य शत्रवः ॥५१६॥
अतो निर्भिद्य निःशेषं, शत्रुवर्गं नराधिप ! ।
निष्कण्टकां महीं कृत्वा, ततो भव निराकुलः ॥५१७॥
तदेवमुद्धतं वाक्यमभिधाय महत्तमः ।
मौनेनावस्थितः सद्यः, कृत्वा कार्यविनिर्णयम् ॥५१८॥

सद्बोधोक्तिः ।

अथाभिधातुं यत्कृत्यं, लीलामन्थरया दृशा ।
चारित्रधर्मराजेन, सद्बोधः प्रविलोकितः ॥५१९॥
ततो निर्णीय गर्भार्थं, कार्यतत्त्वस्य कोविदः ।
सद्बोधः सचिवः सारं, वाक्यमित्थमभाषत ॥५२०॥
साधु साधूदितं देव !, विदुषा तेन ते पुरः ।
सम्प्रत्यसाम्प्रतं वक्तुं, मादृशामत्र वस्तुनि ॥५२१॥
तथापि ते महाराज !,यन्ममोपरि गौरवम् ।

तदेव लम्भितोत्साहं,वाचालयति मादृशम् ॥५२२॥

ततः सम्यग्दर्शनं प्रत्याह-

अहो तेजःप्रधानत्वमहो वाचि प्रगल्भता ।
अहो ते स्वामिभक्तत्वं, चारु चारु महत्तम ! ॥५२३॥
सत्यं मानवतां धीर !, दुःसहोऽरिपराभवः ।
सत्यं पराभिभूतस्य, लोके निःसारता परा ॥५२४॥
सत्यं दुष्टाः शठा वध्या, महामोहादिशत्रवः ।
सत्यं तद्घातुकाः सर्वे, देवपादानुजीविनः ॥५२५॥
किं च-तिष्ठन्तु पुरुषास्तावद्देवशासनवर्तिनः ।
नार्योऽपि देवसैन्यस्य, तेषां निर्घातने क्षमाः ॥५२६॥

किन्तु-

प्रस्तावरहितं कार्यं, नारभेत विचक्षणः ।
नीतिपौरुषयोर्यस्मात्प्रस्तावः कार्यसाधकः ॥५२७॥
अथवा देवपादानां, भवतश्च पुरो मया ।
नीतिशास्त्रं यदुच्येत, हन्त तत्पिष्टपेषणम् ॥५२८॥

नीतिशास्त्रप्रकाशनम् ।

तथाहि-षड् गुणाः पञ्च चाङ्गानि, शक्तित्रितयमुत्तमम् ।
सोदयाः सिद्धयस्तिस्रस्तथा नीतिचतुष्टयम् ॥५२९॥
चतस्रो राजविद्याश्च, यच्चान्यदपि तादृशम् ।
प्रतीतं युवयोः सर्वं, तद्धि किं तस्य वर्ण्यते ? ॥५३०॥ यतः-
स्थानं यानं तथा सन्धिर्विग्रहश्च परैः सह ।
संश्रयो द्वैधभावश्च, षड् गुणाः परिकीर्तिताः ॥५३१॥
तथा-उपायः कर्मसंरम्भे, विभागो देशकालयोः ।
पुरुषद्रव्यसम्पच्च, प्रतिकारस्तथापदाम् ॥५३२॥
पञ्चमी कार्यसिद्धिश्च, पर्यालोच्यमिदं किल ।
अङ्गानां पञ्चकं राज्ञा, मन्त्रमार्गे विजानता ॥५३३॥
तथा-उत्साहशक्तिः प्रथमा, प्रभुशक्तिर्द्वितीयिका ।
तृतीया मन्त्रशक्तिश्च, शक्तित्रयमिदं परम् ॥५३४॥
शक्तित्रितयसम्पाद्यास्त्रय एवोदयास्तथा ।

हिरण्यमित्रभूमीनां, लाभाः सिद्धित्रयं विदुः ॥५३५॥ तथा-

सामभेदोपदानानि, दण्डश्चेति चतुष्टयम् ।
नीतीनां सर्वकार्येषु, पर्यालोच्यं विजानता ॥५३६॥ तथा-
आन्वीक्षिकी[1] त्रयी[2] वार्ता, दण्डनीतिस्तथा परा ।
विद्याश्चतस्रो भूपानां, किलैताः सन्ति गोचरे ॥५३७॥
तदेतद्देवपादानां, भवतश्च विशेषतः ।
प्रतीतमेव निःशेषं, वर्ण्यतां किम् ? महत्तम ! ॥५३८॥
केवलं ज्ञातशास्त्रोऽपि, स्वावस्थां यो न बुध्यते ।
तस्याकिञ्चित्करं ज्ञानमन्धस्येव सुदर्पणः ॥५३९॥
प्रवर्तेताविवेकेन, यो ह्यसाध्येऽपि वस्तुनि ।
लोके स जायते हास्यः, समूलश्च विनश्यति ॥५४०॥
ततश्च-इदं मूलविनष्टं हि, तात ! सर्वं प्रयोजनम् ।
अतोऽद्य तावकोत्साहः, कुत्र नामोपयुज्यताम् ॥५४१॥

सद्बोधेन स्वाभिप्रायप्रकाशनम् ।

यतः-भवचक्रमिदं सर्वं, वयं ते च महाऽरयः ।
स कर्मपरिणामाख्यो, यश्च राजा महाबलः ॥५४२॥
आयत्तं सर्वमेवेदं, तस्यैकस्य महात्मनः ।
तात ! संसारिजीवस्य, यस्यायत्ता महाटवी ॥५४३॥ युग्मम् ॥
स चाद्यापि न जानीते, नामापि खलु मादृशाम् ।
महामोहादिसैन्यं तु, मन्यते गाढवल्लभम् ॥५४४॥
इतश्च-यत्र संसारिजीवस्य, पक्षपातो बलेऽधिकः ।
तस्यैव विजयो नूनं, स हि सर्वस्य नायकः ॥५४५॥
ततो यावन्न जानीते, सोऽस्माकं सैन्यमुत्तमम् ।
यावच्च पक्षपातोऽस्य, नाद्याप्यस्मासु जायते ॥५४६॥
तावन्न युक्तः संरम्भो, न यानं न च विग्रहः ।
युक्तं साम तदा स्थानमुपेक्षा गजमीलिका ॥५४७॥ युग्मम् ॥
सङ्कुचन्ति हि विद्वांसः, कार्यं सञ्चिन्त्य किञ्चन ।
केसरी गजनिर्घाते, यथोत्पातविधित्सया ॥५४८॥
न पौरुषं गलत्यत्र, नश्यतोऽपि विजानतः ।
सिंहो ह्यपसरत्येव, बृहदास्फोटदित्सया ॥५४९॥

१. तर्कशास्त्रम् । २. ब्रह्मसूत्रम्, उपनिषद्, भगवद्गीता चेति त्रयीशब्देन प्रोच्यते ।

सम्यग्दर्शनेनोक्तम्-

आर्य ! संसारिजीवोऽसौ, न जाने ज्ञास्यते न वा ।
अस्मानेतेऽरयो नित्यमधुनैवं विबाधकाः ॥५५०॥
तदद्य संयमस्तावदित्थमेभिः कदर्थितः ।
श्वः सर्वानपि हन्तारस्ततः स्थातुं न युज्यते ॥५५१॥

सद्बोधेनोक्तम्-

संसारिजीवजागृतिक्रमः ।

आर्य ! मोत्तालतां कार्षीः, कालसाध्ये प्रयोजने ।
ध्रुवं संसारिजीवोऽसौ, ज्ञास्यते नः कदाचन ॥५५२॥
यतः-स कर्मपरिणामाख्यो, नरेन्द्रोऽत्र बलद्वये ।
समानपक्षपातेन, सदा प्रायेण वर्तते ॥५५३॥
इतश्च-तस्य संसारिजीवोऽपि, निःशेषं कुरुते वचः ।
अतोऽस्मानेष तस्योच्चैः, कदाचिज्ज्ञापयिष्यति ॥५५४॥
ततश्च-ज्ञाताः संसारिजीवेन, सप्रसादेन पूजिताः ।
वयमार्य ! भविष्यामः, शत्रुनिर्दलनक्षमाः ॥५५५॥

केवलमसावपि कर्मपरिणामः क्वचिदवसरे पर्यालोच्य महत्तमभगिन्या सह लोकस्थित्या, पृष्ट्वा चावसरं निजभार्यां कालपरिणतिं, कथयित्वाऽऽत्मीयमहत्तमाय स्वभावाय, कृत्वा विदितं नियतियदृच्छादीनां, निजपरिजनानामनुकूलयित्वा संसारिजीवस्यैव महादेवीं भवितव्यतामपेक्ष्य 'सप्रसादोऽयमि'ति विज्ञप्तिकावसरं ततः संसारिजीवस्य समस्तमस्मद्वृत्तान्तं सर्वेषामभिरुचिते सति विज्ञापयिष्यति, ततः प्रतिबन्धकाभावाल्लगिष्यति सा विज्ञप्तिका, भविष्यति संसारिजीवोऽस्मासु सप्रसादः, ततश्च-

निर्मूलान्नाशयिष्यामः, शत्रूनेतान्महत्तम ! ।
तेन कालविलम्बोऽत्र, रुचितो मे प्रयोजने ॥५५६॥

सम्यग्दर्शनेनोक्तम्-यद्येवं प्रेष्यतां तावद्दूतस्तेषां दुरात्मनाम् ।
न लङ्घयन्ति मर्यादां, येन ते दूतभर्त्सिताः ॥५५७॥
सद्बोधेनोक्तम्-न कार्यं तत्र दूतेन, प्रहितेन महत्तम ! ।
तिष्ठामस्तावदत्रैव, बकवन्निभृतेन्द्रियाः ॥५५८॥

सम्यग्दर्शनेनोक्तम्-

न भाव्यमतिभीतेन, भवता पुरुषोत्तम ! ।
सुदुष्टा अपि ते पापाः, किं करिष्यन्ति मादृशाम् ॥५५९॥

अन्यच्च-यदि नो रोचते तात !, दूतस्ते दण्डपूर्वकः ।
ततः सन्धिविधानार्थं, सामपूर्वः प्रहीयताम् ॥५६०॥
सद्बोधेनोक्तम्-आर्य ! मा मैवं वोचः, यतः-
कोपाध्माते कृतं साम, कलहस्य विवर्धकम् ।
जाज्वलीति हि तोयेन, तप्तं सर्पिर्न संशयः ॥५६१॥
अथवा-फलेन दृश्यतामेतत्पूर्यतां ते कुतूहलम् ।
येन सम्पद्यते तात !, प्रत्ययो मम जल्पिते ॥५६२॥
दूतः प्रहीयतां तेषां, यदि देवाय रोचते ।
ततो विज्ञाय तद्भावमुचितं हि करिष्यते ॥५६३॥

सत्याभिधानदूतप्रेषणम् ।

अथ चारित्रधर्मेण, तद्वाक्यमनुमोदितम् ।
ततस्तैः प्रहितो दूतः, सत्याख्यः शत्रुसंहतेः ॥५६४॥
अथ दूतानुमार्गेण, साऽपि मार्गानुसारिता ।
गता तात ! मया सार्धं, महामोहबले तदा ॥५६५॥
प्रमत्ततानदीतीरे, चित्तविक्षेपमण्डपे ।
दृष्टश्च विहितास्थानो, महामोहमहानृपः ॥५६६॥
अथ दूतः स सत्याख्यस्तत्रास्थानेऽरिपूरिते ।
प्रविष्टः प्रतिपत्त्या च, निविष्टः शुभविष्टरे ॥५६७॥
ततः पृष्टतनूदन्तो, वाक्यमेवमुदारधीः ।
स प्राह साहसाढ्योऽपि, कोपाग्नेः शान्तिकाम्यया ॥५६८॥
चित्तवृत्तिमहाटव्या, यः प्रभुः परमेश्वरः ।
लोके संसारिजीवोऽसौ, तावद्धो मूलनायकः ॥५६९॥
बहिरङ्गान्तरङ्गाणां, संसारोदरचारिणाम् ।
राज्ञां ग्रामपुराणां च, स स्वामी नात्र संशयः ॥५७०॥
एवं च स्थिते-यूयं वयं च ये चान्ये, केचिदान्तरभूभुजः ।
ते कर्मपरिणामाद्याः सर्वे तस्यैव किङ्कराः ॥५७१॥
ततश्चैकमिदं राज्यं, सर्वेषामेक एव च ।
स्वामी संसारिजीवोऽतः, को विरोधः परस्परम् ? ॥५७२॥
यतः-शक्ताः स्वस्वामिनो भक्ताः, संहताश्च भवन्ति भोः ।
भृत्या बन्धूपमा नैव, स्वपक्षक्षयकारकाः ॥५७३॥

तदस्तु सत ान्दमतः प्रभृति सुन्दरम् ।
युष्माभिः सह राजेन्द्र !, प्रेम नः प्रीतिवर्धनम् ॥५७४॥

महामोहसभाक्षोभः ।

इदं सत्योदितं सत्यं, वाक्यमाकर्ण्य सा सभा ।
महामोही महाक्षोभमथ प्राप्ता मदोद्धुरा ॥५७५॥
ततश्च-दष्टोष्ठा रक्तसर्वाङ्गा, भूमिताडनतत्पराः ।
क्रोधान्धबुद्धयः सर्वे, समकालं प्रभाषिताः ॥५७६॥
अरे रे दुष्ट ! केनेदं, दुरात्मंस्ते निवेदितम् ।
यथा संसारिजीवो नः, स्वामी सम्बन्धिनो वयम् ॥५७७॥
पातालेऽपि पविष्टानां, नास्ति मोक्षः कथञ्चन ।
युष्माकमालजालेन, किमनेन ? नराधमाः ॥५७८॥
संसारिजीवो नः स्वामी, यूयं सम्बन्धिनः किल ।
अहो सम्बन्धघटना, अहो वाक्यमहो गुणाः ॥५७९॥
तत्तूर्णं गच्छ गच्छेति, देवतास्मरणोद्यताः ।
यूयं भवत शान्त्यर्थमेते वो वयमागताः ॥५८०॥
एवं च-सहस्ततालमुत्तालाः, प्रविहस्य परस्परम् ।
तथाऽन्ये निष्ठुरैर्वाक्यैः, कृत्वा दूतकदर्थनम् ॥५८१॥
चलितास्तत्क्षणादेव, क्रोधान्धास्ते महीभुजः ।
संनद्धबद्धकवचा, महामोहपुरस्सराः ॥५८२॥ युग्मम् ॥

चारित्रमोहयोर्युद्धम् ।

सत्येनापि समागत्य, सर्वं तच्चेष्टितं प्रभोः ।
चारित्रधर्मराजस्य, विस्तरेण निवेदितम् ॥५८३॥
अथाभ्यर्णगतां मत्वा, महामोहमहाचमूम् ।
चारित्रधर्मराजीयं संनद्धमखिलं बलम् ॥५८४॥
ततः परिसरे रम्ये, लग्नमायोधनं तयोः ।
चित्तवृत्तिमहाटव्यां, सैन्ययोः कृतविस्मयम् ॥५८५॥

तच्च कीदृशं-विलसितभटकोटिसङ्घातहेतिप्रभाजालविस्तारसञ्चारनिर्नाशिताशेषतामिस्रमेकत्र चारित्रधर्मानुसञ्चारिराजेन्द्रवृन्दैरतोऽन्यत्र दुष्टाभिसन्ध्याद्यनेकप्रचण्डोग्रभूपेन्द्रशृङ्गाङ्गसच्छायकायप्रभोल्लासबद्धान्धकारप्रतानप्रनष्टाखिलज्ञानसद्योतसन्तानजातम् । ततो भीषणे तादृशे कातराणां नराणां महाभीतिसम्पादके

वादितानेकविब्बोकवादित्रनिर्घातसन्त्रासिताशेषसंसारसञ्चारिजीवौघसङ्ग्रामसम्मर्दना-
लोकिसत्सिद्धविद्याधरे-भो ! रणे ते महामोहराजेन्द्रसत्का भटाः । पाटयन्तः
परानीकमुद्वेल्लिताः (इतस्ततः) ॥५८६॥ ततश्च-

बहुदारुणशस्त्रशतैः प्रहतं, दलिताखिलवारणवाजिरथम् ।
श्रुतिभीषणवैरिनिनादभयात्तदशेषमकम्पत धर्मबलम् ॥५८७॥

मोहराजविजयः ।

ततश्चारित्रधर्मोऽसौ, सबलो बलशालिना ।
महामोहनरेन्द्रेण, जितस्तात ! महाहवे ॥५८८॥
नंष्ट्वा प्रविष्टः स्वस्थाने, ततस्ते रिपवस्तकम् ।
लसत्कलकलारावा, रोधयित्वा व्यवस्थिताः ॥५८९॥
ततः परिणतं राज्यं, महामोहनराधिपे ।
चारित्रधर्मराजस्तु, निरुद्धोऽभ्यन्तरे स्थितः ॥५९०॥
मार्गानुसारिता प्राह, दृष्टं तात ! कुतूहलम् ।
सुष्ठु दृष्टं मयाप्युक्तमम्बिकायाः प्रसादतः ॥५९१॥
केवलं कलहस्यास्य, मूलमम्ब ! परिस्फुटम् ।
अहं विज्ञातुमिच्छामि, तन्निवेदय साम्प्रतम् ॥५९२॥
मार्गानुसारिता प्राह, रागकेसरिणोऽग्रतः ।
योऽयं दृष्टस्त्वया वत्स !, मन्त्री निर्व्याजनैपुणः ॥५९३॥
अनेन मन्त्रिणा पूर्वं, जगत्साधनकाम्यया ।
मानुषाणि प्रयुक्तानि, पञ्चात्मीयानि कुत्रचित् ॥५९४॥
अभिभूतानि तानीह, सन्तोषेण पुरा किल ।
चारित्रधर्मराजस्य, तन्त्रपालेन लीलया ॥५९५॥
तन्निमित्तः समस्तोऽयं, जातोऽमीषां परस्परम् ।
कलहो वत्स ! साटोपमन्तरङ्गमहीभुजाम् ॥५९६॥

मयाऽभिहितम्-अम्बिके ! किन्नामानि तानि मानुषाणि कथं वा पञ्चैतानि जगत्साधयन्ति ? मार्गानुसारितयोक्तम्-वत्स ! विचार ! स्पर्शरसनाघ्राणदृष्टिश्रोत्राणि तान्यभिधीयन्ते, तानि च-

स्पर्शे रसे च गन्धे च, रूपे शब्दे च देहिनाम् ।

आक्षेपं मनसः कृत्वा, साधयन्ति जगत्त्रयम् ॥५९७॥

किञ्च-एकैकं प्रभवत्येषां, वशीकर्तुं जगत्त्रयम् ।
यत्पुनर्वत्स ! पञ्चापि, तत्र किं चित्रमुच्यताम् ॥५९८॥
ततो मयोक्तं सम्पूर्णं, देशदर्शनकौतुकम् ।
अधुना तातपादानां, पार्श्वे यास्यामि सत्वरम् ॥५९९॥
तयोक्तं गम्यतां वत्स !, निरूप्य जनचेष्टितम् ।
अहमप्यागमिष्यामि, तत्रैव तव सन्निधौ ॥६००॥

विचारस्य प्रत्यागमनम् ।

अथाहमागतस्तूर्णं, निश्चित्येदं प्रयोजनम् ।
ततस्तात ! वयस्योऽयं, घ्राणनामा न सुन्दरः ॥६०१॥
वञ्चको मुग्धबुद्धीनां, पर्यटत्येष देहिनाम् ।
मानुषाणां तृतीयोऽयं, रागकेसरिमन्त्रिणाम् ॥६०२॥
यावन्निवेदयत्येवं, बुधाय निजदारकः ।
मार्गानुसारिता तावदायाता भो नरेश्वर ! ॥६०३॥
समर्थितं तया सर्वं, विचारकथितं वचः ।
त्यजामि घ्राणमित्येवं, बुधस्यापि हृदि स्थितम् ॥६०४॥
इतश्च-भुजङ्गतासमायुक्तो, घ्राणलालनलालसः ।
मन्दः सुगन्धिगन्धानां, सदाऽन्वेषणतत्परः ॥६०५॥
तत्रैव नगरे भूप !, लीलावत्याः कथञ्चन ।
स देवराजभार्याया, भगिन्या भवने गतः ॥६०६॥
ततश्च-सपत्नीपुत्रघातार्थं, तस्मिन्नेव क्षणे तया ।
आत्तो डोम्बीकराद्गन्धसंयोगो मारणात्मकः ॥६०७॥
ततश्च-तां गन्धपुटिकां द्वारे, मुक्त्वा लीलावती गृहे ।
प्रविष्टा स च सम्प्राप्तो, मन्दः सा तेन वीक्षिता ॥६०८॥
ततो भुजङ्गताऽऽदेशाच्छोटयित्वा निरूपिताः ।
दत्ता घ्राणाय ते गन्धास्ततस्तेन दुरात्मना ॥६०९॥
ततश्चाघूर्णिते घ्राणे, तैर्गन्धैस्तस्य मूर्च्छया ।
स्नेहमोहितचित्तत्वात्स मन्दः प्रलयं गतः ॥६१०॥
ततो विनष्टमालोक्य, घ्राणलालनलम्पटम् ।
तं मन्दं घ्राणसम्पर्काद्विरक्तो नितरां बुधः ॥६११॥

बुधसूरिवृत्तान्तोपसंहारः ।

ततश्च सा बुधेनेदं, पृष्टा मार्गानुसारिता ।
भद्रे ! कथं ममानेन, संसर्गो न भविष्यति ? ॥६१२॥
मार्गानुसारिता प्राह, देव ! हित्वा भुजङ्गताम् ।
तिष्ठ त्वं साधुमध्यस्थः, सदाचारपरायणः ॥६१३॥
ततोऽयं विद्यमानोऽपि, दोषसंश्लेषकारणम् ।
न ते सम्पत्स्यते देव !,ततस्त्यक्तो भविष्यति ॥६१४॥
बुधेनापि कृतं सर्वं, विज्ञाय हितमात्मने ।
मार्गानुसारितावाक्यं, तत्तदा प्राप्य सद्गुरुम् ॥६१५॥
ततो गृहीतदीक्षोऽसौ, साध्वाचारपरायणः ।
विज्ञातागमसद्भावो, गुरूपासनतत्परः ॥६१६॥
आचार्यैः पात्रतां मत्वा, गच्छनिक्षेपकाम्यया ।
उत्पन्नलब्धिमाहात्म्यः, सूरिस्थाने निवेशितः ॥६१७॥
स एष भवतां भूप !, सत्प्रबोधविधित्सया ।
विहाय गच्छमेकाकी, बुधसूरिः समागतः ॥६१८॥
योऽयं निवेदयत्येवं, शृण्वन्ति च भवादृशाः ।
सोऽहमेव धरानाथ !, बुधनामेति गृह्यताम् ॥६१९॥
प्रबोधकारणं भूप !, तदिदं संविधानकम् ।
मम सम्पन्नमेतद्धि, तुल्यं युष्मादृशामपि ॥६२०॥
यतः-विचरन्ति सदा तानि, मानुषाणि जगत्त्रये ।
तत्पृष्ठतोऽनुधावन्ति, महामोहादिशत्रवः ॥६२१॥
ततश्च-यो यस्तैः प्राप्यते प्राणी, स सर्वो गाढदारुणैः ।
निर्भिद्य खण्डशः कृत्वा, क्षणेनैव विलुप्यते ॥६२२॥
इदमेव परं भूप !, निर्भयस्थानमुत्तमम् ।
अमीभिर्लुप्यमानस्य, जैनेन्द्रं वरशासनम् ॥६२३॥
एवं च ज्ञाततत्त्वानां, प्रवेष्टुमिह युज्यते ।
न युक्तं क्षणमप्येकं, धरानाथ ! विलम्बितुम् ॥६२४॥
त्यज्यन्तां विषया भूप !, कालकूटविषोपमाः ।

आस्वाद्यतामिदं दिव्यं, प्रशमामृतमुत्तमम् ॥६२५॥

ततो धवलराजेन, विहस्य विमलः क्षणम् ।
तथा सर्वेऽपि ते लोकाः, साकूतं प्रविलोकिताः ॥६२६॥
उक्तं च–भो भो लोका ! यदादिष्टं, भदन्तेन महात्मना ।
इदमाकर्णितं चित्ते, लग्नं च भवतां वचः ? ॥६२७॥
ततस्ते बुधसद्भानोः, प्रतापेन प्रबोधिताः ।
कमलाकरसङ्काशाः, प्रोत्फुल्लमुखपङ्कजाः ॥६२८॥
भक्त्या ललाटपट्टेषु, विन्यस्तकरकुड्मलाः ।
सर्वेऽपि लोकास्तत्रेदं, समकालं प्रभाषिताः ॥६२९॥
बाढमाकर्णितं देव !, वचोऽस्माभिर्महात्मनः ।
विज्ञातस्तस्य सद्भावो, महाभागप्रसादतः ॥६३०॥
विधूयाज्ञानतामिस्रं, मनोऽनेन प्रकाशितम् ।
जीविताश्चामृतेनेव, मिथ्यात्वविषघूर्णिताः ॥६३१॥
तल्लग्नमिदमस्माकं, चित्ते गाढं मुनेर्वचः ।
सम्पाद्यतां तदादिष्टं, मा विलम्बो विधीयताम् ॥६३२॥

धवलराजादिप्रतिबोधो दीक्षाग्रहणं च ।

एतच्चाकर्ण्य राजेन्द्रः, परं हर्षमुपागतः ।
ततो राज्याभिषेकार्थं, विमलं प्रत्यवोचत ॥६३३॥
गृह्णामि पुत्र ! प्रव्रज्यां, राज्यं त्वमनुशीलय ।
पुण्यैर्मे भगवानेष, सम्पन्नो गुरुरुत्तमः ॥६३४॥
विमलः प्राह किं तात !, नाहं ते चित्तवल्लभः ।
येन दुःखाकरे राज्ये, मां स्थापयितुमिच्छसि ? ॥६३५॥
इत्थं क्षिपसि मां तात !, संसारे दुःखपूरिते ।
स्वयं गच्छसि निर्वाणमहो ते तात ! चारुता ॥६३६॥
ततो गाढतरं तुष्टस्तच्छ्रुत्वा वैमलं वचः ।
साधु साधूदितं वत्स !, न मुञ्चामीत्यभाषत ॥६३७॥
ततः कमलनामानं, राज्ये संस्थाप्य पुत्रकम् ।
विधाय जिनपूजां च, दिनान्यष्ट मनोहराम् ॥६३८॥
तथा दत्त्वा महादानं, विधाय च महोत्सवम् ।
विहिताशेषकर्तव्यः, शुभकाले समाहितः ॥६३९॥

विमलेन समं राजा, सपत्नीकः सबान्धवः ।
सपौरलोकः सहसा, निष्क्रान्तो विधिपूर्वकम् ॥६४०॥ किं बहुना ?-
यैः समाकर्णितं सूरेस्तद्वाक्यममृतोपमम् ।
तेषां मध्ये जनाः स्तोका, ये गृहेषु व्यवस्थिताः ॥६४१॥
तेऽपि चावाप्तसम्यक्त्वा, व्रतरत्नविभूषिताः ।
जाता रत्नाकरे प्राप्ते, कः स्याद्दारिद्र्यभाजनम् ? ॥६४२॥

वामदेवाऽप्रतिबोधकारणम् ।

अहं तु भद्रे ! तत्रापि, वामदेवतया स्थितः ।
दृष्ट्वा तत्तादृशं सूरेः, रूपनिर्माणकौशलम् ॥६४३॥
श्रुत्वा तत्तादृशं वाक्यं, महामोहतमोऽपहम् ।
तथापि च न बुद्धोऽस्मि, तत्राकर्णय कारणम् ॥६४४॥
याऽसौ बहुलिका पूर्वं, योगिनी भगिनी मम ।
शरीरेऽनुप्रविष्टाऽऽसीत्सा मे तत्र विजृम्भिता ॥६४५॥
ततोऽगृहीतसङ्केते !, तद्वशेन दुरात्मना ।
स तादृशो महाभागो, वञ्चकः परिकल्पितः ॥६४६॥
चिन्तितं च मया हन्त, मुनिवेषविडम्बकः ।
सिद्धेन्द्रजालचातुर्यः, कश्चिदेष समागतः ॥६४७॥
अहो शाठ्यमहो जालमहो वाचालताऽतुला ।
अहो मूढा नरेन्द्राद्या, येऽमुनाऽपि प्रतारिताः ॥६४८॥
तथाहि-**अङ्गे बहुलिका येषां, प्रवर्तेत दुरात्मनाम् ।**
ते हि सर्वं शठप्रायं, मन्यन्ते भुवनत्रयम् ॥६४९॥
तदेवं तं बुधाचार्यं, तदाऽलीकविकल्पनैः ।
विकल्पयन्नहं भद्रे !, न प्रबुद्धो दुरात्मकः ॥६५०॥
प्रव्रज्यावसरे तेषां, राजादीनां मया पुनः ।
इदं विचिन्तितं भद्रे !, स्वचित्ते पापकर्मणा ॥६५१॥
अये !-प्रव्रज्यां ग्राहयेदेष, विमलो मां बलादपि ।
आदितो वञ्चयित्वेमं, ततो नश्यामि सत्वरम् ॥६५२॥
बद्ध्वा मुष्टिद्वयं गाढं, ततोऽहं तारलोचने ! ।
तथा नष्टो यथा नैव, गन्धमप्येष बुध्यते ॥६५३॥

अथ दीक्षादिने प्राप्ते, विमलेन महात्मना ।
क्व वामदेव ! इत्येवं, सर्वत्राहं निरूपितः ॥६५४॥
अदृष्ट्वा मां पुनः पृष्टो, बुधसूरिर्महात्मना ।
क्व गतो वामदेवोऽसौ ?, किं वा सञ्चिन्त्य कारणम् ? ॥६५५॥
ज्ञानालोकेन विज्ञाय, विमलाय निवेदितम् ।
ततो मदीयचरितं, निःशेषं बुधसूरिणा ॥६५६॥
विमलेनोदितं नाथ !, किं न भव्यः स मे सुहृत् ।
श्रुतेऽपि तावके वाक्ये, येनैवं बत चेष्टते ? ॥६५७॥
सूरिणाऽभिहितं भद्र !, नाभव्यः किं तु कारणम् ।
यत्तस्य तादृशे शीले, तत्ते सर्वं निवेदये ॥६५८॥
एका बहुलिका नाम, भगिनी तस्य वल्लभा ।
अस्त्यन्तरङ्गा भ्राता च, द्वितीयः स्तेयनामकः ॥६५९॥
ताभ्यामधिष्ठितेनेदं, वामदेवेन चेष्टितम् ।
पुरा च विहितं तात !, रत्नस्य हरणादिकम् ॥६६०॥
तस्मात्तस्य न दोषोऽयं, प्रकृत्या सुन्दरो हि सः ।
स्तेयो बहुलिका चास्य, दोषसंश्लेषकारणम् ॥६६१॥
विमलेनोदितं नाथ !, किं ताभ्यां स वराककः ।
क्वचिन्मुच्येत पापाभ्याम् ?, किं वा नेति निवेद्यताम् ॥६६२॥

स्तेयबहुलिकामोचनोपायः ।

सूरिराह महाभाग !, भूरिकालेऽतिलङ्घिते ।
स ताभ्यां मोक्ष्यते तत्र, कारणं ते निवेद्यताम् ॥६६३॥
शुभाभिसन्धिनृपतेः, पुरे विशदमानसे ।
भार्ये स्तो निर्मलाचारे, शुद्धतापापभीरुते ॥६६४॥
तयोश्च गुणसम्पूर्णे, जनताऽऽनन्ददायिके ।
ऋजुताऽचौरते नाम, विद्येते कन्यके शुभे ॥६६५॥
अत्यन्तसरला साध्वी, सर्वलोकसुखावहा ।
ऋजुता सा महाभाग !, प्रतीतैव भवादृशाम् ॥६६६॥
अचौरतापि लोकेऽत्र, निःस्पृहा शिष्टवल्लभा ।
सर्वाङ्गसुन्दरी नूनं, विदितैव भवादृशाम् ॥६६७॥

ते च कन्ये क्वचिद्धन्ये, सुहृत्ते परिणेष्यति ।
स्तेयोऽयं बहुला चास्य, ततो भो ! न भविष्यतः ॥६६८॥
तयोराभ्यां सहावस्था, प्रकृत्यैव न विद्यते ।
ततस्तात ! तयोर्लाभे, द्वाभ्यामप्येष मोक्ष्यते ॥६६९॥
ततो न योग्यताऽद्यापि, वामदेवस्य विद्यते ।
धर्मं प्रतीति निश्चित्य, कुरु तस्यावधीरणम् ॥६७०॥
ततश्चेदं मुनेर्वाक्यं, विमलेन महात्मना ।
श्रुत्वा तथेति वदता, विहिता मेऽवधीरणा ॥६७१॥

वामदेवकृतः सरलगृहे धनापहारः ।

अहं तु प्राप्तः काञ्चनपुरे, प्रविष्टो हट्टमार्गे, दृष्टः सरलो नाम वाणिजः, गतस्तस्यापणे, विजृम्भिता बहुलिका, कृतमस्य पादपतनं नटेनेव, भृतमानन्दोदकस्य नयनयुगलम् । तदवलोक्यार्द्रीभूतः सरलः, ततोऽभिहितमनेन–भद्र ! किमेतत् ? मयोक्तं–तात ! युष्मानवलोक्य मयाऽऽत्मजनकस्य स्मृतम् । सरलेनोक्तम्–यद्येवं ततो वत्स ! पुत्र एवासि त्वं, ततो नीतोऽहमनेन स्वभवने, समर्पितो बन्धुमत्याः स्वभार्यायाः, कारितः स्नानभोजनादिकं, पृष्टो नामकुलादिकं, निवेदितं मया 'सजातीयोऽयमि'ति तुष्टः सरलः, अभिहितमनेन–

अपुत्रयोः प्रिये ! पुत्रो, वृद्धयोः परिपालकः ।
दत्तः सञ्चिन्त्य दैवेन, वामदेवोऽयमावयोः ॥६७२॥

तदाकर्ण्य हृष्टा बन्धुमती, निक्षिप्तं सरलेन मय्येव गृहं, दर्शितमापणनिहितं रत्नादिकमन्तर्धनं, स च तस्यैव मूर्च्छया मया सहितस्तत्रैवापणे स्वपिति स्म । अन्यदा सन्ध्यायामावयोर्गृहे तिष्ठतोः समागतः सरलस्य बन्धुलनाम्नः प्रियमित्रस्य गृहादाह्वायकः, यथा मम पुत्रस्य षष्ठीजागरे भवताऽऽगत्येह वस्तव्यमिति । ततोऽभिहितोऽहं सरलेन–पुत्र ! वामदेव ! गन्तव्यं मया बन्धुलगृहे त्वं पुनरापणे गत्वा वसेति । मयोक्तम्–अलं मे तातरहितस्यापणे गमनेनाद्य तावदम्बाया एव पादमूले वत्स्यामि । ततोऽहो स्नेहसारोऽयमिति चिन्तयन्नेवं भवत्विति वदन् गतः सरलः । स्थितोऽहं गृहे रात्रौ, विजृम्भितः स्तेयः, चिन्तितं मया हरामि तदन्तर्धनं, ततोऽर्धरात्रे गतस्तमापणं, उद्घाटयतश्च समागता दण्डपाशिकाः, दृष्टोऽहमेतैः प्रत्यभिज्ञातश्च ततः पश्यामस्तावत्किमेषोऽर्धरात्रे करोत्यापणमुद्घाट्येति सञ्चिन्त्य स्थितास्तूष्णींभावेन प्रच्छन्नाः । तत्खातं मया तदन्तर्धनं निखातं तस्यैवापणस्य पश्चाद्भागे, विभातप्रायायां च रजन्यां कृतो हाहारवः, मीलितो नगरलोकः, सम्प्राप्तः सरलः, प्रकटीभूता दण्डपाशिकाः, प्रवृत्तः कलकलः ।

दण्डपाशिकैः राजसमीपे नयनम् ।

सरलेनोक्तम्-वत्स ! वामदेव ! किमेतत् ? मयोक्तम् हा तात ! मुषिता मुषिताः स्म इति, दर्शितश्चोद्घाटित आपणो निधानस्थानं च, सरलेनोक्तम्-पुत्र ! त्वया कथमिदं ज्ञातम् ? मयोक्तम्-अस्ति तावन्निर्गतस्तातस्ततो मे तातविरहवेदनया नागता निद्रा, स्थितः शय्यायां विपरिवर्तमानो रात्रिशेषे च चिन्तितं मया-अयि ! यदि परमेतस्यां तातस्पर्शपूतायां आपणशय्यायां निद्रासुखं सम्पद्यते नान्यत्रेति सञ्चिन्त्य समागतोऽहमापणे दृष्टमिदमीदृशं चौरविलसितं ततः कृतो हाहारव इति । दण्डपाशिकैश्चिन्तितं-निश्चितमेतत्तस्करोऽयं दुरात्मा वामदेवः, अहो अस्यालजाल-चातुर्यं, अहो वाचालता, अहो वञ्चकत्वम्, अहो कृतघ्नता, अहो विश्रम्भघातित्वमहो पापिष्ठतेति । ततस्तैरुक्तम्-श्रेष्ठिन्निराकुलो भव, लब्ध एवास्तेऽस्माभिश्चौरः, ततः साकूतमवलोकितं सर्वैर्मदभिमुखं, ज्ञातोऽहमेतैरिति सञ्जातं मे भयं, ततः पुनः सलोप्त्रं ग्रहीष्याम इत्यालोच्य गतास्तावद्दण्डपाशिकाः, दत्तो ममावरक्षकः, अनेककुविकल्पाकुलस्य मे लङ्घितं तद्दिनं, सन्ध्यायां गृहीत्वा तदन्तर्धनं पलाय-मानोऽहं गृहीतो दण्डपाशिकैः, जातः कोलाहलः, मिलितं पुनर्नगरं, कथितो दण्डपाशिकैः समस्तोऽपि लोकाय मदीयव्यतिकरः, सञ्जातो मच्चरितेन विस्मयः, नीतोऽहं रिपुसूदनराजसमीपे, आज्ञापितस्तेन वध्यतया, समागतः सरलः, पतितो नृपचरणयोः, अभिहितमनेन-

ममायं पुत्रको देव !, वामदेवोऽतिवल्लभः ।
अतो मेऽनुग्रहं कृत्वा, मुच्यतामेष बालकः ॥६७३॥
गृह्यतां मम सर्वस्वं, मैष देव ! निपात्यताम् ।
अन्यथा जायते देव !, मरणं मे न संशयः ॥६७४॥
ततोऽतिसरलं मत्वा, सरलं तं नराधिपः ।
अमुञ्चन्मां प्रसादेन, तस्यायच्छच्च तद्धनम् ॥६७५॥
केवलं सरलस्तेन, तदा प्रोक्तो महीभुजा ।
श्रेष्ठिन्नेष सुपुत्रस्ते, समीपे मम तिष्ठतु ॥६७६॥
यतः-अयं विषाङ्कुराकारस्तस्करो जनतापकः ।
तदेष मद्गृहाद्बाह्यो, वामदेवो न सुन्दरः ॥६७७॥

वामदेवस्य दयनीयदशायां मरणम् ।

इतश्च-पुरापि दुर्बलीभूतः, साम्प्रतं नष्ट एव सः ।
पुण्योदयो वयस्यो मे, दृष्ट्वा तद्दुष्टचेष्टितम् ॥६७८॥

ततश्च–श्रेष्ठिना प्रतिपन्नं तन्नरेन्द्रवचनं तदा ।
धिक्कारविहतो दीनः, स्थितोऽहं राजमन्दिरे ॥६७९॥
राजदण्डभयादुग्राद्द्वयेन प्रशमं गते ।
भद्रे ! निवसतस्तत्र, ते मे स्तेयबहूलिके ॥६८०॥
तथापि लोको मां भद्रे !, सर्वकार्येषु शङ्कते ।
अन्येनापि कृतं चौर्यं, ममोपरि निपात्यते ॥६८१॥
ब्रुवाणस्यापि सद्भूतं, न प्रत्येति च मे जनः ।
धिक्कारैर्हन्ति मामेवं, दृष्टा ते सत्यवादिता ॥६८२॥
सर्वस्योद्वेगजनकः, कृष्णाहेस्तुल्यतां गतः ।
तत्रागृहीतसङ्केते !, बहुकालं विडम्बितः ॥६८३॥
अन्यदा श्रीगृहं राज्ञो, विद्यासिद्धेन केनचित् ।
निःशेषं मुषितं भद्रे !, स च चौरो न लक्षितः ॥६८४॥
ततोऽहं दृष्टदोषत्वादस्यैवंविधसाहसम् ।
सम्भाव्यं नापरस्येति, ग्राहितस्तेन भूभुजा ॥६८५॥
अनेकयातनाभिश्च, नानारूपैर्विडम्बनैः ।
ततोऽहं गाढरुष्टेन, तेन भद्रे ! कदर्थितः ॥६८६॥
न स्थितः सरलस्यापि, वचनेन नराधिपः ।
उल्लम्बितो विशालाक्षि !, ततोऽहं विरटन्नलम् ॥६८७॥
अत्रान्तरे च सा जीर्णा, गुटिका मम पूर्विका ।
भवितव्यतया दत्ता, ततोऽन्या गुटिका मम ॥६८८॥
तस्याः प्रभावतो भद्रे !, तीव्रदुःखौघसम्पदि ।
गतः पापिष्टवासायां, नगर्यामन्त्यपाटके ॥६८९॥
तत्रानुभूय दुःखानि, तीव्रानन्तानि विह्वलः ।
असङ्ख्यकालं भूयोऽपि, गुटिकादानयोगतः ॥६९०॥
पञ्चाक्षपशुसंस्थाने, समागत्य पुरे ततः ।
भ्रान्तोऽहं बहुशोऽन्येषु, नगरेषु पुनः पुनः ॥६९१॥
तन्नास्ति नगरं भद्रे !, ग्रामो वा वरलोचने ! ।
मुक्त्वाऽसंव्यवहाराख्यं, बहुशो यन्न वीक्षितम् ॥६९२॥
तथापि पशुसंस्थाने, योषिदाकारधारकः ।

बहुशो बहुलिकादोषाद्विशेषेण विडम्बितः ॥६९३॥

सोढानि नानादुःखानि, स्थाने स्थाने मया तदा ।
ताभ्यां पापवयस्याभ्यां, प्रेरितेन वरानने ! ॥६९४॥

प्रज्ञाविशालासंवेगभावना ।

एवं वदति संसारिजीवे प्रज्ञाविशालया ।
इदं विचिन्तितं गाढं, संवेगापन्नचित्तया ॥६९५॥
अहो दुरन्तः स्तेयोऽसौ, माया चात्यन्तदारुणा ।
ययोरासक्तचित्तोऽयं, वराको भूरि नाटितः ॥६९६॥
तथाहि-वञ्चितस्तादृशोऽनेन, महात्मा विमलः पुरा ।
तन्माहात्म्येन लोके च, गतोऽयं तृणतुल्यताम् ॥६९७॥
सरलो वत्सलः स्निग्धो, मुषित्वा च प्रतारितः ।
प्राप्तोऽयं तत्प्रसादेन, तत्र घोरविडम्बनम् ॥६९८॥
तथा-यदयं तादृशेनापि, महाभागेन सूरिणा ।
बुधेन बोधितो नासीत्, सा माया तत्र कारणम् ॥६९९॥
ब्रुवाणस्यापि सद्भूतं, न प्रत्येति स्म यज्जनः ।
धिक्करोति च तत्रापि, सैव मायाऽपराध्यति ॥७००॥
यदन्यजनितेनापि, दोषेणायं विबाधितः ।
संसारिजीवस्तत्रापि, स्तेयो माया च कारणम् ॥७०१॥
एवं चानन्तदोषाणामाकरस्ते दुरात्मिके ।
तथापि लोकः पापिष्ठः, स्तेयमाये न मुञ्चति ॥७०२॥
अन्यच्च-तथा संसारिजीवे भोः, कथयत्यात्मचेष्टितम् ।
स भव्यपुरुषस्तत्र, चिन्तयामास विस्मितः ॥७०३॥

भव्यपुरुषसविस्मयविमर्शः ।

अपूर्वमिदमस्याहो, तस्करस्यातिजल्पितम् ।
अतिचित्रमसम्भाव्यं, लोकमार्गातिदूरगम् ॥७०४॥
अप्रसिद्धं ममात्यन्तं, हृदयाक्षेपकारि च ।
तदस्य परमार्थो यः, स मया नावधारितः ॥७०५॥
तथाहि-पूर्वं तावदनेनोक्तं, यथाऽऽसीत्किल सर्वदा ।
पुरेऽसंव्यवहाराख्ये, वास्तव्योऽहं कुटुम्बिकः ॥७०६॥
कालं तत्र स्थितोऽनन्तं, भवितव्यतया सह ।
स्वकर्मपरिणामाख्यराजादेशेन निर्गतः ॥७०७॥

एकाक्षपशुसंस्थाने, तथाऽन्येषु च भूरिषु ।
तथाविधेषु स्थानेषु, भ्रान्तो दुःखैः प्रपूरितः ॥७०८॥
अन्यच्चेदमनेनोक्तमनन्तं कालमेकशः ।
सर्वेषु तेषु स्थानेषु, नाटितः किल भार्यया ॥७०९॥
तथाहि-नन्दिवर्धनरूपेण, रिपुदारणलीलया ।
वामदेवविधानेन, किलाहं भ्रमितस्तया ॥७१०॥
अतीतोऽनन्तकालश्च, सर्वेषामन्तराऽन्तरा ।
कृतान्यनन्तरूपाणि, तथाऽन्यानि स्वभार्यया ॥७११॥
गुटिकादानयोगेन, किलेदं विहितं तया ।
तदस्य चरितं सर्वं, विरुद्धमिव भासते ॥७१२॥
तथाहि-पुरुषश्चेत्कथं तस्य, स्थितिः कालमनन्तकम् ।
किं वाऽजरामरो हन्त, भविष्यत्येष तस्करः ॥७१३॥
तावत्कालस्थितिर्हन्त, का चेयं भवितव्यता ? ।
कथं वा निजभार्याऽपि, प्रतिकूलत्वमागता ! ॥७१४॥
का चेयं गुटिका नाम, महावीर्या यया कृतः ।
एकोऽप्यनन्तरूपोऽयं, भवितव्यतया तया ? ॥७१५॥
अन्यच्च-नगराण्यन्तरङ्गाणि, मित्राणि स्वजनास्तथा ।
येऽमुना गदितास्तेऽपि, न मया परिनिश्चिताः ॥७१६॥
तदिदं स्वप्नसङ्काशमिन्द्रजालाधिकं गुणैः ।
अस्य संसारिजीवस्य, चरितं प्रतिभाति मे ॥७१७॥
इयं च मुखरागेण, बुध्यमानेव लक्ष्यते ।
साध्वी प्रज्ञाविशालेदं, निःशेषं चरितं हृदि ॥७१८॥
अन्यच्च-इदं मे लेशतः सर्वं, निर्दिष्टमनया पुरा ।
अस्य संसारिजीवस्य, वृत्तं प्रज्ञाविशालया ॥७१९॥
केवलं विस्मृतप्रायं, मम तद्वर्ततेऽधुना ।
अकाण्डे पृच्छतश्चेत्थं, सञ्जायेत ममाज्ञता ॥७२०॥
तत्तावत्कथयत्वेष, तस्करो यद्विवक्षितम् ।
अहं तु प्रश्नयिष्यामि, पश्चादेनां रहःस्थिताम् ॥७२१॥
इदं निश्चित्य हृदये, स भव्यपुरुषस्तदा ।

वचः संसारिजीवस्य, तूष्णीमाकर्णयन् स्थितः ॥७२२॥

मुखं संसारिजीवस्य, पश्यन्ती विस्मितेक्षणा ।
स्थिताऽगृहीतसङ्केता, सम्यगज्ञातभावना ॥७२३॥
सदागमस्तु भगवान्निःशेषं तस्य चेष्टितम् ।
वेत्ति संसारिजीवस्य, ततो मौनेन संस्थितः ॥७२४॥

संसारिजीवस्य आनन्दनगरे प्रयाणम् ।

संसारिजीवेनोक्तम्–
अथाहमन्यदा भद्रे !, तुष्टया निजभार्यया ।
सञ्जातकृपया प्रोक्तः, केनचिच्छुभकर्मणा ॥७२५॥
त्वयाऽऽर्यपुत्र ! गन्तव्यमधुना लोकविश्रुते ।
आनन्दनगरे तत्र, वस्तव्यं चारुलीलया ॥७२६॥
मयोक्तं–यद्देवि ! रोचते तुभ्यं, कर्तव्यं तन्मया ध्रुवम् ।
ततः पुण्योदयो भूयः, स तया मे निदर्शितः ॥७२७॥
तथाऽन्यः सागरो नाम, सहायो मे निरूपितः ।
प्रस्तावोऽस्येति विज्ञाय, भवितव्यतया तया ॥७२८॥
उक्तं च–मूढतानन्दनो नाम, रागकेसरिणोऽङ्गजः ।
मयाऽयं विहितोऽद्यैव, सहायस्ते मनोहरः ॥७२९॥
ततोऽहं सहितस्ताभ्यां, सहायाभ्यां प्रवर्तितः ।
आनन्दनगरे गन्तुं, गुटिकादानयोगतः ॥७३०॥ इति ॥
ये घ्राणमायानृतचौर्यरक्ता, भवन्ति पापिष्ठतया मनुष्याः ।
इहैव जन्मन्यतुलानि तेषां, भवन्ति दुःखानि विडम्बनाश्च ॥७३१॥
तथा परत्रापि च तेषु रक्ताः, पतन्ति संसारमहासमुद्रे ।
अनन्तदुःखौघचितेऽतिरौद्रे, तेषां ततश्चोत्तरणं कुतस्त्यम् ? ॥७३२॥
जैनेन्द्रादेशतो वः कथितमिदमहो लेशतः किञ्चिदत्र,
प्रस्तावे भावसारं कृतविमलधियो गाढमध्यस्थचित्ताः ।
एतद्विज्ञाय भो भो मनुजगतिगता ज्ञाततत्त्वा मनुष्याः !
स्तेयं मायां च हित्वा विरहयत ततो घ्राणलाम्पट्यमुच्चैः ॥७३३॥

॥ इति श्रीसिद्धर्षिमुनिविहितायामुपमितिभवप्रपञ्चकथायां मायास्तेयघ्राणेन्द्रियविपाकवर्णनः पञ्चमः प्रस्तावः ॥